CC0. In Public Domain, Digitizagtion by eGangotri

नारीं पृच्छामि नेन्दुं, कथयतु विजया न प्रमाणं यदीन्दु-
र्देव्या निह्नोतुमिच्छोरिति सुरसरितं शाठ्यमव्याद्विभोर्वः ॥१॥

पुनर्जिज्ञासा—नारीमिति । पृच्छेर्द्विकर्मकत्वादहं त्वामिन्दुं चन्द्रं न पृच्छामि ज्ञातुमिच्छामि किन्तु नारीं भवन्मस्तकभूषणरूपां स्त्रियं, नेन्दुविषयको मदीयः प्रश्नोऽपितु नारीविषयक इति तात्पर्यम् । परमचतुरो हरः पुनरुत्तरयति—कथयत्विति । इन्दुशब्दस्येन्दुवाक्यपरत्वेन यदि नेन्दुवाक्यं मदुक्तं तव प्रमाणत्वेनाऽभिमतं, यद्वा नेन्दुविषयणी त्वदीया जिज्ञासा तर्हि त्वत्सहचरी निकटवर्त्तिनी विजयैव कथयतु वदत्विति यावत् । नाऽस्मदुत्तरं विश्वासजनकञ्चेद्विजयैवाऽभिदधातु तदिति तात्पर्यम् । इत्येवं पादत्रयोक्तरीत्या देव्याः पार्वत्याः सकाशात् सुरसरितं गङ्गां निह्नोतुं गोप्तुमिच्छोरभिलषतः, विभोः व्यापकस्य शिवस्य शाठ्यं चातुर्यं व्याजोक्तिरिति यावत्, वो युष्मानव्यात्पायादित्यर्थः । देव्या इत्यत्राऽपादानत्वविवक्षणात्पञ्चमी, वस्तुतस्तु तत्र चतुर्थ्येव युक्तेति बोध्यम् । शशिकलोक्तिव्याजेन शिरःस्थितसुरसरिद्रूपवस्तुगोपनात्पद्येऽस्मिन् व्याजोक्तिनामालङ्कारः । उक्तञ्च तल्लक्षणं काव्यप्रकाश–साहित्यदर्पण–कुवलयानन्देषु ।

व्याजोक्तिश्छद्मनोद्भिन्नवस्तुरूपनिगूहनम् ।
व्याजोक्तिर्गोपनं व्याजादुद्भिन्नस्याऽपि वस्तुनः ॥
व्याजोक्तिरन्यहेतूक्त्या यदाकारस्य गोपनमिति ।

कपटेन स्फुटवस्तुस्वरूपगोपनं व्याजोक्तिरिति तदर्थः ।

माधुर्यव्यञ्जकैर्वर्णैं रचना ललितात्मिका । अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरीष्यते ॥

इति दर्पणोक्तलक्षणादत्र वैदर्भी रीतिः ।

"चित्तं व्याप्नोति यः क्षिप्रं शुष्केन्धनमिवानलः । सप्रसादः समस्तेषु रसेषु रचनासु च" इति लक्षणात्प्रसादोऽत्र गुणः ।

मस्तक पर जो स्त्री बैठी हुई है उस के विषय में पूछती हूं, चन्द्रमाके विषय में नहीं । उ०—मेरा वचन तुम्हारे लिये यदि विश्वास जनक न हो तो विजया ही इसका यथार्थ उत्तर देवे । इस प्रकार जगन्माता पार्वती जी से जगत्पावनी श्रीगङ्गाजी को छिपाने की इच्छा करनेवाले शिवजी की चतुरता सबों को रक्षा करे ॥१॥

वाक्यं सत्यमसत्यं वेति विचारयतु (त्वां बोधयतु) इत्युत्तरम् । इत्येवं प्रकारेण सुरसरितम् [illegible] हूं । देव्या गौर्याः सकाशात् निह्नोतुं गोप्तुम् इच्छोरभिलष्यतो विभोः शिवस्य शा[illegible]आप आज्ञा व्यम् अव्यात् पायात् ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अपि च—

(१) पादस्याविर्भवन्तीमवनतिमवने रक्षतः स्वैरपातैः
सङ्कोचेनैव दोष्णां मुहुरभिनयतः सर्वलोकातिगानाम् ।
दृष्टिं लक्ष्येषु नोग्रां ज्वलनकणमुचं बध्नतो दाहभीते-

म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् ।

इति लक्षणात् स्रग्धरावृत्तम् । मङ्गलं कामयमानेन कविनैतत्पद्यस्य नान्दीत्वेन प्राग् मगणः सन्निवेशितः । धन्येतिधकारनकारेति वर्णद्वयेनारम्भः शुभसूचक इति ॥१॥

ननु चिकीर्षितनान्द्या असमाप्तिम्मन्यमानो 'महाकविर्द्वितीयपद्यमवतारयति— अपि चेति । पादस्येति । जात्या निर्देशेन पादस्येत्येकवचनं पादयोरिति तदर्थः । तथा च पादयोश्चरणयोः स्वैरपातैः स्वेच्छया विक्षेपैः सञ्चालनैरिति यावत् आविर्भवन्तीं प्रादुर्भविष्यन्तीं (वर्तमानसामीप्ये वर्त्तमानवद्वे, त्यनुशासनादप्रथमासामानाऽधिकरण्याच्च भविष्यत्सामीप्ये वर्तमानप्रयोगस्य शतृप्रत्ययस्य चोपपत्तिः) अवनेर्भूमेः अवनतिं रसातलनिवेशं रक्षतो निवारयतः, भूमे रसातलप्रवेशभीत्याऽनौद्धत्यपूर्वकं चरणद्वयस्फालनं कुर्वत इति तात्पर्यार्थः । सर्वलोकातिगानां सर्वान् लोकानतिक्रम्य गच्छन्ति ये ते तथोक्तास्तेषां तथोक्तानां (गमेर्डप्रत्यये रूपम्) अतिविस्तृतानामित्यर्थः । दोष्णां बाहूनां । (भुजबाहुप्रवेष्टो दोरित्यमरः) । सङ्कोचेन दोर्घातजन्यलोकसंहरणभीत्या स्वच्छन्दाप्रसारणात्कुण्ठनेनैव मुहुरसकृत् अभिनयतः रसादिबोधनाय अङ्गविक्षेपं विदधतः ।

अङ्गहारोऽङ्गविक्षेपव्यञ्जकाऽभिनयौ समावित्यमरः ।

दाहभीतेः लक्ष्यदहनशङ्कनात् लक्ष्येषु दृष्टिविषयीभूतवस्तुषु ज्वलनकणमुचं ज्वलनस्याग्नेः कणान् स्फुलिङ्गान् मुञ्चतीति विग्रहे क्विपि रूपम् अग्निस्फुलिङ्गवर्षणशीलामित्यर्थः । अत एव उग्रां तीव्रां दृष्टिं भालतलस्थिततृतीयलोचनं न बध्नतो न

दोनों पैरों के इच्छानुकूल चलाने से हो जानेवाली पृथिवी की अधोगति को बचाते हुए, त्रैलोक्यव्यापी अपनी दोनों भुजाओं को बहुत ही थोड़ा फैलाकर नाचते हुए, जलने के भयसे देखेजाने वाले वस्तुओं में अग्निकण उत्पन्न करनेवाली तीव्र

(१) नान्द्या एकेन पद्येन न पूर्त्तिरिति कारणात् । पद्यं द्वितीयमेतत्तु कविना परिकीर्त्तितम् ॥ पादस्य पादयोः स्वैरपातैः स्वच्छन्दसंचालनैः आविर्भवन्तीम् उत्पत्स्यमानाम् अवनेः अवनतिम् अधोगमनं रक्षतो निवारयतः सर्वलोकातिगानाम् त्रैलोक्यव्यापिनां दोष्णां सङ्कोचेनैव अल्पप्रसारणेनैव मुहुः असकृत् अभिनयतो नृत्यतः । दाहभीतेः दहनशङ्कया

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रित्याधाराऽनुरोधात्त्रिपुरविजयिनः पातु वो दुःखनृत्तम् ॥२॥

नाद्यन्ते—

सूत्रधारः—अलमतिप्रसङ्गेन । आज्ञापितोऽस्मि परिषदा, यथा-

निक्षपतः उक्तहेतोर्लक्ष्याण्यपश्यत इत्यर्थः । त्रिपुरविजयिनः शिवस्य इत्याधारानुरोधात् अङ्गविक्षेपणाद्याश्रयीभूतभूतलादेरधः पतनाद्यभावतात्पर्यात् दुःखनृत्तं कष्टतोऽनुष्ठीयमाननर्त्तनम् वो युष्मान् सभ्यानित्यर्थः पातु अवतु । अत्र त्रिपुरविजयशीलेन शराऽग्निना यथा त्रिपुरं भस्मीकृतमेवं कोपानलेन नन्दान्वयवत् सराक्षस-मलयकेतुदाहनिपुणस्यापि चाणक्यस्य राक्षसग्रहणेच्छया क्रूरनीतिप्रयोगो ध्वन्यते त्रिपुरविजयीतिशब्देनेति बोध्यम् । अस्मिन्पद्येऽवन्यादेरवनत्यादिसम्बन्धाऽसद्भावेऽप्यवनतिसम्बन्धप्रतिपादनादसम्बन्धे सम्बन्धरूपातिशयोक्तिरलङ्कारः ।

भेदेऽप्यभेदः सम्बन्धेऽसम्बन्धस्तद्विपर्ययौ। पौर्वापर्यात्ययः कार्य-हेत्वोः सा पञ्चधा मतः ॥

इति साहित्यदर्पणोक्तलक्षणात् ।

आश्रयाश्रयिणोरेकस्याऽऽधिक्येऽधिकमुच्यते ।

इति लक्षणात् त्रिपुरविजयिहरचरणपतनस्यावनिरूपाश्रयेण शक्त्याधिक्याऽभिधानादत्राऽधिकालङ्कार इति केचित् ।

उक्तैर्विशेषणैः साभिप्रायैः परिकरो मतः ।

इति लक्षणात् त्रिपुरविजयीतिसाभिप्रायविशेषणोक्त्या परिकरालङ्कार इत्यन्ये ।
'वर्णैः शेषैः पुनर्द्वयोः । समस्तपञ्चषपदो बन्धः पाञ्चालिका मता ।

इति लक्षणादत्र पाञ्चाली रीतिः । "चित्तं व्याप्नोति यः क्षिप्रम्" ।

इत्याद्युक्तलक्षणात्प्रसादगुणः । स्रग्धरावृत्तम् । एतल्लक्षणस्य प्रागुक्तत्वान्नेहोक्तम् ॥ २ ॥

नाद्यन्ते सूत्रधार इति । नन्दयति आनन्दयति लोकानिति नान्दीनाटका-

---

दृष्टि (नेत्र) को न देते हुए, त्रिपुरविजयी शिवजीका उक्तहेतुओं के कारण कष्टसाध्य नृत्य (नाचना) आप सबों को रक्षा करें ॥ २ ॥

(नान्दी (मङ्गल) पाठके बाद)—

सूत्रधारः—मङ्गलपाठ में बहुत समय लगाना व्यर्थ है । सभ्यजनों से मुझे आज्ञा

लक्ष्येषु जगत्सु ज्वलनकणमुचम् अग्निस्फुलिङ्गवर्षिणीम् (अत एव) उग्रां तीक्ष्णां दृष्टिं ... हता हूं। न बध्नतः न कुर्वतः । रूपेण आधाराऽनुरोधात् नृत्यस्थानस्याल्पतोऽभिप्रायेण त्रिपुर... आप आज्ञा शिवस्य दुःखनृत्यं कष्टेन नर्तनं वो युष्मान् पातु रक्षतु ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ सामन्तवटेश्वरदत्तपौत्रस्य महाराजपदभाक्पृथुसूनोः कवेर्विशाख-

दो प्राङ्मङ्गलार्थं विहितश्लोको नान्दीशब्देनाऽभिधीयते। उक्तञ्चापि साहित्यदर्पणे—

आशीर्वचनसंयुक्ता स्तुतिर्यस्मात्प्रयुज्यते।
देव–द्विज–नृपादीनां तस्मान्नान्दीति संज्ञितः॥

इति केषाञ्चिन्मये पदनियमस्य नान्द्यामस्वीकारादिह तदस्वीकारः। अथवा पदशब्दस्य पादार्थकत्वादाशीर्वचनयुक्ततया हरस्तुतिरूपतया चाष्टपादतया चेयमष्टपदा नान्दीत्यवसेयम्। तस्या अन्तेऽवसाने समाप्ताविति यावत् सूत्रधारस्तन्नामकप्रधाननटः कथयतीति शेषः। उक्तञ्च दर्पणे—

नाट्योपकरणादीनि सूत्रमित्यभिधीयते। सूत्रं धारयतीत्यर्थे सूत्रधारो निगद्यते॥
नाटकीयकथावस्तु प्रथमं येन सूच्यते। रङ्गभूमिं समाक्रम्य सूत्रधारः स उच्यते॥
रङ्गं प्रसाद्य मधुरैः श्लोकैः काव्यार्थसूचनैः। ऋतुं कञ्चित्समाश्रित्य भारतीं वृत्तिमाश्रयेत्

इति दर्पणोक्तेः सूत्रधारः कोमलमधुरशब्दैः रङ्गप्रसादपूर्वकं भारतीवृत्त्याश्रयणात्काव्यार्थमभिसूचयतीति भावः।

अलमिति। अतिप्रसङ्गेनाऽतिविस्तरेणाऽलं व्यर्थं सभ्यानन्दजनकाभिनयस्य करिष्यमाणत्वान्निष्प्रयोजनकालक्षेपणो वारणीय इत्यर्थः। अतिविस्तरेण मिथो वार्त्तालापेनोक्तकार्यं साध्यं नास्तीति यावत्। (गम्यमानाऽपि क्रिया कारकविभक्तौ प्रयोजिके) ति वार्त्तिकेन गम्यमानसाधनक्रियाऽपेक्षया करणत्वादतिप्रसङ्गशब्दात्तृतीया। अलंशब्दोऽत्र वारणार्थकः। (अलंभूषणपर्याप्तिशक्तिवारणवाचकमित्यमरः)।

रूपकस्य कवेराख्यां गोत्राद्यपि स कीर्त्तयेत्।

इति साहित्यदर्पणोक्त्या नाटक–तद्रचयित्रादिनामकथनं सूत्रधारेण कर्तुमुचितमित्यभिप्रायेणोच्यते **आज्ञपित इति**। परिषच्छब्दस्य लक्षणया तद्वृत्तिसभ्यजनबोधकत्वमन्यथाऽऽज्ञादातृत्वस्य चेतनवृत्तित्वेनोक्तशब्दस्य स्थानवाचित्वात्तत्कर्तृकाज्ञाप्रदानासम्भवादसङ्गतं स्यात्। तथा च परिषदा गोष्ठ्या तत्रस्थितजनेनेत्यर्थः। अस्मीतिक्रियायाः सत्वात् अहमितिकर्तृपदमध्याहार्यम्। अहमाज्ञापित आदिष्टोऽस्मि भवामि। समन्ताद्भावः सामन्तस्तेषु चक्रवर्ती यो वटेश्वरदत्त इति सामन्तवटेश्वरदत्तस्तस्य पौत्रस्तस्य, महाराजपदं महाराजेत्युपाधिं भजति इति तथोक्तः (भजेण्वौ रूपम्)। महाराजपदभाक् चाऽसौ पृथुस्तस्य सूनुः

आज चक्रवर्ती वटेश्वरदत्तके पौत्र पृथु महाराज के पुत्र विशाखदत्त

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दत्तस्य कृतिः मुद्राराक्षसं नाम नाटकं नाटयितव्यम्' इति । यत् सत्यं काव्यविशेषवेदिन्यां परिषदि प्रयुञ्जानस्य ममापि, चेतसि सुम-

---

पुत्रस्तस्य चक्रवर्त्तिवटेश्वरदत्तात्मजमहाराजोपाधिकपृथुतनयस्येति समुदितार्थः । कवेर्नाटकप्रणेतुर्विशाखदत्तस्य कृतिः, मुद्रयाऽङ्गुलिमुद्रया परिगृहीतो राक्षसो यत्रेति (मध्यमपदलोपिबहुव्रीहिः) तदधिकृत्य कृतो ग्रन्थो मुद्राराक्षसं 'तदधिकृत्य कृतो ग्रन्थ' इत्यणन्तत्वात्क्लीवत्वम् , नाम तत्संज्ञकं नाटकं नाटयितव्यमभिनेतव्यं दर्शयितव्यमिति यावत् । उक्तञ्च दर्पणे नाटकलक्षणम्—

नाटकं ख्यातवृत्तं स्यात्पञ्चसन्धिसमन्वितम् । प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान् ॥
दिव्योऽथ दिव्याऽदिव्यो वा गुणवान् नायको मतः । एक एव भवेदङ्गी शृङ्गारो वीर एव वा ॥

इति । अस्मद्विरचिताऽभिनयस्य दर्शनात्परिषद्वर्तिजनानां सन्तोषोऽस्माकञ्चातिशयहर्षो भवतीति यत्तत्सत्यमेवेत्याह—यत्सत्यमिति । काव्यस्य दृश्य श्रव्येत्युभयरूपस्य विशिष्यतेऽनेनेति विशेषो धर्म उत्कर्षाऽपकर्षसूचकगुणदोषरूपः, तद्वेदिन्यां तज्ज्ञाननिष्णातायामित्यर्थः । एतेन काव्यप्रशंसापूर्वकं भारतीवृत्तेः प्ररोचना नामकमङ्गमभिदर्शितम् ।

अङ्गान्यत्रोन्मुखीकारः प्रशंशातः प्ररोचना ।

इति दर्पणोक्तेः । परिषदि सभायां प्रयुञ्जानस्य नाट्येनाऽभिनयं कुर्वतिः इत्यर्थः ।

अस्मिन्नाटके—वीररसोऽङ्गी अतिगहनकौटिल्यनीतिरूपस्याऽद्भुतरसस्य प्रधानाऽङ्गत्वमन्ये च करुणादयोऽङ्गरसाः । चन्द्रगुप्तो धीरोदात्तनायकः मलयकेतुः प्रतिनायकः, एतौ नायक-प्रतिनायकावालम्बनविभावौ, परस्परोद्देशेन परस्परतर्जितादीनामुद्दीपनविभावत्वम् , प्रतीकारस्मरणादीनामनुभावत्वम् , उत्साहस्याऽत्र स्थायिभावत्वम् , नायक-प्रतिनायकभूतयोश्चन्द्रगुप्त-मलयकेत्वोश्चाणक्य-राक्षसावुपनायकसंज्ञाकसहायभूतौ, चाणक्यकृतनन्दान्वयनाश-चन्द्रगुप्ताऽभिषेकयोः पुराणादौ प्रतिपादितत्वात् 'इतिहासनिबन्धनं प्रख्यात' मित्युक्तलक्षणेन प्रख्यातमितिवृत्तमिहेत्यवसेयम् ।

नव चैतान्नन्दान् कौटिल्यो ब्राह्मणः समुद्धरिष्यति । कौटिल्य एव चन्द्रगुप्तमभिषेक्ष्यति ॥
तेषामभावे मौर्व्याः पृथिवीं भोक्ष्यन्ति । कौटिल्य एव चन्द्रगुप्तमुत्पन्नं राज्येऽभिषेक्ष्यति ॥

चाहता हूं ।
कवि का बनाया हुआ मुद्राराक्षस नामक नाटक का अभिनय करो । इस आप आज्ञा के दोष-गुण को जाननेवाली सभामें, अभिनय करनेवाले मे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हान् परितोषः प्रादुर्भवति । कुतः!—

तस्यापि पुत्रो विन्दुसारो भवष्यतीत्यादि ॥ इति विष्णुपुराणे।

तेन चाणक्यनाम्नाऽथ शकटारगृहे रहः। कृत्यां विधाय सप्ताहात्सपुत्रो निहतो नृपः ॥

शकटारः क्षपणकलिङ्गधारी सुनिश्चितः। चाणक्यस्य तु विप्रस्य शर्मान्तेन्दुर्महान् सुहृत् ॥

योगानन्दे यशःशेषे पूर्वनन्दसुतस्ततः। चन्द्रगुप्तः कृतो राज्ये चाणक्येन महौजसा ॥

इति वृहत्कथामञ्जर्याम् ।

वंशे विशालवंशानामृषीणामिव भूयसाम् । अप्रतिग्राहकाणां यो वभूव भुवि विश्रुतः ॥

जातवेदा इवार्चिष्मान् वेदान्वेदविदाम्वरः। योऽधीतवान् सुचतुरश्चतुरोऽप्येकवेदवित् ॥

यस्याऽभिचारवज्रेण वज्रज्वलनतेजसः । पपात मूलतः श्रीमान् सुपर्वा नन्दपर्वतः ॥

एकाकी मन्त्रशक्त्या यः शक्तः शक्तिधरोपमः। आजहार नृचन्द्राय चन्द्रगुप्ताय मेदिनीम् ॥

नीतिशास्त्रामृतं धीमानर्थशास्त्रमहोदधेः । य उद्दध्रे नमस्तस्मै विष्णुगुप्ताय वेधसे ॥

इति कामन्दकीयनीतिसारे ।

मुखं प्रतिमुखं गर्भो विमर्श उपसंहृतिः ।

इत्युक्तेर्दृश्यकाव्ये नाटकादौ पञ्च सन्धयो भवन्ति । एकप्रयोजनान्वितकथावयवानामवान्तरैकप्रयोजनसम्वन्धस्यैव सन्धिशब्दव्यवहारः ।

बीजं बिन्दुः पताका च प्रकरी कार्यमेव च। अर्थप्रकृतयः पञ्च ज्ञात्वा योज्या यथाविधि ।

आरम्भयत्नप्राप्त्याशा नियताप्तिफलागमाः। यथासंख्यमवस्थाभि राभिर्योगात्तु पञ्चभिः॥

पञ्चधैवेतिवृत्तस्य भागाः स्युः पञ्च सन्धयः ॥

इति दर्पणोक्तलक्षणात् प्रयोजनोपपत्तिकारणभूतबीजादयः पञ्चाऽऽरम्भादिपञ्चाऽवस्थाभिर्युक्ता यथासंख्यं मुखादयः पञ्च सन्धयो भवन्तीत्यर्थकात् आरम्भयत्नयोः सम्बन्धो मुखसन्धिः, यत्न-विन्द्वोः सम्बन्धः प्रतिमुखसन्धिः, प्राप्त्याशापताकयोः सम्वन्धो गर्भसन्धिः, नियताप्ति=प्रकर्योः सम्बन्धो विमर्शसन्धिः, फलागम-कार्ययोः सम्बन्ध उपसंहृतिसन्धिः ।

भवेदारम्भ औत्सुक्यं यन्मुख्यफलसिद्धये । इत्यारम्भलक्षणम् ।

प्रयत्नस्तु फलावाप्तौ व्यापारोऽतित्वरान्वितः । इति यत्नलक्षणम् ।

उपायापायशङ्काभ्यां प्राप्त्याशा प्राप्तिसम्भवः । इति प्राप्त्याशालक्षणम् ।

अपायाऽभावतः प्राप्ति र्नियताप्तिस्तु निश्चिता । इति नियताप्तिलक्षणम् ।

...नन्द होरहा है। क्यों कि—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(१) चीयते बालिशस्यापि सत्क्षेत्रपतिता कृषिः ।
न शालेः स्तम्बकरिता वप्तुर्गुणमपेक्षते ॥ ३ ॥

साऽवस्था फलयोगः स्याद्यः समग्रफलोदयः । इति फलागमलक्षणम् ।
एतत्सर्वं दर्पणस्थं बोध्यम् ।
अल्पमात्रं समुद्दिष्टं बहुधा यद्विसर्पति । फलस्य प्रथमोहेतु बीजं तदभिधीयते ॥
इति बीजलक्षणम् ।
अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम् । इति बिन्दुलक्षणम् ।
व्यापि प्रासङ्गिकं वृत्तं पताकेत्यभिधीयते । इति पताकालक्षणम् ।
प्रासङ्गिकं प्रदेशस्थं चरितं प्रकरी मता । इति प्रकरीलक्षणम् ।
प्रकरीनायकस्य स्यान्न स्वकीयफलान्तरम् । अपेक्षितं तु यत्साध्यमारम्भो यन्निबन्धनः ॥
समापनं तु यत्सिद्ध्यैः तत्कार्यमिति सम्मतम् ।
इति कार्यलक्षणम् । एतदपि सर्वं लक्षणं दर्पणस्थमेवेति बोध्यम् ।

ननु सभासान्निध्ये कृताऽभिनयस्यैव तत्स्थजनानन्दसन्दोहजनकत्वस्य परिषदि प्रयुज्यमानस्येत्यनेनाभिहितत्वात्तत्र सभारूपपात्रस्यैव मुख्यत्वेनोत्कर्षजनकत्वमित्यत्र दृष्टान्तं दर्शयति चीयत इति । बालिशस्यापि अज्ञातकृषीवलस्यापि अनवगतकृषिकर्मणोऽपि शिशोरपीति यावत् कृषिस्तत्सम्बन्धिबीजमित्यर्थः । सत्क्षेत्रपतिता उत्कृष्टभूमौ प्रयुक्ता उप्तेति यावत् सती चीयते वर्द्धते अतिशयफलसम्पादिनी भवतीत्यर्थः । शालेः धान्यस्य स्तम्बकरिता प्राचुर्यम् वप्तुर्बीजरोपकस्य गुणं चातुर्यादिकं नापेक्षते नेच्छतीत्यर्थः । चीयते इति चिनोतेः कर्मकर्तरि लटि रूपम् । वारि शेते इति विग्रहे डप्रत्यये 'तत्पुरुषे कृति बहुलमि'ति सप्तम्या अलुकि र-लयोरैक्येन बालिशपदं सिद्ध्यति । (बालिशश्च शिशौ मूर्खे) इति मेदिनी । स्तम्बं करोतीति विग्रहे 'स्तम्बशकृतोरिन्' इतीनि स्तम्बकरिस्ततो भावे तलि रूपम् ।
सामान्यं वा विशेषेण विशेषस्तेन वा यदि । कार्यञ्च कारणेनेदं कार्येण च समर्थ्यते ॥

खेती के कामोंका अच्छीतरह नहीं जाननेवाले पुरुष द्वारा भी उत्तम खेत में बोया हुआ बीज बढ़ता है ! धान्य का बढ़ना (अधिक होना) बीजबोने वाले के गुणकी अपेक्षा नहीं करता है ॥ ३ ॥

(१) योऽपि कृषिकर्म बीजवपनादिकार्यं न जानाति तदुप्तमप्युत्तमक्षेत्रे बीजं भूमेरुत्कर्षेण वर्द्धते एव न तत्र वप्तुर्बुद्धिमत्त्वादिगुणो हेतुः । एवमज्ञाऽस्मदादिकृताऽभिनयोऽपि ... जनानामग्रे प्रसंशार्ह एव भविष्यति न तत्राऽभिनयनैपुण्यं हेतुरिति भावः ॥ ३ ... चाहता हूं। ... आप आज्ञा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तद्यावद् इदानीं गृहं गत्वा गृहिणीमाहूय गृहजनेन सह सङ्गीत-

सामर्थ्येनेतरेणार्थान्तरन्यासोऽष्टधा ततः ।

इति दर्पणोक्तलक्षणात् विशेषेण सामान्यसमर्थनरूपेः पूर्वार्द्धस्य परार्द्धेन वैधर्म्येण समर्थनरूपो वाऽर्थान्तरन्यासोऽलङ्कारः । स च—

क्वचिद्विशेषः सामान्यात्सामान्यं वा विशेषतः । कार्यान्निमित्तात्कार्यञ्च हेतोरथ समात्समम्

अप्रस्तुतात्प्रस्तुतं चेद्गम्यते पञ्चधा ततः । अप्रस्तुतप्रशंसा स्यात् ।

इत्युक्तलक्षणेन यथाऽज्ञकर्तृकोत्कृष्टभूमिनिहितबीजं वर्द्धते इति सामान्येनाऽप्रस्तुतेन तथा विद्वत्सदसि मत्कृतोऽपि प्रयोगः साधीयान् भवतीति विशेषस्य प्रस्तुतस्य प्रतिपादनादप्रस्तुतप्रशंसामूलक इत्यवसेयम् । यथोर्वराभूमिप्रयुक्ता कृषिर्बालिशादिबीजरोपकगुणं विना फलातिशयोत्पादिनी भवति तथा विनापि नर्त्तकगुणं सदसि क्रियाऽऽधारपात्रगुणादभिनयनैपुण्यं भवतीति बिम्ब–प्रतिबिम्बस्य भानादत्र दृष्टान्ताऽलङ्कार इति केचित् । उक्तञ्च तल्लक्षणं दर्पणे—

दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम् ।

इति सदृशवस्तुनः साधर्म्य–वैधर्म्ययोः प्रणिधानगम्यसाम्यत्वे सति निर्दिष्टनामालङ्कार इति तदर्थः । कुवलयानन्दे च—

चेद्बिम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलङ्कृतिः ।

इति । यत्रौपमानोपमेयवाक्ययोर्भिन्नावेव धर्मौ बिम्ब–प्रतिबिम्बभावेन निर्दिष्टौ तत्र दृष्टान्त इत्यर्थः । अत्र वैदर्भी रीतिः । प्रसादगुणः । अनुष्टब्वृत्तम् । केचित्तु जगणस्य द्वितीय–चतुर्थचरणस्थतुर्यवर्णतोऽग्रे सत्त्वात्पथ्यावक्त्रं वृत्तमित्याहुः ।

युजोश्चतुर्थतो येन पथ्यावक्त्रं प्रकीर्तितम् । इति तल्लक्षणम् ॥ ३ ॥

तद्यावदिति । यावच्छब्दो वाक्यालङ्कारार्थकः, तत्तस्मात्कारणात् नटगुणव्यतिरेकेण प्रयोगसाधुत्वाद्धेतोरित्यर्थः । गृहिणीं स्त्रियं प्राणप्रियामिति यावत् । आहूयाऽऽकार्य गृहजनेन गृहिण्या सहेत्यर्थः ।

न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते । इति स्मृतेः ।

सङ्गीतकं गानमनुतिष्ठामि अनुष्ठास्यामि करिष्यामीति तदर्थः (भविष्यत्सामीप्ये लट्) यद्वा संगीतकं यावदनुतिष्ठामीत्यन्वयेन यावच्छब्दयोगे 'यावत्पुरा

तो भी पहले घरजाकर गृहिणी को बुलाकर उस के साथ गान करता हूँ ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

कमनुतिष्ठामि । (परिक्रम्यावलोक्य च ।) इमे नो गृहाः, तद्यावत् प्रविशामि । (नाट्येन प्रविश्यावलोक्य च) अये तत् किमिदमस्मद्गृहेषु महोत्सव इव दृश्यते । स्वस्वकर्म्मण्यधिकतरमभियुक्तः परिजनः । तथाहि—

(१) वहति जलमियं पिनष्टि गन्धानियमियमुद्ग्रथते स्रजो विचित्राः ।
मुसलमिदमियञ्च पातकाले मुहुरनुयाति कलेन हुंकृतेन ॥ ४ ॥

निपातयोर्लडि'ति भविष्यति लट् । परिक्रम्य कियद्दूरं गत्वा । नोऽस्माकमिमे गृहाः सदनानीत्यर्थः 'गृहाः पुंसि च भूम्न्येवे'तिं कोषात्पुंस्त्वबहुबचने । नाट्येन नटोचितभङ्गीविशेषेण अभिनयेनेति तदर्थः । अये इत्याश्चर्यसूचकाव्ययपदम् अस्माकमालयेषु हर्षातिशय इवावलोक्यते, स्वस्वकर्मणि स्वंस्वं कर्मेति व्यतिहारे द्विर्भावः स्वकीय-स्वकीयकार्ये इत्यर्थः । अधिकतरम् अत्यर्थमभियुक्तो नियुक्तः परिजनःसेवकजन इति ।

अभियोगं दर्शयति—वहतीति । इयं काचित्स्त्री जलं वहति, आनयति इयमपरा स्त्री गन्धान् गन्धद्रव्याणि पिनष्टि चूर्णयति, इयमन्या विचित्रा नानाविधाः स्रजः पुष्पमाला उद्ग्रथते ग्रथ्नाति इयमन्या इदं श्रूयमाणं मुसलं मुसलपातशब्दं पातकाले धान्योपरि मुसलपातनक्षणे कलेन मधुरेण हुंकृतेन (हुमित्यव्ययपूर्वकात्कृधातोर्भावे क्ते रूपम्) हुमिति शब्दविशेषेणेत्यर्थः । मुहुरसकृदनुयाति अनुकरोति । अत्र ।

स्वभावोक्तिर्दुरूहार्थस्वक्रियारूपवर्णनम् ।

इति । दर्पणोक्तलक्षणात् जलवहनादिस्वभाववर्णनेन स्वभावोक्तिनामालंकारः । अत्रापि वैदर्भी रीतिः । प्रसादश्च गुणः ।

अयुजि नयुगरेफतो यकारो युजि तु नजौ जरगाश्च पुष्पिताग्रा ।

इति लक्षणात्पुष्पिताग्रावृत्तम् ॥ ४ ॥

(कुछ दूरजाकर घरकी ओर देखता हुआ चकित होकर) यही मेरा घर है । अन्दर जाता हूँ ।

(विचित्र ढङ्ग से प्रवेशकर-और देख कर)

आज बहुत ही आनन्द का विषय है, हमारे घर में यह क्या विशेष उत्सव सा दीख पड़ता है, स्त्रियां अपने कार्यों में लगी हुई हैं । जैसे—

यह (कोई) स्त्री जलको ले आती है । कोई स्त्री मसाला पीसती है । कोई स्त्री अनेक तरहकी मालायें गूथती है । तो कोई स्त्री बारम्बार मधुर हुङ्कार के साथ मूसल का अनुगमन ही करती है । जरा अपनी स्त्री को बुलाकर पूछूँ ता सही ॥ चाहता हूं ।

(१) सत्सु विशिष्टोत्सवेषु विविधपाकादिसम्पादनाय स्त्रीणां कार्येषु शीघ्रता स्वाभाविकी आप आज्ञा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भवतु कुटुम्बिनीमाहूय पृच्छामि । (नेपथ्याभिमुखमवलोक्य)—
(१) गुणवत्युपायनिलये ! स्थितिहेतो ! साधिके ! त्रिवर्गस्य ।

भवत्विति । यदित्यध्याहारेण यद्भवत्वित्यर्थः । कुटुम्बिनीं (भूमानन्दाप्रशंसास्वित्युक्त्या प्राशस्त्यार्थे इनिः) गृहिणीमाहूयाकार्यं पृच्छामि । नेपथ्यस्य वेषनिर्माणालयस्य अभिमुखं सम्मुखं दृष्ट्वेत्यर्थः ।

गुणवतीति । गुणवति ! सत्प्रकृतित्व=गृहकार्यनैपुण्यादिगुणालंकृते । उपायनिलये ! संसारसाधनीभूतव्यापाराश्रयभूते । निलयशब्दस्याऽकारान्तत्वे तु तत्राऽप्प्रत्ययान्तत्वेन नियतलिङ्गत्वम्बोध्यम् । स्थितिहेतो ! लोकयात्रासम्पादिनि । त्रिवर्गस्य "पुरुषार्थभूतधर्मार्थकामरूपस्य साधिके ! सम्पादनकर्त्रि । भार्यैव पुरुषाणां सकलपुरुषार्थान् सम्पादयतीति स्मृत्युक्तेः । मद्भवननीतिविद्ये ! अस्मद्गृहसम्बन्धिनीतिविद्यास्वरूपिणि । कार्याद्यार्ये ! इतिकर्तव्यार्थोपदेशकर्त्रि, आर्ये ! मान्ये, द्रुतं शीघ्रमुपैहि आगच्छ, मद्भवनस्य नीतिविद्येवेत्यर्थकरणादुपमालङ्कारः । कार्यादार्ये इति पाठे फलमपीह हेतुरित्युक्तस्योद्देश्यरूपस्यापि फलस्य हेतुत्वाऽभ्युपगमाद्धेतुपञ्चम्यन्तं कार्य्याद्धितिपदम् । कार्यं विहायेत्यर्थोल्ल्यब्लोपपञ्चम्यन्तं तदिति । केचित् । द्रुतमित्युक्त्या कालक्षेपासहनरूपौत्कण्ठ्यप्रतीतिः ॥ पक्षान्तरे—

ऋतुश्च कश्चित्प्रायेण भारतीं वृत्तिमाश्रितः ।

इतिदर्पणोक्तलक्षणात्कविना तृतीयाङ्कवर्णितस्य शरदृतोरुपादानमेतेन ध्वन्यते । तथाहि–गुणवति ! वर्षोऽपगमाज्जलस्वच्छतादिगुणविशिष्टे, समागते शरदृतौ जले मालिन्यापगमोऽतिप्रसिद्धः । उपायनिलये ! विजयाऽभिलाषिणां सामाद्युपायावस्थाने ।

अथ विजयदशम्यामाश्विने शुक्लपक्षे दशमुखनिधनाय प्रस्थितो रामचन्द्रः । इत्यादिप्रामाण्यात्स एव विजयावसरः प्रसिद्धः, स्थितिहेतो ! रक्षाकारणभूते, शरदागमे धान्याद्युपचयनिमित्तत्वात्प्रावृट्समयापगमावबोधकत्वाच्च तस्या रक्षाहेतुत्वम् , प्रावृषि प्रायशः पाणिनां क्लेशबाहुल्यादिति भावः । त्रिवर्गस्य धर्मार्थकामरूपस्य साधिके ! सम्पादयित्रि, विजयकांक्षिणामवसरवितरणादर्थं साधयति धर्म-

(नेपथ्य की तरफ देख कर)

हे गृहकार्य में नैपुण्यादि गुणवाली ! हे संसार के साधक व्यापार का आश्रय ! ...त्रा सम्पन्न करनेवाली ! हे धर्म-अर्थ-काम का साधन करने वाली !

...धनाय स्त्रीणां प्रसंशापूर्वकमाह्वानं लोकप्रसिद्धमेवेति भावः ॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मद्भवननीतिविद्ये ! कार्य्यार्थय्ये ! द्रुतमुपैहि ॥ ५ ॥

कामेत्युभयस्य चार्थमूलकत्वात्तावपि सम्पादयतीत्यर्थः । मद्भवननीतिविद्ये ! समागतायां मयि विजयं समीहमाना राजानो विदधता समरमित्युपदेशबोधनद्वारा सा नीतिविद्यास्वरूपिणी, आर्ये ! मान्ये, कार्यात् प्रयोजनवशात् द्रुतं शीघ्रमागच्छेत्यर्थः । इति नायककर्तृकशरदागमप्रार्थना ।

पुनः पक्षान्तरे—राक्षसग्रहणहेतुकचाणक्यकर्तृकनीतिविद्याकर्मकाऽभिमुखीकरणं ध्वन्यते । तथाहि-गुणवति ! सन्धि-विग्रह-याना-सन-द्वैधीभाव-समाश्रयेतिषड्गुणशालिनि, उपायनिलये ! नीतिशास्त्रोक्तसाम-दान भेद-दण्डरूपोपायाश्रयभूते, स्थितिहेतो ! राज्यपालयकर्त्रि त्रिवर्गस्प नीतिशास्त्रोक्तक्षय-स्थान-वृद्धिरूपस्य, सिद्धिविधायिनि, आर्ये ! मान्ये, हे मद्भवननीतिविद्ये ! प्रयोजनवशादेहीत्यर्थः ॥

श्लेषः स वाक्य एकस्मिन् यत्रानेकार्थता भवेत् ।
श्लिष्टैः पदैरनेकार्थोऽभिधाने श्लेष इष्यते ॥
नानार्थसंश्रयः श्लेषो वर्ण्यावर्ण्योभयाश्रितः

इति प्रकाश-दर्पण-कुवलयानन्दोक्तलक्षणैः श्लिष्टपदसामर्थ्यादप्राकरणिकार्थप्रतीत्याऽर्थालङ्कारः । यत्तु—

क्वचिद्भेदाद्ग्रहीतॄणां विषयाणां तथा क्वचित् । एकस्यानेकधोल्लेखो यः स उल्लेख उच्यते ॥

इत्युक्तलक्षणादत्रोल्लेखालङ्कार इति तन्न, अथान्तरप्रतीतिसद्भावे श्लेषेण तद्बाधात् ! रीतिरत्र पाञ्चाली नाम—वर्णैश्शेषैः पुनर्द्वयोः ।

समस्तपञ्चषपदो बन्धः पाञ्चालिका मता ॥

इतिदर्पणोक्तलक्षणात् । प्रसादोऽत्र गुणः । लक्षणञ्च प्रागुक्तम् ।

लक्ष्मैतत् सप्त गणा गोपेता भवति नेह विषमे जः ।
षष्ठोजश्च न लघु वा प्रथमार्द्धे नियतमार्यायाः ॥
षष्ठे द्वितीयलात् परके न्ले मुखलाच्च सयतिपदनियमः ।
चरमेऽर्द्धे पञ्चमके तस्मादिह भवति षष्ठो लः ॥

इति लक्षणादार्यावृत्तम् ॥ ५ ॥

हे मेरे घरकी नीतिविद्यास्वरूप ! हे कर्त्तव्याऽकर्त्तव्यके उपदेश करने वाली ! चाहता हूं। यहां आओ ? ॥ ५ ॥ —ये आप आज्ञा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नटी—(प्रविश्य ।) अज्जउत्त ! इअम्हि अण्णाणिओएण मं अणुगेह्णदु अज्जो [आर्यपुत्र, इयमस्मि, आज्ञानियोगेन मामनुगृह्णात्वार्यः]

सूत्रधारः—आर्ये ! तिष्ठतु तावदाज्ञानियोगः, कथय किमद्य भवत्या भगवतां ब्राह्मणानामुपनिमन्त्रणेनैतत् कुटुम्बकमनुगृहीतम्, अथवा अभिमता भवनमतिथयः प्राप्ताः, यत एष पाकविशेषारम्भः ?

नटी—अज्ज ! अज्ज आमन्दिदा मए भअवन्तो बह्मणा [आर्य अद्यामन्त्रिता मया भगवन्तो ब्राह्मणाः]

प्रविश्येति । रङ्गस्थानमित्यस्य शेषो बोध्यः । ऋच्छतेर्ण्यता सिद्धस्यार्यपदस्य स्थानात्स्थानान्तरगमनशीलेत्यर्थः । उक्तञ्च तल्लक्षणं साहित्यदर्पणे—

कर्त्तव्यमाचरन् काममकर्त्तव्यमनाचरन् ।
तिष्ठति प्रकृताऽऽचारे स वै आर्य इति स्मृतः ॥ इति ।

[इ]दा आज्ञानियोगेन शासनप्रदानेन क्वचित्कार्ये प्रेषणरूपो नियोगशब्दार्थः । क्वचित्कार्ये प्रेषणेनेतियावत् अनुगृह्णातु अनुकम्पया कृतकृत्यां विधेहि ।

आर्य इति । तावच्छब्दो वाक्यालङ्कारार्थकः । हे मान्ये ! प्राणप्रिये, आदेशप्रदानं तावदास्तां प्रागिदं कथय किमर्थमस्मिन्दिवसे त्वया पूज्यानां विप्राणां भोजनार्थं नियोगकरणेन पोष्यवर्गः कृतार्थीकृतः, अथवा अभिमता वञ्छिता अतिथयोऽभ्यागता गृहं सम्प्राप्ताः यस्मात् साक्षाद्दृश्यमानः पाकविशेषोद्योगः ।

आर्येति—

नाठयोक्तौ तु पुमानार्यः, आर्ये तु मार्षमारिषावि—

तिप्रमाणद्वयेन सूत्रधारस्य मारिषेति नामान्तरम् । तथा च हे आर्य ! मारिष, मया पूजनीया विप्रा भोजनार्थं निमन्त्रिता इत्यर्थः ।

नटी—(रङ्गशाला में आकर) आर्यपुत्र! यही मैं हूँ, आज्ञा देकर मुझे कृतार्थ कीजिये।

सूत्रधारः—हे प्राणप्रिये ! आज्ञा करना तो तब तक दूर रहे, पहले यह कहो कि [तु]मने आज क्या ब्राह्मणों के निमन्त्रण के कारण इन परिजनों को बुलाया है, या [अ]पनी इच्छा ही से ये सब अतिथि मेरे घर आये हैं, जिस से यह विशेषरूपसे रसोई [ब]न रही हो ।

[नटी—आ]र्यपुत्र ! आज मैंने ब्राह्मणों को निमन्त्रण दिया है ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चाणक्यः—(गृहीत्वा निरीक्ष्य) अहोदर्शनीयताक्षराणाम् ! (इत्यनुवाच्य) भद्र ! अनया मुद्रया मुद्रयैनम् ।

सिद्धार्थकः—जं अज्जो आणवेदि त्ति । (तथा कृत्वा) अज्ज ! अअं सो मुद्दिदो लेहो, ता आणवेदु अज्जो किं अवरं अणुचिट्ठीअदु त्ति [यदार्य्य आज्ञापयति । आर्य्य अयं स मुद्रितो लेखः, तदाज्ञापयत्वार्य्यः किमपरमनुष्ठीयतामिति]

चाणक्यः—भद्र ! कस्मिंश्चित् आत्मनाऽनुष्ठेये कर्मणि त्वां व्यापारयितुमिच्छामि ।

सिद्धार्थकः—(सहर्षम्) अज्ज ! अणुग्गहीदोह्मि, ता आणवेदु अज्जो, किं इमिणा दासजणेण अज्जस्स अणुचिट्ठिदव्वं [आर्य्य !

दृश्यमानः स भवदुक्तो लेखो पत्रं लिखितः ।

गृहीत्वेति । आदाय पत्रमिति शेषः । अहो (विस्मयसूचकमव्ययमिदम्) उक्तञ्चामरकोशेऽपि (अहो हो च विस्मये इति) दर्शनीयानि मनोज्ञानि अक्षराणि वर्णाः सन्तीति शेषः । अनुवाच्य पठित्वा भद्र साधो, अनया राक्षसनामांकितया मुद्रयाङ्गुलिमुद्रया एनं लेखं पत्रं मुद्रय अंकय ।

सिद्धार्थक इति । एतदभिधानश्चाणक्यप्रणिधिः, तथा कृत्वा मुद्रयित्वेत्यर्थः । आर्य पूज्य, अयं प्रत्यक्षदृश्यमानो लेखः पत्रं मुद्रितोऽङ्कितः, अपरमन्यत् किं कार्यमिति शेषः । अनुष्ठीयतां क्रियतामिति ।

भद्रेति-भद्र साधो ! सिद्धार्थक ! कस्मिंश्चित् क्वचित् आप्तजनेन सुहृज्जनेनाऽनुष्ठेयं तस्मिन्नाप्तजनाऽनुष्ठेये कर्मणि कार्ये त्वां भवन्तं व्यापारयितुं नियोजयितुमीच्छामि कामये ।

सहर्षमिति । हर्षेणानन्देन सह वर्तमानं सहर्षं सानन्दं (क्रियाविशेषणमिदम्) कथयतीति शेषः । आर्य मान्य ! अनुगृहीतोऽनुकम्पितोऽस्मि भवामि भवतेति शेषः ।

चाणक्यः—(पत्र लेकर और देख कर) अक्षर बहुत ही सुन्दर हैं । (बांच कर) । भद्र ! इस मुद्रा से इसको मुद्रित करदो ।

सिद्धार्थकः—आप की जैसी आज्ञा । (पत्र में मुहर लगाकर) आर्य ! यह लेख मुद्रित होगया । इसलिये आज्ञा कीजिये कि अब कौनसा दूसरा कार्य करूँ ?

चाणक्यः—भद्र ! मैं अपने करने योग्य किसी कार्य में तुम को लगाना चाहता हूं ।

सिद्धार्थकः—(खुशी से) आर्य ! मैं आपका दयापात्र हूं, इसलिये आप आज्ञा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अनुगृहीतोऽस्मि, तदाज्ञापयतु आर्य्यः किमनेन दासजनेन आर्य्यस्यानुष्ठातव्यम्]

चाणक्यः—भद्र ! प्रथमं तावत् वध्यस्थानं गत्वा घातकाः सरोषं दक्षिणाक्षिसङ्कोचसंज्ञां ग्राहयितव्याः, ततस्तेषु गृहीतसंज्ञेषु भयापदेशादितस्ततः प्रद्रुतेषु शकटदासो वध्यस्थानादपनीय राक्षसं प्रापयितव्यः तस्माच्च सुहृत्प्राणरक्षणपरितुष्टात् पारितोषिकं ग्राह्यं, राक्षस

आर्यः पूज्यो भवान् आज्ञापयतु निदेशं करोतु अनेन दासजनेन अनुचरेण आर्यस्य पूज्यस्य भवतः किमनुष्ठातव्यं विधातव्यम् ।

प्रथममिति । प्रथमं पूर्वं 'तावच्छब्दो वाक्यालंकारे, वध्यस्थानं प्राणदण्डप्रदानभूमिं गत्वा प्राप्य घ्नन्तीति घातकाः हिंसकाः (हन्तेर्ण्वुलि 'हनस्त' इति नस्य तत्वे रूपम्) रोषेण कोपेन सहितः सरोषः दक्षिणं च तदक्षि दक्षिणाक्षि तस्य संकोचो दक्षिणाक्षिसंकोचः सरोषश्चासौ दक्षिणाक्षिसंकोचः सरोषदक्षिणाक्षिसंकोचः स चासौ संज्ञा संकेतः सरोषदक्षिणाक्षिसंकोचसंज्ञा तां सरोषदक्षिणाक्षिसंकोचसंज्ञां ग्राहयितव्याः । प्रापयितव्याः। शकटदासशूलारोपणक्षणे मया क्रियमाणे सकोपदक्षिणनयनेषन्निमीलना (संकोच) त्मकसंकेते तं शकटदासं परित्यज्य पलायितव्यम्भवद्भिरिति संकेतयितव्या इति भावः । ततस्तदनन्तरं संकेतग्राहानन्तरमित्यर्थः । गृहीतोऽङ्गीकृतो ज्ञात इति यावत् । संकेतः संज्ञा यैस्ते गृहीतसंकेतेषु तेषु घातकेषु भयापदेशाद्भयव्याजात् इतस्ततः चतुर्दिक्षु प्रद्रुतेषु पलायितेषु सत्सु शकटदासस्तन्नामकराक्षसमित्रं वध्यस्थानात् (अपादाने पञ्चमी) प्राणदण्डदानभूमेरित्यर्थः । अपनीय पृथक्कृत्य आनीयेति यावत् । राक्षसं नन्दामात्यं प्रापयितव्यो नेतव्यः । तस्मात् सुहृदो मित्रस्य प्राणाः तेषां परिरक्षणं तेन परितुष्टः सुहृत्प्राणपरिरक्षणपरितुष्टस्तस्मात्तथोक्तात् (अपादानपञ्चम्यन्तमिदम्) पारितोषिकं हर्षसूचकद्रव्यादि

कीजिये कि यह दास कौन सा कार्य करे ।

चाणक्यः—भद्र ! पहिले तो वध्यस्थान में जाकर वहां के घातक जनों को क्रोध से दहिने नेत्र का इशारा करो, उन सब के इशारा समझ जाने और भय से इधर उधर चले जाने पर शकटदास को वध्यस्थान से लाकर राक्षस के पास पहुँचाओ और मित्रकी प्राणरक्षा से प्रसन्न राक्षस से पारितोषिक (इनाम) लो । इसके बाद कुछ दिन तक राक्षस ही के पास रहो । शत्रु के समीप रहने पर यह कार्य करना । (कान में कहता है) ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एव कञ्चित् कालं सेवितव्यः, ततः प्रत्यासन्नेषु परेषु त्वया प्रयोजनमिदमनुष्ठेयम् (कर्णे एवमेवम्) ।

सिद्धार्थकः—जं अज्जो आणवेदि त्ति [यदार्य्य आज्ञापयतीति]

चाणक्यः—शार्ङ्गरव ! शार्ङ्गरव !

शिष्यः—(प्रविश्य) उपाध्याय ! आज्ञापय ।

चाणक्यः—उच्यतां मद्वचनात् कालपाशिको दण्डपाशिकश्च, यथा वृषलः समाज्ञापयति, य एष क्षपणको जीवसिद्धिर्नाम राक्षसप्रयुक्तो विषकन्यया पर्वतेश्वरं घातितवान् ; स एनमेव दोषं प्रख्याप्य सनिकारं नगरात् निर्वास्यताम् इति !

ग्राह्यं स्वीकार्यम् । राक्षस एव नन्दामात्य एव कञ्चित्कालं कियत्समयं सेवितव्यः आश्रितव्यः, ततः सेवनानन्तरं परेषु प्रत्यासन्नेषु समीपवर्त्तिषु सत्सु त्वया भवता इदं प्रयोजनं कार्यमनुष्ठेयं कर्त्तव्यम् । कर्णे एवमेवं राक्षसप्राप्तपारितोषिकेण यत्कर्त्तव्यं यच्चाकर्त्तव्यं पञ्चमाङ्के कथयिष्यमाणसुहृद्भेदव्यापारसमूहं तत्सर्वं कथयतीत्यर्थः ।

उच्यतामिति । अस्मद्वचनान्मद्वचनाऽनुसारेण कालपाशिकः एतन्नामकः दण्डपाशिकश्चैतन्नामकश्च दूतः उच्यतामभिधीयताम् यथा वृषलश्चन्द्रगुप्तः समाज्ञापयति निदेशं करोति, य एषः क्षपणकः बौद्धसन्यासी जीवसिद्धिर्नाम तदाख्यश्चाणक्यप्रणिधिः राक्षसेन नन्दामात्येन प्रयुक्तो नियुक्तः सन् विषकन्यया पर्वतेश्वरं तदाख्यराजानं घातितवान् विनाशितवान् स जीवसिद्धिः एनमेव दोषमपवादं प्रख्याप्य-संकीर्त्य निकारेण परिभावेन सह वर्तमानं सनिकारं सतिरस्कारमिति यावत् । नगरात्पुरः निर्वास्यतां निःसार्यताम् । जीवसिद्धेः पुरो बहिष्करणं स्वकृतपर्वतेश्वरवधस्य राक्षसकृतत्वेन ख्यापनार्थं तेन जीवसिद्धिना मलयकेतुनिकटे पर्वतेश्वरो राक्षसेनैव हतो न तु चाणक्येनेति ख्यापनार्थञ्च ।

सिद्धार्थकः—आपकी जैसी आज्ञा ।

चाणक्यः—शार्ङ्गरव ! शार्ङ्गरव !!

शिष्यः—(प्रवेश कर) उपाध्याय ! आज्ञा कीजिये ।

चाणक्यः—हमारे कथनानुसार कालपाशिक और दण्डपाशिक, दोनों दूतों को कहो कि चन्द्रगुप्त आज्ञा करते हैं कि जो यह राक्षसका भेजा हुआ जीवसिद्धि नामका क्षपणक है और जिसने विषकन्या के द्वारा पर्वतेश्वर को मारा है । उसको इस दोष से तिरस्कार के साथ नगर से बाहर कर दो ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शिष्यः—तथेति (इति परिक्रामति)

चाणक्यः—वत्स ! तिष्ठ तिष्ठ, योऽयमपरः कायस्थः शकटदासो नाम राक्षसप्रयुक्तो नित्यमस्मच्छरीरमभिद्रोग्धुमिह प्रयतते, स चाप्येनं दोषं प्रख्याप्य, शूलमारोप्यतां, गृहजनश्चास्य बन्धनागारे प्रवेश्यतामिति।

शिष्यः—तथेति (इति निष्क्रान्तः)

चाणक्यः—(चिन्तां नाटयित्वा स्वगतम् ।) अपि नाम दुरात्मा राक्षसो गृह्येत ?

तथेति । यथाऽऽज्ञापयतीत्यादिः । करिष्यामीति शेषः । परिक्रामति गच्छतीत्यर्थः ।

तिष्ठ तिष्ठेति । वीप्सायां द्विरुक्तिः । यावत्पुनराज्ञापयामि तावदास्तामित्यर्थः । योऽयमपरो द्वितीयः शकटदासो नाम एतदभिधानः कायस्थः चित्रगुप्तसजातीयः राक्षसप्रयुक्तो नन्दाऽमात्यप्रेरितः सन् नित्यं प्रतिदिनं अस्माकं शरीरं अस्मच्छरीरं मत्कायमिव मौर्यमभिद्रोग्धुं विनाशयितुं प्रयतते उद्योगं करोति (अस्मच्छरीरमित्यत्र 'क्रुधद्रुहोरुपसृष्टयोरि'ति कर्मत्वेन द्वितीया) स चाऽपि शकटदासोऽपि एनं दोषमपवादं प्रख्याप्य प्रकथ्य शूलं तदाख्यं लोहनिर्मितशस्त्रविशेषमारोप्यतामारुह्यतां स्थाप्यतामिति यावत्। अस्य च शटदासस्य च गृहजनः कलत्रादिकं बन्धनागारे कारागृहे प्रवेश्यतां निक्षिप्यताम् । बन्धनागारे शकटदासगृहजनप्रवेशनफलमुत्तरत्र चतुर्थेऽङ्के 'तव च पुत्रदारैः सह समागम' इति वक्ष्यमाणराक्षसवचनेन मलयकेतुमनसि स्मृतं स्यात्पुत्रदारस्येति राक्षसस्य च चित्ते विकल्पापादनमिति ध्येयम् ।

तथेति । यथाज्ञापयति तथा करोमीत्यर्थः । निष्क्रान्तः रङ्गस्थानाद्बहिर्गत इत्यर्थः ।

चिन्तामिति । चिन्तां स्मरणं नाटयित्वा कृत्वा आत्मगतं अनतिस्पष्टं प्र-

---

शिष्यः—ऐसा ही करूंगा । (जाता है) ।

चाणक्यः—वत्स ! ठहरो २, जो यह दूसरा राक्षस का भेजा हुआ शकटदास नाम का कायस्थ है, उसको भी इसी अपराध में फांसी देदी जाय और इसके परिवार भरको कारागारमें बन्द कर दिया जाय ।

शिष्यः—ऐसा ही होगा (चला जाता है)

चाणक्यः—(चिन्तित भावसे मन ही मन)। क्या दुरात्मा राक्षस वशीभूत होगा (अर्थात् पकड़ा जायगा)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सिद्धार्थकः—अज्ज ! गहीदो [आर्य्य ! गृहीतः]

चाणक्यः—(सहर्षमात्मगतम्) हन्त ! गृहीतो राक्षसः (प्रकाशम्) भद्र ! कोऽयं गृहीतः ?

सिद्धार्थकः—गहीदो मए अज्जस्स सन्देसो, ता गमिस्सं अहं कज्जसिद्धीए [गृहीतो मया आर्य्यस्य सन्देशः, तद्गमिष्याम्यहं कार्य्यसिद्धयै]

चाणक्यः—(साङ्गुलिमुद्रं लेखमर्पयित्वा) भद्र ! सिद्धार्थक ! गम्यताम्, अस्तु ते कार्य्यसिद्धिः ।

वीतीति शेषः । दुष्टः आत्मा यस्यासौ दुरात्मा राक्षसः अपि गृह्येत वशीभूतो भवेदिति (अत्र सम्भावनायां लिङ्) ।

आर्येति । आर्य ! मान्य, गृहीतः स्वीकृतो मयेति शेषः ।

अर्थोपक्षेपकं यत्तु लीनं सविनयं भवेत् । श्लिष्टप्रत्युत्तरोपेतं तृतीयमिदमुच्यते ॥

इति दर्पणलक्षणात्तृतीयं पताकास्थानम् ।

सहर्षमिति । हर्षेणाऽऽनन्देन सह वर्तमानं सहर्षं आत्मगतं स्वगतमित्यर्थः । (क्रियाविशेषणद्वयम्) । हन्त (हर्षसूचकमव्ययमिदम्) दुर्ग्राह्यो राक्षसो वश्यो भवेन्न वेति विचारयन् चाणक्यो गृहीत इति सिद्धार्थकोक्तनिश्चितवाक्याकर्णनादतिशयानन्दयुक्तः सन् प्रकाशं सुस्पष्टं कथयतीति शेषः । भद्र ! साधो, कोऽयं गृहीतः को वशीकृत इत्यर्थः ।

गृहीत इति । आर्यस्य मान्यस्य भवतः सन्देशो वाचिकं (सन्देशवाग्वाचिकं स्यादित्यमरः) गृहीतः स्वीकृतः । तत्तस्मात्कार्यस्याऽभीष्टस्य सिद्ध्यै निष्पत्त्यै गमिस्यामि यास्यामि ।

चाणक्य इति । अङ्गुलिमुद्रया सह वर्तमानं साङ्गुलिमुद्रं लेखं पत्रमर्पयित्वा समर्प्य । भद्र ! साधो ! सिद्धार्थक ! तन्नामक गूढ़चर ! गम्यतां ते तव कार्यसि-

---

सिद्धार्थकः—आर्य ! मैंने आपका सन्देश ग्रहण किया ।

चाणक्यः—(खुशीसे मन ही मन) हर्षकी बात है, राक्षस ग्रहण कर लिया गया (जोरसे) भद्र ! यह कौन ग्रहण किया गया ?

सिद्धार्थकः—मैंने आपका सन्देश ग्रहण किया और अब कार्य सिद्धिके वास्ते जाता हूँ ।

चाणक्यः—(मुहर किया हुआ पत्र देकर) भद्र सिद्धार्थक ! जाओ, तुम्हारा कार्य सिद्ध हो ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सिद्धार्थकः-जं अज्जो आणवेदि त्ति [यदार्य्य आज्ञापयतीति] (प्रणम्य निष्क्रान्तः)

शिष्यः—(प्रविश्य) उपाध्याय ! कालपाशिको दण्डपाशिकश्च उपाध्यायं विज्ञापयतः इदमनुष्ठीयते देवस्य चन्द्रगुप्तस्य शासनमिति ।

चाणक्यः—शोभनम् । वत्स ! मणिकारश्रेष्ठिनं चन्दनदासमिदानीं द्रष्टुमिच्छामि ।

शिष्यः—यदाज्ञापयत्युपाध्यायः (इति निष्क्रम्य चन्दनदासेन सह पुनः प्रविश्य) इत इतः श्रेष्ठिन् !

द्धिरस्तु अभीष्टलाभो भवतु । (उत्तरोत्तरवाक्यैः कार्यसिद्धिबीजप्रकाशनादिदं प्रशमनम्) । मलयकेतुराक्षसेत्युभयविरोधापादनार्थं लेखरूपोपायविधानम् ।

जं अज्ज इति । आर्यो भवान् यदाज्ञापयति निदेशं करोति तथा करोमीत्यर्थः । निष्क्रान्तः रङ्गस्थानाद्बहिर्गतः ।

प्रविश्येति । रङ्गशालामित्यादिः । उपाध्याय ! आचार्य, कालपाशिको दण्डपाशिकश्चेमौ दूतौ उपाध्यायमाचार्यं भवन्तमिति शेषः विज्ञापयतः प्रार्थयतः ! देवस्य राज्ञश्चन्द्रगुप्तस्य मौर्यस्य शासनमाज्ञा अनुष्ठीयते क्रियते ।

शोभनमिति । चन्द्रगुप्तशासनप्रतिपालनं युक्तमित्यर्थः । वत्स शार्ङ्गरव ! मणिकारश्रेष्ठिनं वैश्यजातीयं चन्दनदासं राक्षससुहृदमिदानीं सम्प्रति द्रष्टुमवलोकितुमिच्छामि वाञ्छामि । अतः परं राक्षसस्य चन्द्रगुप्तमन्त्रित्वास्वीकारिणस्तदर्थं सप्तमांके करिष्यमाणोपायबीजमुपक्षेप्तव्यमित्याह—चन्दनदासमित्यादि ।

यदिति । उपाध्यायो गुरुर्भवानिति शेषः । यदाज्ञापयति निदेशं करोतीत्यभिधाय शिष्यो निष्क्रम्य रङ्गशालातो बहिर्निर्गत्य पुनर्भूयः चन्दनदासेन राक्षससुहृदा सह सार्धं प्रविश्य रङ्गशालामित्यादिः ।

सिद्धार्थकः—आपकी जैसी आज्ञा (प्रणामकर चला जाता है)

शिष्यः—(प्रवेशकर) उपाध्याय ! कालपाशिक और दण्डपाशिक ये दोनों आपसे निवेदन करते हैं कि हम दोनों चन्द्रगुप्त राजाकी आज्ञा को मानते हैं ।

चाणक्यः—अच्छा, वत्स ! मैं अभी राक्षस के मित्र वैश्यजातीय चन्दनदास को देखना चाहता हूं ।

शिष्यः—जैसी आपकी आज्ञा (यह कहता हुआ बाहर जाता है और चन्दनदास के साथ फिर प्रवेशकर) चन्दनास ! इधर इधर ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चन्दनदासः—(स्वगतम्)—

चाणक्कम्मि अअरुणे सहसा सद्दाबिदस्स लोअस्स ।
वड्ढई णिद्दोसस्स बि सङ्का किं जाददोसस्स ॥ २१ ॥

[चाणक्येऽस्मिन्नकरुणे सहसा शब्दायितस्य लोकस्य ।
वर्द्धते निर्दोषस्याऽपि शङ्का किं जातदोषस्य ॥ २१ ॥]

ता भणिदा मए धणसेणप्पमुहा तिणि वाणिजिया । जधा कदावि चाणक्कहदओ गेहं मे विचिण्णावेदि, ता अवहिदा णिव्वहध भट्टिणो अमच्चरक्खसस्स घरअणं, मह दाव जं होदि तं होदु त्ति [तद्भणिता मया धनसेनप्रमुखास्त्रयो बाणिजिका यथा कदापि चाणक्यहतको गेहं मे विचिनोति

चाणक्येऽस्मिन्निति । अविद्यमाना करुणा दया यस्यासावकरुणस्तस्मिन्नकरुणे निर्दय इति यावत् । अस्मिन् चाणक्ये कौटिल्ये (चाणक्येन अकरुणेनेति पाठोयुक्तः) सहसा अकस्मात् शब्दायितस्य (शब्दं करोति विग्रहे 'शब्दवैरकलहे'ति क्यङि ततो हेतुमण्णिजन्तात्कर्मणि क्ते इति तस्य 'निष्ठायां सेटी'ति णेर्लोपे षष्ठयेकवचने प्रयोगः) आहूतस्य लोकस्य जनस्य निर्दोषस्याऽपराधरहितस्याऽपि शङ्का भयं वर्द्धते जायते किं पुनः का कथा जातदोषस्य राक्षसकलत्ररक्षणेन सागसो ममेति शेषः । कूटनीतिचतुरचाणक्यान्तिकमुपेयुषां निरागसोऽपि 'भयोत्पत्तौ सागसस्तु सुतरां तदित्यर्थापत्तिरलंकारः । आर्या छन्दः ॥ २१ ॥

तत्तस्मात्कारणात् निजस्य स्वस्य निदेशः शासनम् तस्मिन् संस्थिता विद्यमाना निजनिदेशसंस्थितास्त्रयो वाणिजिका वाणिज्यव्यापारिण इत्यर्थः । धनसेनः प्रमुख आदिर्येषान्ते धनसेनप्रमुखा धनसेनप्रभृतयो मया भणिताः कथिताः केनापि कस्मिंश्चिदपि काले चाणक्यो हतकश्चाणक्यहतकः, ('कुत्सितानि कुत्सनैरि'ति समासः) मे मम गेहं भवनं विचिनोति मार्गयति परीक्षते इति यावत् । तस्मात्कारणाद्भर्त्तुः

चन्दनदासः—(मन ही मन):—

इस निर्दयी चाणक्यसे बुलाये जानेवाले निरपराध पुरुषको भी भय होता है, फिर अपराधी पुरुषकी तो वात ही क्या है ॥ २१ ॥

इसीलिये मैंने धनसेन आदि तीन व्यापारी बनियों से कह दिया है कि जबतक दुष्ट चाणक्य मेरे घरकी तलाशी न ले तबतक स्वामी मन्त्रिराक्षस के कुटुम्बवर्ग को सावधानी के साथ मेरे घरसे दूसरी जगह ले जाओ, मुझे जो होता हो सो हो ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तदवहिता निर्वहत भर्त्तुः अमात्यराक्षसस्य गृहजनं मम तावत् यद्भवति तद्भवतु इति]

शिष्यः—भोः श्रेष्ठिन् ! इत इतः ।

चन्दनदासः—अअं आगदोह्मि [अयमागतोऽस्मि] (उभौ परिक्रामतः)

शिष्यः—उपाध्याय ! अयं श्रेष्ठी चन्दनदासः ।

चन्दनदासः—(उपसृत्य) जेदु जेदु अज्जो [जयति जयत्यार्य्यः]

चाणक्यः—(नाट्येनावलोक्य) भोः श्रेष्ठिन् । स्वागतम् ? इदमासनमास्यताम् ।

चन्दनदासः—(प्रणम्य) किं ण जाणादि अज्जो, जहा अणुचिदो उवआरो परिहवादोषि महन्तं दुःखमुप्पादेदि, ता इह ज्जेव्व अहं

स्वामिनोऽमात्यराक्षसस्य गृहजनं कलत्रादिकम् अवहिताः सावधानाः सन्तः यूयमिति शेषः निर्वहत निष्कासयत मदन्तःपुरादन्यस्थानं नयतेति यावत् मम यद्भवति तद्भवतु ।

अयमिति । अयमहमागतः प्राप्तोऽस्मि भवामि । उभौ परिक्रामतः शिष्यचन्दनदासावागच्छतः ।

उपसृत्येति । समीपमागत्येत्यर्थः । आर्यो मान्यो भवान् जयति सर्वोत्कर्षेण वर्तताम् ।

नाट्येनेति । नटोचितव्यापारविशेषेण, अवलोक्य दृष्ट्वा, भोः श्रेष्ठिन् चन्दनदास ! स्वागतं सुष्ठु आगमनं ते भवतु इदं साक्षाद्दृश्यमानम् आस्यतेऽस्मिन्नित्यासनम् । आस्यतामुपविश्यताम् । (एतदादि चन्दनदासातिसन्धानार्थं परिहासवचनं नर्म) ।

प्रणम्येति । प्रणामं कृत्वेत्यर्थः । आर्यो मान्यो भवानिति शेषः, किं न जा-

---

शिष्यः—चन्दनदास ! इधर २ ।

चन्दनदासः—मैं चल रहा हूँ । (दोनों जाते हैं)

शिष्यः—उपाध्याय ! चन्दनदास वैश्य उपस्थित है ।

चन्दनदासः—(समीप जाकर) आपकी जय हो ।

चाणक्यः—(विचित्र ढंग से देखकर) चन्दनदास ! यहां आओ, इस आसन पर बैठो ।

चन्दनदासः—(प्रणाम कर) आप क्या नहीं जानते कि अनुचित सत्कार

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उचिदाए भूमीए उवविसामि [किं न जानाति आर्य्यः, यथाऽनुचित उपचारः (अत्र "सहिदअस्स" इत्यधिकपाठे—"सहृदस्य" इति सं०) परिभवादपि महद्दुःखमुत्पादयति, तद् इहैव अहमुचितायां भूमावुपविशामि]

चाणक्यः—भोः श्रेष्ठिन् ! मा मैवम्, उचितमेवैतत् अस्मद्विधैः सह भवतः, तदुपविश्यतामासन एव ।

चन्दनदासः—(स्वगतम्) उपलक्खिदमणेण किम्पि (प्रकाशम्) जं अज्जो आणवेदि त्ति [उपलक्षितमनेन किमपि । यदार्य्य आज्ञापयति इति] (उपविष्टः) ।

चाणक्यः—भोः श्रेष्ठिन् ! चन्दनदास ! अपि प्रचीयन्ते संव्यवहाराणां वृद्धिलाभा वः ?

नाति न ज्ञायते यदनुचित उपचारः, अयुक्तोऽभ्यर्थनादिरूपसत्कारः परिभवादपि तिरस्कारादपि महद्दुःखं बहुतरक्लेशमुत्पादयति जनयति तत्तस्माद्धेतो अहम् इहैवात्रैवोचितायां योग्ययां भूमौ पृथिव्यामुपविशामि ।

भोः श्रेष्ठिन्निति । भो चन्दनदास, एवमुचितायां भूमावित्येव वचनं मा मा (वीप्सायां द्विरुक्तिः) वदेति शेषः । अस्मद्विधैर्मादृशैः सह सार्धं भवतस्तव, एतदुपचारकरणमुचितमेव युक्तमेव (सम्भावितमेवेदमिति पाठे एतदुपचारकरणं सम्भावितमेवेत्यर्थः) एतदुपचारकरणं सम्भावितमेवेति बहिरुपचारः परिभवकरणन्तु निगूढ आशयः ।

स्वगतमिति । अनतिस्पष्टं (क्रियाविशेषणमिदम्) ब्रवीतिति शेषः । अनेन चाणक्येन किमपि ममापराधादिकमुपलक्षितं ज्ञातं अस्मद्विधैरित्यादि यदुक्त्या तथा प्रतीतिरिति भावः ।

अपीति । प्रश्नार्थकोऽत्राऽपिः । वो युष्माकं संव्यवहाराणां क्रयविक्रयात्मकवाणिज्यानां वृद्धिलाभाः प्रचीयन्ते वर्द्धन्ते किमित्यर्थः ।

साधारण दुःखसे भी महान् दुःख देनेवाला होता है ? इसलिये मैं इसी जगह पर बैठता हूँ ।

चाणक्यः—चन्दनदास ! ऐसा मत कहो, हमलोगों के साथ आपका यह बर्ताव उचित ही है, इसलिये आसन पर ही बैठो ।

चन्दनदासः—(मन ही मन) ज्ञात होता है कि इसने मेरे अपराध को जान लिया है (जोरसे) जो आप की आज्ञा (बैठ जाता है) ।

चाणक्यः—चन्दनदास ! तुम्हारा व्यवसाय तो उन्नति पर है न ?

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चन्दनदासः—(स्वगतम्) अच्चादरो संकणीओ (प्रकाशम्) अज्ज ! अध इं, अज्जस्स पसाएण अखण्डिदा मे वाणिज्जा [आर्य्य ! अथ किम् , आर्य्यस्य प्रसादेन अखण्डिता मे वाणिज्याः]

चाणक्यः—भोः श्रेष्ठिन् ! अपि कदाचित् चन्द्रगुप्तदोषा अतिक्रान्त-पार्थिवगुणान् अधुना स्मारयन्ति प्रकृतीः ?

चन्दनदासः—(कर्णौ पिधाय) सन्तं पावं । सारअणीसासमुग्गदेण बिअ पुणिमाचन्देण चन्दसिरिणा अधिअं णंदन्ति पइदिओ [शान्तं पापं, शारदनिशासमुद्गतेनेव पूर्णिमाचन्द्रेण चन्द्रश्रियाधिकं नन्दन्ति प्रकृतयः]

स्वगतमिति । सर्वैरश्राव्यं यथा तथा वदतीति शेषः, अत्यादरोऽतिशय-सत्कारः शंकनीयोऽनिष्टसूचकः । प्रकाशं सर्वैः श्राव्यम् , आर्यस्य भवतः प्रसादेन मे मम वाणिज्या वणिजां कर्माणि अखण्डिता निष्प्रत्यूहाः सन्तीति शेषः । (वाणिज्यं तु वणिज्या स्यादित्यमरः) ।

अपि कदाचिदिति । चन्द्रगुप्तस्य दोषाश्चन्द्रगुप्तदोषा मौर्यापराधाः अति-क्रान्ता अतीताः पार्थिवानां राज्ञां गुणास्तानतिक्रान्तपार्थिवगुणान् अतीतनन्द-प्रभृतिनृपगुणानित्यर्थः । अधुना साम्प्रतं कदाचित् कस्मिंश्चित्काले प्रकृतीः प्रकृति-भिरित्यर्थः स्मारयन्त्यपि किमित्यर्थः । स्मरतेर्ज्ञानसामान्यवाचित्वेन 'गतिबुद्धी'ति कर्मत्वेन प्रकृतीरिति द्वितीयान्तमिति केचित् । वस्तुतस्तु स्मरणस्य ज्ञानवि-शेषवाचित्वेन ज्ञानसामान्यवाचित्वाऽभावेन कर्मत्वाऽप्राप्त्या कवेर्निरङ्कुशतयोक्त-प्रयोगः ।

कर्णौ पिधायेति । श्रोत्रे कराभ्यामाच्छाद्येत्यर्थः । अपिपूर्वकाद्दधातेर्ल्यपि

वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः । आपं चैव हलन्तानां यथा वाचा निशा दिशा ॥

इत्यपेरकारलोपे पिधायेति प्रयोगः । शान्तं पापमवाच्यमित्यर्थः ।

'शान्तं पापमनिर्देश्ये' ।

चन्दनदासः—(मनहा मन) इस तरह अधिक आदर अनिष्टसूचक है ? (जोर से) आर्य ! और क्या, आपकी कृपा से मेरा व्यापार अच्छी तरह से चलता है ।

चाणक्यः—चन्दनदास ! क्या कभी-कभी राजा चन्द्रगुप्त के दोष और भूतपूर्व राजा नन्द के गुणों को प्रजा स्मरण करती है ?

चन्दनदासः—(दोनों कानों को ढाककर) ऐसा न कहिये । शरद् कालीन पूर्णिमा के चन्द्रमा की तरह चन्द्रगुप्त से प्रजा बहुत प्रसन्न है ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चाणक्यः—भो श्रेष्ठिन् ! यद्येवं, प्रीताभ्यः प्रकृतिभ्यः प्रियमिच्छन्ति राजानः ।

चन्दनदासः—आणवेदु अज्जो । किं कित्तिअं वा अत्थजादं इमादो इच्छीअदित्ति [आज्ञापयतु आर्य्यः किं कियद्वा अर्थजातमस्माज्जनादिष्यत इति]

चाणक्यः—भोः श्रेष्ठिन् ! चन्द्रगुप्तराज्यमिदं, न नन्दराज्यं, यतो नन्दस्यैवार्थरुचेरर्थसम्बन्धः प्रीतिमुत्पादयति, चन्द्रगुप्तस्य तु भवतामपरिक्लेश एव ।

इत्युक्त्या नाट्ये अश्राव्यश्रवणे शान्तं पापमिति प्रयोगः । शरदि भवा शरदी सा चासौ निशा चेति शारदनिशा तत्र समुद्गतेनोदितेन पूर्णिमाचन्द्रेण पौर्णमासीन्दुना इव चन्द्रश्रिया चन्द्रगुप्तेन (इयमनुगुणोद्घाटनार्था प्रीतिर्नर्मस्तुतिरष्टममङ्गम्) अधिकमतिशयं प्रकृतयः प्रजाः नन्दन्ति मोदन्ते ।

यद्येवमिति । चन्द्रगुप्तेऽधिकानुरागसत्वे इत्यर्थः प्रीताभ्यः प्रसन्नाभ्यः प्रकृतिभ्यः प्रजाभ्यः राजानो नृपतयः प्रियमिष्टमिच्छन्ति कामयन्ते ।

आज्ञापयत्विति । आर्यो मान्यो भवानिति शेषः । आज्ञापयतु निदेशं करोतु कियत् किंपरिमाणमर्थजातं धनादिकम् , मत्तः किमर्थ्यत इति भावः । (इयं राजानुरागहेतुर्वाक्यरचनोपन्यासः ।) ।

श्रेष्ठिन्निति । भो चन्दनदास ! इदं राज्यं राष्ट्रम् चन्द्रगुप्तस्य वृषलस्य न तु नन्दस्य तदाख्यनृपतेः, अर्थे धने रुचिरभिप्रीतिर्यस्य तस्यार्थरुचेः धनाभिलाषिणो नन्दस्य तदाख्यनृपतेरेव अर्थेन सम्बन्धः सम्पर्कः प्रीतिं हर्षमुत्पादयति जनयति चन्द्रगुप्तस्य मौर्यस्य तु भवतां युष्माकमपरिक्लेशो दुःखाऽभाव एव प्रीतिमुत्पादयतीत्यर्थः । धनाकांक्षिणो धनागमेन सुखं तादृशस्तु नन्द एवेति तस्यैव धनग्रहणं प्रीतिजनकं मौर्यस्य तु धनाकांक्षित्वाऽभावात्प्रकृतिसुखेनैव सुखमिति भावः ।

चाणक्यः—चन्दनदास ! यदि ऐसी बात है तो राजा प्रसन्न प्रजा से किसी प्रियवस्तु की इच्छा करता है ।

चन्दनदासः—आप आज्ञा कीजिये, महाराज क्या वस्तु और कितना धन हम से चाहते हैं ।

चाणक्यः—चन्दनदास! यह चन्द्रगुप्त का राज्य है, नन्द का राज्य नहीं । क्योंकि धन के लोभी नन्द ही को प्रजा से धन लेना भाता था । चन्द्रगुप्त को तो आपलोगों को क्लेश न होना ही प्रसन्नता का साधक है ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चन्दनदासः—(सहर्षम्) अज्ज ! अणुग्गहीदोह्मि [आर्य्य ! अनुगृहीतोऽस्मि]

चाणक्यः—भोः श्रेष्ठिन् ! स चापरिक्लेशः कथमाविर्भवतीति न पुनः प्रष्टव्याः स्मो भवता ।

चन्दनदासः—आणवेदु अज्जो [आज्ञापयत्वार्य्यः]

चाणक्यः—संक्षेपतो राजनि अविरुद्धाभिर्वृत्तिभिर्वर्त्तितव्यम् ।

चन्दनदासः—अज्ज ! को उण अधण्णो, अज्जेण अवगच्छीअदि [आर्य्य ! कः पुनरधन्य आर्य्येणावगम्यते ?] ("जोराअरुद्धोत्ति" इति पाठे-

---

सहर्षमिति । सानन्दं यथा तथा कथयतीति शेषः । आर्य ! मान्य, अनुगृहीतोऽस्मि भवदीयाऽनुग्रहेण कृतार्थोऽस्मीत्यर्थः । धनानभिलाषित्वकथनेनोदात्ताशयमौर्यान्निजक्षतिविरहस्मरणेन चन्दनदासः सहर्षः ।

ननु अन्यधर्मस्याक्लेशस्यान्येन बोद्धुमशक्यत्वाद्व्यंजकहेतुनैव तदवगम इति दर्शयति—स चेति स चापरिक्लेशः क्लेशाऽभावः कथं केन प्रकारेणाऽऽविर्भवति जायतेऽभिव्यक्तो भवतीति यावत् इति तदभिव्यक्तिप्रकारो भवता वयं न प्रष्टव्याः जिज्ञासितव्याः स्मोऽपि तु प्रष्टव्या एव । ननु इति पाठे प्रकृतिदुःखाऽभावसूचको हेतुः प्रष्टव्य एवेत्यर्थः ।

क्लेशाऽभावहेतुजिज्ञासार्थं चाणक्येन नियोजितश्चन्दनदासो जिज्ञासते—आज्ञापयत्विति । को हेतुरपरिक्लेशव्यञ्जक इति कथयतु भवानिति भावः ।

संक्षेपत इति । संक्षेपतः समासतोऽविस्तरत इति यावत । राजनि नृपतौ अविरुद्धाभिरनुकूलाभिर्वृत्तिभिर्व्यवहारैर्वर्त्तितव्यं स्थातव्यं भवद्भिरिति शेषः । राजन्यनुकूलव्यवहार एवाऽपरिक्लेशव्यञ्जको विरुद्धाचरणं तु क्लेशव्यञ्जक इति भावः ।

आर्येति । आर्य ! मान्य, कः पुनरधन्यो भाग्यहीनः आर्येण पूज्येनभव-

---

चन्दनदासः—(खुशी से) आर्य ! मैं आपकी दया से कृतार्थ हूँ ।

चाणक्यः—चन्दनदास ! प्रजा को क्लेश न हो, यह किस तरह हो सकता है यह बात आपने मुझसे नहीं पूछी ।

चन्दनदासः—आप आज्ञा कीजिये ।

चाणक्यः—संक्षेप में यह कहा जा सकता है कि प्रजाको राजा के विरुद्ध व्यवहार नहीं करना चाहिये ।

चन्दनदासः—आर्य ! फिर आप किस अभागे को राजाके विरुद्ध समझते हैं ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यो राजविरुद्धः । "राअ" इत्यत्र "राणि" "राणा" इति च क्वचित् पाठः । "राज्ञि" राजविषये" "राज्ञा सह" वा इति सं०)

चाणक्यः—भवान् एव तावत् प्रथमः ।

चन्दनदासः—(कर्णौ पिधाय) सन्तं पावं सन्तं पावं, कीदिसो तिणाणं अग्गिणा सह विरोहो [शान्तं पापं शान्तं पापं, कीदृशस्तृणानामग्निना सह विरोधः ?]

चाणक्यः—अयमीदृशो विरोधो, यत् त्वमद्यापि राजापथ्यकारिणोऽमात्यराक्षसस्य गृहजनं स्वगृहमभिनीय रक्षसि ।

चन्दनदासः—अज्ज ! अलीअं एदं केणावि अणज्जेण अज्जस्स णिवेदिदं [आर्य्य ! अलीकमेतत् , केनापि अनार्य्येण आर्य्यस्य निवेदितम्]

ताऽवगम्यते ज्ञायते ।

भवानेवेति । तावच्छब्दो वाक्यालंकारे प्रथमं पूर्वं भवानेवाऽधन्योऽवगम्यते मयेति शेषः । (इदं प्रतिमुखनिष्ठुरवचनं वज्रम्) ।

कर्णौ पिधायेति । श्रोत्रे आच्छाद्य, शान्तं पापमवाच्यमित्यर्थः । तृणानां शष्पानामग्निना पावकेन सह कीदृशः क इव विरोधो विद्वेषः । नैव विरोधः सम्भवतीत्यर्थः । यथा नाग्निना सह तृणविरोधसम्भवस्तथा राज्ञा सह ममेति भावः । अत्राऽप्रस्तुतप्रशंसालंकारः । दृष्टान्तालंकार इति केचित् ।

अयमिति । पथोऽनेपतं पथ्यमिष्टं न पथ्यमपथ्यमनिष्टम् राज्ञोऽपथ्यं करोति तच्छीलो राजाऽपथ्यकारी तस्य राजाऽपथ्यकारिणो नृपाऽनिष्टविधायिनरे आमात्यराक्षसस्य राक्षसनाम्नो मन्त्रिणो गृहजनं कलत्रादिकं स्वगृहमभिनीय स्वभवने स्थापयित्वा रक्षसि त्रायसे । प्राक् नगरान्निष्क्रमणकाले रक्षणस्यौचित्येऽपि सम्प्रति मलयकेतोराश्रयणेन मौर्यानिष्टविधानक्षणे तत्कलत्रावनस्य नौचित्यमिति भावः ।

आर्येति । आर्य ! मान्य, एतत् चन्दनदासो राक्षसकलत्रमवतीति वृत्तमली-

---

चाणक्यः—पहले तो आप ही हैं ।

चन्दनदासः—(कानों को ढांपकर) ऐसा न कहिये २ । तृणका अग्नि के साथ कैसे विरोध हो सकता है ।

चाणक्यः—ऐसा विरोध कि तुम अभीतक राजा के विरोध करने वाले मन्त्री राक्षस के कुटुम्बियों को अपने घरमें छिपाये हो ।

चन्दनदासः—आर्य ! यह बात झूठी है, किसी दुष्टने आप को धोखा दिया है ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चाणक्यः—भोः श्रेष्ठिन् ! अलमाशङ्कया, भीताः पूर्वराजपुरुषाः पौराणामनिच्छतामपि गृहेषु गृहजनं निक्षिप्य देशान्तरं व्रजन्ति ततस्तत्प्रच्छादनमेव दोषमुत्पादयति ।

चन्दनदासः—एव्वं णेदं । तस्सिं समये आसी अह्मघरे अमच्चरक्खसस्स घरअणो [एवं नु इदम् । तस्मिन् समये आसीदस्मद्गृहे अमात्यराक्षसस्य गृहजनः]

चाणक्यः—प्रथमम् अनृतम्, इदानीम् आसीदिति परस्परविरोधिनी वचने ।

कश्मिथ्या केनापि अनिर्दिष्टनाम्नाऽनार्येणाऽसाधुना पुरुषेणेति शेषः । आर्यस्य (शेषत्वेन विवक्षया षष्ठी) आर्यायेत्यर्थः । निवेदितं कथितम् ।

अलमिति । आशङ्कया भयेनालं व्यर्थमसाध्यमिति यावत् (अत्र 'गम्यमानापि क्रिया कारकविभक्तौ प्रयोजिके'त्यनेन तृतीया) पूर्वाश्च ते राजानः पूर्वराजानस्तेषां पुरुषाः पूर्वराजभृत्या इत्यर्थः । भीता भययुक्ताः सन्तः अनिच्छतामनभिलषतामपि पौराणां पुरवासिनां गृहेषु सद्मसु नृपजनं कलत्रादिकं निक्षिप्य स्थापयित्वा देशान्तरमन्यदेशं व्रजन्ति गच्छन्ति तत्प्रच्छादनमेव तस्य गृहजनस्य गोपनमेव दोषमनिष्टमुत्पदयति जनयति ।

एवमिति । नु भोः यदुक्तमार्येण निजगृहनिक्षिप्तराक्षसकलत्रगोपनं दोषजनकमिदमेवं युक्तमित्यर्थः । तस्मिन् समयेऽस्मद्गृहे मद्भवने अमात्यराक्षसस्य गृहजनः कलत्रादिकमासीदवर्तत ।

प्रथममिति । प्रथमं पूर्वमनृतमलीकमिदानीं सम्प्रति आसीदवर्ततेति वचने वाक्ये परस्परमन्योऽन्यं विरुन्ध इति परस्परविरोधिनी विरुद्धे । प्रागलीकमेतदित्वादिना राक्षसगृहजनाऽनिष्टोत्पत्तिभिया स्वगृहे तत्स्थित्यभावः प्रतिपादितः सम्प्रति

चाणक्यः—चन्दनदास ! सन्देह मत करो । डरे हुए पूर्वराजा के नौकर नहीं चाहनेवाले भी पुरवासियों के घरमें कुटुम्बवर्ग को रखकर देशान्तर चले जाते हैं, इस कारण उनका रखना ही दोष का सूचक होता है ।

चन्दनदासः—श्रीमान् ! आपका यह कहना ठीक है । पहिले हमारे घरमें मन्त्रि राक्षस के कलत्रादि थे ।

चाणक्यः—तुमने पहिले कहा कि यह बात झूठी है । अब कहते हो कि पहिले थे, यह दोनों वचन विरुद्ध मालूम होते हैं ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चन्दनदासः—एत्तिअं ज्जेव अत्थि मे वाआच्चलं [एतावदेवास्ति मेवाक्छलम्]

चाणक्यः—भोः श्रेष्ठिन् ! चन्द्रगुप्ते राजनि न परिग्रहः छलानां, तत् समर्पय राक्षसस्य गृहजनमच्छलं भवतु भवतः ।

चन्दनदासः—अज्ज णं विण्णवेमि, तस्सिं समय आसी अह्मघरे अमच्चरक्खसस्स घरअणो त्ति ! [आर्य ! ननु विज्ञापयामि, तस्मिन् समये आसीदस्मद्गृहे अमात्यराक्षसस्य गृहजन इति]

चाणक्यः—अथ इदानीं क्व गतः ?

चन्दनदासः—ण जाणामि कहिं गदो त्ति [न जानामि कुत्र गत इति]

चाणक्यः—(स्मितं कृत्वा) कथं न ज्ञायते नाम ? भोः श्रेष्ठिन् !

तत्प्रच्छादनमनिष्टोत्पादकमित्यवगत्य तस्मिन् समये आसीदित्युक्त्या प्राक् तत्स्थितिप्रतिपादनादिदं त्वदीयं परस्परमसङ्गतमिति भावः ।

एतावदेवेति । एतावत् पूर्वाऽपरविरोधरूपं मे मम वाक्छलं वाचि वचने छलं व्याजो न तु यथार्थतस्तत्कृतनिह्नवात्मको मन्तुरिति भावः ।

चन्द्रगुप्त इति । चन्द्रगुप्ते मौर्ये राजनि शासके सति छलानां व्याजानां परिग्रहोऽवकाशो न नास्तीत्यर्थः, तत्तस्माद्धेतोः राक्षसस्य नन्दामात्यस्य गृहजनं पोष्यवर्गं समर्पय देहि भवतस्तवाच्छलमकापट्यं भवतु अस्तु अमात्यराक्षसकलत्रादिसमर्पणेन निष्कपटो भवत्विति भावः ।

स्मितं कृत्वेति । ईषद्विहस्येत्यर्थः । कथं केन प्रकारेण न ज्ञायते नाऽवगम्यते । भो श्रेष्ठिन् ! चन्दनदास ! शिरसि मूर्द्धिन फणास्त्यस्यासौ फणी सर्पोऽस्तीति शेषः (अनेन दर्शनमात्रेणैव विनाशसम्भावना ध्वन्यते) तस्य फणिनः प्रतीकारो निवृत्त्युपायस्तत्प्रतीकारोऽतिदूरेऽत्यसन्निहिते वर्तत इति शेषः । चन्द्रगुप्तप्रतिकूलेन राक्षसेन सह मैत्रीकरणात (तद्गृहजनरक्षणाद्वा) असह्यपराक्रमो नृपदण्ड उपस्थि-

---

चन्दनदासः—हमारे वचन में यही तो ऐब है ।

चाणक्यः—चन्दनदास ! चन्द्रगुप्त राजा के रहने पर ऐब करना अनिष्टकारी है । इसलिये राक्षस के कुटुम्बवर्ग को देकर तुम निर्दोष हो जाओ ।

चन्दनदासः—आर्य ! मैं कहता हूँ कि पहिले मेरे घरमें मन्त्रिराक्षस के कुटुम्बी थे ।

चाणक्यः—अब कहाँ गये ?

चन्दनदासः—मैं नहीं जानता कि कहाँ गये ।

चाणक्यः—(हँस कर) क्यों नहीं जानते ? चन्दनदास ! सिर पर सर्प सवार है,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

शिरसि फणी दूरे तत्प्रतीकारः । अन्यच्च नन्दमिव विष्णुगुप्तः—"

(अर्द्धोक्तौ लज्जां नाटयति)

चन्दनदासः—(स्वगतम्)—

उवरि घणं घणरडिअं दूरे दइया किमेददावडिअम् ।
हिमवदि दिव्वोसहिओ सीस्से सप्पो समाविट्टो ॥ २२ ॥

[उपरि घन घनरटितं दूरे दयिता किमेतदापतितम् ।
हिमवति दिव्यौषधयः शीर्षे सर्पः समाविष्टः ॥२२॥]

तः समलयकेतुरमात्यराक्षसश्चन्द्रगुप्तं विनाश्य नृपदण्डवारणं करिष्यतीति प्रतीकारोऽतिदूरे दूरवर्त्ती संशयापन्न एवेति भावः । अप्रस्तुतशिरसि फणीति प्रतिपादनेन प्रस्तुतसन्निहितराजदण्डरूपार्थावगमादत्राऽप्रस्तुतप्रशंसालंकारः ।

अन्यच्चेति । अपरविधं भयं दर्शयति—यथा विष्णुगुप्तश्चाणक्यो नन्दं नवनन्दान् तथैव मौर्यस्वामिति भावः । (नन्देति जातावेकवचनम्) स्वकर्तृकनन्दविनाशस्योपमानत्वेन स्वेनैवाऽभिधानादयुक्तमिति चाणक्यो लज्जितः ।

ननु सहृदयराक्षसगृहजनागोपनेन पापाऽधिक्याद्गोपनेन तु राजदण्डावाप्तिसम्भवादित्थं विपत्प्राप्तौ किं विधेयमिति चिन्तां सूचयनाह-उपरीति । उपरि उद्र्ध्वं विहायसीति यावत् । घनं निविडं सान्द्रमिति यावत् घनस्य मेघस्य रटितं स्तनितमतिघोरगर्जितमित्यर्थः । श्रूयत इति शेषः । एतत्किमापतितं प्राप्तम् घनगर्जनस्य कामोद्दीपकत्वेन विरहिजनासह्यत्वेन च प्रियाविरहितस्य मम तामन्तरैतत्समयक्षेपणाऽसम्भवादवसानं प्राप्तमिति तात्पर्यम् । अमुमेवाऽर्थं दृष्टान्तद्वारा प्रदर्शयति—शीर्षे शिरसि फणी सर्पः समाविष्टो दंशनार्थं समुपागतः, दिव्यौषधयस्तत्प्रतीकारोपायभूतोत्तमभेषजानि हिमवति हिमालये सन्तीति शेषः । मृत्युरोगस्योपस्थितत्वात्तन्निवर्त्तकौषधस्याऽसान्निध्यात्प्रतीकाराऽसम्भवेनावश्यं मे मृत्युर्भविष्यतीति भावः । एतत्पद्यप्रतिपाद्याऽप्रस्तुतेन सन्निहितश्चाणक्यदण्डो दूरस्थस्तत्प्रतीकारो राक्षसादिति प्रस्तुतावगमादप्रस्तुतप्रशंसाऽलंकारः ।

किन्तु उसका उपाय दूर है और नन्द की तरह चाणक्य……(आधी ही बात कहकर लज्जित हो जाता है)

चन्दनदासः—(मनही मन):—

आकाश में मेघ का घोर गर्जन हो रहा है, स्त्री दूर है. यह क्या हुआ ? दिव्य औषधियां हिमालय पर हैं और सर्प सिरपर बैठा हुआ है ॥ २२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चाणक्यः—चन्द्रगुप्तममात्यराक्षसः समुच्छेत्स्यतीति मैवं मंस्थाः ! पश्य,—

विक्रान्तैर्नयशालिभिः सुसचिवैः श्रीवक्रनासादिभिः
नन्दे जीवति, या तदा न गमिता स्थैर्य्यं चलन्ती मुहुः ।

"अप्रस्तुतात्प्रस्तुतं चेद्गम्यते पञ्चधा ततः । अप्रस्तुतप्रशंसा स्यात् ……" इति दर्पणधृतलक्षणात् । केचित्त्वित्थमलंकारमत्र योजयन्ति, तथा हि- घनस्तनिताद्युत्कण्ठावद्विरहिणः प्रियाऽसान्निध्याद्दुःखापनोदनाभावात्मकाऽप्रस्तुतेन चन्दनदासकर्तृकराक्षसगृहजनप्रदानतश्चाणक्यप्रतीत्यभावात्मकप्रस्तुतावगमादप्रस्तुतप्रशंसालंकारः । स च शिरःस्थफणिनो हिमवतो भेषजानयनमिव सन्निहितराजदण्डस्य मम राक्षसप्रतीकारोऽसम्भव इति विम्बप्रतिविम्बभावावगमात् दृष्टान्तालंकारेण संकीर्णः । एतल्लक्षणं यथा साहित्यदर्पणे—

दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम् । इति(१) ॥ २२ ॥

चन्द्रगुप्तमिति । भोः श्रेष्ठिन् ! अमात्यराक्षसो नन्दप्रधानसचिवः चन्द्रगुप्तं मौर्यं समुच्छेत्स्यति समुन्मूलयिष्यतीति मैवं मंस्थाः मैवं जानीहि ।

विक्रान्तैरिति । नन्दे तदाख्ये नृपे जीवति विद्यमाने सति (जातावेकवचनम्) नवनन्देषु जीवत्सु सत्स्वित्यर्थः । मुहुरसकृत् चलन्ती निन्दितनृपत्याश्रयणादस्थिरा या श्रीः राज्यलक्ष्मीः विक्रान्तैः पराक्रमिभिः शक्तिमद्भिरिति यावत् (नयेन (नीत्या शालन्ते शोभन्ते इति नयशालिनः 'सुप्यजाता'विति णिनिः) तैर्नयशालिभिर्नीतिज्ञैः सुसचिवैः सुमन्त्रिभिः वक्रनासादिभिर्वक्रनासप्रभृतिभिः प्रधानपुरुषैरिति शेषः । स्थैर्यं नैश्चल्यं न गमिता न प्रापिता न स्थिरीकृतेति यावत् । एकत्वं स्थिरत्वं नैश्चल्यमित्यर्थः । उपागतां प्राप्तां जगद्विश्वं प्रह्लादयन्तीं भासयन्तीं द्युतिमिव ज्योत्स्नामिव तां श्रियं राजलक्ष्मीं चन्द्रात्सुधांशोरिव चन्द्रगुप्तनृपतेः वृषलभूपतेः ('पृथग्विने'ति पञ्चमी) पृथक् भिन्नां दूरस्थामिति यावत् । कर्तुं विधातुं को जनो

चाणक्यः—मन्त्रिराक्षस चन्द्रगुप्त को मार डालेगा, ऐसा मत समझो । देखोः—

नन्दराजा के जीवित रहते पराक्रमी और नीति को जाननेवाले वक्रनास आदि मुख्यमन्त्रियों द्वारा बारम्बार चलायमान भी राज्यलक्ष्मी स्थिर न की जा सकी ।

---

(१) यथा कामोद्दीपकघनगर्जनस्याऽतिसान्निध्येन तत्प्रतीकारभूतदयिताया असान्निध्याद्विरहिणो मरणं यथा चौषधेरसान्निध्याच्छिरसि दष्टस्य मरणं तथाऽमात्यराक्षसस्याऽसामीप्यादुपस्थितचाणक्यदुष्टशासनाक्रान्तस्य मे मरणमवश्यं भावीति भावः ॥ २२ ॥

 Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तामेकत्वमुपागतां द्युतिमिव प्रह्लादयन्तीं जगत्
कश्चन्द्रादिव चन्द्रगुप्तनृपतेः कर्तुं व्यवस्येत् पृथक् (१) ॥ २३ ॥

अपि च—(आस्वादितेत्यादि प्रागुक्तं [२० पृष्ठस्य श्लोकं] पठति)।

चन्दनदासः—(स्वगतम्) फलेण संपादिदं सोहदि दे विकत्थिदं ।
[फलेन सम्पादितं शोभते ते विकत्थितम्]

(नेपथ्ये कलकलः)

व्यवस्येत् प्रयतेत न कोऽपि पृथक्कर्तुं शक्नुयादित्यर्थः । कुनृपाश्रितत्वादस्थिरायाः यस्या राजश्रियो नन्दसद्भावे स्थैर्यं न सम्पादितवन्तो वक्रनासादयस्तस्याश्चन्द्रगुप्ताश्रितायाः श्रियो मयि विद्यमाने को जनः पार्थक्यविधायी न कोऽपीति भावः । उपमानवाचकद्युति-चन्द्रशब्दयोरुपमेयवाचकश्री-चन्द्रगुप्तशब्दयोश्च, सामान्यधर्मस्य जगत्प्रह्लादकत्वस्यौपम्यवाचकेवशब्दस्य चोपादानादत्र श्रौतीपूर्णोपमालङ्कारः । लक्षणं यथा साहित्यदर्पणे —

सा पूर्णा यदि सामान्यधर्म औपम्यवाचि च । उपमेयं चोपमानं भवेद्वाच्यमियं पुनः॥
श्रौती यथेववाः शब्दाः इत्यादि

लाटी रीतिः । ओजोगुणः । वीरो रसः । शार्दूलविक्रीडितं छन्दः ॥ २३ ॥

आस्वादितेति । आस्वादितद्विरदशोणितशोणशोभामित्यादि पूर्वोक्तं पद्यं वीररससूचकं पुनः पठतीत्यर्थः । इदं स्वामिस्नेहाऽभिव्यक्तियुक्तवचनं पुष्पम् ।

फलेनेति । फलेन कार्येण सम्पादितं ते तव विकत्थितमात्मश्लाघा शोभते दीप्यते । सम्वादितमिति पाठे प्रकटितमित्यर्थः ।

नेपथ्य इति—नेपथ्ये वेषरचनालये कलकलः मौर्याज्ञया जीवसिद्धिनिष्कास-

---

तब इस समय संसार को प्रकाशित करती हुई चन्द्रिका की तरह स्थिर राज्यलक्ष्मी को चन्द्रमा के समान चन्द्रगुप्त राजा से कौन सा पुरुष उसे अलग कर सकता है॥२३॥

और भी—(पहिले कहा हुआ-'आस्वादितद्विरदशोणितशोणशोभा' इस श्लोक को पढ़ता है)

चन्दनदासः—(मन ही मन) मनोऽभिलषित कार्य सिद्ध हो जाने पर तुम्हारी आत्मप्रशंसा भी भली ही लगती है ।

(नेपथ्य में निकाले जाते हुए जीवसिद्धि को देखने के लिये आए हुए लोगों

---

(१) अनेककर्तृसाध्यकार्यस्यैकेन साधनाऽसम्भवादनेकवक्रनासादि दुर्मन्त्रिद्वाराऽस्थिरायाः राज्यश्रियः एकेनाऽमात्यराक्षसेन स्थिरीकरणं न सम्भवतीति भावः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चाणक्यः—शार्ङ्गरव ! ज्ञायतां किमेतत् ।

शिष्यः—यदाज्ञापयत्युपाध्यायः (निष्क्रम्य, पुनः प्रविश्य) उपाध्याय, एष राज्ञश्चन्द्रगुप्तस्याज्ञया राजापथ्यकारी क्षपणको जीवसिद्धिः सनिकारं नगरान्निर्वास्यते ।

चाणक्यः—क्षपणकः अहह !! अथवा—अनुभवतु राजापथ्यकारित्वस्य फलम् । भोः श्रेष्ठिन् चन्दनदास ! एवमयं राजापथ्यकारिषु

नक्षणे तद्दर्शनार्थमागतानां लोकानां रव इत्यर्थः ।

शार्ङ्गरवेति । वत्स ! ज्ञायतां किमेतत् वेषनिर्माणसद्मनि किं हेतुको जनरव इति बुध्यतामित्यर्थः ।

उपाध्यायेति । गुरो ! राज्ञो देवस्य चन्द्रगुप्तस्य वृषलस्याऽऽज्ञया निदेशेन पथोऽनपेतं पथ्यं ('धर्मपथ्यर्थन्यायादनपेते' इति यति रूपम्) न पथ्यमपथ्यमहितमित्यर्थः । राज्ञोऽपथ्यं राजाऽपथ्यं राजापथ्यं करोति तच्छीलो राजाऽपथ्यकारी राजद्रोहीत्यर्थः एषः असौ क्षपणको बौद्धसंन्यासिलिङ्गी जीवसिद्धिस्तदाख्यः सनिकारं (क्रियाविशेषणमिदम्) निकारेण तिरस्कारेण सह वर्तमानं सनिकारं सतिरस्कारं यथा स्यात्तथेत्यर्थः । नगरात्पुरो निर्वास्यते निष्कास्यते । संन्यासिनामपि ब्राह्मणवद्दण्डः । उक्तञ्च—

वपनं द्रविणादानं स्थानान्निष्क्रामणं तथा ।
एष हि ब्रह्मबन्धूनां वधो नान्योऽस्ति दैहिकः ॥ इति ।

क्षपणक इति । मुण्डी निष्परिग्रहस्तपस्वी नापमानयोग्य इति कारुण्याविष्कारार्थमहहशब्दः । अथवेति—राजद्रोहिणो युक्त एवैष दण्ड इति समाधिः । राजापथ्यकारित्वस्य राजद्रोहविधायित्वस्य फलमनुभवतु भुनक्तु । अयमेष राजा नृप-

---

का कोलाहल सुनाई देता है)

चाणक्यः—शार्ङ्गरव ! देखो तो यह कोलाहल कैसा है ।

शिष्यः—जो आज्ञा (बाहर जाकर और फिर प्रवेशकर) राजा के विरुद्ध कार्य करनेवाला जीवसिद्धि नामक क्षपणक राजा चन्द्रगुप्त की आज्ञा से अनादर के साथ नगर से निकाला जाता है ।

चाणक्यः—अरे क्षपणक को अथवा राजा के विरुद्ध कार्य करने का फल भोगे । चन्दनदास ! यह राजा चन्द्रगुप्त राजविरोधियों को कठिन दण्ड देता है, इस कारण

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तीक्ष्णदण्डो राजा, तत् क्रियतां पथ्यं सुहृद्वचः, समर्प्यतां राक्षसगृहजनः चिरमनुभूयन्तां विचित्रा राजप्रसादाः ।

चन्दनदासः—णत्थि मे गेहे अमच्चरक्खसघरअणो [नास्ति मे गेहे अमात्यराक्षसगृहजनः]

(नेपथ्ये पुनः कलकलः)

चाणक्यः—शार्ङ्गरव ! ज्ञायतां पुनः किमेतत् ।

शिष्यः—यदाज्ञापयत्युपाध्यायः । (इति निष्क्रम्य, पुनः प्रविश्य) उपाध्याय ! असौ राजाज्ञया राजापथ्यकारी कायस्थः शकटदासः शूलमारोपयितुं नीयते ।

चाणक्यः—स्वकर्मफलभाक् भवतु । भोः श्रेष्ठिन् ! एवमयं राजा-

तिश्चन्द्रगुप्तो राजाऽपथ्यकारिषु राजविद्रोहिषु तीक्ष्णस्तीव्रो दण्डः शासनं यस्यासौ तीक्ष्णदण्डः उग्रशासन इत्यर्थः वर्तत इति शेषः । तत्तस्माद्धेतोः पथ्यं हितं सुहृदो मित्रस्य वचो वचनं सुहृद्वचः सहृदयकथनमित्यर्थः । क्रियतां विधीयतां, राक्षसगृहजनो राक्षसकलत्रादिकं समर्प्यताम् मदायत्तीक्रियताम् , चिरं बहुकालं विचित्रा बहुविधा राजप्रसादाः नृपानुरागाः, वा नृपाऽनुग्रहा अनुभूयन्ताम् प्राप्यन्ताम् ।

स्यात्प्रसादोऽनुरागेऽपीत्यमरः ।

प्रसादोऽनुग्रहे काव्यगुणस्वास्थ्यविपत्तिषु ॥ इति मेदिनी ।

उपाध्यायेति । असौ स राजाऽपथ्यकारी राजद्रोही कायस्थः चित्रगुप्तसजातीयः शकटदासस्तदाख्यो राक्षससुहृत् शूलं लोहनिर्मितमायुधमारोपयितुं नीयते तन्निकटं प्राप्यते ।

स्वकर्मफलभागिति । स्वस्यात्मनः कर्म कार्यं तस्य फलं स्वकर्मफलं तद्भ-

---

मेरे वचन को मानो और राक्षस के कलत्रवर्ग को ले आओ और बहुत दिनतक अनेक प्रकार से राजा के अनुग्रह का फल भोगो ।

चन्दनदासः—हमारे घरमें मन्त्रिराक्षस के कुटुम्बी नहीं हैं ।

(नेपथ्यमें फिर पूर्ववत् लोगों का कोलाहल सुनाई देता है) ।

चाणक्यः—शार्ङ्गरव ! देखो यह क्या है ।

शिष्यः—जो आज्ञा (यह कहकर बाहर जाकर और फिर प्रवेशकर) उपाध्याय ! राजा के विरुद्ध कार्य करनेवाला शकटददास नाम का कायस्थ राजा की आज्ञा से सूली पर चढ़ाने के लिये ले जाया जाता है ।

चाणक्यः—अपना कर्मफल भोगे । चन्दनदास ! इसी तरह यह राजा विरुद्ध कार्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पथ्यकारिषु तीक्ष्णदण्डो राजा, न मर्षयिष्यति राक्षसकलत्रप्रच्छादनं भवतः, तद् रक्ष परकलत्रेणात्मनः कलत्रं जीवितञ्च ।

चन्दनदासः—अज्ज ! किं मे भअं दंसेसि ? सन्तं वि गेहे अमच्चरक्खसस्स घरअणं ण समप्पेमि, किं उण असन्तं [आर्य्य ! किं मे भयं दर्शयसि ? सन्तमपि गेहे आमात्यराक्षसस्य गृहजनं न समर्पयामि, किंपुनरसन्तम्]

चाणक्यः—चन्दनदास ! एष ते निश्चयः ?

चन्दनदासः—वाढं, ऐसो मे त्थिरो णिच्चओ [वाढं, एष मे स्थिरो निश्चयः]

जतीति स्वकर्मफलभाग् भवतु स इति शेषः । एवमनेन प्रकारेण राजापथ्यकारिषु राजद्रोहिषु तीक्ष्णदण्डः उग्रशासनोऽयमेष राजा नृपतिश्चन्द्रगुप्त इति शेषः । भवतस्तव राक्षसकलत्रप्रच्छादनं राक्षसगृहजनगोपनं न मर्षयिष्यति सहिष्यते, तत्तस्मात्कारणात् परकलत्रेण राक्षसगृहजनसमर्पणेनेत्यर्थः । आत्मनः स्वस्य कलत्रं गृहजनं जीवितं च रक्ष पाहि, अन्यथा तदनर्पणे भवत्कलत्रजीवितयोर्विनाशः स्यादिति भावः ।

आर्येति । आर्य ! मान्य, कौटिल्य ! मे मामित्यर्थः (दृशेः सर्वत्रेति भाष्यकृदुक्त्या पत्यै दर्शयन्नित्यत्रेव चतुर्थी) । भयं त्रासं दर्शयसि अवलोकयसि गृहे सद्मनि ममेति शेषः । अमात्यराक्षसस्य नन्दसचिवस्य गृहजनं कलत्रादिकं सन्तमपि विद्यमानमपि न समर्पयामि न प्रदास्यामीत्यर्थः (भविष्यत्सामीप्ये लट्) किं पुनरसन्तमविद्यमानम् ।

वाढमिति । (स्वीकारार्थकमव्ययमिदम्) एवमित्यर्थः ? एषोऽसौ मे मम निश्चयः प्रतिज्ञा स्थिरो दृढ इत्यर्थः ।

ननु बन्धुहेतोः सकलसम्पत्तिं परित्यज्य सुखेन मरणमङ्गीकुर्वन् चन्दनदासो-

---

करनेवालों को कठिन दण्ड देता है । वह राक्षस के कुटुम्बियों को छिपाकर रखने का अपराध नहीं सहन कर सकेगा । इस कारण दूसरे के कुटुम्बियों को देकर अपने कुटुम्बियों और जीवन की रक्षा करो ।

चन्दनदासः—आर्य ! आप मुझको क्या डर दिखाते हैं ? यदि हमारे घर में राक्षसके कुटुम्बी हों भी तो मैं नहीं दे सकता नहीं रहनेसे तो फिर बात ही क्या है ।

चाणक्यः—चन्दनदास ! ऐसा ही तुम्हारा निश्चय (विचार) है ?

चन्दनदासः—हां, यह हमारा स्थिर संकल्प है ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चाणक्यः—(स्वगतम्) साधु चन्दनदास ! साधु—

सुलभेष्वर्थलाभेषु परसंवेदने जनः ।
क इदं दुष्करं कुर्यादिदानीं शिविना विना ॥ २४ ॥

(प्रकाशम्) चन्दनदास ! एष ते निश्चयः ?

चन्दनदासः—बाढं [बाढम्] ।

चाणक्यः—(सक्रोधम्) दुरात्मन् दुष्टवणिक् ! अनुभूयतां तर्हि

दृढप्रतिज्ञ इत्यवगत्य चेतसा तं प्रशंसयति–सुलभेष्विति । परस्य परकीयार्थस्य संवेदने समर्पणे कृते सति, अर्थानां लाभा येभ्यस्तेऽर्थलाभा अर्थप्राप्त्युपायास्तेष्वर्थलाभेषु सुलभेषु सुकरेषु सत्सु स्वार्थमनादृत्य इदमन्यगृहजनसंगोपनात्मकं दुष्करं कठिनं कर्म कार्यं इदानीमस्मिन् कलौ शिविना तन्नामकोशीनरदेशाधिपेन विना त्वदन्यः को जनो लोकः कुर्यात् कर्त्तुं समर्थो न कोऽपीत्यर्थः । शिविस्तु कृतयुगे कृतवान् त्वन्तु कलाविति ततोऽपि त्वं प्रशस्तकीर्त्तिशालीति भावः । शिविः कृतयुगे कपोतरूपधारिशरणागतेन्द्ररक्षणार्थं श्येनरूपधारिधर्मसन्तुष्टये स्वमांसं दत्तवानिति पौराणिकी कथा स्मर्त्तव्या ।

शिवेः कृतयुगे दुष्करकार्यकारित्वं तव तु कलावित्युपमानभूतशिव्यपेक्षयोपमेयस्य चन्दनदासस्याधिक्यवर्णनादत्र व्यतिरेकाऽलंकारः । लक्षणं दर्पणे यथा—

आधिक्यमुपमेयस्योपमानान्न्यूनताऽथवा । "व्यतिरेकः"

इति । प्रशस्तकीर्त्तिशालिशिविनृपतिचरितस्य प्रस्तुताऽङ्गत्वादुदात्तालंकारश्च । लोकातिशयसम्पत्तिवर्णनोदात्तमुच्यते । यद्वाऽपि प्रस्तुतस्याङ्गं महतां चरितं भवेत् ॥

इति दर्पणलक्षणात् । प्रसादगुणः । वैदर्भी रीतिः । परसंवेदनशब्दस्य परकीयार्थसमर्पणरूपार्थः कष्टगम्य इति कष्टत्वं दोषः । अनुष्टुप्वृत्तम् ॥ २४ ॥

सक्रोधमिति । सकोपं यथा स्यात्तथा कथयतीत्यर्थः । (क्रियाविशेषणमि-

---

चाणक्यः—(मन ही मन) धन्य हो चन्दनदास ! तुम धन्य हो ।

मनुष्य धनके लोभ में पड़कर कठिसे से कठिन कार्य कर बैठता है, पर इस कलियुगमें बिना किसी लोभके शिवि राजाको छोड़कर तुम्हारे जैसा दूसरा कौन ऐसा कठिन कार्य कर सकता है ? कोई भी नहीं ॥ २४ ॥

(जोरसे) चन्दनदास ! तुम्हारा ऐसा ही विचार है ?

चन्दनदासः—हां ।

चाणक्यः—(क्रोधसे) अरे दुष्ट कार्य करनेवाले बनिये ! ऐसा है तो राजा के

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राजकोपः ।

चन्दनदासः—(बाहू प्रसार्य) सज्जोह्मि, अणुचिट्ठदु अज्जो अत्तणो अहिआरस्स अणुरूअं [सज्जोऽस्मि, अनुतिष्ठत्वार्यः आत्मनोऽधिकारस्यानुरूपम्] ("सरिम्" इति पाठे—सदृशम्) ।

चाणक्यः—(सक्रोधम्) शार्ङ्गरव ! उच्यतामस्मद्वचनात् कालपाशिको दण्डपाशिकश्च,—"शीघ्रमयं दुष्टवणिक् निगृह्यताम्" अथवा —तिष्ठतु, उच्यतां दुर्गपालो विजयपालश्च, गृहीतगृहसारमेनं सपुत्र कलत्रं संयम्य रक्ष तावत्, यावत् मया वृषलाय कथ्यते, स एवास्य प्राणहरं दण्डमाज्ञापयिष्यति ।

दम्)। दुष्ट आत्मा यस्यासौ दुरात्मा तत्संबोधने दुरात्मन् क्रूरहृदय, दुर्वणिक् ! तर्हि तदा राजकोपो नृपाऽमर्षोऽनुभूयताम् उपलभ्यतां साक्षात्क्रियतामिति यावत् ।

सज्जोऽस्मीति । अहं दण्डग्रहणार्थमुद्यतोऽस्मीत्यर्थः । आर्यो मान्यो भवानिति शेषः । आत्मनः स्वस्याधिकारानुरूपं स्वत्वसदृशमनुतिष्ठतु विदधातु ।

शार्ङ्गरवेति । वत्स ! अस्मद्वचनान्मत्कथनाऽनुसारेण कालपाशिको दण्डपाशिकश्चेति दूतद्वयमुच्यतामभिधीयताम् । अयमेष दुष्टवणिक् दुष्टवैश्यः निगृह्यतां दण्ड्यताम् । अथवा दुर्गपालको विजयपालकश्चेत्युभौ दूतौ वक्तव्यौ गृहीत आयत्तीकृतो गृहस्य सारो मूलधनादिरूपः स्थिरांशो यस्य स गृहीतगृहसारस्तं गृहीतगृहसारं । सारो बले स्थिरांशे चेति मेदिनी ।

पुत्राश्च कलत्रं च (एषामितरेतरद्वन्द्वः) पुत्रकलत्राणि तैः सह वर्तत इति सपुत्रकलत्रस्तं सपुत्रकलत्रमेनं चन्दनदासं संयम्य बद्ध्वा तावत् तावत्कालं रक्ष पालय स्थापयेति यावत् । यावत्कालं वृषलाय मौर्याय कथ्यते निवेद्यते । वृषल एव

क्रोध का फल भोग ।

चन्दनदासः—(दोनों बाहु फैलाकर) मैं तय्यार हूँ । आप अपने अधिकार के अनुरूप कार्य कीजिये ।

चाणक्यः—(क्रोध के साथ) शार्ङ्गरव ! हमारे कथनाऽनुसार कालपाशिक और दण्डपाशिक दोनों से कहो कि इस दुष्ट वनिये चन्दनदास को शीघ्र गिरफ्तार करलें अथवा–ठहरो, दुर्गपाल और विजयपाल दोनों से कहो कि पहिले इसका धन जब्त करके स्त्रीपुत्र के साथ इसको बांधकर तबतक जेल में रखें जब तक मैं चन्द्रगुप्त से कहता हूं । वही इसके प्राणान्तक दण्ड की आज्ञा देगा ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शिष्यः—यदाज्ञापयत्युपाध्यायः । श्रेष्ठिन् ! इत इतः ।

चन्दनदासः—(उत्थाय) अज्ज ! अअमाअच्छामि । (स्वगतम्) दिट्ठिआ मित्तकज्जेण मे विणासो जणिदो, ण उण पुरिसदोसेण । [आर्य्य ! अयमागच्छामि । दिष्ट्या मित्रकार्य्येण मे विनाशो जनितः, न पुनः पुरुषदोषेण] (परिक्रम्य शिष्येण सह निष्क्रान्तः) ।

चाणक्यः—(सहर्षम्) हन्त, लब्ध इदानीं राक्षसः कुतः ?

त्यजत्यप्रियवत् प्राणान् यथा तस्यायमापदि ।
तथैवास्यापदि प्राणा नूनं तस्यापि न प्रियाः(१) ॥२५॥

अस्य चन्दनदास प्राणान् जीवान् हरतीति प्राणहरस्तं प्राणहरं जीवनाशकं दण्डं निग्रह माज्ञापयिष्यति विधास्यति । (इदं छद्मना हितागमननिरोधनं निरोधः):छद्मना व्याजेन हितागमनाय स्वेष्टसिद्धये चन्दनदासनिरोधात् । अथवा, हितं राक्षसमागमयतीति हितागमो हितागमनस्य हितराक्षसागमनहेतुभूतस्य चन्दनदासस्य निरोधनात् ।

आर्येति । स्वगतमनतिस्पष्टं यथा तथा वक्तीति शेषः । (क्रियाविशेषणमिदम्) दिष्ट्या भाग्येन (इदमव्ययं तृतीयाविभक्त्यन्तप्रतिरूपकम्) मित्रकार्येण सुहृत्प्रयोजनेन (हेतुतृतीयान्तमिदम्) मे मम विनाशोऽपायः पुरुषस्य दोषश्चरित्रदूषणहेतुभूतचौर्यादिकाऽपकर्मेत्यर्थः। पुरुषदोषस्तेन पुरुषदोषेण स्वकीयाऽऽगसेत्यथः । न विनाशः मृत्युरित्यर्थः । अत्र परिसंख्याऽलंकारः)

त्यजतीति । अयमेष चन्दनदासः श्रेष्ठी राक्षससुहृत् तस्य राक्षसस्य आपदि कलात्रादेः शत्रुहस्तपतनात्मकविपत्तौ प्राणानसून् अप्रियवत् अनिष्टवत् यथा त्यजति जहाति तथैव तेन प्रकारेणैव अस्य चन्दनदासस्याऽऽपदि राजदण्डेन प्राणसं-

---

शिष्यः—आपकी जैसी आज्ञा । चन्दनदास ! इधर इधर ।

चन्दनदासः—उठकर आर्य्य ! यह मैं आताहूं (मनही मन) यह हर्ष की बात है कि मित्र के कार्य से मेरा विनाश हुआ, न कि अपने चारित्र्य दोष से । (शिष्य के साथ बाहर चला जाता है)

चाणक्यः—(खुशी के साथ) हर्षकी बात है किअब राक्षस मिलगया। क्यों कि-जिस प्रकार चन्दनदास राक्षस की आपत्ति में अपने प्राणों को तुच्छ समझ है, उसी तरह चन्दनदासकी आपत्ति में राक्षस को भी अपने प्राण प्रियन होंगे ॥ २६ ॥

---

(१) एतेनायमर्थो वक्ष्यमाणो ध्वन्यते—
मिथो विपत्प्रतीकारो मिथस्तत्र च संस्थितिः सुहृदां जायते नूनमापत्काले परीक्षणम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(नेपथ्ये कलकलः)

चाणक्यः—शार्ङ्गरव !

शिष्यः—(प्रविश्य) उपाध्याय ! आज्ञापयतु ।

चाणक्यः—ज्ञायतां किमेतत् ।

शिष्यः—(निष्क्रम्य विभाव्य पुनः प्रविश्य सम्भ्रान्तः) उपाध्याय ! एष खलु शकटदासं वध्यमानं वध्यभूमेरादाय समपक्रान्तः सिद्धार्थकः ।

चाणक्यः—(स्वगतम्) साधु सिद्धार्थक ! साधु, कृतः कार्य्यारम्भः (प्रकाशम्) प्रसह्य किमपक्रान्तः ? (सक्रोधम्) वत्स ! उच्यतां

हरणात्मकापत्तौ तस्यापि राक्षसस्यापि प्राणा असवः नूनं निश्चितं प्रिया न भविष्यन्तीत्यर्थः । यथा चन्दनदासो राक्षसकलत्ररक्षणार्थं प्राणं त्यजति तथा चन्दनदाससमुद्धरणाय राक्षसोऽप्यात्मानमर्पयिष्यतीति भावः ।

मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादयः ।

इति साहित्यदर्पणधृतलक्षणादत्रोत्प्रेक्षाऽलंकारः । अयं स इव सोयमिवेति परस्परमुपमानोपमेययोरुपमानोपमेयभावादुपमालंकार इति कश्चित् । वैदर्भी रीतिः । प्रसादगुणः । अनुष्टुप् छन्दः ॥ २५ ॥

विभाव्येति । विलोक्येत्यर्थः । एष सिद्धार्थकः वध्यभूमेः (अपादानपञ्चम्यन्तमिदम्) प्राणदण्डस्थानादित्यर्थः । वध्यमानं संयम्यमानं शकटदासं तन्नामानं कायस्थमादाय गृहीत्वा समपक्रान्तः पलायितः ।

कृतः कार्यारम्भ इति । कार्यस्य वध्यभूमितः शकटासमादायाऽपसरणात्मककृत्यस्य आरम्भः अभ्यादानं कृतो विहितः ।

'स्यादभ्यादानमुद्घात आरम्भः' ।

प्रसह्य हठादित्यर्थः, अपक्रान्तः पलायितः भागुरायणस्तन्नामकदूत उच्यताम्

(नेपथ्य में कोलाहल होता है)

चाणक्यः—शार्ङ्गरव !

शिष्यः—(प्रवेशकर) उपाध्याय ? आज्ञा कीजिये ।

चाणक्यः—देखो तो यह क्या है ?

शिष्यः—(बाहर जाकर और देखकर फिर प्रवेशकर आश्चर्य के साथ कहता है), उपाध्याय ! सिद्धार्थक वध्यस्थान से बंधे हुए शकट दास को लेकर भाग गया ।

चाणक्यः—(मनही मन) सिद्धार्थक ! तुमने अच्छा किया तुमने कार्य का आरम्भ कर दिया । (जोर से) क्या जबरदस्ती लेकर भागगया ? (क्रोधकर) वत्स !

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भागुरायणो यथा त्वरितमेनं सम्भावयेति ।

शिष्यः—(पुनस्तथा कृत्वा प्रविश्य सविषादम्) उपाध्याय ! हा धिक् कष्टम् , अपक्रान्तो भागुरायणोऽपि ।

चाणक्यः—(स्वगतम्) व्रजतु कार्य्यसिद्धये । (प्रकाशं सक्रोधमिव) वत्स ! कृतं विषादेन, उच्यन्तामस्मद्वचनाद् भद्रभट-पुरुषदत्त-हिङ्गरात-बलगुप्त-राजसेन-रोहिताक्ष-विजयवर्माणः शीघ्रमुपसृत्य गृह्यतां दुरात्मा भागुरायणः ।

एनं सिद्धार्थकं सम्भावय, निगृह्य शीघ्रमानयेति बाह्यार्थः । त्वमपि तेन सार्द्धं कार्यं साधयेति गूढोऽर्थः । (अयमपि विन्दुः))

पुनस्तथेति । पुनर्भूयस्तथा कृत्वा सम्भाव्य प्रविश्य समेत्य रङ्गस्थानमित्यादिः । सविषादं सखेदं (क्रियाविशेषणमिदम्) कथयतीति शेषः । उपाध्याय गुरो । हा (खेदसूचकमव्ययमिदम्) कष्टं दुःखं धिक् , भागुरायणोऽपि अपक्रान्तः पलायितः मलयकेतुमाश्रित्य कथयिष्यमाणकार्यसम्पादनाय भागुरायणस्याऽपक्रमणं तत्तु स्वयमेव चाणक्येनोपदिष्टमिति भावः । अयं चतुर्वर्णनिर्वर्णनं चतुर्वर्णनं वर्णसंहारः । ब्राह्मणादिचतुर्वर्णान्तःपातिनीनां प्रकृतीनां ये याता इत्यादिना वर्णनात्त्रयोदशमङ्गम् । तृतीयाङ्के वक्ष्यमाणं तेषामुदन्तमानेष्यामीति गूढाशयः ।

स्वगतमिति । अनतिस्पष्टमित्यर्थः (क्रियाविशेषणमिदम्) कार्यसिद्धये अभिधास्यमानस्योपदिष्टकृत्यसम्पादनायेत्यर्थः । व्रजतु गच्छतु । प्रकाशं सुस्पष्टं (क्रियाविशेषणमेतत्) सक्रोधमिव सकोपमिव (इदमपि क्रियाविशेषणम्) कथतीत्यस्य शेषः । यद्वा सकोपमिवेत्येव क्रियाविशेषणं प्रकाशमिति तु अध्याहृतवचनमित्यस्य विशेषणम् सकोपं यथा स्यात्तथा प्रकाशं स्पष्टं वचनं कथयति चाणक्य इति तस्य निर्गलितोर्थः । वत्स, पुत्र विषादेन खेदेन कृतं व्यर्थम् खेदो न कर्तव्यइति तदर्थः, अस्मद्वचनान्मद्वाक्याऽनुसारेण भद्रभटादयो दूता उच्यन्ताम् उपसृत्य

भागुरायण से कहो कि सिद्धार्थक को पकड़कर शीघ्र ले आवे ।

शिष्यः—(फिर वैसा ही करके प्रवेशकर दुःख के साथ) उपाध्याय ! खेद की बात है, कि भागुरायण भी भाग गया ।

चाणक्यः—(मन ही मन) कार्य सिद्धि के वास्ते जाओ । (जोर से क्रोधी के समान) । वत्स ! हमारे वचन के अनुसार भद्रभट-पुरुषदत्त-हिङ्गुरात बलगुप्त-राजसेन-रोहिताक्ष-विजयवर्म्मा आदि से कहो कि शीघ्र जाकर दुष्ट भागुरायण को पकडलें ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शिष्यः—यदाज्ञापयत्युपाध्यायः । (इति निष्क्रम्य पुनः प्रविश्य सविषादम्) उपाध्याय ! हा धिक् कष्टं, सर्वमेव तन्त्रमाकुलीभूतं, तेऽपि खलु भद्रभटप्रभृतयः प्रथममुषस्येवापक्रान्ताः ।

चाणक्यः—(स्वगतम्) सर्वेषामेव शिवाः पन्थानः सन्तु (प्रकाशम्) वत्स ! अलं विषादेन । पश्य,—

(१) ये याताः किमपि प्रधार्य्य हृदये, पूर्वं गता एव ते

समीपं गत्वा दुरात्मा दुष्टहृदयो भागुरायणस्तन्नामकश्चरो निगृह्यताम् ।

यदाज्ञापयतीति । उपाध्यायो गुरुर्भवानिति शेषः । यदाज्ञापयति निदेशं करोति । इति इत्यभिधाय निष्क्रम्य निर्गत्य रङ्गस्थानादिति शेषः । पुनर्भूयः प्रविश्याभ्यन्तरमेत्य सविषादं सखेदं कथयतीत्यस्याध्याहारः । उपाध्याय ! गुरो, हा खेदे कष्टं क्लेशं धिक् दुःखं निन्दनीयमित्यर्थः । सर्वमेव सकलमेव तन्त्रं प्रकृतिमण्डलं प्रजासमूहमिति यावत् आकुलीभूतं व्याकुलं पीडितमिति यावत् वर्तत इति शेषः । तेऽपि भद्रभटादयः उषस्येव प्रभात एवाऽपक्रान्ताः पलायिताः । यत्तु-शिष्योक्तावपक्रान्ता इत्यस्यास्मदिष्टसम्पादनायैव गता इत्यर्थस्तन्न । शिष्यस्य तज्ज्ञानाऽभावात् । अत एवालं विषादेनेति चाणक्योक्तिः सङ्गच्छते सङ्गच्छते च पूर्वाऽपरग्रन्थसन्दर्भः ।

स्वगतमिति । अप्रकाशमित्यर्थः सर्वेषामखिलानां भद्रभटादीनामित्यर्थः । पन्थानो मार्गाः शिवं कल्याणमस्त्येषामिति शिवाः (अर्शाद्यजन्तः) कल्याणयुक्ता इत्यर्थः । सन्तु भवन्तु । प्रकाशं सुस्पष्टमित्यर्थः । वत्स ! पुत्र, विषादेन खेदेन अलं व्यर्थम् खेदो न विधेय इत्यर्थः ।

ये याता इति । गद्यस्थवत्सेति सम्बोधनपदमादायान्वयः कार्यस्तं प्रत्येव चाणक्योक्तेरिति ध्येयम् । हेवत्स ! ये भागुरायणप्रभृतयः किमपि मदिष्टमनिष्टं वा हृदये मनसि निधाय कृत्वा (अस्मदनिष्टं मनसि कृत्वेति बहिः, अस्मदिष्टसाधनमु-

---

शिष्यः—जैसी आपकी आज्ञा (यह कहता हुआ बाहर जाकर-फिर लौटकर) उपाध्याय ! खेदकी बात है कि सब प्रजामन्डल व्याकुल है, वे भद्रभट प्रभृति भी सवेरे ही चले गये ।

चाणक्यः—(मनही मन) सब का जाना सफल हो (जोर से) वत्स ! चिन्ता मत करो । देखोः—

जो भद्रभट आदि गुप्तचर अपने हृदय में मेरा इष्ट वा अनिष्ट रखकर चलेगये, वे

---

(१) अस्मदिष्टकार्यसाधनाय गतानां तेषां भद्रभटादिगुप्तचराणामितः पलायनं युक्तमेवेति गूढोऽर्थः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ये तिष्ठन्ति, भवन्तु तेऽपि गमने कामं प्रकामोद्यमाः ।
एका केवलमर्थसाधनविधौ सेनाशतेभ्योऽधिका
नन्दोन्मूलनदृष्टवीर्य्यमहिमा बुद्धिस्तु मा गान्मम ॥ २६ ॥

(उत्थाय प्रत्यक्षवदाकाशे लक्ष्यं वद्ध्वा) एष खलु दुरात्मनो भद्रभटप्रभृतीनाहरामि । (आत्मगतम्) दुरात्मन् राक्षस ! क्वेदानीं यास्यसि ? एषोऽहमचिरात् भवन्तम्,—

ङ्क्रियेति गूढः) याता मलयकेतुनिकटं गतास्ते पूर्वं प्रागेव गता अलं तत्खेदेनेति भावः । ये तदतिरिक्ताः जनारिहसन्ति तेऽपि गमने इतः प्रयाणे कामं यथेच्छं प्रकामः प्रकृष्ट उद्यम उद्योगो येषां ते प्रकामोद्यमाः उत्साहवन्तो भवन्तु सन्तु । अर्थस्य साधनं निष्पादनं तस्य विधिर्विधानं तस्मिन्नर्थसाधनविधौ प्रयोजन सम्पादनात्मकविधाने सेनाशतेभ्यो बहुसेनाभ्योऽधिका बहुला, नन्दानामुन्मूलने विनाशे दृष्टः साक्षात्कृतो वीर्यस्य सामर्थ्यस्य महिमा प्रभावो यस्यास्तादृशी नन्दोन्मूलनदृष्टवीर्यमहिमा एकाऽद्वितीया मम बुद्धीः केवलंमा गात् न गच्छतु मद्बुद्धिरेव सकलकार्यसम्पादनपट्वीति भद्रभटप्रभृतीनामितो गमनेऽपि न काप्यनुपपत्तिरिति भावः । सकलकार्यसम्पादने हेतुभूताया बुद्धेर्वाक्यार्थत्वेन काव्यलिङ्गमलङ्कारः ।

हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम् ।

इति तल्लक्षणात् । सेनाशतरूपोपमानादुपमेयभूतबुद्धेराधिक्यप्रतिपादनाद्व्यतिरेकालङ्कारश्चेत्यनयोः संसृष्टिः ।

"आधिक्यमुपमेयस्योपमानान्न्यूनताऽथवा । व्यतिरेक इति"

इति लक्षणात् । लाटी रीतिः । ओजो गुणः । शार्दूलविक्रीडितं छन्दः ॥२६॥

क्वेति । सर्वत्र मद्गुप्तचराधिष्ठितत्वान्न ते गुप्तस्थानप्राप्तिसम्भव इति भावः ।

सब पहिले ही चलेगए थे और जो हैं वे भी चलेजाने को तैयार हो जायँ, तो भी नन्दका विनाश करने में अपने पराक्रम की महिमा दिखानेवाली और अर्थ साधन करने में सैकड़ों सेना से अधिक बलवती केवल एक मेरी बुद्धि न जाय ॥ २६ ॥

(उठकर प्रत्यक्ष की तरह आकाशमें लक्ष्यबांधकर) यह मैं भद्रभट आदि दुष्टों को पकड़ता हूं। (मन ही मन) दुष्ट राक्षस! अब कहां जाओगे ? मैं शीघ्र ही तुमको—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वच्छन्दमेकचरमुज्ज्वलदानशक्तिमुत्सेकिना बलमदेन विगाहमानम् ।
बुद्ध्या विगृह्य, वृषलस्य कृते, क्रियायामारण्यकं गजमिव प्रगुणीकरोमि २७

(इति निष्क्रान्ताः सर्वे)

इति मुद्राराक्षसे प्रथमोऽङ्कः ।

स्वच्छन्दमिति । स्वच्छन्दं निरङ्कुशं स्वपक्षाऽनाश्रयणाद्विजातीयपरपक्षाश्रयणेन न कोऽपि तव नियन्ताऽस्तीत्यर्थः । यद्वा स्वच्छन्दं (विचरणक्रियाविशेषणम्) एकः सहायहीनश्चरतीत्येकचरस्तं तथोक्तं गजपक्षे यूथहीनं उज्ज्वला प्रभूता दानशक्तिर्वितरणसामर्थ्यं यस्य स तथोक्तस्तं तथोक्तं 'नन्दान्वयसम्बन्धिनोऽस्मान्विहाय तत्रैकश्चरसीति भावः, गजपक्षे उज्ज्वला प्रभूता दानशक्तिर्मदजलक्षरणं यस्य तथोक्तम् उत्सेकिना उद्रिक्तेन बलमदेन सैन्याऽभिमानेन शारीरिकशक्त्युद्भूतोत्कृष्टपराक्रमेण वा विगाहमानं मदनिष्ठायोयुक्तं गजपक्षेऽरण्यसरोवरादिकमालोडयन्तं भवन्तं बुद्ध्या मत्या निगृह्य आयत्तीकृत्य वृषलस्य मौर्यस्य कृते निमित्तं तदिष्टसम्पादनार्थमित्यर्थः । क्रियायां तस्यैव मन्त्रित्वग्रहणादिरूपायां गजपक्षे वाहनादिरूपायाञ्च आरण्यकं वन्यं गजं करिणमिव प्रगुणीकरोमि वशीकरोमि गजपक्षे दृढरज्जुबद्धं करोमीत्यर्थः । शक्त्यादृढरज्जुबन्धनाद्युपायेन संवाहनादिक्रियायां गजमिव मौर्यमन्त्रित्वग्रहणरूपक्रियायां त्वां वशीकरोमीति भावः । अत्रोपमालंकारः श्लेषेणाऽनुप्राणितः । वैदर्भी रीतिः । ओजो गुणः । वसन्ततिलकं वृत्तम् ॥ २७ ॥

प्रथमोऽङ्क इति । प्रत्यक्षनेतृचरितं रसभावसमुज्ज्वलम् ।
इत्यादि दर्पणेऽङ्कलक्षणं प्रदर्शितम् ।

इति मुद्राराक्षसभावबोधिनीव्याख्यायां प्रथमोऽङ्कः ।

अपनी इच्छा से अकेले रहनेवाले, बहुत दानशक्ति युक्त, बढेहुए सेनाके मद से मेरा अनिष्ट करने के लिये तत्पर तुमको निरङ्कुश-और यूथों से अलग हुए और बहते हुए मद-जलवाले बढ़े हुये बलके अभिमान से वनके सरोवर में प्रवेश करते हुए वनके हाथी की तरह अपनी बुद्धि से तुमको अपने वश में करके चन्द्रगुप्तके मन्त्रिरूप इष्टकार्य साधनके काम में लगाता हूं ॥ २७ ॥

(यह कहकर चले जाते हैं ।)

इति आशुबोधिनीव्याख्यायां प्रथमोऽङ्कः ।

---

(१) स्वच्छन्दं निरङ्कुशम् एकचरं सहायहीनम् उज्ज्वलदानशक्ति प्रचुरदानसामर्थ्यं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्वितीयोऽङ्कः ।

(ततः प्रविशत्याहितुण्डिकः (१))

आहितुण्डिकः—

जाणन्ति तन्तजुत्तिं जहट्ठिअं मण्डलं अहिलिहन्ति ।
जे मन्तरक्खणपरास्ते सप्पणराहिवे उवचरन्ति ॥ १ ॥

तत इति । ततः प्रथमाङ्कसमाप्त्यनन्तरं चाणक्यादिनिखिलपात्रनिष्क्रमणानन्तरं वा आहितुण्डिकः सर्पक्रीडनोपजीविवेशधारी विराधगुप्तनामा राक्षसगुप्तचरः प्रविशति रङ्गस्थानमिति शेषः । अहिः सर्पस्तस्य तुण्डं मुखमहितुण्डमहितुण्डेन दीव्यतीत्याहितुण्डिकः ('तेन दीव्यती'त्यनेन ठक्) सर्पक्रीडनोपजीवीत्यर्थः ।

अथ नन्दामात्यराक्षसकृतोपायप्रवृत्तिमभिधातुं प्राप्त्याशापताकासम्बन्धात्मको गर्भसन्धिर्द्वितीयाऽङ्केनाऽभिधीयते—

गर्भस्तु दृष्टद्रव्यस्य वीजस्याऽन्वेषणं मुहुः ।

इति तल्लक्षणम् । प्रथमाङ्के दृष्टस्याऽत्र राक्षसाऽऽहितुण्डिकसंवादरूपया व्यापिन्या कथया पताकाख्यया नष्टस्याऽदृष्टस्य चाणक्यनयात्मकवीजस्याग्रे मुहुरन्वेषणादयं गर्भसन्धिः पताकाप्राप्त्याशाऽनुगुण्येन गर्भसन्धेरङ्गानि—

अभूताहरणं मार्गो रूपोदाहरणे क्रमः । संग्रहश्चाऽनुमानञ्च तोटकाधिवले यथा ॥
उद्वेगसंभ्रमाक्षेपा द्वादशाऽङ्गान्यनुक्रमात् ॥

अत्राऽऽहितुण्डिकछद्मधारिणो विराधगुप्तस्य सकलप्राकृतवचनं प्रस्तुतोपयोगिछद्माऽऽचरणमभूताहरणम् , अप्रस्तुतस्य राक्षसं प्रति कुसुमपुरोदन्ताऽभिधानस्योपयोगे छद्माचरणात् ।

(आहितुण्डिक प्रवेश करता है)

[जिसकी जीविका सर्प के द्वारा होती है उसका नाम "आहितुण्डिक" (सपेरा) है]

उत्सेकिना प्रवर्तमानेन बलमदेन सैन्याभिमानेन विगाहमानम् मदनिष्टतत्परं भवन्तम् , स्वच्छन्दं निश्शासनम् एकचरं यूथहीनम् उज्ज्वलदानशक्तिं प्रभूतमदक्षरणं उत्सेकिना जायमानेन बलमदेन शरीरोद्भूतसामर्थ्येन विगाहमानं वन्यसरोवरमालोडयन्तम् आरण्यं वन्यं गजमिव निगृह्य वशीकृत्य वृषलस्य मौर्यस्य कृते निमित्तं क्रियायां मन्त्रित्वादिग्रहणरूपायां पक्षे संवाहनादिरूपायां प्रगुणीकरोमि वशीकरोमि पक्षे दृढ़ बन्धनं करोमि ।

(१) राक्षसस्य भाव्यनिष्टसूचनार्थमाहितुण्डिकप्रवेश इत्यवधेयम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[जानन्ति तन्त्रयुक्तिं यथास्थितं मण्डलमभिलिखन्ति ।
ये मन्त्ररक्षणपरास्ते सर्पनराधिपावुपचरन्ति ॥ १ ॥]

(अकाशे) अज्ज ! किं भणासि को तुमं त्ति ? अज्ज ! अहं क्खु आहितुण्डिओ जिण्णविसो णाम (पुनराकाशे) किं भणासि अहंपि अहिणा खेलिदुं इच्छामि त्ति ? अथ कद्रं उण अज्जो वित्ति उवजीवदि ? (पुनराकाशे) किं भणासि राअउलसेवओ त्ति ? णं खेलदि ज्जेव अज्जोअहिणा । किं भणासि कधं त्ति ? अमन्तोसहिकुशलो वालग्गाही, अगिहीदङ्कुसो मत्तगअवरारोही, लद्धाहिआरो जिदकासी रामसेवओ त्ति, एदेतिण्णि अवस्सं विणासमणुहोन्ति । कधं, दिट्ठमत्तो अदिक्कन्तो एसो (पुनराकाशे) अज्ज ! तुमं उण किं भणासि—किं एदेसु पेडास-

---

जानन्तीति । ये जनाः तन्त्रे विषौषधविशेषे युक्तिं प्रयोगं यथास्थितं यथावत् जानन्ति अवगच्छनति मण्डलं महेन्द्रादिदेवतामन्त्रं मण्डलाऽऽकारवेष्टनं वा अभिलिखन्ति रेखाकारेण लिखन्ति । यद्वा सर्पकुण्डलस्थानं विशेषतोऽवगत्य पृथ्वीं विदारयन्ति ये च मन्त्रैर्गारुडादिमन्त्रैः रक्षणे आत्मगोपने परा आसक्ताः ते सर्पमुपचरन्ति सेवन्ते पक्षे—येये जनाः तन्त्रे स्वराष्ट्रचिन्तने ।

'तन्त्रं स्वराष्ट्रे चिन्तायां शास्त्रौषधमखेष्वपि' । इति वैजयन्ती ।

युक्तिं न्यायं यथास्थितं यथावत् समुचितमिति यावत् जानन्ति ज्ञायन्ते । मण्डलं राष्ट्रं चाऽभिलिखन्ति । (अभिरभागे इत्यभेः कर्मप्रवचनीयत्वेन तद्योगे द्वितीया) विशेषरूपेणाऽवगत्य पत्रारूढान् कुर्वन्ति । ये च मन्त्राणां षाड्गुण्यचिन्तनात्मकमन्त्रणाकार्याणां रक्षणं गोपनं परं प्रधानं येषां ते मन्त्ररक्षणपरास्ते जनाः नराधिपं राजानं किञ्चित्स्खलनेऽप्युग्रतेजसा जीवनाशकमिति यावत् उपचरन्ति आश्रयितुं शक्नुवन्तीत्यर्थः । तन्त्रमन्त्रादिषु सर्वथा कुशलैः सर्पनराधिपोपचरणं विधेयमिति भावः ।

जो मनुष्य-विष के औषधि विशेपका प्रयोग अच्छी तरह जनते हैं, और माहेन्द्रादि देवता के मन्त्र को भी जानते हैं, (अथवा) सर्पकुण्डलस्थान को विशेषरूप से जानकर पृथ्वी को खोदते हैं, और गारुडादि मन्त्रों से अपनी आत्मरक्षा में तत्पर रहते हैं, वे ही सर्पोंकी सेवा कर सकते हैं ॥ १ ॥

दूसरे पक्ष में अर्थ यह है कि—

जो अपने राष्ट्र चिन्तन में समुचित न्यायको जानते हुए राष्ट्रको चाहते हैं, और

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मुग्गकेसु त्ति ? अज्ज ! अप्पजीविआसरुपाइआ सप्पा (पुनराकाशे) किं भणासि-पेक्खिदुमिच्छामित्ति ? प्पसीददु प्पसीददु अज्जो । अत्थानं क्खु एदं, ता जइ दे कोदूहलं, ता एहि एदस्सिं आवासे दंसेमि । (पुनराकाशे) किं भणासि एदं क्खु भट्टिणो अमच्चरक्खसस्स गेहं, णत्थि इध अह्मारिसाणं प्पवेसोत्ति ? तेण हि गच्छदु अज्जो । जीविआए प्पसादेण अत्थि एत्थ मम प्पवेसो त्ति । कधं एसो वि अदिक्कन्तो ! [आर्य्य ! किं भणसि कस्त्वमिति ? आर्य्य अहं खलु आहितु-

---

पदार्थानां प्रस्तुतानामन्येषां वा यदा भवेत् ।
एकधर्मोऽभिसम्बन्धः स्यात्तदा तुल्ययोगिता ॥
नियतानां सकृद्धर्मः सा पुनस्तुल्ययोगिता ।

धर्म इत्यन्तरं यदुपादीयते इत्यस्य शेषान्नियतानां प्राकरणिकानामप्राकरणिकानां वा धर्मो यदुपादीयते सा तुल्ययोगितेत्यर्थः ।

वर्ण्यानामितरेषां वा धर्मैक्यं तुल्ययोगिता ।

इत्यादिदर्पण-प्रकाश कुवलयानन्दस्थलक्षणेभ्यः सर्पनराधिपयोर्द्वयोः प्राकरणिकत्वेन प्रस्तुतत्वादुपचरणात्मकैकक्रियाऽभिसम्बन्धतया श्लोकेऽस्मिन् तुल्ययोगितालङ्कारः । स च तन्त्रादिपदानां श्लिष्टत्वाच्छलेषालंकारानुप्राणितः । सर्पश्चासौ नराधिपश्चेत्यनयोरितरेतरद्वन्द्वः सर्पनराधिपाविति समासोऽवगन्तव्यः ।

केचित्तु—सर्पो नराधिप इव सर्प इव नराधिप इति वोपमितोपमानेति समासद्वयमवमत्योपमितसमासपक्षे सर्पे नराधिपत्वारोपादुपमानसमासपक्षे नराधिपे सर्पत्वारोपात्तत्साहश्यबोधनाद्वा तन्त्रादिपदानां श्लिष्टत्वाच्च श्लेषानुप्राणितो रूपकालंकारो वोपमालंकार इति वदन्ति । वस्तुतस्तु पूर्वोक्तालंकार एवाऽत्रयुक्तः सर्पनराधिपयोरुभयोरपि वक्तव्यत्वेनाहितुण्डिमकच्छ्मधारिविराधगुप्तवक्तुरभिमतत्वात् । सर्प इव नराधिपो नराधिप इव सर्पो वेत्येकस्य वक्तव्यत्वेनाऽनभिमतत्वाद्रूपकाद्यलंकाराऽसंभवादिति तत्त्वम् । अत्र वैदर्भी रीतिः । प्रसादगुणः । आर्याछन्दः ॥ १ ॥

किं ब्रवीषीति यन्नाट्ये विना पात्रं प्रयुज्यते ।
श्रुत्वेवाऽनुक्तमप्यर्थं तत्स्यादाकाशभाषितम् ॥ इति ॥

जो षाड्गुण्य चिन्तनरूप मन्त्रणाकार्य की रक्षा में तत्पर रहतेहैं, वे ही मनुष्य राजा की सेवा करते हैं ॥ १ ॥

(आकाश में) आर्य ! क्या कहते हो कि तुम कौन हो ? आर्य ! मैं जीर्ण-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ण्डिको जीर्णविषो नाम। किं भणसि अहमप्यहिना खेलितुमिच्छामीति ? अथ कतरां पुनरार्य्यो वृत्तिमुपजीवति ? किं भणसि राजकुलसेवक इति ? ननु खेलत्येव आर्य्योऽहिना। किं भणसि कथमिति ? अमन्त्रौषधिकुशलो व्यालग्राही, अगृहीताङ्कुशो मत्तगजवरारोही लब्धाधिकारो जितकाशी राजसेवक इति, एते त्रयोऽवश्यं

अप्रविष्टैः सहालापो भवेदाकाशभाषणम् ।

इति चाकाशभाषितस्य लक्षणदाह–आकाशे इति। आर्य ! मान्य किं भणसि कथयसि त्वं कः किं नामधेयः। आर्य, मान्य ! अहं (खलु शब्दो निश्चये वाक्यालङ्कारे वा) आहितुण्डिकः सर्पक्रीडनोपजीवी जीर्णविषो नाम जीर्णविषनाम्ना प्रसिद्धोऽस्मीत्यर्थः। किं भणसि कथयसि अहमपि अहिना सर्पेण खेलितुं क्रीडितुमिच्छामि अभिलषामि, अथाऽनन्तरं पुनः आर्यः पूज्यो भवान् कतरां कां वृत्तिं जीविकामुपजीवति समलम्बते, किं भणसि कथयसि राजकुलसेवकः नृपान्वयाश्रितः, (ननुशब्दो निश्चयार्थक, उत्तरवाक्यप्रदानार्थको वा) आर्यः पूज्यो भवान् अहिना सर्पेण ननु निश्चयेन (ननु शब्दोपपदसद्भावात् खेलतीत्यत्र भूते लट्, 'ननौ पृष्टप्रतिवचने' इत्यनुशासनेनेति बोध्यम्) किं भणसि कथयसि कथमिति केन प्रकारेणेति, मन्त्राश्चौषधयश्च मन्त्रौषधयस्तेषु कुशलो निपुणो मन्त्रौषधिकुशलो न मन्त्रौषधिकुशलः अमन्त्रौषधिकुशलः मन्त्रेषु गारुडादिकेषु औषधिषु ईश्वरमूलकादिषु चाज्ञ इत्यर्थः, व्यालमाशीविषं गृह्णाति तच्छीलो व्यालग्राही व्यालोपजीवी, अगृहीतोऽधृतोऽङ्कुशः शासनदण्डो येन सोऽगृहीताङ्कुशः मत्तश्चासौ गजवरश्चेति मत्तगजवरस्तमारोहतीति मत्तगजवरारोही उन्मत्तकरिश्रेष्ठारोहणशील इत्यर्थः, लब्धः प्राप्तोऽधिकारः कार्यप्रभुत्वं येन स लब्धाऽधिकारः जितेन जयेन काशते स्पर्द्धत इति जितकाशी अभिमानीत्यर्थः। सेवते इति सेवकः (कर्तरि ण्वुल्) राज्ञः सेवको राज-

---

विष नाम का आहितुण्डिक (सपेरा) हूं (फिर आकाश में) क्या कहते हो कि मैं भी सर्प से खेलने की इच्छा करता हूं। तो पहले यह कहो कि तुम क्या काम करते हो ? (फिर आकाश में) क्या बोलते हो कि मैं राज कुल सेवक हू । तो तुम सर्वदा सर्पसे खेलते ही होगे। क्या कहते हो कि किसतरह से ? गारुडादि मन्त्र के और ईश्वरमूलकादि औषधिके प्रयोग को नहीं जानने वाला, सर्पग्राही, और विना अङ्कुशलिये ही मतवाले हाथी के ऊपर चढ़ने वाला, और अधिकार पाये हुए अभिमानी राजासेवक, ये तीनों अवश्यही विनाशको प्राप्त होते हैं। यह पुरुष देखते २ ही चलागया ! (फिर आकाशमें) आर्य ! तुम फिर क्या कहते हो कि उन पेटारियों में क्या है। आर्य ! इसमें हमारी जीविका चलाने वाले सर्प

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विनाशमनुभवन्ति । कथं दृष्टमात्रोऽतिक्रान्त एषः ! आर्य्य ! त्वं पुनः किं भणसि-- किमेतेषु पेटकसमुद्गकेषु इति ? आर्य्य ! आत्मजीविकासम्पादकाः सर्पाः । किं भणसि--प्रेक्षितुमिच्छामीति ? प्रसीदतु आर्य्यः । अस्थाने--खलु एतत् तद्यदि ते कौतूहलं तदेहि एतस्मिन्नावासे दर्शयामि । किं भणसि--इदं खलु भर्त्तुरमात्य-राक्षसस्य गृहं, नास्तीह अस्मादृशानां प्रवेश इति ? तेन हि गच्छत्वार्य्यः-जीवि-कायाः प्रसादेनास्त्यत्र मम-प्रवेश इति । कथमेषोऽप्यतिक्रान्तः ?]

(दिशोऽवलोक्य संस्कृतमाश्रित्य स्वगतम्) अहो ! आश्चर्य्यम् ।

सेवको नृपपरिचारकः एते त्रयोऽवश्यं निश्चितं विनाशं मरणमनुभवन्ति प्राप्नुवन्ति सर्वथैषां प्रमादसम्भवादित्यर्थः । कथं केन प्रकारेण एष आकाशस्थपुरुषः दृष्टमात्रः (मयूरव्यंसकादयश्चेति समासः) अतिक्रान्तोऽन्तर्हितः । आर्य ! मान्य त्वं, किं भणसि कथयसि, एतेषु प्रत्यक्षतो दृश्यमानेषु पेटकानां समुद्गक इति पेटकसमुद्गका-स्तेषु पेटकसमुद्गकेषु मञ्जूषासम्पुटेषु किं वस्तु वर्तत इति शेषः । आर्य निजवृत्ति साधका आत्मजीविकासम्पादकाः सर्पाः फणिनः । किं भणसि कथयसि प्रेक्षितुं द्रष्टु-मिच्छामि वाञ्छामि । आर्यः पूज्यो भवान् प्रसीदतु प्रसन्नो भवतु । खलु निश्चये एतत् प्रेक्षणमित्यर्थः । अस्थानं अयुक्तम् । तत्तस्मात्कारणात् यदि ते तव कौतूहलं सर्पक्रीडावलोकनोत्कण्ठा वर्तत इति शेषः । तत्तर्हि आगच्छ एतस्मिन्नमुष्मिन् आ-वासे गृहे दर्शयामि अवलोकयामि । किं भणसि वदसि, इदं साक्षाद्दृश्यमानं खलु निश्चतं भर्त्तुः स्वामिनोऽमात्यराक्षसस्य गृहं भवनम् । अस्मादृशानां मद्विधा-नां जनानामिति शेषः । इहाऽस्मिन् गृहे प्रवेश आगमो नाऽस्ति न विद्यते । तेन हेतुना आर्यो भवान् गच्छतु व्रजतु । जीविकाया वृत्तेः प्रसादेन उपायेनेत्यर्थः । अत्रैतस्मिन् गृहे मम प्रवेश आगमनमस्ति वर्तते । कथं कुतः एषोऽपि अयमपि अ-तिक्रान्तोऽन्तर्हितः ।

दिशः ककुभोऽवलोक्य दृष्ट्वा संस्कृतं देववाणीमाश्रित्य समवलम्ब्य स्वगतम-

---

हैं (फिर आकाश में) क्या कहते हो कि मैं देखना चाहता हूं । तुम प्रसन्न हों प्रसन्न हो । तुमको यह देखना ठीक ही है । इस लिये यदि तुम्हारी इच्छा हो तो यहां आओ ? मैं इस घर में दिखाता हूं (फिर आकाशमें) क्या कहते हो कि यह मन्त्रिराक्षसका घर है ? । यहां हमारे जैसे पुरुषों का प्रवेश नहीं है इसलिये तुम चलेजाओ ? जीविका के कारणयहां भीमेरा प्रवेश हैं। क्या यह भी चलागया ?

(चारों ओर देखकर मनहीमन) आश्चर्य है । चाणक्यकी बुद्धि के अनुसार

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चाणक्यमतिपरिगृहीतं चन्द्रगुप्तमवलोक्य, विफलमिव राक्षसप्रयत्नमवगच्छामि । राक्षसमतिपरिगृहीतञ्च मलयकेतुमवलोक्य, चलितमिवाधिराज्याच्चन्द्रगुप्तमवगच्छामि । तथाहि—

कौटिल्यधीरज्जुनिबद्धमूर्तिं मन्ये स्थिरां मौर्य्यकुलस्य लक्ष्मीम् ।
उपायहस्तैरपि राक्षसेन विकृष्यमाणामिव लक्षयामि (१) ॥ २ ॥

नतिस्पष्टं कथयतीति शेषः । अहो (विस्मयसूचकमव्ययमिदम्) आश्चर्यम् चित्रमित्यर्थः । चाणक्यस्य कौटिल्यस्य मतिर्बुद्धिः परिगृहीता येन स तथोक्तस्तं तथोक्तं यद्वा चाणक्यस्य मत्या परिगृहीतं परिचालितम् चन्द्रगुप्तं वृषलमवलोक्य दृष्ट्वा राक्षसस्य प्रयत्नं प्रयासं विफलमिव वितथमिवाऽगच्छामि सम्भावयामि जानामीति यावत् । राक्षसस्य नन्दसचिवस्य मत्या बुद्ध्या परिगृहीतं परिचालितं यद्वा राक्षसस्य मतिः परिगृहीता स्वीकृता येन तथोक्तस्तं तथोक्तं मलयकेतुं पर्वतकपुत्रमवलोक्य दृष्ट्वा अधिको राजाऽधिराजस्तस्य भावोऽधिराज्यं तस्मादधिराज्यात् चलितं पृथग्भूतमिव चन्द्रगुप्तं मौर्यमवगच्छामि सम्भावयामीत्यर्थः । चाणक्य-राक्षसेति सचिवद्वयबुद्धिपाटवप्रदर्शनार्थमाह—तथाहीति—

कौटिल्येति । कौटिल्यस्य चाणक्यस्य धीर्बुद्धिरेव स्थैर्यसम्पादकत्वेन रज्जुर्दाम तया निबद्धा सम्बद्धा संयतेति यावत् मूर्त्तिराकृतिर्यस्याः सा तथोक्ता तां कौटिल्यधीरज्जुनिबद्धमूर्त्तिं चाणक्यमतिदामसंयताकृतिमित्यर्थः । मौर्यश्चासौ नृपश्चेति मौर्यनृपस्तस्य मौर्यनृपस्य चन्द्रगुप्तनृपतेर्लक्ष्मीं राज्यश्रियं स्थिरां निश्चलां मन्ये उत्प्रेक्षे सम्भावयामीति यावत् । राक्षसेन नन्दसचिवेन उपायाः सामादयः ।

सामदानदण्डभेदमित्युपायचतुष्टयम् ।

इत्यमरः । एव हस्ताः करास्तैरुपायहस्तैः साम-दान-दण्ड-भेदेत्युपायचतुष्टयात्मककरैरित्यर्थः । अपि विकृष्यमाणां बलेनाकृष्यमाणामिव मलयकेतुपक्षश्रितां

चलनेवाला चन्द्रगुप्तको देखकर राक्षसका उद्योग व्यर्थही दीखपड़ता है । और राक्षसकी बुद्धि के अनुसार चलनेवाला मलयकेतु को देखकर चन्द्र गुप्त को राज्य से हटे हुए की तरह देखता हूं । जैसे किः—

चाणक्य की बुद्धि रूपीडोरी से बँधी हुई चन्द्रगुप्त की राज्यलक्ष्मी को मैं स्थिर जानता हूं । पर वह भी राक्षसके सामादि उपायरूपी हाथों से खीची हुई की तरह दीख पड़ती है ॥ २ ॥

(१) एतेन चाणक्य-राक्षसयोर्बुद्धिकौशलं प्रदर्श्यते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तदेवमनयोःसुनयशालिनोः सचिवयोर्विरोधे संशयितेव नन्दकुललक्ष्मी लक्ष्यते । कुतः ?—

विरुद्धयोर्भृशमिह मन्त्रिमुख्ययोर्महावने वनगजयोरिवान्तरे ।

विधास्यमानामिवेति यावत् लक्षयामि सम्भावयामीत्यर्थः । चाणक्यबुद्धिरूपदामसंयताकृतिं मौर्यराज्यश्रियं निश्चलामपि राक्षसकर्तृकोपायचतुष्टयात्मकरकरणकाकर्षणयुक्तामिव तर्कयामीति भावः । रज्जुत्व-हस्तत्वयोश्चाणक्यबुद्ध्युपाययोरारोपान्निरङ्गरूपकालङ्कारः । मौर्यराज्यश्रियं स्थिरां मन्ये उपायहस्तैर्विकृष्यमाणामिवेति च वाच्योत्प्रेक्षालङ्कारश्चेत्यन्योन्यमेतयोः साङ्कर्यम् । उक्तञ्चैतदलङ्कारद्वयस्य लक्षणद्वयं साहित्यदर्पणे यथा—

रूपकं रूपितारोपाद्विषये निरपह्नवे । निरङ्गं केवलस्यैव रूपणं तदपि द्विधा ॥
मालाकेवलरूपत्वात् ,,
भवेत्सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना ।
वाच्या प्रतीयमाना सा प्रथमं द्विविधा मता ॥

अत्र वैदर्भी रीतिः । प्रसादगुणः । उपजातिश्छन्दः । उक्तं चैतल्लक्षणं यथा छन्दोमञ्जर्याम्—

अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः ॥ २ ॥

तदेवमिति । तत्तस्मात्कारणादेवमित्थमनयोश्चाणक्य-राक्षसयोः सुष्ठु सम्यक् नयेन नीत्या शालेते तच्छीलाविति सुनयशालिनौ (श्लाघार्थकशाङ्धातोर्णिनि । डलयोरैक्याल्लघटितरूपम्) तयोः सुनयशालिनोः सुनीतिविदोः सचिवयोरमात्ययोर्विरोधे वैरत्वे सति नन्दकुलस्य लक्ष्मीः राज्यश्रीः संशयिता क्व मामकीना स्थितिरिति सन्देहाकुलेव लक्ष्यतेऽवगम्यते तर्क्यते इति यावत् । अत्रोत्प्रेक्षालङ्कारः ।

विरुद्धयोरिति । महच्च तद्वनं चेति महावनं (कर्मधारयसमासः आन्महतः इत्याकारः) तस्मिन्महावने महाविपिने निविडकानने इत्यथः । भृशमत्यर्थं ।

अतिवेलभृशात्यर्थमतिमात्रोद्गाढनिर्भरम् इत्यमरः ।

विरुद्धयोः (विपूर्वकाद्रुधेः क्तः) विरोधं कुर्वतोः हस्तिन्यर्थं युध्यतोरिति यावत्

इसलिये अच्छी तरह नीतिको जानने वाले इन दोनों मन्त्रियों के परस्परविरोध होने पर नन्दकुल की राज्य लक्ष्मी का वापस आना असम्भव ही जानपड़ता है । जैसे किः—

सघन वन में परस्पर लड़ते हुए वन्य हस्तियों के बीच डरी हुई हस्तिनी की

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अनिश्चयाद्गजवशयेव भीतया गतागतैर्भृशमिव खिद्यते श्रिया (१) ॥३॥

वनगजयोः वन्यहस्तिनोरन्तरे मध्ये विद्यमानयेति शेषः । अनिश्चयाद्युद्धे जयपराजयनिर्णयाऽभावात् भीतया सन्त्रस्तया गजवशया करिण्या इव । वशा स्त्री करिणी च स्यात् इत्यमरः ।

इहाऽस्मिन्नुपस्थितविषयेऽन्यजयात्मकव्यापार इत्यर्थः । भृशमत्यर्थं विरुद्धयोः परस्परजयार्थं विरोधमाचरतोर्मन्त्रिमुख्ययोरमात्यप्रवरयोः कौटिल्य-राक्षसयोरन्तरे मध्ये अनिश्चयादन्यतरविजयानिर्धारणात् भीतया भययुक्तया श्रिया राजलक्ष्म्या गतागतैः गतानि चागतानि चेति तथोक्तानि तैर्गतागतैर्गमनागमनैः मलयकेतुतो वृषले गतिः वृषलान्मलयकेतावगतिरित्येवंरूपैरित्यर्थः । भृशं श्रमाधिक्यादत्यर्थं खिद्यते क्लिश्यत इव । यथा करिण्यर्थमन्योऽन्यं विरोधिकारिवन्यमत्तहस्तिद्वयमध्यवर्त्तिनी करिणी अन्यतरजयानवधारणाद्भीता सती खेदयुक्ता भवति तथैव कौटिल्य-राक्षसोभयान्तरालस्थिता-राज्यश्रीरतिशयं क्लेशभागिनीवेति-भावः ।

अमात्यद्वयस्यारण्यकरिसाम्यप्रदर्शनाद्राजलक्ष्म्याश्च करिणीसाम्यप्रदर्शनाच्चोपमाद्वयम् राजलक्ष्म्याः क्लेशसम्भावनादुत्प्रेक्षा तथा चात्रोपमानुप्राणितोत्प्रेक्षालङ्कारः । वैदर्भी रीतिः । प्रसादगुणः । रुचिरा वृत्तम् ।

"जभौ सजौ गिति रुचिरा चतुर्ग्रहैः" इति लक्षणात् ।

उपायाऽपायशङ्काभ्यां प्राप्त्याशाकार्यसम्भवः ।

इति लक्षणादियं प्राप्त्याशा । कौटिल्यधीरज्जुनिबद्धेत्युपायशङ्का । राक्षसेन निष्कृष्यमाणेत्यपायशङ्का ताभ्यां मौर्यश्रीस्थैर्यात्मककार्यस्य सम्भवः कादाचित्कत्वेन सम्भावना ।

प्रतिपाद्य कथाङ्गं स्यात्पताका व्यापिनी कथा ।

इति लक्षणाद्विराधगुप्त-राक्षसेत्युभयोर्महती सम्वादकथा पताका । प्राप्त्याशा-पताकयोः सम्बन्धादेष गर्भसन्धिरिति बोध्यम् ॥ ३ ॥

तरह परस्पर विरोध करते हुए दोनों प्रधान मन्त्रियों के बीच में पड़ी राज्यलक्ष्मी गमन और आगमन से खिन्न की तरह मालूम होती है ॥ ३ ॥

(१) एतेन पद्येन मिथो विपक्षाश्रितराक्षसकौटिल्येति मन्त्रिद्वयस्योन्मत्तवन्यगजोपमादानान्निरंकुशत्वाद्यतिमलिष्ठत्वं सूच्यते । राजलक्ष्म्याश्च वशोपमादानादुभयाश्रितत्वादतिखेदयुक्तत्वं सूच्यते ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तद्यावत् अहममात्यराक्षसं पश्यामि (इति परिक्रम्य स्थितः)

(ततः प्रविशत्यासनस्थः स्वभवनगतः पुरुषेणानुगम्यमानः सचिन्तो राक्षसः)

राक्षसः—(उद्ध्र्वमवलोक्य सवाष्पम्) कष्टं भोः ! कष्टम्—

वृष्णीनामिव नीतिविक्रमगुणव्यापारशान्तद्विषां

तद्यावदिति । तत्तस्मात्कारणात् यावद्यावत्कालम् अहममात्यराक्षसं राक्षसनाममन्त्रिणं पश्यामि प्रेक्षे । प्रथमाङ्कावसाने कौटिल्येन मदबलेन विगाहमानमिति राक्षसकृतविगाहमानस्य नीतिप्रयोगस्य द्वितीयाङ्के कथयिष्यमाणस्य सूचनादिदमङ्कास्यम् । उक्तश्च दर्पणे तल्लक्षणं यथा—

"अङ्कान्तपात्रैरङ्कस्यं छिन्नाङ्कस्यार्थसूचनात्" इति ।

अङ्कान्ते सूचितः पात्रैस्तदङ्कस्याऽविभागतः ।
यत्राऽङ्कोऽवतरत्येषोऽङ्कावतार इति स्मृतः ॥

इत्युक्तलक्षणात् । द्वितीयाङ्केऽभिधास्यमानक्षपणक—शकटदासादिनिग्रहस्य पूर्वाङ्कार्थानुसङ्गतत्वादाहितुण्डिकप्रवेशस्य सूचनाच्चैषोऽङ्कावतार इति । परिक्रम्य संचर्य ।

ततः प्रविशतीति । ततः स्थित्यनन्तरम् आसनस्थः आसने तिष्ठति यः स तथोक्तः स्वभवनगतः निजनिलयवर्त्ती पुरुषेणाऽनुचरेणाऽनुस्रियमाणः चिन्तया शोकेन सह वर्त्तमानः सचिन्तो राक्षसो नन्दसचिवः प्रविशति रङ्गस्थानमिति शेषः ।

ऊर्ध्वमवलोक्येति । ऊर्ध्वमुपरिष्टादवलोक्य दृष्ट्वा सवाप्पं साश्रुनेत्रं । (क्रियाविशेषणमेतत्) चिन्तावसरे ऊद्ध्र्वावलोकनं सुप्रसिद्धम् पूर्वघटनास्मरणाद्बाष्पपात इत्यनुसन्धेयम् ।

विवादे विस्मये हर्षे खेदे दैन्येऽवधारणे । सम्भ्रमे चैव शब्दानां द्विस्त्रीरुक्तिर्न दुष्यति॥

इत्यभिधानप्रामाण्यात्कष्टमिति खेदे द्विरुक्तिः ।

वृष्णीनामिति । नीतिर्दण्डनीतिर्विक्रमः शौर्यं गुणाः सन्धि-विग्रहप्रभृतयः

इस लिये चलूं तबतक मैं मन्त्रिराक्षसको देखता हूं । (घूमकर खड़ा होकर जाता है)

(तब अपने घरमें आसन पर बैठा और नौकरों के साथ चिन्तित राक्षस प्रवेश करता है)

राक्षसः—(ऊपर देखकर आंखों में आंसू भरकर) कष्ट है, महा कष्ट है !!

नीति (दण्डनीति) विक्रम (शौर्य्यं) गुण (सन्धिविग्रहप्रभृति) इनके यथा-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नन्दानां विपुले कुलेऽकरुणया नीते नियत्या क्षयम् ।
चिन्तावेशसमाकुलेन मनसा रात्रिन्दिवं जाग्रतः
सैवेयं मम चित्रकर्म्मरचना भित्तिं विना वर्त्तते (१) ॥४॥

नीतिश्च विक्रमश्च गुणाश्चेत्येषामितरेतरद्वन्द्वः नीतिविक्रमगुणास्तेषां व्यापारेण यथावत्प्रयोगेण यद्वा—नीतिः षाड्गुण्यं विक्रमः–प्रभुत्वं शूरत्वमिति यावत् तावेव गुणौ तयोर्व्यापारेण यथोचितप्रयोगेण शान्ताः शमिता (अन्तर्भावितोऽत्र ण्यर्थः । वा पदान्त इति सूत्रेण पाक्षिकनिपातः) द्विषः शत्रवो यैस्ते तथोक्तास्तेषां तथोक्तानां वृष्णीनां यदूनामिव नन्दानां नवसंख्यकानां विपुले महति कुलेऽन्वयेऽकरुणया निर्दूदयया अननुकुलयेति यावत् । नियत्या भाग्येन क्षयं नाशं नीते प्रापिते सति चिन्तायाः दुःखमापतितं कथं वा तदुद्धार इत्येवंरूपभावनायाः आवेशात्सद्भावात् समाकुलेन व्यग्रेण मनसा हृदयेनोपलक्षितस्येति शेषः । (तत्र 'इत्थम्भूतलक्षणे' इति तृतीया) रात्रिश्च दिवा चेति रात्रिन्दिवम् (अचतुरविचतुरेति निपातः) जाग्रतश्चिन्ताधिक्यादनिद्रिस्य निद्रामननुभवत इति यावत् । मम सैवेयं नन्दजीवनकालिक्येवेत्यर्थः चित्रकर्मरचना विचित्रपौरुषव्यापारः । भित्तिं कुड्यमाश्रयमाधारमिति यावत् विना वर्त्तते प्रवर्त्त इत्यर्थः । चिन्तयाऽनेकविधिविषयकः सङ्कल्पः प्रादुर्भवति किन्तु न समुचितस्थानमाप्नोतीति भावः भित्तेराश्रयत्वेन तामन्तरा चित्रकर्मरचनायाः स्थित्यसम्भवेऽपि स्थित्यभिधानाद्विशेषालङ्कारः । उक्तञ्च लक्षणं दर्पणे यथा—

यदाधेयमनाधारमेकञ्चानेकगोचरम् । किञ्चित्प्रकुर्वतः कार्यमशक्यस्येतरस्य वा ।
कार्यस्य करणं दैवाद्विशेषस्त्रिविधस्ततः ।
विभावना विनापि स्यात्कारणं कार्यजन्म चेत् ।

इति कुवलयानन्दोक्तलक्षणाद्भित्तेरसद्भावे चित्रकर्मरचनासत्त्वभावाद्विभावनालङ्कारः ।

किञ्चात्र कारणासत्त्वेऽपि कार्योत्पत्तौ विभावनालंकारस्य विषयत्वाच्चित्रकर्मरचनात्मककार्यस्योत्पत्तौ भित्तिरूपकारणस्यापेक्षणादेतमन्तराऽप्युक्तरूपकार्योविर्भावनानाद्विभावनालङ्कारः । उक्तञ्चैतल्लक्षणं यथा काव्यप्रकाश–दर्पण–कुवलयानन्देषु—

वत्प्रयोग करने से शत्रु जिनके शान्त हैं ऐसे वृष्णिवंशियों के सदृश नन्दराजा के विस्तृत कुल के निर्दूदयभाग्य द्वारा नाश होने पर अधिकचिन्ता के कारण व्याकुल मन से रातदिन जाग रहा हूं यह भी विना आधार के चित्र व्यापार करना है ॥ ४॥

---

(१) एतेनाऽमात्यराक्षसो नियतः प्राबल्यं सूचितवान् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथवा—नेदं विस्मृतभक्तिना न विषयव्यापारमूढात्मना

क्रियायाः प्रतिषेधेऽपि फलव्यक्तिर्विभावना । का० प्र०

क्रियतेऽनयेति व्युत्पत्त्या प्रसिद्धहेतुपरः । क्रियाशब्दः । विभावयति कारणान्तरं कल्पयतीति व्युत्पत्त्या विभावनाशब्दोऽप्यन्वर्थः । प्रसिद्धहेत्वसद्भावेऽपि कार्याविर्भावो हि कार्यस्य हेत्वन्तरं विभावयति तथा च प्रसिद्धहेत्वभावेऽपि तत्कार्यात्मकफलव्यक्तिः, प्रकाशनमभिधानं विभावनाऽलंकार इति कारिकार्थः ।

शाब्दिकनये-क्रियाया एव हेतुत्वात्कारिकायां क्रियापदोक्तिः । वस्तुतस्तु कारणप्रतिषेधे कार्यवचनं विभावनेति प्रदीपकृत् । शाब्दिकमताङ्गीकारे आत्मादेरपि हेतुत्वप्रसङ्ग इत्याह वस्तुतस्त्विति ।

विभावना विना हेतुं कार्योत्पत्तिर्यदुच्यते ।
उक्तानुक्तनिमित्तत्वाद्द्विधा सा परिकीर्तिता ॥ सा० द०
विभावना विनाऽपि स्यात्कारणं कार्यजन्म चेत् । कुवल०

यत्तु—चित्रकर्मसत्त्वेऽपि भित्तेरभाव इति विशेषोक्तिस्तन्न ।

विशेषोक्तिरखण्डेषु फलावचः । का. प्र. ।
सति हेतौ फलाभावे विशेषोक्तिस्तथा द्विधा । सा. द. ।

इत्यादि प्रकाशदर्पणोक्तलक्षणासंघटनात् । चित्रकर्मात्मककार्यम्प्रति भित्तेरेव कारणत्वेन भित्तिं प्रति चित्रकर्मणो हेतुत्वाऽसम्भवात् यथा कथञ्चित्स्वेच्छया तथा कल्पनेनैतदलंकारकथनं सर्वथाऽनादरणीयमेवेति ध्येयम् ।

विशेषालङ्कार-विभावनालङ्कारयोः परस्परसन्देहसाङ्कर्यम् । सादृश्यार्थकेवशब्दसत्त्वादुपमालङ्काराभिधानात् वृष्णीनामिवेत्युपमालंकारेण पूर्वोक्तालंकारद्वयस्य मिथोऽनपेक्षया संसृष्टिः । एवं च पृथगलंकारोयं संसृष्टिर्नाम इति बोध्यम् ।

प्रसादोऽत्र गुणः । पाञ्चाली रीतिः । शार्दूलविक्रीडितं छन्दः ॥ ४ ॥

नेदमिति । परस्याऽऽत्मनो भिन्नस्य मलयकेतोरित्यर्थः। दास्यं दासस्य कर्म परायत्तत्वमिति यावत् एत्य प्राप्य स्वीकृत्येत्यर्थः । मया आत्मना नीतौ नीतिप्रयोगे यन्मनः स्वान्तं निपुणमतिशयं साभिनिवेशं साग्रहमिति यावत् दीयते विधीयते इदं तत् नीतौ मनोदानं प्रभुस्नेहस्मरणं कुर्वतैव दीयते न तु विस्मृतभक्तिना मये-

अथवा—मलयकेतुका नोकर बनकर मैं नीति प्रयोगमें जो आग्रह के साथ मन देता सो अपने प्रभु की भक्ति भूलजाने के लिए नहीं, यथावत् सामदानादि प्रयोग में आत्माकी मूढता के कारण भी नहीं, और अपनी प्रतिष्ठा बढाने के लिए भी नहीं,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्राणप्रच्युतिभीरुणा न च मया नात्मप्रतिष्ठार्थिना ।
अत्यर्थं परदास्यमेत्य निपुणं नीतौ मनो दीयते
देवः स्वर्गगतोऽपि शात्रववधेनाराधितः स्यादिति (१) ॥५॥

(आकाशमवलोकयन् सास्रम्) भगवति कमलालये ! भृशम् अगुणज्ञाऽसि । कुतः ?—

त्यर्थः । विस्मृता भक्तिर्येन स तथोक्तस्तेन तथोक्तेन। अत्रेदं बोध्यम्—भक्तिशब्दस्य प्रियादिगणे पाठा'दप्पूरणीप्रियादिष्वि'ति निषेधाद्विस्मृता भक्तिर्येनेति विग्रहे 'स्त्रियाः पुंवदि'ति पुंवद्भावाप्राप्त्या नोक्तप्रयोगोपपत्तिरिति चेन्न । दृढा भक्तिर्यस्य स दृढभक्तिरिति कौमुदीकृद्रीत्या स्त्रीपूर्वपदस्याऽविवक्षितत्वेन नपुंसकपूर्वपदबहुव्रीहेर्विवक्षणात्तदुपपत्तेः न वा विषयव्यापारे यथावत्सामदानादिप्रयोगे मूढोऽज्ञ आत्माऽन्तःकरणं यस्य तेन विषयव्यासङ्गरूढात्मनेति पाठे विषयेषु रूपादिषु व्यासङ्ग आसक्तिस्तत्र रूढः स्थिरपरिचय आत्मान्तःकरणं यस्य तेनेत्यर्थः । न वा प्राणस्य जीवस्य प्रच्युतिर्नाशः प्राणप्रच्युतिस्ततो भीरुणा भययुक्तेन शङ्कितेनेति यावद् मनो दीयते इत्यर्थः । नवा आत्मनः स्वस्य प्रतिष्ठा महत्त्वं तस्या अर्थिना अभिलाषुकेन याचकेन स्वकीर्त्तिलाभेच्छयेत्यर्थः मनो दीयते किन्तु देवो नन्दः स्वर्गगतोऽपि परलोकस्थितोऽपि शात्रववधेन रिपुविनाशेन आराधितस्तदभीष्टसम्पादनात्सन्तोषितः स्यादिति हेतो मनो दीयते इत्यर्थः ।

किञ्चित्पृष्टमपृष्टं च कथितं यत्प्रकल्पते । तादृगन्यव्यपोहाय परिसंख्या तु सा मता ॥
प्रश्नादप्रश्नतो वाऽपि कथिताद्वस्तुनो भवेत् ।
तादृगन्यव्यपोहश्चेच्छाब्द आर्थोऽथवा तदा । परिसंख्या,

इति प्रकाश–दर्पणोक्तलक्षणाभ्यां परलोकस्थितस्वामिनो नन्दस्य समाराधनार्थमरिविनाशात्मकवस्तुनो विस्मृतभक्तित्वादिहेतुचतुष्टयस्य निराकरणादत्र परिसंख्यालङ्कारः । प्रसादगुणः । पाञ्चाली रीतिः । शार्दूलविक्रीडितं वृत्तम् ॥ ५ ॥

आकाशेति । आकाशं विष्णुपदमूर्ध्वप्रदेशमित्यर्थः । अवलोकयन् पश्यन् अस्रेण नेत्रजलेन सह वर्त्तमानं सास्रं सरोदनम् यथा स्यात्तथा मनसि ब्रवीतीति

बल्कि स्वर्ग में गये हुए देव (नन्दराजा) शत्रु के बधसे आराधित हों इस लिये ॥५॥

(आकाश की ओर देखता हुआ आखों में आंसू भर कर) भगवति ! लक्ष्मि ! तू बड़ी अगुणज्ञा है । क्योंकिः—

---

(१) एतेनाऽमात्यराक्षसः स्वामिभक्तेराधिक्यं सूचयति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आनन्दहेतुमपि देवमपास्य नन्दं
रक्ताऽसि किं कथय वैरिणि मौर्य्यपुत्रे ? ।
दानाम्बुराजिरिव गन्धगजस्य नाशे
तत्रैव किं न चपले ! प्रलयं गताऽसि ? ॥ ६ ॥

शेषः (क्रियाविशेषणमेतत्) भगमैश्वर्यं विद्यते यस्याः सा भगवती तत्सम्बोधने भगवति ऐश्वर्यशालिनि हे पूज्ये इति पर्यवसितोऽर्थः, कमलं पद्मालय आश्रयो निवासस्थानं यस्याः सा कमलालया तत्सम्बोधने हे कमलालये ! 'लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया' इत्यमरः । भृशमतिशयं गुणं जानातीति गुणज्ञा न गुणज्ञा अगुणज्ञा ज्ञानशून्ये त्यर्थः असि भवसि । लक्ष्म्यामङ्गीकृतपुरुषपरित्यागात्मकदोषस्य सदैव स्थितिः । उक्तञ्च—लक्ष्मीः पुंयोगमाशंसुः कुलटेव कुतूहलात् । अन्तिकेऽपि स्थिता पत्युश्छलेनाऽन्यं निरीक्षते ॥

तथा च तस्मास्तद्दोषमभिदर्शयन्नाह—

आनन्दहेतुमिति । हे चपले ! हे अस्थिरस्वभावे ! आनन्दस्य सुखस्य सम्भोगादिसम्पादनस्य हेतुं कारणमपि देवं स्वामिनं नन्दमपास्य परित्यज्य वैरिणि शत्रौ प्रतिकूले मौर्यपुत्रे असद्वंशोद्भवचन्द्रगुप्ते किं कथं रक्ताऽनुरागवती असि इति कथय । गन्धप्रधानो गजो गन्धगजः (शाकपार्थिवादित्वात्समासः) तस्य गन्धगजस्य नाशे मरणे सति (अत्र 'यस्य च भावेने'ति सप्तमी) दानाम्बुराजिरिव तदीयमदजलधारेव तत्रैव नन्दे एव किं कथं प्रलयं तिरोधानं न गताऽसि प्राप्ताऽसि इति कथय । दुष्कुलजातपुरुषाश्रयणापेक्षया तव तिरोधानमेव समुचितमिति भावः। चपले इति सम्बोधनपदं लक्ष्म्या कार्यमूढतामभिव्यञ्जयति । दानाम्बुराजिरिवेत्यत्रत्यसादृश्यार्थकेवशब्देन लक्ष्म्या दानाम्बुराजितुल्यत्वप्रतिपादनादत्रोपमालङ्कारः । स च—

उक्तैर्विशेषणैः साभिप्रायैः परिकरो मतः ।

इति दर्पणस्थलक्षणादानन्दहेतुमेवेत्युभयविशेषणपदस्य साऽभिप्रायत्वेनाऽभिधानात्परिकरालङ्कारेण संसृष्टः । वैदर्भी रीतिः । प्रसादगुणः । वसन्ततिलकवृत्तम् । लक्षणं यथा—

ज्ञेयं वसन्ततिलकं तभजा जगौ गः ॥ ६ ॥

हे चपलस्वभाववालि ! सुखसम्भोगादिसाधन करने वाले राजा नन्द को छोड़कर तू शत्रु चन्द्रगुप्त में क्यों अनुरागवती हो गयी ? मतवाले हाथी के नाश होने पर मदजलधारा की तरह तू उनके साथ २ क्यों नहीं नष्ट हो गई ? ॥६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अपि च अनभिजाते !

पृथिव्यां किं दग्धाः प्रथितकुलजा भूमिपतयः
पतिं, पापे ! मौर्य्यं यदसि कुलहीनं वृतवती ?
प्रकृत्या वा काशप्रभवकुसुमप्रान्तचपला
पुरन्ध्रीणां प्रज्ञा पुरुषगुणविज्ञानविमुखी ॥ ७ ॥

अपि चेति। किञ्चेत्यर्थः अभिजाता कुलीना तद्भिन्नाऽनभिजाता ततसम्बोधने अनभिजाते असत्कुलसम्भूते । अकुलीनत्वादस्याः सदाचरणेऽप्रवृत्तिरिति भावः। दुःखाधिक्यादनभिजाते इति गालनम् ।

नन्दनृपानाश्रयणपूर्वकचन्द्रगुप्ताश्रयणेन लक्ष्म्याः शाठ्यमभिसूचयन्नाह—पृथिव्यामिति । हे पापे ! पापाचरणविशिष्टे दुष्कृतकारिणि प्रथितानि विख्यातानि-कुलानि वंशाः प्रथितकुलानि तेषु जाताः दग्धाः वह्निसाद्भूता विनष्टा भाग्येनेति शेषः । यद्यस्मात्कारणात् कुलहीनं दुष्कुलजातं मौर्यं चन्द्रगुप्तं पतिं स्वामिनं वृतवती स्वीकृतवती असि सत्कुलोद्भूताऽसद्भावे दुष्कुलजाताश्रयणमुचितम् सति तु तस्मिन्तदाश्रयणन्तवायुक्तमिति भावः । वा अथवा काशः प्रभवो यस्य तत्काशप्रभवं तच्च तत्कुसुमं काशप्रभवकुसुमं तस्याऽग्रं तद्वच्चपला चञ्चला अचिरस्थायिनी पुरन्ध्रीणां स्त्रीणां प्रज्ञा बुद्धिः प्रकृत्या स्वभावेनैव पुरुषगुणविज्ञाने सत्पुरुषगुणविवेचनें विमुखी पराङ्मुखी भवति । भगवति ! कमलालये ! इत्यादिराक्षसस्य वितर्कप्रतिपादनरूपं नामाऽङ्गम् । प्रकृत्येत्यादिपराद्धोत्मकसामान्येन पृथिव्यामित्यादिपूर्वार्द्धात्मकविशेषस्य समर्थनादत्राऽर्थान्तरन्यासोऽलङ्कारः ।

उक्तञ्च तल्लक्षणं दर्पणे यथा—

सामान्यं वा विशेषेण विशेषस्तेन वा यदि । कार्यञ्च कारणेनेदं कार्येण च समर्थ्यते ॥
साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा ततः ।

स च प्रान्तचपलेत्यत्र प्रान्त इव चपलेत्युपमालंकारेण संसृष्टः ।

वैदर्भी रीतिः । प्रसादगुणः । प्रभवशब्दस्याधिकस्य कथनादधिकपदत्वदोषः । शिखरिणी छन्दः ॥ ७ ॥

और भीः—हे असत्कुलीने ! हे पापे ! क्या प्रतिष्ठितकुलवाले और राजा पृथ्वी में नहीं हैं, जिससे तूने कुलहीनचन्द्रगुप्त को अपना पति बना लिया है? इससे मालूम होता है कि स्त्रियों की बुद्धि काशपुष्प का अग्रभाग के सदृश चञ्चल होती है अतः पुरुष के गुणों को जानने में समर्थ नहीं होती ॥ ७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अपि च, अविनीते! तदहमाश्रयोन्मूलनेनैव त्वामकामां करोमि। (विचिन्त्य) मया तावत् सुहृत्तमस्य चन्दनदासस्य गृहे गृहजनं निक्षिप्य नगरान्निर्गच्छता न्याय्यमनुष्ठितम्। किं कारणमिति? कुसुमपुराभियोगं प्रति अनुदासीनो राक्षस इति, तत्रस्थानामस्माभिः सह एककार्य्याणां देवपादोपजीविनां नोद्यमः शिथिलीभविष्यतीति। चन्द्रगुप्तशरीरमभिद्रोग्धुमस्मत्प्रयुक्तानां तीक्ष्णरसदायिनामुपसंग्रहार्थं

अपि चेति। अविनीते! दुःस्वभावे, तत्तस्मात्कारणादहमाश्रयस्य मौर्यात्मकत्वदास्पदस्योन्मूलनेन विनाशेन त्वां भवतीमकामां निष्फलाभीष्टां करोमि। करिष्यामीत्यर्थः। (भविष्यत्सामीप्ये लट्)। विचिन्त्य राजलक्ष्म्याश्रयोन्मूलनहेतुभूतोपायं विचार्येत्यर्थः। तमेव मया तावदित्यादिना प्रपञ्चयति तावत्-अतिशयेन सुहृदिति सुहृत्तमः (अतिशायने तमबिष्ठनाविति तमप्)। सुहृत्तमस्य मित्रवर्यस्य चन्दनदासस्य गृहे सद्मनि गृहजनं कलत्रं निक्षिप्य न्यासीकृत्य स्थापयित्वेत्यर्थः। नगरात्पुरात् निर्गच्छता निःसरता मया न्यायादनपेतं न्याय्यं समुचितमनुष्ठितं विहितम्। कुसुमपुरस्याऽभियोग आक्रमणं कुसुमपुराऽभियोगस्तं कुसुमपुराऽभियोगं प्रति राक्षसः तदाख्यनन्दप्रधानसचिवः अनुदासीनः सोद्यमः (उत्पूर्वकादासेः शानचि 'इदास' इति ईदादेशे नञ् समासे च रूपम्) इत्यस्माद्धेतोः एकं प्रधानं कार्यं मौर्योन्मूलनात्मकमुद्देश्यं येषां ते एककार्यास्तेषाम् तत्र तिष्ठन्तीति तत्रस्थास्तेषां तत्स्थाने वर्तमानामित्यर्थः। (तत्पुरुषे कृति बहुलम् इति सप्तम्या अलुक्) देवस्य राज्ञो नन्दस्येत्यर्थः पादानुपजीवन्ति समाश्रयन्ते इति देवपादोपजीविनस्तेषां देवाऽनुचराणामित्यर्थः। अस्माभिः सहोद्यमश्चेष्टा व्यापार इति यावत् न शिथिलीभविष्यति मन्दः सम्पत्स्यते। चन्द्रगुप्तशरीरं मौर्यदेह मभिद्रोग्धुं जिघांसुमस्मत्प्रयुक्तानां मत्प्रेरितानां तीक्ष्णरसं विषं ददति तच्छीला इति तीक्ष्ण-

---

और भीः-हेदुष्टस्वभाववाली! इसी कारण तेरे आश्रय रूप चन्द्रगुप्तका नाशकरके मैं तुझे भी निष्फलमनोरथ वाली करता हूँ (विचारकर) नगरसेबाहर आतेसमय परम सुहृद चन्दन दास के घरमें अपने गृहजनोंको रखकर मैंने अच्छा ही किया। क्यों कि राक्षस तय्यार है। कुसुमपुर के रहने वाले और हमलोगोंके साथ एककार्य करने वाले नन्दराजाके नौकरों का उद्योग शिथिल न होगा। चन्द्रगुप्त के शरीर को जलाने के लिए मेरे द्वारा भेजे गये विषरस के देने वालों का संग्रह करने के लिए और शत्रु के कार्य को भङ्ग करने के लिये मैंने बहुत सा द्रव्य इकट्ठा करके शकटदास को नियुक्त

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परकृत्योपजापार्थश्च, महता कोशसञ्चयेन स्थापितः शकटदासः। प्रतिक्षणमरातिवृत्तान्तोपलब्धये, तत्संहतिभेदाय च व्यापारिताः सुहृदो जीवसिद्धिप्रभृतयस्तत् किमत्र बहुना ?—

इष्टात्मजः सपदि सान्वय एव देवः
शार्दूलपोतमिव यं परिपुष्य नष्टः ।

रसदायिनस्तेषामुपसंग्रहार्थं सञ्चयार्थं परस्य शत्रोः कृत्यं कार्यं परकृत्यं तस्योपजापो भङ्गोऽर्थो यस्य, तत्परकृत्योपजापार्थं यद्वा परेषां शत्रूणां कृत्यमेव कृत्यं येषां तेषां तथोक्तानां शत्रुकार्यसम्पादकानामित्यर्थः । उपजापार्थं (अर्थेन सह नित्यसमासः) भेदार्थं धनप्रदानादिनेति शेषः । महता प्रचुरेण कोशसञ्चयेन धनराशिना शकटदासो निजसुहृत् स्थापितो नियुक्तः । प्रतिक्षणमनवरतम् अरातेः शत्रोर्वृत्तान्तस्योदन्तस्य लब्धये प्राप्तये ज्ञानायेति यावत् (अत्र निमित्तार्थिका चतुर्थी) तेषामरातीनां संहतिर्मेलनं तस्य भेदनाय भङ्गाय च (समुच्चयार्थकोऽत्र चशब्दः) जीवसिद्धिप्रभृतयः जीवसिद्धिप्रमुखाः सुहृदो मित्राणि व्यापारिताः नियुक्ताः तत्तस्मात्कारणादत्राऽस्मिन् शत्रुभेदनरूपविषये बहुनाऽधिकेन किं न किमपीत्यर्थः ।

राक्षसेन प्रकृतकार्यस्योत्कर्षाऽभिधानात् चन्द्रगुप्तेत्यादिजीवसिद्धिप्रभृतय इत्यन्तमिदं प्रकृतोत्कर्षाऽभिधानमुदाहरणम् ।

इष्टात्मज इति । इष्टाः प्रिया आत्मजाः पुत्रा यस्य स इष्टात्मजः (हेतुगर्भविशेषणमेतत्) अन्वयेन वंशेन संहितः सान्वयः सवंशः निजाष्टपुत्रसहित इत्यर्थः देवो नृपो नन्दः शार्दूलस्य व्याघ्रस्य पोतः सुतस्तमिव ।

पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः । इत्यमरः ।

यं मौर्यं परिपोष्य दासीक्षेत्रजमपि पुत्रत्वेन संरक्ष्य सपदि तत्क्षणं नष्टो विनाशमुपगतः हीनमपि यमुत्तमपुत्रवत् परिपाल्य मृत इति भावः । तस्यैव मौर्यस्यैव मर्म जीवनस्थानं बुद्धिरेव विशिखो बाणस्तेन बुद्धिविशिखेन भिनद्मि विदारयामि, यदि दैवं भाग्यम् अमृष्यमानमसहमानम् (अदृश्यमानमिति पाठे) अप्रत्यक्षं सत् वर्मी रक्षकं न भवेत् न स्यात् । यथा व्याघ्रो निजपुत्रं परिपाल्य तेनैव खादितो नश्यति, तथैव प्रियपुत्रो नन्दो निजकिङ्करीगर्भजत्वेन हीनमपि यं चन्द्रगु-

---

कर दिया है । हमेशा शत्रु की गतिविधि को जानने के लिये, और शत्रुके मेल को भङ्ग करने के लिये जीव सिद्धि आदि मित्र भेजेगये हैं । इसमें विशेष कहना क्या है:—

प्रियपुत्रवाला नन्दराजा जिस चन्द्रगुप्त को व्याघ्र के बच्चों की तरह पालकर सप-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तस्यैव बुद्धिविशिखेन भिनद्मि मर्म
वर्मीभवेद्यदि न दैवमदृश्यमानम् ॥ ८ ॥
(ततः प्रविशति कञ्चुकी)

कञ्चुकी—कामं नन्दमिव प्रमथ्य जरया चाणक्यनीत्या यथा

मपत्यं परिपाल्य नष्टत्वं गतः । तस्यैव चन्द्रगुप्तस्य मर्मस्थानं बुद्धिवाणद्वारा विदारयामि यदि चन्द्रगुप्तस्यादृश्यमानं भाग्यं रक्षकं न स्याद्यदि च तदपि दृश्यमानं चेत्तदा तस्यापि प्रतीकारं कर्त्तुं शक्नुयामिति सरलार्थः । दैवस्यानुकूलत्वे सकलमभीष्टं फलति प्रतिकूलत्वे तु नेति भावः ।

शार्दूलपोतमिव यमित्यत्र सामान्यधर्मः स्वोत्पादकविनाशकत्वमौपम्यवाचक इव शब्दः उपमेयो यच्छब्दवाच्यश्चन्द्रगुप्तः उपमानं शार्दूलपोतः एतेषां वाच्यत्वादत्र पूर्णोपमालङ्कारः । उक्तं हि दर्पणे यथा—

सा पूर्णा यदि सामान्यधर्म औपम्यवाचि च । उपमेयं चोपमानं भवेद्वाच्यमिति,

बुद्धिविशिखेनेत्यत्र बुद्धौ विशिखत्वारोपेण रूपकालङ्कारः ।

रूपकं रूपितारोपाद्विषये निरपह्नवे । इति दर्पणोक्तलक्षणात् ।

उपमानरूपकयोः संसृष्टिः ।

विषयात्मतयारोप्ये प्रकृतार्थोपयोगिनि ।
परिणामो भवेत्तुल्यातुल्याधिकरणो द्विधा ॥

इति दर्पणलक्षणात् परकृताभिचारव्यावृत्त्युपयोगिनि वर्मणि दैवस्यारोपात्परिणामालङ्कारश्च । पाञ्चाली रीतिः । ओजो गुणः । वसन्ततिलकं वृत्तम् । मया तावदित्यादि दैवमदृश्यमानमित्यन्तं राक्षसस्योपायाऽपायशङ्के ॥ ८ ॥

ततः प्रविशतीति । ततस्तदनन्तरं राक्षसचिन्तनानन्तरमित्यर्थः । कञ्चुकी वक्ष्यमाणलक्षणः पात्रविशेषः प्रविशति रङ्गस्थानमिति शेषः । उक्तञ्च लक्षणं दर्पणे यथा—अन्तःपुरचरो वृद्धो विप्रो गुणगणान्वितः ।
सर्वकार्यार्थकुशलः कञ्चुकीत्यभिधीयते ॥ इति ।

काममिति । चाणक्यस्य कौटिल्यस्य नीतिर्नयश्चाणक्यनीतिस्तया चाणक्य-

---

रिवार मरगया । उसी चन्द्रगुप्त के मर्म स्थान को मैं अपनी बुद्धि रूप बाणों से भेदन करता हूं । यदि मेरा कल्याण नहीं सहने वाला भाग्य उसका रक्षक न हो ॥ ८ ॥

(कञ्चुकी प्रवेश करता है)

कञ्चुकी—जैसे चाणक्य की नीति ने राजा नन्द को पराजित कर कुसुमपुर में

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धर्मो मौर्य्यं इव, क्रमेण, नगरे नीतः प्रतिष्ठां मयि ।
तं सम्प्रत्युपचीयमानमपि मे लब्धान्तरः सेवया
लोभो राक्षसवज्जयाय यतते, जेतुं न शक्नोति च ॥ ९ ॥

(दृष्ट्वा) अयममात्यराक्षसः (परिक्रम्य उपसृत्य च) इदममात्यराक्षसस्य गृहम् । प्रविशामि (प्रविश्यावलोक्य च) अमात्य ! स्वस्ति भवते ।

नीत्या यथा कौटिल्यनयेनेव जरसा वार्द्धक्येन नन्दं तदाख्यनृपमिव कामं विषयाऽभिलाषं प्रमथ्य सम्मर्द्य परिभूयेत्यर्थः । क्रमेण (प्रकृत्यादित्वात्तृतीया) नगरे कुसुमपुरे मौर्य इव चन्द्रगुप्त इव धर्मः सुकृतं मयि प्रतिष्ठां स्थितिं नीतः प्राप्तः, जरायां विषयौदासीन्येन कामं परित्यज्य धर्ममेव सेवितुमुत्सहे इति भावः। सम्प्रति इदानीं सेवया मलयकेतुशुश्रूषया उपचीयमानं वर्द्धमानं तं मौर्यम् अनु लक्षीकृत्य लब्धान्तरः प्राप्तावसरः राक्षस इव लब्धान्तरः प्राप्तावकाशो मे मम लाभो विषयाऽभिलाष उपचीयमानं वर्द्धिष्णुं तं धर्मं जयाय जेतुमित्यर्थः (तुमर्थाच्च भाववचनादिति चतुर्थी) यतते उद्युङ्क्ते, च पुनः किन्त्वित्यर्थः । जेतुं न शक्नोति समर्थो भवति । वार्द्धक्ये सुकृताधिक्येन सुकृतमनादृत्य मयि स्थितिं कर्त्तुमीहते किन्तु विषयौदासीन्येन न धर्माऽनादरणे समर्थः, एवं चन्द्रगुप्तपराभवकाङ्क्षी राक्षसस्तं पराभवितुमीहते किन्तु चाणक्यबुद्धिमाहात्म्येन न समर्थो भवतीति भावः। एतत्कञ्चुकिनिर्वेदेन चाणक्यनयेन राक्षसप्रयत्नस्य भाव्युपमर्दसूचनम् । नन्दमिव मौर्य इव राक्षसवदित्यादौ सादृश्यार्थप्रतिपादकेववच्छब्दसत्त्वादुपमालंकारः । जयेच्छादिरूपाऽप्रस्तुतभटव्यवहारस्य प्रस्तुतकञ्चुकिलाभे समारोपणात्समासोक्त्यलंकारश्च । अत्र वैदर्भी रीतिः । प्रसादगुणः । शार्दूलविक्रीडितं छन्दः ॥ ९ ॥

परिक्रम्येति । परिक्रम्य संचर्य उपसृत्य समीपमेत्य इदं दृश्यमानम् अमात्यराक्षसस्य मन्त्रिराक्षसस्य गृहं सद्म वर्तत इति शेषः। प्रविशामि अभ्यन्तरं गच्छामि प्रविश्यान्तर्गत्वाऽवलोक्य दृष्ट्वा च भवते तुभ्यं स्वस्ति कल्याणं भूयादिति शेषः

चन्द्रगुप्त को राजा बनाया उसी तरह वृद्धावस्था ने मेरी विषयाभिलाषा को हटा कर मुझ में धर्म को स्थान दिया । अब बढ़े हुए उस चन्द्रगुप्त को मलयकेतु की शुश्रूषा से अवसर पाया हुआ राक्षस की तरह लोक धर्म को जीतने की चेष्टा करता है । पर जीत नहीं सकता है ॥ ९ ॥

(देखकर) यही मन्त्री राक्षस है (घूमकर और समीप जाकर) यही राक्षस मन्त्री का घर है । प्रवेश करता हूं (प्रवेशकर-और देखकर) मन्त्रिन् ! आप का कल्याण हो।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

राक्षसः—आर्य्यं जाजले ! अभिवादये । प्रियंवदक ! आसनम् अत्रभवत उपनय ।

पुरुषः—एदं आसणं उपविसदु अज्जो [इदमासनमुपविशत्वार्य्यः]

कञ्चुकी—(नाट्येनोपविश्य) अमात्य ! कुमारो मलयकेतुरमात्यं विज्ञापयति—"चिरात्प्रभृत्यार्य्यः परित्यक्तोचितशरीरसंस्कार इति पीडयते मे हृदयम् । यद्यपि स्वामिगुणाः सहसा न शक्यन्ते विस्मर्त्तुं तथापि मद्विज्ञापनां मानयितुमर्हत्यार्यः" (इत्याभरणानि दर्शयित्वा) अमात्य ! इमान्याभरणानि कुमारेण स्वशरीरादवतार्य्य प्रेषितानि, धारयितुमर्हत्यार्य्यः ।

आर्येति । अभिवादये प्रणमामि त्वामिति शेषः । प्रियम्वदकः राक्षसानुचरस्य संज्ञेयम् । आसनमास्तरणमुपनय आनय उपवेष्टुमिति शेषः ।

नाट्येनेति । नाट्येन नटोचितव्यापारेण भङ्गीविशेणेत्यर्थः । ताण्डवं नटनं नाट्यमित्यमरः आसन इति शेषः । कुमारः पर्वतकपुत्रो मलयकेतुः अमात्यं मन्त्रिणं विज्ञापयति चिरात्प्रभृति बहुदिवसतः आर्यो भवान् परित्यक्तो वर्जितोऽगृहीतः परिहृतइति यावत् उचितो योग्यः संस्कारः कायस्य प्रधानं वैमल्यं वा येन स परित्यक्तोचितसंस्कारः परिवर्जितयोग्यालंकरणः इति हेतोर्मे मम हृदयं चित्तं पीड्यते । यद्यपि स्वामिनो राज्ञो नन्दस्य गुणा दयादाक्षिण्यप्रभृतयः सहसा हठात् विस्मर्तुं न शक्यन्ते तथापि मद्विज्ञापनां प्रार्थनामार्यो भवान् मानयितुं स्वीकर्त्तुमर्हति इत्युक्त्वा आभरणान्यालङ्करणानि प्रदर्श्य दर्शयित्वा इमानि प्रत्यक्षदृश्यमानानि आभरणानि कुमारेण मलयकेतुना स्वशरीरात् निजकायादवतार्य प्रेषितानि अमात्यो भवान् धारयितुमर्हति ।

राक्षसः—आर्य जाजले ! मैं प्रणाम करता हूं । प्रियंवदक ! कञ्चुकी के लिये आसन लाओ ?

पुरुषः—यह आसन है, आप बैठिये ।

कञ्चुकी—(विचित्र ढंग से बैठ कर) मन्त्रिन् ! कुमार मलय केतु आप को कहते हैं कि मन्त्रि राक्षस ने बहुत दिन से उचित शरीर संस्कार छोड़ दिया है इसलिये मेरे हृदय में दुःख होता है । यद्यपि वे स्वामी के गुणों को किसी तरह नहीं भूल सकते हैं तो भी हमारी प्रार्थना मानने योग्य है ।

(इतना कह, अलङ्करणों को देखा कर) मन्त्रिन् ! कुमार (मलय केतु) ने इन अलङ्करणों को अपने शरीर से उतार कर आप के लिये भेजा है, आर इन को धारण कीजिये ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राक्षसः—आर्य्य ! जाजले ! विज्ञाप्यतां मद्वचनात् कुमारः विस्मृता मया स्वामिगुणा भवद्गुणपक्षपातेन । किन्तु—

न तावन्निर्वीर्य्यैः परपरिभवाक्रान्तिकृपणै-
वंहाम्यङ्गैरेभिः प्रतनुमपि संस्काररचनाम् ।
न यावन्निःशेषक्षयितरिपुचक्रस्य निहितं
सुगाङ्गे हेमाङ्कं, नृवर ! तव सिंहासनमिदम् ॥ १० ॥

आर्येति । हे आर्य ! जाजले (कञ्चुकिसम्बोधनमिदम्) कञ्चुकिन् ! मद्वचनान्मदुक्त्येत्यर्थः । कुमारो मलयकेतुर्विज्ञाप्यतामभिधीयताम् । भवतो गुणा दयादाक्षिण्यप्रभृतयो भवद्गुणास्तेषु पक्षपात आसक्तिस्तेन (हेतुतृतीयान्तमिदम्) स्वामिनः प्रभोर्नन्दस्य गुणा उक्तरूपा विस्मृता अविदितप्राया एव मयेति शेषः। त्वयि ततोऽप्यधिकदयादाक्षिण्यादिसद्भावादिति भावः ।

न तावदिति । नृणां वरो नृवरस्तत्सम्बोधने हे नृवर ! राजन् , यावत् यत्कालपर्यन्तं निर्नास्ति शेषोऽवशिष्टभागो यत्र तन्निश्शेषं समग्रं तद्यथा स्यात्तथा क्षयितं विनाशितं रिपूणां शत्रूणां चक्रं साकल्यं (समुदायो) येन स तथोक्तस्तस्य तथोक्तस्य तव भवतः इदं बुद्धिस्थं हेमाङ्कं स्वर्णभूषितं सिंहासनं भद्रासनं सुगाङ्गे तन्नामकप्रासादे सुष्ठुशोधनं गाङ्गं गङ्गाजलं यस्मिन्तत्सुगाङ्गं तस्मिन् सुगाङ्गे नगरे न निहितं स्थापितं भवेत् । तावत् तत्कालपर्यन्तं परेषां शत्रूणां परिभवस्य तिरस्कारस्याऽऽक्रान्त्याऽऽक्रमणेन कृपणैर्दीनैः । 'कदर्ये कृपणक्षुद्रकिंपचानमितंपचाः । निःस्वस्तु दुर्विधो दीनो दरिद्रो दुर्गतोऽपि सः, इत्यमरः ।

निर्वीर्यैः पराक्रमरहितैर्दुर्बलैरित्यर्थः एभिरङ्गैरवयवैः प्रतनुमपि स्वल्पमपि संस्काररचनां भूषणादिपरिधानात्मिकां न वहामि न धारयामि । शत्रुपराभूतानां संस्काररचना नैवोचितेति भावः । निर्वीर्यादिसंस्काररचनापरित्यागोपयुक्तविशेषणाभिधानात्—उक्तैर्विशेषणैः साऽभिप्रायैः परिकरो मतः ।

राक्षसः—आर्य जाजले ! हमारे कहे अनुसार कुमारसे कहो कि मैं आप के गुणों से स्वामी के गुण को भूलगया हूं ।

किन्तु—

हे राजन् ! शत्रुवर्ग जिन के द्वारा नष्ट किये गये हैं ऐसे आप के सुवर्णभूषित इस सिंहासन को जबतक मैं सुगाङ्ग प्रासाद के ऊपर नहीं रखूंगा, तब तक मैं पराक्रमहीन (और) शत्रु के पराभव से अति दीन इन अपने अङ्गों में एक भी अलङ्करण को नहीं धारण करूंगा ॥ १० ॥

 Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कञ्चुकी—अमात्य ! त्वयि नेतरि सुलभमेतत् कुमारस्य, तत् प्रतिमान्यतां कुमारस्य प्रथमः प्रणयः ।

राक्षसः—आर्य्य ! कुमार इवानतिक्रमणीयवचनो भवानपि, तदनुष्ठीयते कुमारस्याज्ञा ।

कञ्चुकी-(नाट्येन भूषणानि परिधाप्य) स्वस्ति भवते, साधयाम्यहम् ।

राक्षसः—आर्य्य ! अभिवादये (कञ्चुकी निष्क्रान्तः)

इति दर्पणस्थलक्षणादत्र परिकरालंकारः । ओजो गुणः । पाञ्चाली रीतिः । शिखरिणी छन्दः ॥ १० ॥

अमात्य इति । अमात्ये मन्त्रिणि त्वयि भवति नेतरि नायके सति (यस्य च भावेनेति सति सप्तमी) कुमारस्य मलयकेतोरेतत्सुगाङ्गाधिकरणकसिंहासनस्थापनं सुलभं सुकरम् , तत्तस्मात्कारणात् कुमारस्य पर्वतकात्मजस्य मलयकेतोः प्रथमो मुख्योऽद्वितीयः प्रणयः प्रार्थना प्रतिमान्यतां स्वीक्रियताम् !

आर्य्येति । आर्य ! कुमार इव मलयकेतुरिव भवानपि त्वमपि नातिक्रमणीयमुल्लंघनीयं वचनं वाक्यं यस्य सोऽनतिक्रमणीयवचनोऽनुल्लंघनीयशासन इत्यर्थः, (अस्तीति शेषः) । तत्तस्माद्धेतोः कुमारस्य मलयकेतोराज्ञा शासनमनुष्ठीयते क्रियते ।

नाट्येनेति । नाट्येन नटोचितव्यापारविशेषेण शरीरभङ्ग्यादिनेत्यर्थः । भूषणानि अलङ्करणानि परिधाप्य संनिवेश्य अङ्गेष्विति शेषः । भवते तुभ्यं स्वस्ति कल्याणं भूयादिति शेषः (नमः स्वस्तीति चतुर्थी) अहं साधयामि कार्य्यसम्पादनाय गच्छामीत्यर्थः । नाटके णिजन्तसाधिर्गमनार्थकः ।

प्रायेण ण्यन्तकः साधिर्गमेः स्थाने प्रयुज्यते । इति दर्पणोक्तवचनात् ।

निष्क्रान्त इति । प्रस्तुतराक्षसोपयोगित्वादिदं प्रस्तुतोपयोगि समाधानवचनं संग्रहः । यद्वा प्रस्तुतचाणक्योपायात्मकवीजोपयोगि इदं भूषणदानं समाधान-

---

कञ्चुकी— मान्यवर् आपके मन्त्री ! रहने पर कुमार का यह होना सुलभ है इस लिये कुमार की पहली प्रार्थना स्वीकार कर लीजिये ।

राक्षसः—आर्य ! कुमार की तरह आप भी मान्य हैं, इसलिये मैं कुमार की आज्ञा मानता हूँ ।

कञ्चुकी—(विचित्र ढंग से भूषणों को पहना कर) आपका कल्याण हो, अब मैं जाता हूँ ।

राक्षसः—आर्य ! मैं प्रणाम करता हूँ । (कञ्चुकी चलागया) प्रियम्वदक !

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रियंवदक ! ज्ञायतां कोऽयमस्मद्दर्शनार्थी द्वारि तिष्ठति ।

प्रियंवदकः—जं अज्जो आणवेदित्ति (परिक्रम्याहितुण्डिकं दृष्ट्वा) एं अज्ज ! को तुमं ? [यदार्य्य आज्ञापयतीति । ननु आर्य्य कस्त्वम् ?]

आहितुण्डिकः—भद्द ! अहं क्खु आहितुण्डिओ जिण्णविसो णाम इच्छामि अमच्चरक्खसस्स पुरदो सप्पेहिं खेलिदुं [भद्र ! अहं खल्वाहितुण्डिको जीर्णविषो नाम, इच्छाम्यमात्यराक्षसस्य पुरतः सर्पैः खेलितुम् ।

प्रियंवदकः—चिट्ठ, जाव अमच्चस्स णिवेदेमि (राक्षसमुपसृत्य) अज्ज ! एसो क्खु सप्पोवजीवी इच्छदि सप्पेहिं अमच्चस्स पुरदो खेलिदुं [तिष्ठ, यावदमात्यस्य निवेदयामि । आर्य्य ! एष खलु सर्पोपजीवी इच्छति सर्पैरमात्यस्य पुरतः खेलितुम्)

राक्षसः—(वामाक्षिस्पन्दनं सूचयित्वा आत्मगतम्) कथं प्रथममेव

वचनम् , अनुपदमेव राक्षसेन सिद्धार्थकाय पारितोषिकत्वेन दास्यमानैतद्भूषणनिर्वहणे कूटलेखे उपयोक्ष्यमाणत्वात् ।

प्रियंवदकेति । हे प्रियंवदक ! अस्माकं दर्शनमस्मद्दर्शनं तदर्थयते याचते इत्यस्मद्दर्शनार्थी मद्दर्शनाभिलाषुकः कोऽयं किंनामकः द्वारि प्रतीहारभूमौ तिष्ठति वर्तत इति ज्ञायतां बुध्यताम् ।

जं अज्ज इति । आर्यः श्रेष्ठो भवान् यत् आज्ञापयति आदिशति इतीत्यभिधाय परिक्रम्य संचर्य आहितुण्डिकं तदाख्यसर्पक्रीडनोपजीविनं दृष्ट्वा समवलोक्य ननु सम्बोधने हे आर्य ! श्रेष्ठ त्वं भवान् कः किंनामकः इति कथयेति शेषः ।

वामाक्षिस्पन्दनमिति । वामस्य दक्षिणेतरस्य सव्यस्येत्यर्थः । अक्ष्णो नेत्रस्य स्पन्दनमीषत्कम्पनं सूचयित्वा अभिनयं कृत्वेत्यर्थः । आत्मगतमनतिस्पष्टं

देखो कि हम से मिलने के लिये दरवाजे पर कौन खड़ा है ।

प्रियम्वदकः—जैसी आपकी आज्ञा (घूमकर सपेरे को देख कर) । आर्य ! तुम कौन हो ।

आहितुण्डिकः—भद्र ! मैं जीर्णविष नामका सपेरिया हूं , मन्त्रि राक्षस के आगे सर्पों से खेल करना चाहता हूं

प्रियंवदकः—ठहरो मैं अभी निवेदन करता हूं । (राक्षस के समीप जाकर) आर्य ! एक सपेरिया आया है जोकि आप के आगे सर्पों से खेलन चाहता है ।

राक्षसः—(वाम नेत्र का कम्पन दिखाता हुआ मन ही मन) । क्यों पहले ही

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सर्पदर्शनम ? (प्रकाशम्) प्रियंवदक ! न नः कुतूहलमस्ति सर्पदर्शने, तत् परितोष्य विसर्ज्जयैनम् ।

प्रियंवदकः—जं अज्जो आणवेदि . (परिक्रम्याहितुण्डिकमुपसृत्य) भद्द ! एसो क्खु दे अमच्चो अदंसणेण प्पसादं करेदि, ण उण दंशणेण [यदार्य्य आज्ञापयति । भद्र ! एष खलु ते अमात्योऽदर्शनेन प्रसादं करोति न पुनर्दर्शनेन]

आहितुण्डिकः—भद्द ! विण्णवेहि मम वअणेण अमच्चं,-"ण केवलं अहं सप्पोवजीवी, पाउअकवी क्खु अहं, ता जइ मे दंसणेण अमच्चो प्पसादं ण करेदि, ता एदं पि पत्तअं वाचेदुं प्पसीददु" त्ति

(क्रियाविशेषणमेतत्) कथयतीति शेषः । कथं कुतः कस्मात्कारणादित्यर्थः । प्रथमं पूर्वमेव सर्पस्य व्यालस्य दर्शनमवलोकनं जातमिति शेषः शत्रुपराजयकामनया युद्धोद्योगवतो मे पूर्वमेवाशुभदर्शनं जातमिति भावः । प्रकाशं (क्रियाविशेषणम्) सुस्पष्टं यथा स्यात्तथा ब्रवीतीति शेषः । प्रियंवदक ! नोऽस्माकं सर्पेषु व्यालेषु कौतूहलमौत्कण्ठ्यं न नास्तीत्यर्थः । तत्तस्मात्कारणादेनं व्यालोपजीविनं परितोष्य धनादिदानेन सन्तुष्टं कृत्वा विसर्जय इतो बहिष्कुरु ।

प्रियंवदक इति । तथा भवदीयनिदेशं करोमीत्यर्थः इतीत्यभिधाय उपसृत्य समीपं गत्वा सर्पोपजीविनमिति शेषः । भद्र ! कल्याणिन् ! एष खलु अयममात्यो राक्षसः अदर्शनेन दर्शनमन्तरैव सर्पक्रीडनमन्तरैवेत्यर्थः प्रसादमुपहारं करोति ददाति न पुनर्दर्शनेन सर्पक्रीडनं दृष्ट्वेत्यर्थः ।

भद्रेति । भद्र ! कल्याणिन् , मम वचनेन मदुक्त्या अमात्यं मन्त्रिणं विज्ञापय निवेदय. अहं न केवलं सर्पोपजीवी व्यालक्रीडनवृत्तिः किन्तु अहं प्राकृतकविः स्वतः सिद्धज्ञानयुक्तः प्राकृतभाषाकोविदः, प्राकृतभाषायां काव्यप्रणेतेत्यर्थः । (प्रकृतिपरिज्ञाने त्वया यो नियुक्तः सोऽहमिति ध्वनिः) । तत्तस्मात्कारणाद्यदि अमा-

---

सर्पका दर्शन भया । (जोर से) प्रियंवदक ! मुझे सर्प देखने की इच्छा नहीं है, इस लिये उसे कुछ द्रव्य देकर भगा दो ।

प्रियंवदकः—आपका जो आज्ञा (घूमकर सपेरिया के पास जाकर । भद्र ! मन्त्री राक्षस विना खेल देखेही आप को द्रव्य देते हैं ।

आहितुण्डिकः—भद्र ! हमारे वचन से मन्त्रीको कहो कि मैं केवल सपेरिया ही नहीं हूँ—किन्तु प्राकृत भाषा का कवि भी । इसलिये यदि मेरोखेल की देखना नहीं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[भद्र ! विज्ञापय मम वचनेनामात्यं—"न केवलमहं सर्पोपजीवी, प्राकृतकविः खल्वहं तस्माद् यदि मे दर्शनेनामात्यः प्रसादं न करोति, तदा एतदपि पत्रकं वाचयितुं प्रसीदतु" इति] (पत्रमर्पयति)

प्रियंवदकः—(पत्रं गृहीत्वा राक्षसमुपसृत्य) अमच्च ! एसो क्खु आहितुण्डिओ विण्णवेदि,—"ण केवलं अहं सप्पोबजीवी, पाउअकवी क्खु अहं ता जइ मे दंसणेण अमच्चो प्पसादं ण करेदि, ता एदं पि पत्तअं वाचेदुं प्पसाददु" त्ति [अमात्य ! एष खलु आहितुण्डिको विज्ञापयति—"न केवलमहं सर्पोपजीवी, प्राकृतकविः खल्वहं, तस्माद् यदि मे दर्शनेनामात्यः प्रसादं न करोति, तदा एतदपि पत्रकं वाचयितुं प्रसीदतु" इति]

राक्षसः—(पत्रं गृहीत्वा वाचयति)—

पाऊण णिरवसेसं कुसुमरसं अत्तणो कुसलदाए ।
जं उग्गिरेइ भमरो तं अण्णाणं कुणइ कज्जं ॥ ११ ॥
[पीत्वा निरवशेषं कुसुमरसमात्मनः कुशलतया ।
यदुद्गिरति भ्रमरस्तदन्येषां करोति कार्य्यम् ॥११॥]

त्यो राक्षसो मे मम दर्शनेन सपक्रीडनावलोकनेन प्रसादमुपहारं न करोति ददाति तदा एतत्पत्रमपि वाचयितुं पठितुं प्रसीदतु प्रसन्नो भवतु ।

प्रियंबदक इति । पत्रं सर्पोपजीविप्रदत्तं दलं गृहीत्वा समादाय राक्षसं तदाख्यमन्त्रिणमुपसृत्य प्राप्य एष खलु अयमाहितुण्डिकः व्यालोपजीवी विज्ञापयति प्रार्थयति केवलमहं सर्पोपजीवी न किन्तु प्राकृतकविः खल्वहं तस्मात्कारणात् यदि मे मम दर्शनेन अमात्यः सचिवः प्रसादं न करोति प्रसन्नो न भवति तदा एतत्पत्रमपि वाचयितुं प्रसीदतु प्रसन्नो भवतु ।

पीत्वेति । आत्मनः स्वस्य कुशलतया नैपुण्येन निर्नास्त्यवशेषो यत्र तन्नि-

---

चाहते हैं तो इस पत्र को पढ़ने की कृपा करें । (पत्र देता है)

प्रियंवदकः—(पत्र को ले राक्षस के पास जाकर) मन्त्रिन् यह आहितुन्डिक (सपेरिया) कहता है कि मैं केवल सपेरिया ही नहीं हूं किन्तु प्राकृत भाषा का कवि भी हूं । इसलिये मन्त्री मुझे दर्शन न दे सकें तो इस पत्र को ही वाचने की कृपा करें ।

राक्षसः—(पत्र लेकर बांचता है)

भ्रमर अपनी चतुरता से समस्त पुष्परस को पीकर जो वस्तु (मधु) बाहर निकालता है, वह (मधु) दूसरे देव-पितृ कार्य का साधन होता है ॥ ११ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राक्षसः—(आत्मगतम्) अये ! कुसुमपुरवृत्तान्तज्ञः अहं भवत्प्रणिधिश्चेति गाथार्थः । आः कार्य्यवग्रत्वात् मनसः प्रभूतत्वाच्च प्रणि-

---

रवशेषं समग्रं (क्रियाविशेषणमिदम्) कुसुमस्य पुष्पस्य रसं सारभागं मधु पीत्वा भ्रमरो मधुकरः यन्मधु उद्गिरति बहिर्निःसारयति तन्मधु उद्गीर्यमाणं सत् अन्येषां मनुष्याणां कार्यं दैवपैतृकं कृत्यं करोति निष्पादयति ।

पक्षान्तरे—भ्रमर इवाचरति भ्रमरति ततः पचाद्यचि भ्रमरः भ्रमरसदृशाचरणकर्ता भ्रमरशब्दस्य स्वसदृशाचरणकर्तरि शक्त्या वोक्तार्थः । दूतः आत्मनः स्वस्य कुशलतया दूतोचितचातुर्येण निरवशेषं समग्रं कुसुमस्य कुसुमपुरस्य रसं वृत्तं गुप्तरहस्यतन्त्रं वा पीत्वा ज्ञात्वा यदुद्गिरति कथयति तदुद्गीर्यमाणं कथ्यमानं दूतवचनमिति यावत् अन्येषां दूतप्रेषकानां कार्यं सन्धिविग्रहादिकृत्यं करोति साधयति । सारग्राहि भ्रमरसदृशोऽहं निजचातुर्यप्रभावात्सकलकुसुमपुरोदन्तज्ञ इति नियोक्तुस्तव तदाकर्णनेन सर्वमीप्सितकार्यं सेत्स्यतीति भावः । अप्राकरणिकभ्रमरकर्तृककुसुमरसकर्मकपानानन्तरं मधूद्गिरणतः प्राकरणिकस्य स्वस्य कुसुमपुरोदन्तोद्गिरणप्रतीत्या पद्येऽस्मिन्नलङ्कारोऽप्रस्तुतप्रशंसा नाम । उक्तञ्च लक्षणं तस्य काव्यप्रकाशे कुवलयानन्दे च—

अप्रस्तुतप्रशंसा या सा सैव प्रस्तुताश्रया । का० प्र०

अप्रस्तुतप्रशंशा स्यात्सा यत्र प्रस्तुताश्रया ।

एकः कृती शकुन्तेषु योऽन्यं शक्रान्न याचते ॥ कु०

वैदर्भी रीतिः । प्रसादगुणः । आर्या वृत्तम् ॥ ११ ॥

आत्मगतमिति । (क्रियाविशेषणमेतत्) अनतिस्पष्टं यथा स्यात्तथा वदतीत्यर्थः । अये, (कोमलालापेऽव्ययमिदम्) कुसुमपुरस्य वृत्तान्तं जानातीति कुसुमपुरवृत्तान्तज्ञः (आतोऽनुपसर्गे कः, इति कः) कुसुमपुरसम्बन्धिसकलोदन्तवेत्तेत्यर्थः । (पूर्वं द्वारिकस्तिष्ठतीति कुसुमपुरोदन्तविद्दूतागमनस्य सञ्चिन्तितस्य प्राप्तेरियं सञ्चिन्तितार्थप्राप्तिः क्रमः) । अहं भवतः प्रणिधिर्भवत्प्रणिधिर्दूत इति

(दूसरे पक्ष का अर्थ यह है)

भ्रमर के समान मैं आप का दूत अपनी चतुरता से समस्त कुसुमपुर के वृत्तान्त को जान कर आपके आगे जो कुछ कहता हूँ, वह कहाहुआ मेरा वचन आपके सन्धि विग्रहादि कार्यका साधन बनेगा ।

राक्षसः—(मन ही मन) । अये ! कुसुमपुर का वृत्तान्त को जानने वाला मैं आप का गुप्तचर हूँ । अहो कार्य में मन लगे रहने से और दूतों की विशेषता से मैं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धीनां विस्मृतम् , इदानीं स्मृतिरुपलब्धा । व्यक्तम् आहितुण्डिकच्छद्मना कुसुमपुरादागतेन विराधगुप्तेनानेन भवितव्यम् (प्रकाशम्) प्रियंवदक ! प्रवेशय एनं, सुकविः एषः, श्रोतव्यमस्मात् सुभाषितम्।

प्रियंवदकः—जं अज्जो आणवेदित्ति. (आहितुण्डिकमुपसृत्य) उपसप्पदु अज्जो [यदार्य्य आज्ञापयति । उपसर्पत्वार्य्यः]

आहितुण्डिकः—(नाट्येनोपसृत्यावलोक्य च संस्कृतमाश्रित्य स्वगतम्)
अये ! अयममात्यराक्षसस्तिष्ठति । स एषः—

वामां बाहुलतां निवेश्य शिथिलं कण्ठे निवृत्तानना

गाथाया आर्याछन्दसा परिणद्धाया गीतिकाया अर्थस्तात्पर्यम् । आः इति स्मरणार्थकमव्ययम् । कार्येषु कृत्येषु व्यग्रः आकुलः कार्यव्यग्रः तस्य भावः कार्यव्यग्रत्वं- तस्मात्कार्यव्यग्रत्वात् । (इष्टजनानुसन्धानात्मकमधिवलनामकमिदमङ्गम्) मनसश्चित्तस्य कार्येषु व्यग्रत्वाद्व्याकुलत्वाद्धेतोः प्रणिधीनां चराणां प्रभूतत्वादाधिक्याच्च हेतोः स्वप्रेषितचरगमनं विस्मृतम् ; इदानीं साम्प्रतं स्मृतिरुपलब्धा प्राप्ता । कुसुमपुरवास्तव्यप्रकृतिचित्तपरिज्ञानाय मया नियुक्तोऽयं चर इति स्मृतमित्यर्थः। व्यक्तं स्पष्टं यथार्थतः आहितुण्डिकच्छद्मना व्यालोपजीविव्याजेन विराधगुप्तेनैतदाख्येनानेन चरेण भवितव्यम् । प्रकाशं सुव्यक्तं क्रियाविशेषणमिदम् । प्रियंवदक, एनं प्रतीहारभूमिवर्त्तिनं चरं प्रवेशय मत्सन्निधिं प्रापय । एष सुकविः सुपण्डितः, अस्मात्सुकवेः सुभाषितं सुवाक्यं श्रोतव्यम् आकर्णनीयम् ।

वामामिति । श्रीर्लक्ष्मीः यस्य राक्षसस्योद्यमसुद्योगमाशङ्कते तच्छीला उद्यमाशङ्किनी राक्षसोद्योगभीता सती वामां दक्षिणेतरां (पत्युर्वामपार्श्वे स्त्रीणां शयन-

---

भूल गया था । अब याद आया । मालूम होता है कि सपेरिये के वेश में कुसुपुर से आया हुआ यह विराधगुप्त है (जोरसे) । प्रियंवदक । उस को यहां ले आओ यह सुकवि है, इससे सुभाषित सुनना चाहिये ।

प्रियंवदकः—आपकी जो आज्ञा (सपेरिये के पास जाकर) आप चलिये ।

आहितुण्डिकः—(विचित्र ढंग से समीप जाकर और देख कर संस्कृत भाषा में मनही मन) ।

अये ! यह मन्त्री राक्षस बैठे हैं । वही यह मन्त्रि राक्षस हैं—

जिनके उद्योगसे डरी हुई राज्य लक्ष्मी चन्द्रगुप्त के कण्ठ में आपने बांये भुजाको धीरे से रख कर-मुखको फेरती हुई जबरदस्ती उस के कन्धे पर रखा गया

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्कन्धे दक्षिणया बलान्निहितयाप्यङ्के पतन्त्या मुहुः ।
गाढालिङ्गनसङ्गपीडितमुखं यस्योद्यमाशङ्किनी
मौर्यस्योरसि नाधुनाऽपि कुरुते वामेतरं श्रीः स्तनम् ॥१२॥

विधानस्य प्रसिद्धत्वाद्वामबाहोरेव 'प्राक् पतिकण्ठाधिकरणतानिरूपितऽऽधेयत्वस्य सम्भव इति भावः) बाहुलतां भुजावल्लीं (वल्लीवेष्टनधर्मस्य भुजे सत्त्वात्तत्र तत्त्वारोपः) मौर्यस्य चन्द्रगुप्तस्य निवृत्तं परावृत्तमाननं मुखं यस्यास्सा तादृशी पराङ्मुखी सति बलात् हठात् स्कन्धे अंसप्रदेशे निहितया मुहुर्वारम्वारम् अङ्के क्रोडे पतन्त्या स्खलन्त्या दक्षिणया वामेतरया बाहुलतयेति शेषः । (हेतुतृतीयान्तमिदम्) यद्वा तयोपलक्षिता सतीति शेषः । गाढालिङ्गनस्य दृढपरिष्वङ्गस्य सङ्गेन संश्लेषेण पीडितं उरसि वक्षसि चन्द्रगुप्तस्येति शेषः । अधुनापि सम्प्रत्यपि न कुरुते न स्थापयति । भुजद्वयेन गाढमालिङ्ग्य न शेते भययुक्तायास्तथाऽऽलिङ्गनपूर्वकशयनाऽसम्भवात् । (लक्ष्म्याश्चन्द्रगुप्तेऽनुरागाभावे राक्षसकर्तृकाकर्षणभीतेरेव हेतुत्वमिति ध्वनिः । यथा पतिसमालिङ्गिता भयविह्वलाऽकामा स्त्री न पतिमालिङ्गति तथैव श्रीः मौर्यं नालिङ्गतीति भावः । पतिसमालिङ्गिताऽप्यनुरागशून्यहृदया कामिनी पतिमिव श्रीर्न चन्द्रगुप्तमालिङ्गतीत्यर्थावधारणेन श्रियः प्राकरणिकत्वेन तत्राऽप्राकरणिकाऽननुरक्तनायिकाकर्तृकभीतिप्राचुर्यहेतुकदृढालिङ्गनात्मककार्याभावसमारोपणादत्र श्लोके समासोक्तिर्नामालङ्कारः । उक्तञ्च तल्लक्षणं काव्यप्रकाश—साहित्यदर्पण—कुवलयानन्देषु यथा—

परोक्तिर्भेदकैः श्लिष्टैः समासोक्तिः । का० प्र० ।

प्राकरणिकाऽप्राकरणिकार्थद्वयसम्वलितविशेषणवाचिमात्रशब्दद्वारा अप्राकरणिकगतव्यवहारात्मकार्थस्योक्तिर्बोधनं प्राकरणिकोदन्ते आरोपो व्यञ्जनया प्रतिपादनमिति यावत् समासोक्तिरिति तदर्थः ।

समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणैः ।
व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः ॥ सा० द०

प्रस्तुताप्रस्तुतसाधारणैः कार्यलिङ्गविशेषणैः प्रस्तुतेऽन्यस्याऽप्रस्तुतस्य वस्तुनो व्यवहारसमारोपः समासोक्तिरिति तदर्थः ।

और बार बार गोद में गिरते हुए दहने भुजासे दृढ आलिङ्गन किये रहने के कारण बञ्चित सुख वाले अपने दहिनास्तन को चन्द्रगुप्तके हृदय में अभीतक भी नहीं रखपाती है ॥ १२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(प्रकाशम्) जअदु जअदु, अमच्चो [जयति जयत्यमात्यः]

राक्षसः—(विलोक्य) "अये विराध !"–" (इत्यर्द्धोक्ते विरूढस्मृतिः) प्रियंवदक ! भुजङ्गैः इदानीं विनोदयामः, तद् विश्रम्यतां परिजनेन, त्वमपि स्वमधिकारमशून्यं कुरु ।

प्रियंवदकः—जं अमच्चो आणवेदित्ति [यदमात्य आज्ञापयतीति]

(सपरिवारो निष्क्रान्तः)

राक्षसः—सखे ! विराधगुप्त ! इदमासनमास्यताम् ।

समासोक्तिः परिस्फूर्त्तिः प्रस्तुतेऽप्रस्तुतस्य चेत् ।
अयमैन्द्रीमुखं पश्य रक्तश्चुम्बति चन्द्रमाः । कु०

स च समासोक्तिरलङ्कारः उग्रमाशङ्किनीति पदार्थहेतुककाव्यलिङ्गेन सङ्कीर्णः । पाञ्चाली रीतिः । प्रसादगुणः शार्दूलविक्रीडितं वृत्तम् ॥ १२ ॥

प्रकाशमिति । (क्रियाविशेषणमेतत्) सुस्पष्टं यथा स्यात्तथा ब्रवीतीत्यर्थः । आर्यः श्रेष्ठो भवान् जयति जयति जययुक्तो भवत्वित्यर्थः ।

विलोक्येति । दृष्ट्वेत्यर्थः, अये विराध परिजनं प्रति रहस्यगोपनार्थमर्द्धोक्तिः । विकृतो राधो वेष आकार इति यावत् यस्य स विराध एतदाख्यः । विरूढा जाता स्मृतिः स्मरणं यस्य सः । स्वस्यात्मन अधिकारो नियोगः स्वाधिकारस्तमशून्यं कुरु प्रतिपालयेत्यर्थः, अन्यप्रवेशनिषेधं कुर्वन् द्वारि सावधानस्तिष्ठेत्यर्थः । सर्पक्रीडनोपजीविच्छलेन दौत्येन प्रेरितविराधगुप्तस्य प्रियंवदकनिकटे नामोच्चारणान्मन्त्रप्रकाशनभीत्या अर्द्धोक्ते तद्रक्षणाय प्रियंवदकं प्रति छलेन ततोऽपसारणमिति बोध्यम् । सपरिवारः सपरिजनो निष्क्रान्तो निर्गत इत्यर्थः ।

सखे इति । हे सखे ! सुहृद् इदं सम्बोधनमतिशयादरसूचनार्थम् । इदं प्रत्यक्षदृश्यमानं आसनमास्तरणमस्तीति शेषः, तत्र आस्यतामुपविश्यताम् ।

(जोरसे) मन्त्रिन् ! आपकी जय हो, जय हो ।

राक्षसः—(देख कर) अये विराध ! (यह कहने पर याद आया) प्रियंवदक ! अभी हम सर्प का खेल देखेंगे इस लिये सब आदमी चले जायँ, और तुम भी अपना काम करते जाओ ।

प्रियंवदकः—मन्त्री की जो आज्ञा (सबके सब चले गये) ।

राक्षसः—मित्र विराधगुप्त ! यह आसन है बैठिये ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विराधगुप्तः—यदाज्ञापयत्यमात्य इति (नाट्येनोपविष्टः)

राक्षसः—(सखेदं निर्वर्ण्य) अहो ! देवपादपद्मोपजीविनो जनस्येय-मवस्था (इति रोदिति)

विराधगुप्तः—अमात्य ! अलं शोकेन, नातिचिरादमात्योऽस्मान् नूनं पुरातनीमवस्थामारोपयिष्यति ।

राक्षसः—सखे ! विराधगुप्त ! वर्णय इदानीं कुसुमपुरवृत्तान्तम् ।

विराधगुप्तः—अमात्य ! विस्तीर्णः कुसुमपुरवृत्तान्तः तदाज्ञापय कुतः प्रभृति कथयामि ?

नाट्येन नटोचितव्यापारविशेषेण शरीरभङ्ग्यात्मकेनेत्यर्थः ।

सखेदमिति । इदं क्रियाविशेषणम् । खेदेन शोकेन सहितं सखेदं यथा स्यात्तथा निर्वर्ण्य दृष्ट्वा । 'निर्वर्णनं तु निध्यानं दर्शनालोकनेक्षणम्' इत्यमरः । अहो आश्चर्यम् , देवस्य राज्ञो नन्दस्य पादपद्मं चरणकमलमुपजीवतीति देवपाद-पद्मोपजीवी तस्य तथोक्तस्य इयमेतादृशी अवस्था दशा अस्ति वा जातेति शेषः । इत्युक्त्वा रोदिति क्रन्दति ।

अमात्येति । अमात्य ! मन्त्रिन् शोकेन अलं व्यर्थम् शोको न विधेयः । नातिचिरात् अतिशीघ्रमेवेत्यर्थः, अमात्यो मन्त्री भवान् नूनं निश्चितमस्मान् पुरा-तनीं पूर्वसदृशीमवस्थां दशामारोपयिष्यति पुरा यादृशी दशा आसीत् पुनश्च तादृश्येव त्वत्कृपया भविष्यतीत्यर्थः ।

सखे इति । हे सखे ! मित्र, इदानीं सम्प्रति कुसुमपुरवृत्तान्तं वर्णय कथय, (इयं व्यापिनी कथा पताका) ।

अमात्येति । हे अमात्य ! मन्त्रिन् कुसुमपुरस्य वृत्तान्तः कुसुमपुरवृत्तान्तः कुसुमपुरोदन्तमित्यर्थः । वीस्तीर्णः दीर्घः प्रचुरमित्यर्थः । तत्तस्मात्कारणात् आज्ञा-

---

विराधगुप्तः—मन्त्री की जो आज्ञा (विचित्र ढंग से बैठता है)

राक्षसः—(सोचता हुआ देख कर) अहो ! कष्ट की बात है राजा के सेवकों की यह दुरवस्था (यह कह कर रोने लगता है) ।

विराधगुप्तः—मन्त्रिन् ! शोक करना व्यर्थ है, आप हम लोगों को बहुत शीघ्रही पहिली अवस्थाको प्राप्त करादेंगे ।

राक्षसः—मित्र विराधगुप्त ! अब कुसुमपुर का वृत्तान्त कहो ।

विराधगुप्तः—मन्त्रिन् ! कुसुमपुर का वृत्तान्त बहुत विस्तृत है, इसलिये यह कहिये कि कहाँ से कहूँ ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राक्षसः—सखे ! चन्द्रगुप्तस्य तावत् नगरप्रवेशात्प्रभृति, अस्मत्प्रयुक्तैस्तीक्ष्णरसदायिभिः किमनुष्ठितमित्यादितः श्रोतुमिच्छामि ।

विराधगुप्तः—एष कथयामि । अस्ति तावत्-शक यवन-किरात-काम्बोज-पारसीक-वाह्लीकप्रभृतिभिश्चाणक्यमतिपरिगृहीतैश्चन्द्रगुप्त पर्वतेश्वरबलैरुदधिभिरिव, प्रलयकालचलितसलिलैः समन्तादुपरुद्धं कुसुमपुरम् ।

पय नियोगं कुरु, कुतः प्रभृति कस्मादारभ्य कथयामि ब्रवीमि, 'वर्णयामीति' पाठेऽपि स एवार्थः (अत्र लोडर्थलक्षणे चेति लट्) ।

सखे इति । हे सखे ! तावत् प्रथमम् वाक्यालंकारार्थकोऽत्र वा तावच्छब्दः, चन्द्रगुप्तस्य मौर्यस्य नगरे प्रवेश आगमनं नगरप्रवेशात् प्रभृति नगरप्रवेशमारभ्येत्यर्थः (अत्र प्रभृतिशब्दयोगे पञ्चमी) अस्माभिः प्रयुक्ता अस्मत्प्रयुक्तास्तैरस्मत्प्रयुक्तैः मन्नियुक्तैरित्यर्थः । तीक्ष्णरसं दातुं शीलं येषां ते तीक्ष्णरसं ददति तच्छीला वा तीक्ष्णरसदायिनस्तैस्तीक्ष्णरसदायिभिः विषप्रदानशीलैरित्यर्थः । किमनुष्ठितं किं कृतम् इति एतत् वृत्तमित्यर्थः । आदिः प्रथमं यस्य स इत्यादिस्तस्मादित्यादितः श्रोतुमाकर्णितुमिच्छामि वाञ्छामि ।

एष कथयामिति । एतच्छब्देन सन्निकृष्टत्वाद्वक्तुः परामर्शादेषोऽहं भवदाज्ञामधिगम्य कुसुमपुरोदन्तं वर्णयामीत्यर्थः । तथा हि, चाणक्यमतिपरिगृहीतैः कौटिल्यबुद्धिसंचालितैः शक-यवन-किरात-काम्बोज—पारसीक—वाह्लीकाः प्रभृतिरादिर्येषां ते तथोक्तास्तैस्तथोक्तैः चन्द्रगुप्त—पर्वतेश्वरबलैः मौर्य-पर्वतेश्वरसैन्यैः प्रलये प्रलयकाले चलितं परिवर्द्धितं सलिलं तोयं येषां ते प्रलयकालचलितसलिलास्तैस्तथोक्तैः उदकानि धीयन्ते एषु इति उदधयः 'उदकस्योदः संज्ञायम्' इति सूत्रेणोदकस्योदादेशः तैरुदधिभिः समुद्रैरिव समन्तात्सर्वतः चतुर्दिक्ष्वित्यर्थः । कुसुमपुरं तदाख्यं नगरं उपरुद्धं वेष्टितमस्ति (अत्रास्तीति क्रियायाः वाक्यार्थः कर्तेत्यनुसन्धेयम्) ।

राक्षसः—मित्र ! पहले चन्द्रगुप्तके नगरप्रवेश से लेकर हमसे भेजेगये विषरस देने वाले दूतों ने क्या किया, यह सुनना चाहता हूँ ।

विराधगुप्तः—यही कहता हूँ-चाणक्य के पक्षपाती, प्रलयकाल में बढ़े हुए जलवाले समुद्रकी तरह बढ़ हुए शक-यवन-किरात-काम्बोज-पारसीक-वाल्हीक आदि चन्द्रगुप्त और पर्वतेश्वर के सैन्यों से चारोतरफ कुसुमपुर घिरा हुआ है ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राक्षसः—(शस्त्रमाकृष्य ससम्भ्रमम्) मयि स्थिते, कः कुसुमपुरमुपरोत्स्यति ? प्रवीरक ! प्रवीरक ! क्षिप्रमिदानीम्—

प्राकारान् परितः शरासनधरैः क्षिप्रं परिक्षिप्यतां,
द्वारेषु द्विरदैः परद्विपघटाभेदक्षमैः स्थीयताम् ।
मुक्त्वा मृत्युभयं प्रहर्तुमनसः शत्रोर्बले दुर्बले,
ते निर्यान्तु मया सहैकमनसो, येषामभीष्टं यशः ॥ १३ ॥

शस्त्रमाकृष्येति । शस्त्रमसिमाकृष्य कोशाद्बहिष्कृत्य ससम्भ्रमं ससन्देहमित्यर्थः (क्रियाविशेषणमिदम्) अयि सम्बोधनमिदं कोमलालापे, मयि स्थिते विद्यमाने कः किंनामकः पुरुषः कुसुमपुरम् उपरोत्स्यति उक्तविधसैन्यः वेष्टयिष्यतीत्यर्थः । (अत्र 'अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि' इति सूत्रेण भूते लृट्) प्रवीरक ! तत्काले सन्निहितानुचरसंज्ञेयम् । क्षिप्रं शीघ्रं इदानीं सम्प्रति ।

प्राकारानिति । शरा वाणा अस्यन्ते क्षिप्यन्ते यैस्तानि शरासनानि धनूंषि धरन्तीति धरास्तेषां धराः शरासनधरा धानुष्का धनुर्द्धारिणो योद्धार इति यावत् । तैः शरासनधरैः धानुष्कैः प्राकारान् प्राचीरान् परितः समन्तात् क्षिप्रं शीघ्रं परिक्रम्यताम् सञ्चर्यताम् (क्षिप्यतामिति पाठे क्षिप्रं शीघ्रम् परिक्षिप्यताम् क्षेपणीयम् अस्त्रमिति शेषः) परेषां शत्रूणां द्विपा हस्तिनः परद्विपास्तेषां घटाः समूहः परद्विपघटास्तस्या भेदे विदारणे क्षमैः समर्थैः द्वौ रदौ दन्तौ येषां ते द्विरदास्तैः द्विरदैः गजैः द्वारेषु स्थीयताम् द्वारसंरक्षणायेति शेषः । येषामस्मद्वीराणां यशः कीर्त्तिमभीष्टमीप्सितं ते वीरा एकमनसः अभिन्नहृदयाः मृत्युभयं मरणभीतिं त्यक्त्वा परित्यज्य दुर्बले निर्बले बलहीने शत्रौ रिपोर्बले सैन्ये प्रहर्तुं मनो येषां ते प्रहर्तुमनसः विनाशकामुकाः सन्तः मया सह निर्यान्तु निर्गच्छन्तु नगरादिति शेषः । ये वीराः कीर्तिकांक्षिणस्ते पुरद्वारसंरक्षणार्थं भटान् प्रबलहस्तिनश्च यथास्थानं संस्थाप्य अमरमात्मानन्मन्यमानाः सन्तः शत्रुसैन्यविजयप्रयोजनसम्पादनाय नगरान्निर्गच्छ-

---

राक्षसः—(शस्त्र सम्हाल कर) हमारे रहते कुसुमपुर को कौन घेरेगा, प्रवीरक ! प्रवीरक ! जल्दी से अभी—

योद्धा लोग प्राकारके चारों तरफ शीघ्र खड़े हो जांय, शत्रु के हाथियों को पराजित करने वाले अपने हाथी सब दरवाजों पर खड़े कर दिये जायँ जिनको यश इष्ट हो, और शत्रु को मारने की इच्छा रखते हो वे सब एकचित्त से मृत्युभयको छोड़कर मेरे साथ दुर्बल शत्रुसैन्य पर चढ़ाई करं ॥ १३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विराधगुप्तः—अमात्य ! अलमावेगेन ? वृत्तमिदं वर्ण्यते ।

राक्षसः—(निःश्वस्य) कष्टं वृत्तमिदम् ? मया पुनर्ज्ञातं स एव कालो वर्त्तत इति (शस्त्रमुत्सृज्य सास्रम्) हा देव नन्द ! स्मरामि ते राक्षसम्प्रति प्रसादातिशयं यस्तु एवं विधकाले—

यत्रैषा मेघनीला चलति गजघटा, राक्षसस्तत्र याया·

न्निवति भावः । युद्धावसरे शत्रुबलाक्रमणशङ्कया स्वपुररक्षणाय यथास्थानं सैन्यसन्निवेशस्य योद्धुः स्वभावसिद्धत्वात् (स्वाभाविकत्वात) अत्र स्वभावोक्तिनामाऽलङ्कारः यशोलाभहेतुकमरकर्तृकगमने हेतुभूतयोः शरासनधरकर्तृकप्राकारकर्मकपरिक्रमणद्वाराधिकरणकद्विरदकर्तृकस्थित्योः पदार्थत्वेनाभिधानात्काव्यलिङ्गालङ्कारश्च, एतयोः संसृष्टिः । अत्र वीरो रसः स्थायिभावः । गौडी रीतिः । ओजोगुणः । शार्दूलविक्रीडितं छन्दः ॥ १३ ॥

अमात्येति । हे अमात्य ! मन्त्रिन् आवेगेन क्रोधेन अलं व्यर्थम् इदं वृत्तं वृत्तान्तं वर्ण्यतेऽभिधीयते । न तु कुसुमपुरावरोधकाल इति न क्रोधः साम्प्रतमिति भावः ।

कष्टमिति । स एव कालः कुसुमपुरावरोधनसमयो वर्ततेऽस्ति । शस्त्रमसिमुत्सृज्य सास्रम् अस्रेण नेत्रजलेन सहितं (क्रियाविशेषणमिदम्) अश्रुपूर्णनेत्र यथा-स्यात्तथेत्यर्थः । अश्रुपूर्णनेत्रो भूत्वा वक्ष्यमाणवचनं ब्रवीतीति भावः हा कष्टं दुःखमित्यर्थः । हे देव ! राजन् नन्द ! राक्षसं प्रति स्वप्रधानसचिवं प्रति ते तव प्रसादस्य प्रसन्नताया अनुकम्पाया अतिशयः आधिक्यं प्रसादातिशयस्तं तथोक्तम् अनुग्रहात्यर्थमित्यर्थः । स्मरामि चिन्तयामि । स्मरामि ते राक्षसः प्रसादानामिति पाठे ('अधीगर्थदयेशां कर्मणि' इति कर्मणि षष्ठी) राक्षसस्तदाख्योऽहं ते तव प्रसादानां प्रसन्नताः स्मरामीत्यर्थः ।

यत्रेति । यत्र यस्मिन् संग्रामप्रदेशे एषा बुद्धिस्था मेघ इव नीला मेघनीला

विराधगुप्तः—मन्त्रिन् ! क्रोध करना व्यर्थ है यह समाचार कहा जाता है ।

राक्षसः—(निःश्वास लेकर) यह वृत्तान्त कष्ट देने वाला है । मैंने तो समझा था कि वही समय उपस्थित हो गया है (शस्त्र को छोड़ आखों में आंसू भर कर) । हा देव नन्द ! पहले राक्षसमें आपकी अधिक प्रीति का मैं याद करता हूं । राक्षस ऐसे समय—

जिस संग्रामप्रदेश में यह मेरी सजलमेघ घटा के समान नीलवर्ण के हाथयों के यूथ

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

देतत् पारिप्लवाम्भःप्लुति तुरगबलं वार्य्यतां राक्षसेन ।
पत्तीनां राक्षसोऽन्तं नयतु बलमिति प्रेषयन्मह्यमाज्ञा-
मज्ञासीः स्नेहयोगात् स्थितमिह नगरे राक्षसानां सहस्रम् ॥१४॥

(उपमानानि सामान्यवचनैरिति समासः) जलपरिपूरितमेघसदृशश्यामवर्णा, गजानां हस्तिनां घटा समूहः गजघटा हस्तिवृन्दमित्यर्थः। चरति सङ्ग्रामार्थः तत्र रणप्रदेशे राक्षसः तदाख्यस्तव मन्त्रिवर्यः यायात् तत्प्रतीकाराय गच्छेत् (न हि राक्षसस्य हस्तिसमूहावलोकनाद्भयमिति ध्वनिः), पारिप्लवस्यातिचञ्चलस्याम्भसो प्लुतिर्गतिविशेषो यस्य तत्तथोक्तं एतत् बुद्धिस्थं तुरगबलं विपक्षपक्षीयाश्वसैन्यं राक्षसेन वार्यताम् निवर्त्यताम्। (न हि तस्मादपि राक्षसस्य त्रास इति ध्वनिः)। राक्षसः पत्तीनां पदातीनाम्। 'पदातिपत्तिपदगे' त्यमरः। बलं सैन्यं पराक्रमं वा अन्तं नाशं नयतु प्रापयतु (राक्षसोऽन्त इतिपाठे पदातीनां रिपुसैन्यानामन्तर्मध्ये बलं स्वसैन्यं नयत्वित्यर्थः) इति एवं रीत्या मह्यं (क्रियया यमभिप्रैति सोऽपि सम्प्रदानमित्यनेन चतुर्थी) मां प्रतीत्यर्थः आज्ञां नियोगं प्रेषयन् कुर्वन्निति यावत्। प्रेरयन् स्नेहयोगात्प्रेमसम्पर्कात् नगरे कुसुमपुरे राक्षसानां सहस्रं सहस्रराक्षसकृत्यसम्पादनशीलत्वाद्राक्षससहस्रमिव मां स्थितमज्ञासीः अमंस्थाः। सामान्यधर्मोपमानोपमेयौपम्यवाचिनां मध्ये एकस्य वा द्वयोर्वा त्रयाणामनुपादाने लुप्तोपमा भवतीत्यर्थकात्-

लुप्ता सामान्यधर्मादेरेकस्य यदि वा द्वयोः।
त्रयाणां वाऽनुपादाने श्रौत्यार्थी सापि पूर्ववत् ॥

इदि दर्पणोक्तलक्षणात् मेघनीलेत्यत्र पारिप्लवाम्भःप्लुतीत्यत्र चौपम्यवाचकेवशब्दलोपाल्लुप्तोपमालङ्कारः तस्य च।

भवेत्सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना। वाच्या प्रतीयमाना सा प्रथमं द्विविधा मता॥
वाच्येवादिप्रयोगे स्यादप्रयोगे परा पुनः।

इति दर्पणधृतवचनात् राक्षसानां सहस्रमिवेति वाच्योत्प्रेक्षालङ्कारेण संसृष्टिः। यत्तु प्रतीयमानोत्प्रेक्षया संसृष्टिरिति तन्न वाच्येवादिप्रयोगे स्यादिति लक्षणविरोधात्।

यदाधेयमनाधारमेकञ्चानेकगोचरम्।

संग्राम के लिये चलता है, उस संग्राम प्रदेश में उसे हटानेके वास्ते राक्षस जाय, अति चंचल जलका गति विशेष वाले इस शत्रु पक्षके अश्व सैन्यको राक्षस पीछे हटावे, और पैदल चलने वाली सेना पतिके पराक्रम को दूर करे। इस तरह मुझको आज्ञा करते हुए आप स्नेहसे इस कुसुमपुर में हजारों राक्षस को जानते थे॥१४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ततस्ततः ?

विराधगुप्तः—ततः समन्तादुपरुद्धं पुष्पपुरमवलोक्य, बहुदिवसप्रभृति महद्वपरोधवैशसमुपरि पौराणां परिवर्त्तमानमसहमाने, तस्यामवस्थायां, पौरजनापेक्षया, सुरंगामुपेत्यापक्रान्ते तपोवनाय देवे सर्वार्थसिद्धौ, स्वामिविरहात् सुशिथिलीकृतप्रयत्नेषु युष्मद्बलेषु जयघोषणाव्याघातादिसाहसानुमितान्तर्नगरवासिषु, पुनरपि नन्दराज्यप्रत्यानयनाय सुरङ्गया बहिरपगतेषु युष्मासु, चन्द्रगुप्तनिधनाय यु-

इति दर्पणोक्तलक्षणेनैकस्य राक्षसस्य बहुजनसम्पादनशीलत्वेनानेकगोचरत्वाद्विशेषालङ्कारयुक्तश्च । लाटी रीतिः । ओजोगुणः । यायात् नयतु इति कर्तृवाच्यप्रयोगप्रक्रमे वार्यतामित्यकर्तृवाच्यप्रयोगकरणादत्र दोषो भग्नप्रक्रमो नाम । वृत्तञ्चैतत्स्रग्धरा नाम ॥ १४ ॥

तत इति । समन्ताच्चतुर्दिक्षु सर्वत इत्यर्थः । उपरुद्धं सैन्याक्रान्तं कुसुमपुरं तदाख्यनगरमवलोक्य दृष्ट्वा बहुदिवसप्रभृति अनेकवासरान् यावत् पौराणां पुरवासिनां नागरिकाणामुपरि महद्बहुलम् परिवर्तमानं प्रतिदिननूतनम् उपरोधेनाऽवरोधेन वैशसं अत्याचाररूपघातुककर्म असहमाने सोढुमसमर्थे तस्यामप्यवस्थायामसहनदशायाम् पौरजनापेक्षया नगरवासिजनानुमत्या सुरङ्गां गुप्तवर्त्म एत्य प्राप्य तपोवनाय तपोवनं गन्तुं देवे राज्ञि सर्वार्थसिद्धौ, अपक्रान्ते गते सति स्वामिविरहात् प्रभुविच्छेदात् प्रशिथिलीकृतप्रयत्नेषु मन्दीकृतोद्योगेषु जयस्य घोषणा डिण्डिमाघातपूर्वकजयविज्ञापनं चन्द्रगुप्तस्येति शेषः । तस्या व्याघातोऽकरणं स आदिर्येषां तैः साहसैः सैन्यकृतकार्यैः नृपानुमतिव्याघातात्मकैरित्यर्थः । अनुमितेषु शत्रूपजापदूषिता इत्येवमुन्नीतेषु अन्तर्नगरवासिषु युष्मद्बलेषु भवत्सैन्येषु सत्सु पुनरपि नन्दराज्यप्रत्यानयनाय नन्दनृपतिराज्यायत्तीकरणाय सुरङ्गया गुप्तवर्त्मना बहिरपगतेषु बाह्यप्रदेशं गच्छत्सु युष्मासु भवत्सु चन्द्रगुप्तनिधनाय मौर्यविनाशाय युष्मत्प्रयुक्तया

विराधगुप्तः—तब चारों तरफ सैन्योंसे घिरे हुए कुसुमपुर को देख बहुत दिनों से पुरवासियों के ऊपर होते हुए अत्याचाररूप घातुककर्म को नहीं सहन करने वाले पुरवासियों की सहानुभूति से सुरंग द्वारा राजा सर्वार्थ सिद्धि के तपोवन चले जाने पर स्वामीके विरह से आपके सैन्यवर्गों के उद्योग छोड़ देने, और जयघोषणाके रोकने के उद्योगसे नगरवासियों के अभिप्रायको जान लेने के बाद फिर भी नन्द के राज्य को लौटाने के लिये सुरङ्ग के द्वारा आप लोगों के बाहर चले जाने पर चन्द्रगुप्त को

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्भवत्प्रयुक्तया विषयकन्यया घातिते तपस्विनि पर्व्वतेश्वरे"

राक्षसः—सखे ! पश्याश्चर्य्यम्,—

कर्णेनेव विषाङ्गनैकपुरुषव्यापादिनी रक्षिता,
हन्तुं शक्तिरिवार्ज्जुनं बलवती, या चन्द्रगुप्तं मया ।
सा विष्णोरिव विष्णुगुप्तहतकस्यात्यन्तिकश्रेयसे
हैडिम्बेयमिवेत्य पर्व्वतनृपं तद्वध्यमेवावधीत् ॥ १५ ॥

भवत्प्रेरितया विषकन्यया विषनिर्मितकन्यया तपस्विनि तपश्चरणशीले पर्वतेश्वरे घातिते विनाशिते सति ।

कर्णेनेति । कर्णेन सूर्यतनयेनेव मया अर्जुनं गाण्डीविनमिव चन्द्रगुप्तं मौर्यं हन्तुं व्यापादितुं बलवती सामर्थ्ययुक्ता (एकपुरुषं व्यापादयति तच्छीलेति विग्रहे णिनिः) एकपुरुषव्यापादिनी अद्वितीयपुरुषविनाशकारिणीत्यर्थः । शक्तिः शक्रप्रदत्त-शक्तिनामास्त्रविशेष इव या विषाङ्गना विषकन्या रक्षिता स्थापिता, सा विषाङ्गना विष्णोर्भगवत इव विष्णुगुप्तहतकस्य चाणक्यस्य आत्यन्तिकश्रेयसे अधिककल्याणाय हैडिम्बेयं हिडिम्बासुतं घटोत्कचमिव तद्वध्यं तस्य विष्णोर्वध्यं पक्षान्तरे तस्य परिपणित(प्रतिश्रुत) राज्यार्द्धदानभीरोश्चन्द्रगुप्तस्य वध्यं घात्यं पर्वतनृपं पर्वतेश्वर-नृपतिमवेत्य प्राप्य अवधीत् घातितवान् । सूर्यतनयः कर्णः अर्जुनविनाशाय शक्र-प्रदत्तशक्तिमिव मौर्यवधाय विषाङ्गनामहं स्थापितवान् सा शक्तिरिव विषाङ्गना विष्णुवध्यं हिडिम्बापुत्रमिव मौर्यवध्यं पर्वतेश्वरं विनाशितवतीति भावः । शक्रश्चैकदा कवचकुण्डलादिकं कर्णं याचितवान् ततो याचितवस्तुप्राप्त्या प्रसन्नधूताच्छकादेकां शक्तीं कर्णः समासादितवान्, सा प्रयत्नतोऽर्जुनवधाय रक्षिता समरे हिडिम्बा-तनयवधाय प्रहितेति भारतीयकथात्रानुसन्धातव्या ।

गुणक्रिये वा चेत्स्यातां विरुद्धे हेतुकार्ययोः । यद्वाऽऽरब्धस्य वैफल्यमनर्थस्य च सम्भवः ॥

मारने के लिए आप के द्वारा भेजी हुई विषकन्या द्वारा तपस्वी पर्वतेश्वर के मारे जाने पर—

राक्षसः—सखे ! इस आश्चर्यजनक घटना को तो देखो—

सूर्यपुत्रकर्णकी तरह मैंने एक पुरुष को मार ने वाली शक्ति नामक अस्त्र विशेष के समान जिस विष कन्या का प्रयोग किया था, वह विष कन्या, विष्णु भगवान् के सदृश चाणक्य के कल्याण के लिये विष्णु के वध्य हीडिम्बा पुत्र घटोत्कच की तरह चाणक्य के वध्य पर्वतेश्वर राजा को जान ली ॥ १६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विराधगुप्तः—अमात्य ! दैवस्यात्र कामचारः, किमत्र क्रियते ?

राक्षसः—ततस्ततः ?

विराधगुप्तः—ततः पितृवधपरित्रासादपक्रान्ते कुसुमपुरात् कुमारे मलयकेतौ, विश्वासिते च पर्वतकभ्रातरि वैरोचके, प्रकाशिते च चन्द्रगुप्तस्य नन्दभवनप्रवेशे, चाणक्यहतकेनाहूयाभिहिताः कुसुमपुरनिवासिनः सर्वे एव सूत्रधाराः "यथा सांवत्सरिकवचनादद्यैवार्द्धरात्रसमये एवाभिमतः चन्द्रगुप्तस्य नन्दभवनप्रवेशो भविष्यतीति, ततः

विरूपयोः संघटना या च तद्विषमं मतम् ॥

इति दर्पणोक्तलक्षणादारब्धवैफल्यपूर्वकाऽनर्थसम्भवरूपोऽत्र विषमालङ्कारः । स च कर्णेनेवेत्यादिषु सादृश्यार्थकेवशब्दसत्त्वात्पूर्णोपमालङ्कारसंकीर्णः । एतल्लक्षणं प्रागुक्तत्वान्नेहोक्तम् । वैदर्भी रीतिः । माधुर्यगुणः । शार्दूलविक्रीडितं वृत्तम् ॥१५॥

अमात्येति । अमात्य मन्त्रिन् ! अत्र पर्वतेश्वरवधे दैवस्य भाग्यस्य कामचारः इच्छा अत्राऽस्मिन्विषये किं क्रियते मयेतिशेषः न किमपीत्यर्थः ।

ततस्तत इति । तदनन्तरं किं वृत्तं जातं तत्कथयेत्यर्थः ।

तत इति । पितुर्वधो नाशः पितृवधः पितृवधात्त्रासः पितृवधत्रासस्तस्मात्पितृवधत्रासात् तातविनासभयात् कुसुमपुरात् तन्नामनगरात् कुमारे शिशौ मलयकेतौ पर्वतराजसुते अपक्रान्ते पलायिते सति पर्वतकस्य भ्राता सोदरः पर्वतकभ्राता तस्मिन् पर्वतकभ्रातरि पर्वतकसोदरे वैरोचके तन्नाम्नि विश्वासिते विश्वासं प्रापिते सति विष्णुगुप्तकर्तृकतत्सम्प्रदानकराज्यार्द्धप्रदानसूचकवचनेन आश्वासित इत्यर्थः । चन्द्रगुप्तस्य मौर्यस्य नन्दस्य भवनं नन्दभवनं तत्र प्रवेशः सन्निवेशो नन्दभवनप्रवेशस्तस्मिन्नन्दभवनप्रवेशे नन्दनृपतिगृहसन्निवेशे प्रकाशिते प्रख्यापिते च सति, चाणक्यो हतकः चाणक्यहतकः (कुत्सितानि कुत्सनैरिति समासः) तेन चाणक्य-

---

विराधगुप्तः—मन्त्रिन् ! पर्वतेश्वर राजा का वध में भाग्य ही की इच्छा कारण है। इस विषय में मैं क्या करता ।

राक्षसः—तब क्या हुआ ?

विराधगुप्तः—तब पिता के बध के भय से कुमार मलयकेतु के कुसुमपुर से चले जाने पर और पर्वतेश्वर के भाई वैरोचक के मन में विश्वास उत्पन्न करने पर और चन्द्र गुप्त के नन्द भवन में प्रवेश की वार्ता प्रकाशित होने पर चाणक्यने कुसुमपुर के रहने वाले सब अफ़सरों को बुलाकर कहा कि आज ही अर्द्ध रात्रि के समय चन्द्रगुप्त का नन्द भवन में प्रवेश होगा । इसलिये पहले दरवाजे से लेकर राज भवनको साफ

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रथमद्वारात्प्रभृति संस्क्रियतां राजभवनम्' इति। ततः सूत्रधारैरभिहितम् ,—"आर्य! प्रथममेव देवस्य चन्द्रगुप्तस्य नन्दभवनप्रवेशमुपलभ्य सूत्रधारेण दारुवर्मणा कनकतोरणन्यासादिभिः संस्कारविशेषैः संस्कृतं प्रथमराजद्वारम्। इदानीमस्माभिरभ्यन्तरे संस्कारो विधेयः" इति ततश्चाणक्यवटुना, आदिष्टेनैव दारुवर्मणा संस्कृतं

हतकेन विष्णुगुप्त विद्वेषिणा आहूय आकार्य सर्वे एव निखिला एव कुसुमपुरे निवसन्ति तच्छीलाः कुसुमपुरनिवासिनः ('सुप्युजातावि'ति णिनिः) कुसुमपुरवास्तव्याः सूत्रधाराः शिल्पज्ञाः अभिहिताः कथिताः, यथा सांवत्सरिकस्य दैवज्ञस्य वचनं वाक्यं सांवत्सरिकवचनं तस्मात्सांवत्सरिकवचनात् दैवज्ञकथनादित्यर्थः। अद्यैव अस्मिन्नेव अर्द्धरात्रसमये निशीथार्द्धसमये एव चन्द्रगुप्तस्य मौर्यस्य नन्दभवनप्रवेशः नन्दगृहसन्निवेशः अभिमतः इष्टो भविष्यति। ततस्तदनन्तरं प्रथमद्वारात् प्रभृति पूर्वद्वारमारभ्य राज्ञो भवनं राजभवनं नृपसद्मेत्यर्थः। संस्क्रियताम् संस्कारयुक्तं विधीयताम् इतीत्येतद्वृत्तम् अस्य चाणक्येनाहूयाऽभिहिताः सूत्रधारा इत्यनेनान्वयः। ततस्तदनन्तरं चाणक्याभिधानानन्तरमित्यर्थः सूत्रधारैः शिल्पिभिः अभिहितं कथितम्। आर्य! श्रीमन् देवस्य राज्ञः चन्द्रगुप्तस्य मौर्यस्य प्रथममेव प्रागेव नन्दभवनप्रवेशं नन्दनृपगृहसन्निवेशनमुपलभ्य ज्ञात्वा सूत्रधारेण शिल्पिना दारुवर्मणा तन्नाम्ना कनकस्य सुवर्णस्य बर्हिद्वारं। 'तोरणं तु बहिर्द्वारमि'त्यमरः।

कनकतोरणं तस्य न्यासः सन्निवेश आदिर्येषां ते कनकतोरणन्यासादयस्तैः कनकतोरणन्यासादिभिः संस्कारविशेषैः मौर्योपदिष्ट बहिर्द्वारपातनोद्योगात्मकैरित्यर्थः। राज्ञो द्वारं राजद्वारं प्रथमं च तद्राजद्वारञ्च प्रथमराजद्वारं संस्कृतं संस्कारास्पदं कृतम्। इदानीं साम्प्रतं अस्माभिः शिल्पिभिः अभ्यन्तरे अन्तराले संस्कारो (तीक्ष्णरसदानशयनगृहशयितहननादिरूपः इति गूढोऽभिसन्धिः) विधेयः। सम्पादनीयः कार्य्यं इति यावत्। क्वचित्पुस्तके आधेय इति पाठस्तस्याप्युक्त एवार्थः। ततस्तदन्तरं अनादिष्टेनैव आदेशमप्राप्तवतैव सूत्रधारेण शिल्पिना दारुवर्म्मणातन्नाम्ना राजभवनद्वारं नृपगृहद्वारं संस्कृतं संस्कारयुक्तं कृतं इत्यस्माद्धेतोः परि-

---

करो। तब अधिकारियों ने कहा कि आर्य! राजा चन्द्रगुप्त के नन्दभवनप्रवेश की वार्ता जानकर पहलेही दारुवर्मा नामके सूत्रधार ने सुवर्ण के तोरण विन्यास आदि संस्कार विशेषों से पहला राजद्वार को सजाया है। अब हम लोग भीतर सजावेंगे। विना आज्ञाही दारुवर्माने राजभवनको सजाया है इससे सन्तुष्ट चाणक्य ने बहुत-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राजभवनद्वारमिति परितुष्टेन, दारुवर्म्मणः सुचिरं दाक्ष्यमभिनन्द्याभिहितम् "अचिरादस्य दाक्ष्यस्यानुरूपं फलमधिगमिष्यसि दारुवर्म्मन् !"

राक्षसः—(सोद्वेगम्) सखे ! कुतश्चाणक्यवटोः परितोषः । अफलमनिष्टफलं वा दारुवर्म्मणः प्रयत्नमवगच्छामि । यदनेन बुद्धिमोहादथवा राजभक्तिप्रकर्षान्नियोगकालमप्रतीक्षमाणेन, सञ्जनितश्चाणक्य-

---

तुष्टेन सन्तुष्टेन संतोषवतेत्यर्थः। इव चाणक्येन विष्णुगुप्तेन सुचिरं वहुकालं दारुवर्मणस्तन्नाम्नः शिल्पिनः दक्षस्य भावो दाक्ष्यं नैपुण्यं प्रशंस्य संस्तुत्य अभिहितमुक्तम् दारुवर्मन् अस्य त्वदीयस्येति शेषः दाक्ष्यस्य नैपुण्यस्य रूपस्य योग्यमनुरूपं सदृशं फलं (वधरूपं फलमिति गूढभावः) अचिरात् शीघ्रमधिगमिष्यसि प्राप्स्यसीति भावः ।

सोद्वेगमिति । उद्वेगेनोत्कण्ठया सहितं सोद्वेगं (क्रियाविशेषणमिदम्) सोत्कण्ठं यथा स्यात्तथा कथयतीत्यर्थः । सखे ! मित्र, चाणक्यश्चासौ वटुश्चेति चाणक्यवटुस्तस्य चाणक्यवटोः अल्पबुद्धिमतो विष्णुगुप्तस्येत्यर्थः । परितोषः सन्तोषः कुतः कस्मात् तादृशस्य तस्य नैव सन्तोषः सम्भवतीत्यर्थः दारुवर्म्मणः तदाख्यस्य शिल्पविद्यावतः प्रयत्नं प्रयासं अविद्यमानं फलं यस्य तदफलं निष्फलमित्यर्थः । वा अथवा अनिष्टमशुभं फलं यस्य तदनिष्टफलमशुभफलमित्यर्थः । अवगच्छामि जानामि । यद्यस्मात्कारणात् अनेन दारुवर्मणा बुद्धेर्मतेर्मोहो भ्रमो बुद्धिमोहस्तस्माद्बुद्धिमोहात् मतिभ्रमात् । अथवा राज्ञो भक्तिः राजभक्तिः राजभक्तेः प्रकर्षो राजभक्तिप्रकर्षस्तस्माद्राजभक्तिप्रकर्षात् राज्ञः सर्वार्थसिद्धौ शत्रुवधेन भक्त्याधिक्यप्रदर्शनादित्यर्थः । नियोगस्य प्रेरणस्य कालः समयः नियोगकालस्तं नियोगकालं प्रेरणसमयमित्यर्थः । प्रतीक्षमाणः (प्रतिपूर्वकादीक्षतेः शानचि रूपम्) न प्रतीक्षमाणोऽप्रतीक्षमाणस्तेनाऽप्रतीक्षमाणेन असहिष्णुना अनेन दारुवर्मणा चाणक्यवटोः विष्णुगुप्तात्मकान्तेवासिनः चेतसि हृदये वलवान् सुदृढः विकल्पः सन्देहः

देरतक दारुवर्मा की चतुरता की प्रशंसा की और कहा कि हे दारुवर्मन् ! तुम इस चतुरता के योग्य फल शीघ्र ही पावोगे ।

राक्षसः—(उत्कण्ठाके साथ) उस अल्पबुद्धिवाले चाणक्य को सन्तोष कैसे हुआ? निष्फल अथवा अनिष्ट फल को देने वाला दारुवर्मा के प्रयत्न को जानता हूं । क्योंकि इसने बुद्धि के भ्रम अथवा अतिशय राजभक्ति के कारण आज्ञा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चटोश्चेतसि बलवान् विकल्पः। ततस्ततः ?

विराधगुप्तः—ततश्चाणक्यहतकेनानुकूललग्नवशादद्यार्द्धरात्रसमये चन्द्रभवनप्रवेशो भविष्यतीति, शिल्पिनः पौरांश्च गृहीतार्थान् कृत्वा, तस्मिन्नेव क्षणे पर्वतेश्वरभ्रातरं वैरोचकमेकासने चन्द्रगुप्तेन सहोपवेश्य, कृतः पृथ्वीराज्यार्द्धभागः !

राक्षसः—किंचातिसृष्टं पर्वतेश्वरभ्रात्रे वैरोचकाय पूर्वप्रतिश्रुतं राज्यार्द्धम् ?

सञ्जनितः समुत्पादितः। ततस्ततः (वाप्सायां द्विरुक्तिः) तदनन्तरं किं वृत्तं जातं तत्कथयेत्यर्थः ।

तत इति । तदनन्तरं चाणक्य हतकेन कुत्सितेन चाणक्येनेत्यर्थः । अनुकूलं च तल्लग्नमनुकूललग्नं तस्य वशस्तस्मात् अनुकूललग्नवशात् अद्य अस्मिन् अर्द्धरात्रसमये निशीथार्द्धक्षणे (अर्द्धरजनीकाले) चन्द्रगुप्तस्य मौर्यस्य नन्दस्य भवनं नन्दभवनं नन्दभवने प्रवेशो नन्दभवनप्रवेश इत्यर्थः । भविष्यति इति इत्येतद्वृत्तं शिल्पिनः शिल्पविद्यावतः पुरि भवाः पौरास्तान् पौरान् पुरवासिनश्च गृहीतोऽवगतोऽर्थस्तात्पर्यं यैस्ते गृहीतार्थास्तान् गृहीतार्थान् अवगताऽभिप्रायान् वा अवगतसंकेतान् कृत्वा विधाय तस्मिन्नेव क्षणे नन्दभवनप्रवेशसमय एवेत्यर्थः । पर्वतेश्वरभ्रातरं पर्वतेश्वरसोदरं वैरोचकं तन्नामानम् एकासने एकोपवेशने चन्द्रगुप्तेन वृषलेन सह सार्द्धं उपवेश्य संस्थाप्य पृथ्वी राज्यं तस्यार्द्धभागः पृथ्वीराज्यार्द्धभागः मौर्यायार्द्धं दत्तं, परिशिष्टार्द्धञ्च वैरोचकाय प्रदत्तमित्येवंरूपो विभाग इत्यर्थः । कृतः सम्पादितः । (विष्णुगुप्तेष्टार्थोपायानुसरणमिदमाक्षेपो नामाऽन्त्यमङ्गम्)

किञ्चेति । किन्तु पर्वतेश्वरस्य भ्राता पर्वतेश्वरभ्राता तस्मै पर्वतेश्वर-

---

के समय की प्रतीक्षा नहीं की इससे अल्प बुद्धिवाला चाणक्य के हृदयमें दृढ सन्देह होगया। तब उसके बाद क्या हुआ ?

विराधगुप्तः—तब उस दुरात्मा चाणक्यने प्रथमप्रवेशलग्न कारण की बात कहकर कहा–आज आधी रात के समय नन्द भवन में प्रवेश होगा। यह समाचार शिल्पविद्या जानने वाले तथा पुरवासियों को जनाकर उसी समय वैरोचकनाम पर्वतेश्वर के भ्राताको चन्द्रगुप्तके साथ एक आसनपर बैठाकर पृथ्वी के राज्यका आधा हिस्सा अलग करदिया।

राक्षसः—पहले की प्रतिज्ञाके अनुसार आधा राज्य पर्वतेश्वर के भ्राता वैरोचक को देदिया क्या ?

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विराधगुप्तः—अथ किम् ।

राक्षसः—(आत्मगतम्) नियतमतिधूर्त्तवटुना तस्यापि तपस्विनः कमप्युपांशुवधमाकलय्य पर्वतेश्वरविनाशजनितस्यायशसः परिहारार्थमेषा लोकप्रतिपत्तिरुपचरिता (प्रकाशम्) ततस्ततः ?

विराधगुप्तः—ततः प्रथममेव प्रकाशिते चन्द्रगुप्तस्यार्द्धरात्रे नन्दभवनप्रवेशे, कृताभिषेके च वैरोचके, विमलमुक्तागुणपरिक्षेपोपरचित-

---

भ्रात्रे पर्वतेश्वरसोदराय पूर्वप्रतिश्रुतं प्राक्प्रतिज्ञातं राज्यार्द्धम् अतिसृष्टं दत्तम् ; (अतिपूर्वकः सृजिर्दानार्थकः दिश अतिसर्जन इत्यत्र दिशधात्वर्थबोधकातिसर्जनपदेन तथा प्रतीतेः) ।

अथ किमिति । स्वीकारार्थकोऽत्राऽथशब्दः उक्तनाम्ने राज्यार्द्धं दत्तमित्यर्थः ।

आत्मगतमिति । अनतिस्पष्टमित्यर्थः । (क्रियाविशेषणमिदम्) अन्यजनाश्राव्यं यथा स्यात्तथा ब्रवीति भावः । अतिधूर्त्तवटुना अतिशठेन चाणक्येनेति शेषः । तपस्विनः तपश्चरणशीलस्य तस्यापि पर्वतेश्वरस्यापि किमपि यत्किञ्चिदनिर्दिष्टमपि उपांशुवधं रहस्यहननम् आकलय्य अवधार्य निश्चित्य पर्वतेश्वरस्य विनाशः पर्वतेश्वरविनाशस्तेन जनितः पर्वतेश्वरविनाशजनितस्तस्य पर्वतेश्वरविनाशजनितस्य पर्वतेश्वरवधोत्पन्नस्य अयशसोऽकीर्त्तेः परिहारार्थं प्रक्षालनार्थं अतिधूर्त्तवटुना अतिशठेन नियतं निश्चितं एषा लोकानां जनानां प्रतिपत्तिर्निश्चयो लोकप्रतिपत्तिः उपचरिता परिकल्पिता (लोकप्रसिद्धिरिति पाठे तु) लोकेषु जनेषु प्रसिद्धिः प्रख्यापनेति तदर्थः । प्रकाशं सुव्यक्तं यथा तथा ब्रवीतीत्यर्थः । ततस्ततः तदनन्तरं किं जातमित्यर्थः । (वीप्सायां द्विरुक्तिः) ।

तत इति । ततस्तदनन्तरं प्रथममेव पूर्वमेव चन्द्रगुप्तस्य मौर्यस्य अर्द्धरात्रे निशीथे नन्दभवनप्रवेशे नन्दगृहसन्निवेशे प्रकाशिते विख्याते सति वैरोचके पर्वतेश्वरभ्रातरि कृतोऽभिषेको यस्यासौ कृताऽभिषेकस्तस्मिन् कृताऽभिषेके कृतराज्यप्राप्तिप्राक्कालिकस्नपने च सति, विमलश्चासौ मुक्तागुणो विमलमुक्तागुणः निर्मलमु-

---

विराधगुप्तः—और क्या ?

राक्षसः—(मन ही मन) निश्चयही अत्यन्त धूर्त चाणक्य ने तपस्वी का रहस्यवध को सोचकर पर्वतेश्वर बधजनित अयशको दूर करने के लिये ही ऐसा कार्य किया होगा । (जोरसे) तब क्या हुआ ?

विराधगुप्तः—तब आधीरात के समय ही नन्दभवनमें चन्द्र गुप्तका प्रवेश प्रकाशित, और वैरोचक के अभिषेक हो जाने पर पवित्र मुक्ताहारसे खचित वज्रमय

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पटवारवाणप्रच्छादितशरीरे, मणिमयमुकुटनिविड़नियतरुचिरतरमौलौ, सुरभिकुसुमदामवैकक्षिकावभासितविपुलवक्षःस्थले, परिचिततमैरप्यनभिज्ञायमानाकृतौ चाणक्यहतकादेशाच्चन्द्रगुप्तोपवाह्यां चन्द्रलेखाभिधानां गजवशामारुह्य, चन्द्रगुप्तानुयायिना राजलोकेन अनुग-

---

क्ताहारः विमलमुक्तागुणस्य परिक्षेपः शोभार्थं परितो वेष्टनं विमलमुक्तागुणपरिक्षेपस्तेन रचितः कल्पितो यश्चित्रोऽनेकविधवर्णः पटस्तन्मयस्तन्निर्मितो यो वारवाणः कञ्चुकः वारयति बाणानिति व्युत्पत्तिः । 'कञ्चुको वारबाणोऽस्त्री' इत्यमरः । तेन प्रच्छादितमाच्छादितं शरीरं यस्य स तथोक्तस्तस्मिन् विमलमुक्तागुणपरिक्षेपोपरचितपटवारबाणप्रच्छादितशरीरे निर्मलमुक्ताहारप्रदानोपकल्पितपटमयकञ्चुकाच्छादितविग्रहे (वैरोचकोऽयमित्यवगतिर्न भविष्यतीत्यनेन सूचितम्), मणिमयश्चासौ मुकुटश्चेति मणिमयमुकुटस्तेन निविडमतिशयदृढं नियमितः संयतो बद्धः रुचिरतरो मनोज्ञो मौलिः कचो यस्य स तथोक्तस्तस्मिन् मणियमुकुटनिविडनियमितरुचिरमौलौ मणिनिर्मितकिरीटदृढबद्धमनोज्ञकचे । 'मौलयः संयताः कचाः' इत्यमरः ।

सुरभीणि सुगन्धीनि च तानि कुसुमानि चेति सुरभिकुसुमानि तेषां दाम माल्यं सुरभिकुसुमदाम तदेव वैकक्षिकं यज्ञोपवीतवत्तिर्यग्लम्बि स्रगिति सुरभिकुसुमदामवैकक्षिकं तेनाऽवभासितं सुशोभितं विपुलं महत् वक्षःस्थलमुरःस्थलं यस्यासौ तथोक्तस्तस्मिन् सुरभिकुसुमदामवैकक्षिकाऽवभासितविपुलवक्षःस्थले, अतिशयेन परिचिताः परिचिततमास्तैः परिचिततमैरपि अतिशयेन संस्तुतैरपि न अभिज्ञायमाना अवगम्यमाना आकृतिः आकारः शरीरं यस्य स तथोक्तस्तस्मिन् अनभिज्ञायमानाऽऽकृतौ अनवगम्यमानशरीरे, चाणक्यश्चासौ हतकश्चाणक्यहतकस्तस्याऽऽदेश आज्ञा तस्मात् चाणक्यहतकादेशात् निन्दितविष्णुगुप्तनिदेशात् चन्द्रगुप्त उपवाह्य आरोहको यस्याः सा तथोक्ता तां चन्द्रगुप्तोपवाह्यां मौर्याऽऽरोहिकाम् मौर्यवाहिनीमिति यावत् । चन्द्रलेखेत्यभिधानं नाम यस्याः सा तथोक्ता तां चन्द्रलेखानाम्नीं गजवशां गजस्त्रीम् करेणुमित्यर्थः । 'वशा स्त्री करिणी च स्यात्' इत्यमरः ।

कञ्चुक से ढांके हुए शरीर वाला, मणि जटित मुकुट से अच्छीतरह बंधे हुए सुन्दर केशवाला, तिरछी लटकी हुई सुगन्धित पुष्पमालासे सुशोभित उन्नतवक्षस्थलवाला, अत्यन्तपरिचित लोगोंसे भी नहीं जानने योग्य आकृति वाला, दुष्ट चाणक्य की आज्ञा से चन्द्रगुप्तके चढने योग्य चन्द्रलेखानामकी हस्तिनी पर चढ़कर चन्द्रगुप्त के पीछे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्यमाने, जवेन देवस्य नन्दस्य भवनं प्रविशति वैरोचके, युष्मत्प्रयुक्तेन सूत्रधारेण दारुवर्मणा, चन्द्रगुप्तोऽयमिति मन्यमानेन वैरोचकस्योपरि निपातनाय सज्जीकृतं यन्त्रतोरणम्। अत्रान्तरे वहिर्निगृहीतवाहनेषु स्थितेषु,चन्द्रगुप्तानुयायिषु भूमिपालेषु युष्मत्प्रयुक्तेनैव चन्द्रगुप्तनिषादिना वर्व्वरकेण, कनकदण्डान्तर्निहितामसिपुत्रिकामाक्रष्टुकामेन अवलम्बिता करेण, कनकशृङ्खलावलम्बिनी कनकदण्डिका।

आरुह्य तदुपरि स्थित्वा चन्द्रगुप्तमनुयातुं शीलं यस्य स चन्द्रगुप्तानुयायी तेन चन्द्रगुप्तानुयायिना मौर्यानुगामिना (मौर्यभ्रान्तिसम्पत्त्यर्थमित्युक्तिः) राजलोकेन नृपजनेन अनुगम्यमाने अनुयायमाने वैरोचके पर्वतेश्वरभ्रातरि देवस्य राज्ञो नन्दस्य तदाख्यस्य सदनं गृहं प्रविशति अभ्यन्तरं गच्छति सति युष्मत्प्रयुक्तेन त्वत्प्रेरितेन दारुवर्मणा तन्नाम्ना सूत्रधारेण शिल्पिना अयमेव चन्द्रगुप्तो मौर्य इति मत्वा अवगत्य तस्य वैरोचकस्योपरि निपातनाय प्रक्षेपणाय यन्त्रस्य तोरणं यन्त्रतोरणम् तोरणरूपेण निर्मितं यन्त्रमित्यर्थः। वहिर्द्वारमिति यावत्। 'तोरणं तु बहिर्द्वारम्'इत्यमरः।

बहिः सज्जीकृतं समुद्यतं बाह्ये निगृहीतानि अवरुद्धानि वाहनानि अश्वादयो यैस्ते तथोक्तास्तेषु वहिर्निगृहीतवाहनेषु बाह्यावरुद्धाश्वादिष्वित्यर्थः, चन्द्रगुप्तनिषादिना मौर्यहस्तिपकेन। 'आधोरणा हस्तिपका हस्त्यारोहा निषादिनः' इत्यमरः। वर्व्वरकेण तन्नाम्ना (वृषलोपांशुवधनिमित्तमयं वर्वरको राक्षसेन तस्य हस्तिपकत्वेन नियोजितः) कनकस्य सुवर्णस्य दण्डो यष्टी कनकदण्डस्तस्यान्तरभ्यन्तरे निहिता स्थापिता कनकदण्डान्तर्निहिता तां कनकदण्डान्तर्निहितां सुवर्णयष्ट्यभ्यन्तरस्थापितां असिपुत्रिकां शस्त्रीं छुरिकामित्यर्थः। 'स्याच्छस्त्री चासिपुत्री च छुरिका' इत्यमरः।

आक्रष्टुं कामयते इत्याक्रष्टुकामस्तेनाऽऽक्रष्टुकामेन वहिर्निःसारणेच्छुना करेण हस्तेन कनकस्य स्वर्णस्य शृङ्खला बन्धनरज्जुः कनकशृङ्खला तामवलम्बते तच्छी-

---

चलने वाले राजाओं के साथ जाते हुए वैरोचक ने राजा नन्दके भवनमें प्रवेश करने पर यह चन्द्रगुप्त है ऐसा जानके आपके भेजे हुये दारुवर्मा नामक सूत्रधार ने वैरोचक के ऊपर फेकने के वास्ते जो तोरणरूप यन्त्र तैयार कियाथा। सो वाहर अश्वादिवाहनों को रोकने वाले चन्द्रगुप्तके अनुयायी राजाओं के रुकजाने पर आप से भेजे हुए बर्वरक नामके चन्द्रगुप्तके फीलवान ने सुवणदण्डके भीतर रखेहुए छूराको वाहर करनेकी इच्छासे सुवर्ण हारमें लटकी हुई सुवर्ण यष्टि को पकड़ा।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राक्षसः—उभयोरप्यस्थाने यत्नः । ततस्ततः ?

विराधगुप्तः—अथ जघनाभिघातमुत्प्रेक्षमाणा गजवधूरतिजवनतया गत्यन्तरमारूढवती । ततः प्रथमगत्यनुरोधप्रत्याकलितमुक्तेन प्रभ्रष्ट-लक्ष्यं पतता यन्त्रतोरणेन आकृष्टकृपाणीव्यग्रपाणिरनासादयन्नेव च-न्द्रगुप्तप्रत्याशया वैरोचकं, दारुवर्म्मणा हतस्तपस्वी वर्वरकः ततो दारुवर्मणा, यन्त्रतोरणनिपातनादात्मवधमाकलय्य शीघ्रमेवोत्तुङ्गतो-

---

लेति कनकशृङ्खलावलम्बिनी (कनकशृङ्खलामुखावलम्बिनीति पाठे) कनकशृ-ङ्खला स्वर्णहारो मुखावलम्बिनी मुखे लम्बमाना यस्याः सा तथोक्ता, आस्यावलम्बमान-स्वर्णहारेत्यर्थः । कनकदण्डिका स्वर्णयष्टिः अवलम्बिता धृता ।

उभयोरपीति—उभयोर्द्वयोः वर्वरकदारुवर्मयोरित्यर्थः । अस्थाने असमये यत्न उद्योगः । ततस्ततः तदनन्तरं किं वृत्तं संवृत्तं तद्वदेत्यर्थः ।

अथेति । अथानन्तरं जघने नितम्बे अभिघातं आघातमुत्प्रेक्षमाणा सम्भा-वयन्ती गजवधूः करिणी अतिजवनतया अतिशयवेगेन गत्यन्तरं शीघ्रगतिम् आरू-ढवती समाश्रितवती । ततस्तदनन्तरं प्रथमा चासौ गतिः प्रथमगतिः मन्दगमन-मित्यर्थः । तस्या अनुरोधः प्रथमगत्यनुरोधस्तेन प्रथमगत्यनुरोधेन मन्दगमनाऽपे-क्षयेत्यर्थः । प्रत्याकलितं धृतं मुक्तञ्चेति प्रथमगत्यनुरोधप्रत्याकलितमुक्तं तेन तथो-क्तेन मन्दगत्यपेक्षया धृतत्यक्तेनेत्यर्थः । प्रभ्रष्टं च्युतं लक्ष्यं शरव्यं यत्र तद्यथा स्यात्तथा (क्रियाविशेषणमिदम्) पतता यन्त्रतोरणेन तोरणरूपेण निर्मितयन्त्रविशे-षेण, आकृष्टा कोषाद्बहिर्निःसारिता या कृपाणी सा आकृष्टकृपाणी तया व्यग्रः समु-द्यतः । सज्जीभूतः व्याप्त इति यावत् । पाणिः करो यस्य स तथोक्तः कोषोन्मुक्त-छुरिकाव्याप्तपाणिः प्रहाराय समुद्यतहस्त इत्यर्थः । वैरोचकं पर्वतेश्वरभ्रातरमनासा-दयन्नेव हननार्थमप्राप्नुवन्नेव तपस्वी तपश्चरणशीलो दीन इत्यर्थः । वर्बरकः दा-रुवर्मणा तन्नाम्ना सूत्रधारेण चन्द्रगुप्तप्रत्याशया मौर्यबुद्ध्या हतो विनाशितः । तत-

---

राक्षसः—दोनों ही का उद्योग असामयिक रहा । तब क्या हुआ ?

विराधगुप्तः—इसके बाद हस्तिनीके जघनप्रदेशमें चोटलगने के कारण वह अत्यन्त वेगसे दौड़ी। तब पहले मन्दगमनके समय पकड़ागया पीछे शीघ्रगमनके समय छोडा गया भ्रष्टलक्ष्य होकर गिरते हुए यन्त्रतोरण के द्वारा पर्वतेश्वरके भ्राता वैरोचक को नहीं पानेवाले दारुवर्म्माके द्वारा निकालीभयी तलवारको हांथमें लिये हुए बेचारा वर्वरक चन्द्रगुप्तके धोखेसे मारागया । तब शीघ्रही ऊंचे बाहरी दरवाजे पर चढ़े हुए

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रणस्थानमारूढ़ेन, यन्त्रघट्टनवीजलोहकीलकमादाय हस्तिनीगत एव हतस्तपस्वी वैरोचकः ।

राक्षसः—कष्टम् ! अनर्थद्वयमापतितम् ; न हतश्चन्द्रगुप्तोऽसौ हतो वैरोचक वर्वरकौ !! (सावेगमात्मगतम्) नैतावुभौ हतौ, दैवेन वयमेव हताः (प्रकाशम्) अथ स सुत्रधारो दारुवर्मा क ?

विराधगुप्तः—वैरोचकपुरः-सरेण पदातिलोकेन लोष्ठघातं हतः ।

रुतदनन्तरं यन्त्रतोरणनिपातनात् यन्त्रतोरणप्रहरणात् आत्मवधं स्वविनाशमाकलय्य निश्चित्येति यावत् । शीघ्रमेव द्रुतमेव उत्तुङ्गतोरणस्थानम् अतिशयोच्चबहिर्द्वारस्थानम् आरूढेन प्राप्तवता दारुवर्मणा तदाख्यभूत्रधारेण यन्त्रघट्टनवीजं यन्त्रसञ्चालनकारणं लोहकीलकं अयःशङ्कुमादाय गृहीत्वा हस्तिनीगत एव करिणीपृष्ठसमारूढ एव तपस्वी दीनो वैरोचकः पर्वतेश्वरभ्राता हतो नाशितः ।

कष्टमिति । कष्टम् दुःखम् अनर्थद्वयम् अनिष्टद्वयम् आपतितं सम्प्राप्तम् । असावेष चन्द्रगुप्तो मौर्यो न हतो न विनाशितः किन्तु वैरोचक–वर्व्वरकौ एतन्नामकौ द्वौ हतौ विनाशितौ दैवेनेति शेषः । सावेगं आवेगसहितमित्यर्थः । आत्मगतमव्यक्तं ब्रवीतीति शेषः । एतौ इमौ उभौ द्वौ 'रोचकवर्व्वरकाविति शेषः । न हतौ न विनाशितौ किन्तु दैवेन भाग्येन वयमेव हता विनाशिता इत्यर्थः । प्रकाशं सुस्पष्टं ब्रवीतीति शेषः । अथानन्तरम् सूत्रधारः शिल्पी दारुवर्मा तन्नामकः क कुत्र वर्त्तत इति शेषः (कथमिति पाठे) केन प्रकारेणास्तीत्यर्थः ।

वैरोचकेति–पुरोऽग्रे सरतीति पुरस्सरः वैरोचकः पुरस्सरोऽग्रगामी यस्य तथोक्तस्तेन वैरोचकपुरस्सरेण पर्वतेश्वरसोदराग्रगामिना पद्भ्यामङ्घ्रिभ्यामतति गच्छतीति पदातिः पदातिश्चासौ लोकश्चेति पदातिलोकस्तेन पदातिलोकेन चरणगेन लोष्ठेकेनेत्यर्थः। लोहंत्वेति लोष्ठघातं(करणे हनः इति सूत्रेण हन्तेर्णमुलि रूपम्)हतो विनाशितः।

दारुवर्म्माने यन्त्रतोरणके प्रहारसे अपना मरण समझकर यन्त्र चलाने के कारण लोहे की कीलको लेकर हस्तिनीपर चढे हुए ही बेचारे बैरोचक को मारा

राक्षसः—दुःखकीबात है । ये दोनों ही अनर्थ हुए । वह चन्द्रगुप्त नहीं मारागया, किन्तु वैरोचक–वर्वरक ये दोनों मारे गए । (वेगसे मनही मन) ये दोनों नही मारे गये, किन्तु भाग्य से हमलोग ही मारडालेगए । (जोरसे) अब वह दारुवर्म्मा नामका सूत्रधार कहां है ?

विराधगुप्तः—वैरोचक के पीछेचलने वाले लोगों ने पत्थरों से उसे मार दिया ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राक्षसः—(सास्रम्) कष्टम् ! अहो ! वत्सलेन सुहृदा दारुवर्म्मणा वियुक्ताः स्मः । अथ तत्रत्येन भिषजाऽभयदत्तेन किमनुष्ठितम् ?

विराधगुप्तः—अमात्य ! सर्व्वमनुष्ठितम् ।

राक्षसः—(सहर्षम्) किं हतो दुरात्मा चन्द्रगुप्तः ।

विराधगुप्तः—अमात्य ! दैवान्न हतः ।

राक्षसः—(सविषादम्) ततः किमिदानीं कथयसि परितुष्टः "सर्व्वमनुष्ठितम्" इति ?

विराधगुप्तः—अमात्य! कल्पितमनेन विषचूर्णमिश्रमौषधं चन्द्रगुप्ताय

सास्रमिति—अस्रेण नेत्रजलेन सहितं यथा तथा वदतीत्यर्थः । (क्रियाविशेषणम्) कष्टं दुःखम् सम्प्राप्तमिति शेषः । वत्सलेन प्रीतिमता सुहृदा मित्रेण दारुवर्मणा तन्नामकसूत्रधारेणेत्यर्थः । वियुक्ता विरहिताः स्मो भवामो वयमिति शेषः । अथानन्तरम् तत्रत्येन तद्ग्रामवास्तव्येन भिषजा वैद्येन अभयदत्तेन तन्नाम्ना किमनुष्ठितं किं कार्यं कृतमित्यर्थः ।

अमात्येति—हे अमात्य ! मन्त्रिन् , सर्वमनुष्ठितम् उक्तनाम्ना वैद्येन भवदुपदिष्टं सकलं कार्यं सम्पादितमित्यर्थः ।

सहर्षमिति—(इदं क्रियाविशेषणम्) हर्षेणानन्देन सहितं यथा तथा ब्रवीतीत्यर्थः । दुरात्मा दुःस्वभावः चन्द्रगुप्तो मौर्यः किं हतो नाशितः ।

अमात्येति । मन्त्रिन् । दैवात् भाग्यात् न हतो नाशितः ।

सविषादमिति । सविषादं सखेदं यथा तथेत्यर्थः (क्रियाविशेषणमिदम्) कथयतीति क्रियाऽध्याहारः । तत्तस्मात् इदानीं साम्प्रतं परितुष्टः सन्तुष्टः सन् त्वमिति शेषः । सर्वं कार्यं सम्पादितमिति किं कथयसि ब्रवीषि ।

अमात्येति । मन्त्रिन् ! अनेन वैद्येन विषचूर्णमिश्रं विषचूर्णेन संयुक्तं औषधं

राक्षसः—(रोता हुआ) बड़े कष्ट की बात है! अहो, हमलोग अपने प्रियमित्र दारुवर्म्मा से वियुक्त होगये । इसके बाद? वहां पर रहते हुए अभयदत्त वैद्यने क्या किया?

विराधगुप्तः—आमात्य ? सब कुछ किया ।

राक्षसः—(हर्षसे) दुरात्मा चन्द्रगुप्त मारागया क्या ?

विराधगुप्तः—अमात्य ! वह भाग्य बल से नहीं मारा जा सका ।

राक्षसः—(खेदसे) तब क्या अभी खुश होकर कहते हो कि सब किया ?

विराधगुप्तः—अमात्य ! इस अभयदत्तवैद्यने चन्द्रगुप्तके लिये विषचूर्ण मिली हुई

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तच्च प्रत्यक्षीकुर्व्वता चाणक्यहतकेन कनकभाजने वर्णान्तरमुपगतमुपलभ्याभिहितश्चन्द्रगुप्तः–"वृषल ! सविषमिदमौषधं, न पातव्यम्" इति ।

राक्षसः—शठः खल्वसौ वटुः । अथ स वैद्यः कथम् ?

विराधगुप्तः—स खलु वैद्यस्तदेवौषधं पायित उपरतश्च ।

राक्षसः—(सविषादम्) अहह ! महान् विज्ञानराशिरुपरतः । भद्र ! अथ तस्य शयनाधिकृतस्य प्रमोदकस्य किं वृत्तम् ?

भेषजं चन्द्रगुप्ताय मौर्याय कल्पितम् प्रयुक्तम् । तदौषधं प्रत्यक्षीकुर्वता परिशोधयता चाणक्यहतकेन विष्णुगुप्तदुष्टेन कनकभाजने स्वर्णपात्रे वर्णान्तरमन्यवर्णमुपलभ्य ज्ञात्वा वृषल ! मौर्य, इदं पुरःस्थितमौषधं भेषजं सविषं विषमिश्रितमतस्त्वया न पातव्यमिति चन्द्रगुप्तो वृषलोऽभिहित उक्तः ।

शठ इति । असौ अयम् वटुः ईषद्विज्ञः चाणक्य इति शेषः । खलु निश्चयेन शठः क्रूरः अस्तीति शेषः । अथाऽन्तरं स उक्तनामा वैद्यो भिषजः कथं केन प्रकारेणास्तीत्यर्थः ।

तदेवेति । स वैद्यः तदेव विषमिश्रितमेव औषधं भेषजं पायितः राज्ञेति शेषः । उपरतो मृतश्च ।

सविषादमिति । सखेदं यथा तथेत्यर्थः । अहह खेदसूचकमव्ययम् । महान् श्रेष्ठो विज्ञानराशिः चिकित्साविषयकज्ञानाऽऽकरः उपरतो मृतः अथानन्तरं शयने शय्यायामधिकृतस्य नियुक्तस्य शयनगृहसंस्कारादिना राजप्रलोभने नियुक्तस्येत्यर्थः । प्रमोदकस्य राक्षसप्रेषितगुप्तचरस्य किं वृत्तं वृत्तान्तमस्तीति शेषः ।

औषधि बनायी । औषधिकी परीक्षा करने के लिए चाणक्यने उसे सोने के पात्रमें रखा तो वह तुरन्त अन्यवर्ण सा हो गया । तब उस औषधिको देखकर उसने चन्द्रगुप्त से कहा—वृषल ! यह औषधि विष मिली हुई सी मालूम होती है । इस लिये इसे न पीना ।

राक्षसः—वह अल्प बुद्धि वाला चाणक्य बड़ा पाजी है । अब कहो कि वह वैद्य किस तरह है ?

विराधगुप्तः—वैद्य को वही औषधि पिलायी गयी और वह मर गया ।

राक्षसः—(खेदके साथ) अहह ! बड़ा भारी वैद्य मर गया । भद्र ! चन्द्रगुप्तके शयनगृहके अधिकारी उस प्रमोदक का क्या हाल है ?

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विराधगुप्तः—आत्मविनाशः ।

राक्षसः—(सोद्वेगम्) कथमिव ?

विराधगुप्तः—स खलु मूर्खस्तं युष्माभिरतिसृष्टं महान्तमर्थराशिम-वाप्य, महता व्ययेनोपभोक्तुमारब्धवान् । ततः "कुतोऽयं भूयान् धनागमस्तव" इति पृच्छ्यमानोऽयं यदा वाक्यभेदान्, बहूनकथयत् तदा चाणक्यहतकादेशाद् विचित्रेण वधेन व्यापादितः ।

राक्षसः—(सोद्वेगम्) कथमत्रापि वयमेवोपहता दैवेन ? अथ शयि-

आत्मेति—आत्मनः प्राणस्य विनाशो विघातो जात इति शेषः, अयमपि हतस्तेनेत्येवं वृत्तमस्तीत्यर्थः । (यदितरेषामिति) पाठेऽपि इतरेषामन्येषां वैरोचक-वर्बरकाऽभयदत्तानां यद्वृत्तमात्मविनाशरूपन्तदेवाऽस्य प्रमोदकस्याऽपिवृत्तमित्यर्थः। उभयविधपाठेऽप्यर्थस्यैक्यायुक्तमेव पाठद्वयम् ।

सोद्वेगमिति । ससम्भ्रमं यथा स्यात्तथेत्यर्थः । कथमिव केन प्रकारेण हत इत्यर्थः ।

स खल्विति । खलुशब्दोऽत्र वाक्यालङ्कारे मूर्खः ज्ञानशून्यः स प्रमोदको युष्माभिर्भवद्भिः अतिसृष्टं दत्तं महान्तं प्रचुरम् अर्थराशिं धनसमूहम् अवाप्य प्राप्य महता प्रभूतेन व्ययेन अर्थस्याऽपगमेन उपभोक्तुं निर्वेष्टुम् । 'निर्वेश उपभोगः स्यात्'इत्यमरः। आरब्धवान् । ततस्तदनन्तरं तव अयमेष धनागमः अर्थाऽधिगमः कुतः कस्मात् इति इत्येतद्वृत्तं पृच्छ्यमानः जिज्ञास्यमानः चाणक्येनेति शेषः । अयं प्रमोदकः, यदा बहून् अनेकान् वाक्यभेदान् अन्योऽन्यविरुद्धवचनानि अकथयत् अब्रवीत् तदा चाणक्यहतकादेशात् कुत्सितविष्णुगुप्तनिर्देशात् विचित्रेण अनेकविधेन विस्मयोत्पादकेनेति यावत् वधेन वधोपायेन व्यापादितो मारितः ।

सोद्वेगमिति । ससम्भ्रममित्यर्थः । अत्राऽपि प्रमोदकवधेऽपि दैवेन भाग्येन

विराधगुप्तः—आत्मविनाश ।

राक्षसः—(उद्वेगसे) सो किस तरह ?

विराधगुप्तः—वह प्रमोदक आप लोगों से दिया हुआ बहुत सा धन पाकर बहुत ज्यादा खर्च करने लगा । इसके बाद "कहां से यह बहुतसा धन तुम को मिला" पूछा गया। प्रमोदक ने जब बहुतसी इधर-उधर की बातें कही। तब दुष्ट चाणक्य की आज्ञा से अनेक कष्ट देकर बुरी तरह मारा गया ।

राक्षसः—(उद्वेगके साथ) क्या इस उद्योग में भी भाग्यसे हम सब ही मारे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तस्य चन्द्रगुप्तस्य शरीरे प्रहर्त्तुमस्मत्प्रयुक्तानां नरपतिशयनगृहस्याऽन्तःसुरङ्गायां निवसतां, वीभत्सकादीनां को वृत्तान्तः ?

विराधगुप्तः—अमात्य ! दारुणो वृत्तान्तः ।

राक्षसः—(सावेगम्) कथं दारुणो वृत्तान्तः न खलु विदिताः ते तत्र निवसन्तः चाणक्यहतकेन ?

विराधगुप्तः—अथ किम् ?

राक्षसः—कथमिव ?

विराधगुप्तः—प्राक् चन्द्रगुप्तप्रवेशात् , प्रविष्टमात्रेणैव शयनगृहे

वयमेव हता विनाशिताः निष्फलोद्योगाः कृता इति यावत् अथाऽनन्तरं शयितस्य निद्रितस्य चन्द्रगुप्तस्य मौर्यस्य वृषलस्य शरीरे काये प्रहर्त्तुम् शस्त्रप्रहारं कर्त्तुम् अस्मत्प्रयुक्तानामस्मत्प्रेषितानाम् नरपतिशयनगृहस्य राजशयनभवनस्य अन्तःसुरङ्गायाम् अभ्यन्तरवर्त्तिबिले निवसतां तिष्ठतां बीभत्सकादीनां वीभत्सकप्रभृतीनाम् को वृत्तान्तः किंवृत्तान्तमस्तीति शेषः ।

अमात्येति । मन्त्रिन् ! दारुणः कठिनः श्रवणात्क्लेशप्रद इत्यर्थः । वृत्तान्तः प्रवृत्तिरस्ति तेषामिति शेषः ।

सावेगमिति । सक्लेशं यथा स्यात्तथा कथयतीत्यर्थः । कथं कुतः दारुणः दुःखप्रदो वृत्तान्त उदन्तस्तेषामित्यर्थः । तथोक्तस्थाने निवसन्त्यः वासं कुर्वन्तस्ते बीभत्सकादयः चाणक्यहतकेन चाणक्यदुष्टेन च विदिताः खलु ज्ञाताः किमित्यर्थः। प्रश्नार्थकोऽत्र न खलुशब्दः ।

अथ किमिति । ते वीभत्सकादयश्चाणक्येन विदिता एवेत्यर्थः ।

कथमिवेति । कथं केन प्रकारेण तेन विदितास्ते तत्कथय ।

प्रागिति । चन्द्रगुप्तप्रवेशात् मौर्यसन्निवेशात्प्राक् पूर्वं प्रविष्टमात्रेणैव सन्नि-

---

गए । अच्छा, चन्द्रगुप्तके शरीर से प्रहार करने के लिये हमसे भेजे गए राजा के शयनगृहके भीतर सुरङ्ग में रहते हुए वीभत्सक आदियों का क्या हाल है ।

विराधगुप्तः—अमात्य ! बड़ा भयानक वृत्तान्त है ।

राक्षसः—(वेगसे) कैसा भयानक वह वृत्तान्त है वहां पर रहते हुए वे सब दुष्ट चाणक्य द्वारा पकड़े तो नहीं गए ?

विराधगुप्तः—और क्या ?

राक्षसः—किस तरह ?

विराधगुप्तः—चन्द्रगुप्तके प्रवेश से पहिले ही दुष्ट चाणक्य ने शयनगृह में जाकर

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चाणक्येन दुरात्मना समन्तादवलोकितः, ततस्तु एकस्माद् भित्तिच्छिद्राद्गृहीतभक्तावयवां निष्क्रामन्तीं पिपीलिकापङ्क्तिमवलोक्य, पुरुषगर्भमेतद्गृहमिति गृहीतार्थेन दाहितं तदन्तःशयनगृहम्। तस्मिंश्च दह्यमाने धूमावरुद्धदृष्टयः प्रथममपिहितनिर्गमनमार्गमनधिगम्य सर्व्वे एव वीभत्सकादयस्तत्रैव ज्वलनमुपगता उपरताश्च।

राक्षसः—(सास्रम्।) सखे! पश्य, चन्द्रगुप्तस्य दैवसम्पदा सर्वं एव उपरताः (सचिन्तम्) सखे! दैवसम्पदं पश्य दुरात्मनश्चन्द्रगुप्तहतकस्य!! कुतः ?—

वेशमात्रेणैव दुरात्मना दुष्टेन चाणक्येन विष्णुगुप्तेन समन्तात् सर्वतः शयनगृहे निद्राभवने अवलोकिते निरीक्षिते सति ततस्तदनन्तरमेकस्मात् कुतोऽपि भित्तिछिद्रात् कुड्यरन्ध्रात् गृहीताः प्राप्ताः भक्तस्याऽन्नस्याऽवयवाः कणा यया सा गृहीतभक्तावयवा तां कुतोऽपि आत्तान्नकणां निष्क्रामन्तीं निर्गच्छन्तीं पिपीलिकापंक्तिम् पिपीलिकाश्रेणीम् अवलोक्य दृष्ट्वा एतत् गृहं भवनं पुरुषो गर्भेऽभ्यन्तरे यस्य तत्पुरुषगर्भम् पुरुषयुक्तमित्यर्थः। अस्तीति शेषः। इत्यस्माद्धेतोः गृहीतः निश्चितः अर्थस्तात्पर्यं येन स गृहीतार्थस्तेन चाणक्येनेति शेषः। तत्पूर्वोक्तमन्तःशयनगृहमन्तर्निद्राभवनं दाहितं भस्मसात्कृतम्। तस्मिन् शयनगृहे दह्यमाने भस्मसात्कृते सति धूमेनाऽवरुद्धा दृष्टि श्चक्षुर्येषां ते धूमावरुद्धदृष्टयस्ते वीभत्सकादयः सर्वे एव प्रथमं पूर्वं यम् अपिहितनिर्गमनमार्गं निरुद्धवहिर्निस्सरणपथम् अनधिगम्य अप्राप्य तत्रैव शयनगृह एव ज्वलनं वह्निमुपगताः प्राप्ताः (सन्तः) उपरता मृताश्च।

सास्रमिति। सरोदनं यथा स्यात्तथा कथयतीत्यर्थः (इदं क्रियाविशेषणम्)। सखे, मित्र चन्द्रगुप्तस्य मौर्यस्य दैवसम्पदा भाग्यसम्पत्त्या सर्वे एव वैरोचकाद-

---

चारों तरफ देखा तब भात का टुकड़ा लेकर दीवार के छेद से निकलती हुई एक पिपीलिका पङ्क्ति को देख कर उसे सन्देह हुआ और कहा कि मालूम होता है कि इसके भीतर मनुष्य हैं। ऐसा समझ कर उसने उस शयनगृहको जला दिया। उस घरको जला देने पर धूम से नेत्रों के व्याप्त हो जाने के कारण वे सब बीभत्सकादि वहीं पर जलकर मर गए।

राक्षसः—(रोता हुआ) मित्र! देखो चन्द्रगुप्तकी दैवीसम्पत्ति से हमारे सब कार्यकर्ता मर गए (शोचते हुए) मित्र! उस अल्पबुद्धिवाले दुरात्मा चन्द्रगुप्त के भाग्य को तो देखोः—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कन्या तस्य वधाय या विषमयी गूढं प्रयुक्ता मया
दैवात् पर्व्वतकस्तया विनिहतो, यस्तस्य राज्यार्द्धभाक् ।
ये यन्त्रेषु रसेषु च प्रणिहितास्तैरेव ते घातिताः
मौर्यस्यैव फलन्ति, पश्य, विविधश्रेयांसि मे नीतयः ॥ १६ ॥

यो वीभत्सकादयश्चोपरता मृताः पश्यावलोकय । सचिन्तम् (इदमपि क्रियाविशेषणम्) सखेदं यथा स्यात्तथा पुनः कथयतीत्यर्थः । सखे ! दुरात्मनो दुष्टस्य चन्द्रगुप्तहतकस्य मौर्योऽधमस्य दैवसम्पदं भाग्यसम्पत्तिं पश्य अवलोकय ।

कन्येति । मया तस्य चन्द्रगुप्तस्य वधाय हननाय या विषमयी विषनिर्मिता कन्या गूढं गुप्तं यथा स्यात्तथा प्रयुक्ता प्रेषिता तया विषनिर्मितकन्यया दैवात् पूर्वप्रतिश्रुतार्द्धराज्यग्रहीता परिपणितादूर्धराज्याधिकारीति यावत् । स विनिहतो विनाशितः यन्त्रेषु प्राणविघातसाधनपदार्थेषु रसेषु विषेषु च 'शृङ्गारादौ विषे वीर्ये गुणे रागे समुज्ज्वले' इत्यमरोक्त्या रसशब्दोऽत्र विषवाचकः । ये दारुवर्मादयः प्रणिहिताः प्रेषितास्ते तैरेव यन्त्रैर्विषैरेव च घातिता नाशिता ये मम नीतयः शत्रुविनाशोपाया मौर्यस्यैव चन्द्रगुप्तस्यैव विविधानि च तानि श्रेयांसि चेति विविधश्रेयांसि बहुविधकल्याणानि फलन्ति समुत्पादयन्तीति त्वं पश्य । विषकन्याप्रेषणात्मकनीतिप्रयोगेण मामकीनेन मौर्यवधाजननात्फलाऽप्राप्त्या किन्तु तस्यैव कल्याणसम्पादनान्निजेष्टाऽनुत्पत्त्या च पद्येऽस्मिन् विषमाऽलङ्कारः । उक्तञ्च लक्षणं तस्य दर्पणे यथा—

गुणौ क्रिये वा चेत्स्यातां विरुद्धे हेतुकार्ययोः ।
यद्वाऽरब्धस्य वैफल्यमनर्थस्य च सम्भवः । विरूपयोः संघटना या च तद्विषमं मतम् ॥

इति । राज्यार्द्धभाक्विविधश्रेयांसीति पदद्वयव्यतिरिक्तपदानामसमस्तत्वादत्र वैदर्भी रीतिः । माधुर्यगुणः । उक्तञ्चतल्लक्षणं दर्पणे—

चित्तद्रवीभावमयो ह्लादो माधुर्य्यमुच्यते ।
सम्भोगे करुणे विप्रलम्भे शान्तेऽधिकं क्रमात् ॥

इति । शार्दूलविक्रीडितं छन्दः ॥ १६ ॥

उस चन्द्रगुप्त को मारने के लिये मैंने जो विषकन्या गुप्तभाव से भेजी थी, उस विषकन्याके द्वारा भाग्यवश पर्वतक स्वयं मारा गया, जो पर्वतक चन्द्रगुप्त के आधे राज्य का अधिकारी था । जो गुप्तचर यन्त्रप्रयोग और विष प्रयोग के लिये भेजे गए, उन्हीं प्रयोगों से वे बेचारे खुद मारे गये । मेरी नीतियां भी उस मौर्य्यही के अनेक कल्याण साधन करती हैं ॥ १६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विराधगुप्तः—अमात्य ! तथापि प्रारब्धमपरित्याज्यमेव । पश्य तु—

प्रारभ्यते न खलु विघ्नभयेन नीचैः,
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः,
प्रारब्धमुत्तमगुणास्त्वमिवोद्वहन्ति ॥ १७ ॥

अमात्येति । मन्त्रिन् ! तथापि नीतिवैफल्येऽपि प्रारब्धं प्रक्रान्तं प्रस्तुतमिति यावत् । कार्यम् अपरित्याज्यमेव परित्यागयोग्यं नेत्यर्थः निपातनादत्र कृत्वाभावः) तदेव दर्शयति पश्येति अवलोकयेत्यर्थः ।

प्रारभ्य इति । न्यञ्चन्तीति नीचास्तै नीचैः क्षुद्रैरल्पबुद्धिभिरिति यावत् । जनैः विघ्नस्य भयं विघ्नभयं विघ्नभयेन प्रत्यूहभीत्या न खलु प्रारम्यते नैव कार्यं प्रस्तूयते, मध्या मध्यमा जनाः प्रारभ्य कार्यं प्रस्तुत्य विघ्नविहताः अन्तरायप्रतिरुद्धवेगाः सन्तः विरमन्ति निवर्तन्ते कार्यादिति शेषः । प्रस्तुतं कार्यं न कुर्वन्तीत्यर्थः । (व्याङ्परिभ्यो रम इति परस्मैपदम्) । उत्तमा उत्कृष्टा गुणाः दयादाक्षिण्यादयो येषान्ते उत्तमगुणा उत्कृष्टगुणवन्तो महान्त इत्यर्थः । त्वमिव विघ्नैः प्रत्यूहैः पुनः पुनः भूयो भूयः प्रतिहन्यमाना अवरुध्यमानाः सन्तः प्रारब्धं प्रस्तुतं कार्यम् उद्वहन्ति सम्पादयन्ति । त्वमित्युपमानवाचकपदस्योत्तमगुणा इत्युपमेयवाचकपदस्यौपम्यवाचकेवशब्दस्योत्कृष्टगुणवत्वरूपोपमानोपमेयगतसाधारणधर्मस्य च सत्वादत्र पूर्णोपमालङ्कारः । तदुक्तं दर्पणे—

सा पूर्णा यदि सामान्यधर्म औपम्यवाचि च ।
उपमेयं चोपमानं भवेद्वाच्यमिति ॥

किञ्च उत्तमगुणा इव नीचा मध्याश्च कार्यं न कुर्वन्तीत्यर्थप्रतीतावुपमानभूतोत्तमगुणवदपेक्षयोपमेययोर्नीच-मध्ययोर्न्यूनत्वप्रतिपादनाद्व्यतिरेकाऽलङ्कारश्च ।

आधिक्यमुपमेयस्योपमानान्न्यूनताऽथवा । व्यतिरेकः

इत्यादि दर्पणोक्तलक्षणात् । अत्रैव श्लोके चतुर्थचरणे प्रारब्धमुत्तमगुणा न परि-

---

विराधगुप्तः—अमात्य ! तो भी प्रारम्भ किया हुआ कार्य त्यागने योग्य नहीं है। देखो-अल्पबुद्धि वाले मनुष्य, विघ्न के भय से कार्य आरम्भ नहीं करते मध्यम बुद्धि के मनुष्य, कार्य का आरम्भ कर विघ्न बाधा आने पर कार्य को छोड़ बैठते हैं, आप की तरह उत्तम गुणवाले मनुष्य,बारम्बार विघ्नों से रोके जाने पर भी आरम्भ किया हुआ कार्य को नहीं छोड़ते हं ॥ १७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अपि च—किं शेषस्य भरव्यथा न वपुषि ? क्ष्मां न क्षिपत्येष यत्,
किं वा नास्ति परिश्रमो दिनपतेः ? आस्ते न यन्निश्चलः ।
किं त्वङ्गीकृतमुत्सृजन् कृपणवत् श्लाध्यो जनो लज्जते,
निर्व्वाहः प्रतिपन्नवस्तुषु सतामेतद्धि गोत्रव्रतम् ॥ १८ ॥

त्यजन्तीति पाठे उत्कृष्टगुणवन्तः प्रस्तुतकार्यं न परित्यजन्ति इत्यप्रस्तुतार्थेनत्वया-पि प्रस्तुतं कार्यं न परित्याज्यमिति प्रस्तुतार्थव्यञ्जनादप्रस्तुतप्रशंसाऽलङ्कारः ।

अप्रस्तुतात्प्रस्तुतञ्चेद्गम्यते पञ्चधा ततः । अप्रस्तुतप्रशंसा स्यात् ''

इति दर्पणोक्तलक्षणात् । वैदर्भी रीतिः । प्रसादो गुणः । वसन्ततिलकं वृत्तम् ॥ १७ ॥

किं शेषस्येति । शेषस्य सर्पराजस्य वपुषि शरीरे भरव्यथा वसुधाधार-गोत्पन्नदुःखं किं न भवति, अपि तु भवत्येव, तथापि एष शेषः क्ष्मां पृथ्वीं न क्षिपति परित्यजति इति यत् । दिनपतेः सूर्यस्य परिश्रमः अहोरात्रभ्रमणोत्पन्न-क्लेशो वा किं नास्ति अपि तु अस्त्येव तथापि निश्चलः स्थिरः न आस्ते न तिष्ठति इति यत् । किन्तु श्लाध्यः प्रशंसनीयचरितो जनः कृपणेन तुल्यं कृपणवत् नीच इव अङ्गीकृतं कार्यम् उत्सृजन् परित्यजन् किं न लज्जते न त्रपते अपि तु लज्जत इव इति यत् । यतः प्रतिपन्नवस्तुषु स्वीकृतविषयेषु निर्वाहः यथावत्स्वीकृतप्रति-पालनम् एतत् सतां महतां कुलव्रतम् कुलाचारः । भूधारणजन्यक्लेशसत्त्वेऽपि क्ष्माऽपरित्यागी शेष इव अनवरतगमनजन्यदुःखसत्त्वेऽपि अस्थिरो दिनपतिरिव अङ्गीकृतप्रतिपालकः श्लाध्य इव कार्यसाधकाऽनेकाप्तजनविनाशेऽपि त्वमपि स्वीकृतं परिपालयेति भावः ।

सतामेतद्धि गोत्रव्रतमिति सामान्येन किं शेषस्येत्यादि प्रतिपाद्यविशेषार्थस्य समर्थनादत्र श्लोकेऽर्थान्तरन्यासः । स च अङ्गीकृतक्ष्माधारी शेष इव अनवरत-गमनशीलो दिनपतिरिवेत्यर्थे गम्यमाने पूर्वार्द्धगतप्रतिवस्तूपमया कृपणवदित्यत्र तुल्यार्थकवतिप्रत्ययस्य सत्त्वेन नीच इवेत्यर्थे उत्तरार्द्धगतोपमया च सङ्कीर्णः । अत्राऽपि वैदर्भी रीतिः । प्रसादश्च गुणः । शार्दूलविक्रीडितं छन्दः ॥ १८ ॥

और भी—

सर्पराज के शरीर में पृथ्वी धारण करने की पीडा नहीं होती है क्या ? होतीही है तो भी वे पृथ्वी को नहीं फेंकते । सूर्यभगवान् को चक्कर लगाने में परिश्रम नहीं होता है क्या ? होता ही है तो भी वे स्थिर नहीं होते । महान् पुरुष क्षुद्रों की तरह स्वीकृत कार्यको छोडनेमें लज्जित होते हैं । क्योंकि स्वीकृत कार्यका यथावत् पालन करना ही सज्जनों का कुल धर्म है ॥ १८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राक्षसः—सखे ! प्रारब्धमपरित्याज्यमिति प्रत्यक्षमेवैतद्भवताम् । ततस्ततः ?

विराधगुप्तः—ततः प्रभृति चाणक्यहतकश्चन्द्रगुप्तस्य शरीरे सहस्रगुणमप्रमत्तः, एभ्य एव ईदृशं भवतीत्यन्विष्य निगृहीतवान् कुसुमपुरनिवासिनो युष्मदीयानाप्तपुरुषान् ।

राक्षसः—(सोद्वेगम्) वयस्य ! कथय कथय के के निगृहीताः ?

विराधगुप्तः—अमात्य ! आदावेव तावत् क्षपणको जीवसिद्धिः सनिकारं नगरान्निर्वासितः ।

सख इति । हे मित्र ! प्रारब्धं प्रस्तुतं कार्यम् अपरित्याज्यम् परित्यागाऽयोग्यम् इत्येतद्भवतां युष्माकं प्रत्यक्षमेव समक्षमेव । ततस्ततः तदनन्तरं किं जातं तत्कथयेत्यर्थः ।

तत इति । ततः प्रभृति तस्माद्दिवसादारभ्य चन्द्रगुप्तस्य मौर्यस्य शरीरे विग्रहे तद्रक्षणे इत्यर्थः । सहस्रम् अधिका गुणा यस्मिन् कर्मणि तत्सहस्रगुणम् (क्रियाविशेषणमिदम्) सहस्रगुणं यथा स्यात्तथा चाणक्यहतकः दुरात्मा विष्णुगुप्तः अप्रमत्तः सावधानः सन् एभ्य एव कुसुमपुरवासिराक्षसाप्तजनेभ्य एव ईदृशम् विषकन्यादिप्रयोगरूपम् अनिष्टं भवति जायते इत्यस्माद्धेतोः अन्विष्य संमृग्य कुसुमपुरवासिनः कुसुमपुरवास्तव्यान् तदानीं तत्र विद्यमानानित्यर्थः । युष्माकमिमे युष्मदीयास्तान् युष्मदीयान् आप्तपुरुषान् विश्वासिनो लोकान् निगृहीततान् आयत्तीकृतवान् ।

सोद्वेगमिति । सत्रासं यथा स्यात्तथा कथयतीत्यर्थः । वयस्य मित्र ! कथय कथय (वीप्सायां द्विरुक्तिः) ब्रूहि के के किंनामका मदीयाप्तजना निगृहीता दण्डिताः ।

अमात्येति । मन्त्रिन् ! आदौ पूर्वमेव तावच्छब्दो वाक्याऽलङ्कारे । जीवसि-

---

राक्षसः—मित्र ! आरम्भ किया कार्य त्याज्य नहीं है यह आप के सामने ही है । तब क्या भया ?

विराधगुप्तः—उसी दिन से चन्द्रगुप्तके शरीर को रक्षा के लिये विशेष रूप से सावधान रहते हुए उस अल्प बुद्धि वाले चाणक्य ने'इनहीं सबों से ऐसा होता है'यह निश्चय करके कुसुमपुरमें रहने वाले आपके गुप्तदूतोंको खोज खोज कर पकड़ लिया ।

राक्षसः—(उद्वेगसे) मित्र ! कहो कहो !! कौन कौन पकड़े गये ?

विराधगुप्तः—अमात्य ! सबसे पहले जीवसिद्धि नामक क्षपणक अनादर के साथ नगर से भगा दिया गया ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राक्षसः—(आत्मगतम्) एतावत् सह्यं, न निष्परिग्रहं स्थानपरिभ्रंशः पीडयिष्यति (प्रकाशम्) सखे ! कमपराधमुद्दिश्य निर्वासित एषः ?

विराधगुप्तः—एष दुरात्मा राक्षसप्रयुक्तया विषकन्यया पर्वतेश्वरं घातितवानिति ।

राक्षसः—(स्वगतम्) साधु कौटिल्य ! साधु ।

स्वस्मिन् परिहृतमयशः पातितमस्मासु घातितोऽर्द्धराज्यहरः ।

द्धिस्तन्नामकः क्षपणको बौद्धसन्न्यासिचिह्नधारी सनिकारं सतिरस्कारं यथा तथा नगरात्पुरो निर्वासितो निष्कासितः ।

आत्मगतमिति । स्वगतम् अव्यक्तं तथा तथा वदतीत्यर्थः । एतावत् जीवसिद्धिनिष्कासनम् सह्यम् सहनयोग्यम्, निर्नास्ति परिग्रहो विषयासक्तिर्यस्य तन्निष्परिग्रहं विषयासक्तिशून्यं स्थानभ्रंशः वासस्थानपरित्यागः न पीडयिष्यति न व्यथा करिष्यति । प्रकाशं सुस्पष्टम्, सखे मित्र ! कम् किमभिधेयम् दोषम् उद्दिश्य निश्चित्य प्रख्याप्येत्यर्थः । एष क्षपणको निर्वासितो निष्कासितः ।

एष इति । एषः असौ दुरात्मा दुष्टो जीवसिद्धिः विषकन्यया विषनिर्मितकन्यया पर्वतेश्वरं तन्नामकराजानं घातितवान् विनाशितवान् ।

स्वगतमिति । अस्पष्टं वदतीत्यर्थः । भो कौटिल्य विष्णुगुप्त ! साधु साधु त्वया सम्यक् कृतमित्यर्थः ।

स्वस्मिन्निति । स्वस्मिन् आत्मनि अयशोऽकीर्त्तिः पर्वतेश्वरवधोद्भूतमित्यर्थः परिहृतम् दूरीकृतम् जीवसिद्धिनिष्कासनादात्मनोऽपवादं दूरीकृतमिति भावः, तत् अयशः जीवसिद्धिना राक्षसप्रेरणया पर्वतेश्वरो हत इत्येतद्रूपम् अस्मासु मयि पातितं स्थापितम्, तथा अर्द्धराज्यहरः प्रतिश्रुतार्द्धराज्याऽधिकारी घातितो

राक्षसः—(मनही मन) जीव सिद्धिका निष्कासन मात्र सहने योग्य है । विषयानुरागशून्य को स्थान का परित्याग दुःख नहीं देता (जोरसे) मित्र? किस अपराध में यह निकाला गया ।

विराधगुप्तः—इस दुरात्मा जीवसिद्धि ने राक्षस के द्वारा भेजी हुई विष कन्या द्वारा राजा पर्वतेश्वर को मारा था यह कहकर)

राक्षसः—(मनहीं मन) साधु कौटिल्य ? साधु ।

राजा पर्वतेश्वर के वधसे उत्पन्न अपयश को तुमने अपने में नहीं रहने दिया, बल्कि उसी अपयश को हमी लोगों के मत्थे मढ दिया, और आधा राज्य लेने

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एकमपि नीतिबीजं बहुफलतामेति यस्य तव ॥ १९ ॥

(प्रकाशम्) ततस्ततः ?

विराधगुप्तः—ततश्चन्द्रगुप्तशरीरमभिद्रोग्धुमनेन व्यापारिता दारुवर्मादय इति नगरे प्रख्याप्य शकटदासः शूलमारोपितः ।

राक्षसः—(सास्रम्) हा सखे ! शकटदास ! अयुक्तस्तवायमीदृशो मृत्युः !! अथवा, स्वाम्यर्थमुपरतो न शोच्यस्त्वमसि; वयमेवात्र

विनाशितः त्वयेति शेषः । यस्य तव एकमपि अद्वितीयमपि नीतिबीजं जीवसिद्धि निष्कासनात्मको नीतिहेतुः बहूनि अनेकानि फलानि यस्य स बहुफलस्तस्य भावो बहुफलता तां बहुफलताम् एति प्राप्नोति नीतिबीजस्यानेकफलोत्पादकत्वे हेतुभूतस्य परिहृतमयश इत्यादेः पदार्थत्वेनाभिधानादस्मिन्पद्ये काव्यलिङ्गमलङ्कारः । उक्तञ्च दर्पणे तल्लक्षणं यथा—

हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम् । इति ।

अत्रापि वैदर्भी रीतिः । प्रसादश्च गुणः । आर्य्यावृत्तम् ॥ १९ ॥

प्रकाशं ततस्ततः । तदनन्तरं किं वृत्तान्तं तत् कथयेति राक्षस एव सुस्पष्टं ब्रवीतीत्यर्थः ।

ततश्चन्द्रगुप्तेति । ततस्तदनन्तरम् अनेन शकटदासेन चन्द्रगुप्तशरीरं मौर्यकायम् अभिद्रोग्धुम् अभिजिघांसितुं दारुवर्मादयो दारुवर्मप्रभृतयो व्यापारिता नियोजिता इति इत्येतद्वृत्तं नगरे पत्तने प्रख्याप्य उद्घोष्य शकटदासस्तन्नामको राक्षससुहृत् शूलं लौहदण्डमारोपितः स्थापितः ।

हा सखे इति । हा कष्टं, हे सखे ! हे मित्र, शकटदास ! तव अयम् एष ईदृशः एतद्विधो मृत्युर्मरणम् अयुक्तोऽयोग्यः । अथवा स्वामी प्रभुः आर्यः

वाला पर्वतेश्वर को मार डाला । इससे एकही जीवसिद्धि निष्कासन रूप नीति बहुत कार्यों का साधक हो गया ॥ १९ ॥

राक्षसः—(जोर से) तब क्या हुआ ?

विराधगुप्तः—इसके बाद शकटदास ने दारुवर्मा आदि दूतों को चन्द्रगुप्त को मारने के लिये भेजा था इस बात को नगर में फैलाकर शकटदास को शूली पर चढ़ा दिया ।

राक्षसः—बड़े कष्टकी बात है, मित्र शकटदास ! तुम्हारा इस तरह मरण होना उचित नहीं है अथवा तुम स्वामी के लिये मरे हो इसलिये सोचने योग्य नहीं हो ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शोच्याः,—ये नन्दकुलविनाशेऽपि जीवितुमिच्छामः ।

विराधगुप्तः—अमात्य ! स्वाम्यर्थ एव साधयितव्यः इति प्रयतसे ।

राक्षसः—सखे !—

अस्माभिरमुमेवार्थमालम्ब्य न जिजीविषाम् ।
परलोकगतो देवः कृतघ्नैर्नानुगम्यते ॥ २० ॥

कारणं यस्मिन्तद्यथा तथा उपरतो मृतः अतस्त्वं न शोच्यः शोचितुं योग्योऽसि अत्रा स्मिन्विषये वयमेव शोच्याः शोकयोग्याः स्मः, ये वयं नन्दकुलविनाशेऽपि नन्द-वंशक्षयेऽपि (भावे सप्तमी) जीवितुं प्राणितुम् इच्छामः अभिलषामः ।

अमात्येति । मन्त्रिन् स्वामिनोऽर्थः स्वाम्यर्थः प्रभुकार्यमित्यर्थः । साध-यितव्यः सम्पादयितव्य इत्यस्माद्धेतोः प्रयतसे चेष्टसे ।

अस्माभिरिति । कृतं घ्नन्तीति कृतघ्नास्तैः कृतघ्नैः कृतोपकाराऽनभिज्ञैः अस्माभिः अमुमुक्तरूपम् अर्थम् प्रयोजनं स्वामिकार्यमेवेत्यर्थः । आलम्ब्य न जिजी-विषाम् जीवनेच्छामाश्रित्येत्यर्थः । परलोकं गतः परलोकगतः लोकान्तरप्राप्तो देवो राजा नन्द इत्यर्थः । नानुगम्यते नानुम्रियते । परलोकवासिनः प्रभोरनुगमनमकृत्वा शत्रुविनाशरूपकार्यसम्पादनार्थमेव मम स्थितिर्न जीवनेच्छयेत्यर्थः । परलोकगत-देवस्यानुगमने हेतुभूतस्य कृतघ्नत्वस्य स्वामिकार्यसाधनस्य च पदार्थत्वेनाऽभि-धानात्काव्यलिङ्गमलङ्कारः । अप्रश्नपूर्वकोक्तस्वामिकार्यसम्पादनात्मकवस्तुनः पर-लोकगतदेवानुगमननिराकरणात्परिसंख्यालंकारो वा ।

प्रश्नादप्रश्नतो वाऽपि कथिताद्वस्तुनो भवेत् ।
तादृगन्यव्यपोहश्चेच्छाब्द आर्थोऽथ वा भवेत् ॥ परिसंख्या,,

इत्युक्तलक्षणात् उभयालंकारसमावेशात्संसृष्टिनामालंकारः । रीतिरत्र वैदर्भी । माधुर्य्यंश्च गुणः । करुणारसः । अनुष्टुप् छन्दः ॥ २० ॥

किन्तु इस विषय में हम लोग ही सोचने योग्य हैं जो नन्द कुल का नाश हो जाने पर भी जीने की इच्छा करते हैं ।

विराधगुप्तः—स्वामी कार्य साधना आवश्यक है इसी से तो आप उद्योग कर रहे हैं ।

राक्षसः—सखे !—

स्वामी के किये हुए उपकारोंको नहीं जानने वाले हमलोगों ने स्वामीका कार्य करने के लिये ही तो परलोक को गये हुए राजा (नन्द) का अनुगमन नहीं किया । जीने के लिए नहीं ॥ २० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विराधगुप्तः—अमात्य ! नैतदेवम् (अस्माकममुमेवार्थमित्यादि पुनः पठति) ।

राक्षसः—सखे ! कथ्यतामपरस्यापि सुहृद्व्यसनस्य श्रवणे सज्जोऽस्मि ।

विराधगुप्तः—तत एतदुपलभ्य, चन्दनदासेनोपारूढसाध्वसेनापवाहितममात्यकलत्रम् ।

राक्षसः—सखे ! क्रूरस्य चाणक्यवटोर्विरुद्धमयुक्तमनुष्ठितं चन्दनदासेन ?

विराधगुप्तः—अमात्य ! ननु अयुक्ततरः सुहृद्द्रोहः ।

राक्षसः—ततस्ततः ?

विराधगुप्तः—ततो याच्यमानेनापि यदा न समर्पितमनेनाऽमात्य-

अमात्येति । मन्त्रिन् ! एतत् अमुमेवार्थमित्यादि भवदुक्तं वाक्यं नैतत् न एतदर्थकं किन्त्वन्यार्थकमेवेत्यर्थः । अतस्तदेव पद्यमन्यार्थपरत्वेन पुनः पठति । अस्माभिरित्यादि । उपकारशालिस्वामिप्रयोजनमसम्पाद्यानुगमनशीला जना कृतघ्ना उच्यन्ते भवान् तु तत्कार्यसम्पादनार्थं तिष्ठतीति न कृतघ्नपदवाच्य इति तदर्थः ।

कथ्यतामिति । हे सखे ! मित्र, अपरस्यापि सुहृद्व्यसनस्य मित्रदुःखस्य श्रवणे आकर्णने सज्जोऽस्मि तत्परोऽस्मि त्वया कथ्यतामभिधीयताम् ।

तत इति । तदनन्तरं शकटदासस्य शूलारोपणानन्तरमित्यर्थः । एतदुपलभ्य इदं ज्ञात्वा उपारूढं समुत्पन्नं साध्वसं भयं यस्य स उपारूढसाध्वसस्तेन समुत्पन्नभयेनेत्यर्थः । चन्दनदासेन राक्षससुहृदा अमात्यकलत्रं राक्षसगृहजनः अपवाहितं स्थानान्तरं प्रापितम् ।

विराधगुप्तः—अमात्य ! यह बात नहीं है । ('अस्माकम्०' श्लोकको फिर पढ़ता है)

राक्षसः—मित्र ! कहो, मैं दूसरे मित्रों का भी दुःख सुनने को तैयार हूं ।

विराधगुप्तः—तब यह जानकर डरा हुआ चन्दनदास ने अमात्य (राक्षस) के कुटुम्ब को दूसरे स्थान में ले गया ।

राक्षसः—मित्र ! चन्दनदासने दुष्ट चाणक्यके विरुद्ध कार्य किया ।

विराधगुप्तः—अमात्य ! मित्रका द्रोह उचित नहीं है ।

राक्षसः—तब क्या हुआ ?

विराधगुप्तः—मांगनेपर भी चन्दनदास ने अमात्य के कुटुम्बको जब नहीं दिया,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कलत्रं, ततः कुपितेन चाणक्यवटुना—।

राक्षसः—(सोद्वेगं) स खलु व्यापादितः ?

विराधगुप्तः——अमात्य! न खलु व्यापादितः,—किन्तु गृहीतगृहसारः सपुत्रकलत्रः संयम्य वन्धनागारे निक्षिप्तः ।

राक्षसः—ततः किं परितुष्टः कथयसि—"अपवाहितमनेन राक्षसकलत्रम्" इति ? ननु वक्तव्यं "संयतः सकलत्रो राक्षसः" इति ।

(प्रविश्य पटाक्षेपेण पुरुषः) जअदु अज्जो । अज्ज ! एसो क्खु सअडदासो पडिहारभूमिमुवत्थिदो [जयत्वार्यः आर्य ! एष खलु शकटदासः प्रतिहारभूमिमुपस्थितः ।

अमात्यति । मन्त्रिन् ! न खलु व्यापादितः हतः किन्तु गृहीतगृहसारः आदत्तगृहस्थितसकलधनः सपुत्रकलत्रः स्त्रीपुत्रसहितः चन्दनदासः संयम्य बद्ध्वा वन्धनागारे कारागृहे निक्षिप्तःस्थापितः ।

तत इति । तदा परितुष्टः सन्तुष्टः सन् किं कथयसि ब्रवीषि त्वमिति शेषः, अनेन चन्दनदासेन राक्षसकलत्रम् अपवाहितं स्थानान्तरं प्रापितमिति, किन्तु सकलत्रः स्त्रीसहितो राक्षसोऽमात्यः संयतः सम्बद्ध इत्येव वक्तव्यम् । आवयोर्मित्रयोश्चित्तैक्यात् सपुत्रकलत्रस्य बन्धनेनैव सकलत्रोहं बद्धोऽस्मीत्यर्थः ।

प्रविश्य पटाक्षेपणेति । पटस्य तिरस्करिण्या अक्षेपेण क्षेपणमन्तरेण अनपसारणेनेत्यर्थः पटापसारमकृत्वैवेति यावत् । पुरुषः प्रविश्य रङ्गस्थानाभ्यन्तरमागत्य ब्रवीति ।

जयत्वार्य इति । आर्यो भवान् जयतु सर्वोत्कर्षेण वर्तताम् । आर्य श्रीमन् ! एष, असौ शकटदासः तन्नामा कायस्थो भवत्सुहृत् प्रतिहारभूमिं द्वारदेशम् उपस्थित आगतः ।

तब उस क्रोधी चाणक्य ने—

राक्षसः—(उद्वेग से) । वह मारा गया क्या ?

विराधगुप्तः—मारा नहीं गया किन्तु उसका सब धन लेकर और कुटुम्ब के साथ उसको बांधकर जेल में बन्द कर दिया ।

राक्षसः—तब क्या खुश होकर कहते हो कि इसने अमात्यके कुटुम्ब को दूसरे स्थान में रख दिया, कहना चाहिये कि सकुटुम्ब राक्षस बांध लिया गया ।

(जवनिका हटाते हुए एक पुरुष का प्रवेश) आपकी जय हो । आर्य ! यह शकटदास दरवाजे पर उपस्थित हैं ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राक्षसः—प्रियंवदक ! अपि सत्यम् ?

प्रियंवदकः—किं अलिअं अमच्चपादेसु विणिवेदेमि [किमलीकममात्यपादेषु विनिवेदयामि]

राक्षसः—सखे ! विराधगुप्त ! कथमेतत् ।

विराधगुप्तः—अमात्य ! स्यादेतदेवं यतो भव्यं रक्षति भवितव्यता ।

राक्षसः—प्रियंवदक ! यद्येवं तत् किं चिरयसि ? क्षिप्रं प्रवेशय तम् ।

प्रियंवदकः—जं अमच्चो आणवेदि त्ति [यदमात्य आज्ञापयति इति] (निष्क्रान्तः)

(ततः प्रविशति सिद्धार्थकेनानुगम्यमानः शकटदासः)

शकटदासः—(दृष्ट्वा आत्मगतम्)—

दृष्ट्वा मौर्य्यमिव प्रतिष्ठितपदं शूलं धरित्र्यास्तले

किमिति । अमात्यपादेषु भवच्चरणसमीपेषु किम् अलीकं मिथ्या विनिवेदयामि, कथयामि । नैवाऽसत्यं वक्तुं शक्नोमीत्यर्थः ।

आत्मत्येति । मन्त्रिन् ! एतत् शकटदासस्याऽत्रागमनम् एवं सत्यं स्याद्भवेत् , यतः यस्मात् भव्यमस्यास्तीति भव्यः (अर्शादित्वादच्) तं भव्यं कल्याणिनं भवितव्यता भाग्यं रक्षति पालयति ।

यद्येवमिति । यदि एवम् शकटदासागमनं सत्यं तत् तदा किं किमर्थं चिरयसि विलम्बसे । क्षिप्रं शीघ्रं तं शकटदासकायस्थं प्रवेशय आनय ।

दृष्ट्वेति । धरित्र्यास्तले भूमौ मौर्यमिव चन्द्रगुप्तमिव प्रतिष्ठितं पदं यस्य

राक्षसः—प्रियंवदक ! क्या यह बात ठीक है ?

प्रियंवदकः—आपके निकट क्या मैं झूठी बात निवेदन करता हूं ।

राक्षसः—सखे ! विराधगुप्त । यह कैसे हुआ ।

विराधगुप्तः—अमात्य ! शकटदासका यहां आना सत्य ही है, क्यों कि भाग्य, भाग्यवान् की रक्षा करता ही है ।

राक्षसः—प्रियंवदक ! यदि यह सत्य है तो क्यों देर करते हो ? उसको शीघ्र ले आओ ।

प्रियंवदकः—आपकी जो आज्ञा (चला गया)। उसके बाद (सिद्धार्थक के साथ शकटदास प्रवेश करता है) ।

शकटदास—(देख कर मनहीं मन)—

प्रतिष्ठितपद वाले मौर्य्य की तरह पृथ्वी में अच्छी तरह गाड़े हुए शूलको देख-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तल्लक्ष्मीमिव चेतसः प्रमथिनी मुन्मुच्य वध्यस्रजम् ।
श्रुत्वा स्वाम्युपरोधरौद्रविषमानाध्माततूर्य्यस्वनान्
न ध्वस्तं प्रथमाभिघातकठिनं मन्ये मदीयं मनः ॥ २१ ॥
(नाट्येनावलोक्य सहर्षम्) अयममात्यराक्षसस्तिष्ठति । य एषः,—
अक्षीणभक्तिः क्षीणेऽपि नन्दे स्वाम्यर्थमुद्वहन् ।

स प्रतिष्ठितपदस्तं प्रतिष्ठितपदं प्राप्तप्रतिष्ठं दृढस्थापितमूलञ्च शूलं मारणार्थलौहदण्डं दृष्ट्वा अवलोक्य । तल्लक्ष्मीमिव चन्द्रगुप्तश्रियमिव चेतःप्रमथिनीं हृदयविदारिणीं बध्यस्रजं वध्यचिह्नभूतां रक्तकुसुममालाम् उन्मुच्य परिधाय स्वामिनः प्रभोः उपरोधेन हिंसनेन रौद्राः घोराः विषमा अश्राव्या इति स्वाम्युपरोधरौद्रविषमास्तान् तथोक्तान् आध्माततूर्यस्वनान् ताडितडिण्डिमशब्दान् श्रुत्वा आकर्ण्य मदीयं मनश्चित्तं प्रथमाऽभिघातकठिनं प्राक्ताडनेन कठिनं दृढं न ध्वस्तं न विशीर्णम्, इत्यहं मन्ये जाने । मनसोऽध्वंसने प्रथमाभिघातकठिनमिति हेत्वभिधानात् काव्यलिङ्गालङ्काराऽनुप्राणितमन्येशब्दप्रयोगनिबन्धनोत्प्रेक्षालङ्कारः, स च मौर्य–शूलयोः लक्ष्मी–वध्यस्रजोश्चोपमानोपमेयभावेन प्रतिष्ठितपदमिति श्लिष्टपदोत्थापितत्वेन च श्लेषानुप्राणितोपमालङ्कारेण संसृष्टः । शूलवध्यस्रग्रूपोपमानाभ्यां मौर्य–लक्ष्म्योःसाम्यप्रतिपादनं शकटदासस्यासूयातिशयद्योतकमित्यलङ्कारेण वस्तुध्वनिः । शार्दूलछन्दः २१

नाट्येनेति । नटस्येदं नाट्यं तेन नाट्येन नटोचितव्यापारविशेषेणेत्यर्थः । अवलोक्य दृष्ट्वा सहर्षं सानन्दं यथा तथा ब्रवीतीत्यर्थः । अयम् एषः अमात्यराक्षसः राक्षसनामा मन्त्री तिष्ठति आस्ते ।

अक्षीणभक्तिरिति । नन्दे तन्नाम्नि राज्ञि क्षीणेऽपि अधिगतनाशेऽपि विनष्टेऽपीत्यर्थः । अक्षीणा अनधिगतह्रासा भक्तिरनुरागो यस्य स अक्षीणभक्तिः अलुप्तानुरागः भवानिति शेषः । स्वामिनोऽर्थः स्वाम्यर्थस्तं स्वाम्यर्थं प्रभुकार्यम् उद्वहन्

कर, और चन्द्रगुप्तकी लक्ष्मीके समान हृदय विदारण करने वाली वध्यचिह्न स्वरूप कुसुम माला को पहनकर, और स्वामीकी हिंसासे कठोर तथा अश्राव्य तुड़ही तथा नगाड़े के शब्दों को कान से सुनकर उसके प्रथम निनाद से मेरा कठिन हृदय विदीर्ण नहीं भया, यह मैं जानता हूँ ॥ २१ ॥

(विचित्रढङ्ग से देखकर हर्ष के साथ) यह अमात्य राक्षस हैं । जो यह—
नन्द राजा के मरने पर भी उनमें भक्ति रखने वाले, आप पृथिवीके सभी

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पृथिव्यां स्वामिभक्तानां प्रमाणे परमे स्थितः ॥२२॥

(उपसृत्य) जयत्यमात्यः ।

राक्षसः—(विलोक्य सहर्षम्) सखे शकटदास ! दिष्ट्या कौटिल्य-गोचरगतोऽपि दृष्टोऽसि, तत् परिष्वजस्व माम् ।

(शकटदासस्तथा करोति)

राक्षसः—(तं परिष्वज्य) इदमत्रासनमास्यताम् ।

साधयन् पृथिव्यां भूमौ स्वामिभक्तानां प्रभुसेवकानां मध्ये परमे उत्कृष्टे प्रमाणे दृष्टान्ते स्थितो विद्यमानः अस्तीति क्रियाविशेषः । नन्दान्वयविनाशेऽपि राक्षसानु-रागस्याक्षीणत्वे कारणाऽभावात्तमन्तरक्षीणभक्तिरूपकार्योत्पत्त्या विभावनानामाऽत्रा-ऽलङ्कारः । तदुक्तं—विभावना विना हेतुं कार्योत्पत्तिर्यदुच्यते । इति ।

जीवति नन्दान्वये शत्रुनिर्य्यातनरूपस्वामिकार्योऽसम्पादनात् नष्टे तस्मिन् भक्तेः क्षीणत्वे तत्कार्यसम्पादनासम्भवात् क्षीणेऽपि नन्दे राक्षसस्य भक्तिरक्षीणेति राक्षसनिष्ठनन्दान्वयविषयकानुरागस्याक्षीणत्वे स्वाम्यर्थसाधनस्य हेतुत्वमुपपन्नम् तथा च राक्षसस्याक्षीणभक्तित्वे हेतुभूतस्य स्वाम्यर्थसाधनस्य पदार्थत्वेनोक्तत्वादिह काव्यलिङ्गमलङ्कार इति केचित् अनुष्टुप्वृत्तम् ॥ २२ ॥

उपसृत्येति । उपसृत्य समीपमेत्य अमात्यो मन्त्री भवानिति शेषः । जयति सर्वोत्कर्षेण वर्तताम् ।

विलोक्येति । विलोक्य दृष्ट्वा सहर्षं सानन्दं यथा तथा ब्रवीति । सखे मित्र शकटदास ! दिष्ट्या भाग्येन कौटिल्यस्य गोचरः कौटिल्यगोचरस्तं गतः कौटिल्य-गोचरगतः चाणक्यसमीपं प्राप्ताऽपि दृष्टोऽसि त्वमित्यादिः मयेति शेषः, तत्तस्मा-त्कारणात् मां परिष्वजस्व आलिङ्ग (परिपूर्वकात् ष्वञ्ज आसङ्गे इत्यस्माद्धातोर्लोटि मध्यमपुरुषैकवचने "उपसर्गात्सुनोती"ति षत्वे रूपम्) ।

शकटदासः तन्नामा राक्षसप्रणयी तथा करोति राक्षसमालिङ्गतीत्यर्थः ।

तमिति । राक्षसोऽपि तं शकटदासं परिष्वज्य आलिङ्गय । इदम् एतत् प्रत्यक्ष-

---

स्वामी भक्तों से बड़े हैं ॥ २२ ॥

(समीप जाकर) अमात्य की जय हो ।

राक्षसः—(देखकर खुशी से) सखे ! शकटदास ! आप भाग्य से ही चाणक्य की चपेट में पड़कर भी जीवित देखे जा रहे हैं । इसलिये आओ, मेरे हृदय से लग जाओ ।

(शकटदास वैसाही करता है) ।

राक्षसः—(उसको आलिङ्गन करके) यह आसन है, बैठो ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शकटदासः—यदाज्ञापयत्यमात्यः ।

(इति नाट्येनोपविष्टः)

राक्षसः—सखे ! शकटदास ! अथ कोऽयमीदृशस्य मे हृदयानन्दस्य हेतुः ?

शकटदासः—(सिद्धार्थकं निर्दिश्य) अमात्य ! प्रियसुहृदा सिद्धार्थकेन घातकान् विद्राव्य वध्यस्थानादपवाहितोऽस्मि ।

राक्षसः—(सहर्षम्) भद्र सिद्धार्थक ! काममपर्याप्तमिदमस्य प्रियस्य, तथापि गृह्यताम् (इति स्वगात्रादवतार्य्य भूषणानि प्रयच्छति)

दृश्यमानम् आसनम् उपवेशनार्थं कुशादिनिर्मितमास्तरणम् अस्तीति शेषः । आस्यतामुपविश्यताम् त्वयेत्यादि ।

सखे इति । सखे मित्र शकटदास, अथ, वाक्यालङ्कारेऽत्र प्रयुक्तोऽयमथशब्दः । मे मम ईदृशस्य अनुपमस्येत्यर्थः । हृदयानन्दस्य मानससुखस्य कोऽयं हेतुः किं कारणम् ।

सिद्धार्थकमिति । सिद्धार्थकं चाणक्यप्रणिधिं निर्दिश्य ब्रवीति इति शेषः । अमात्य मन्त्रिन् ! प्रियसुहृदा प्रियमित्रेण अनेन साक्षाद्दृश्यमानेन सिद्धार्थकेन तन्नाम्ना चाणक्यप्रणिधिना घातकान् हिंसकान् विद्राव्य संताड्य दण्डयित्वेति यावत् । वध्यस्थानात् अपवाहितः समानीतः अस्मि भवामि ।

सहर्षमिति । सानन्दं यथा तथा ब्रवीतीत्यर्थः । भद्र कल्याणिन् सिद्धार्थक ! अस्य त्वत्कृतस्य प्रियस्य अतिशयानन्दप्रदस्य वध्यस्थानाच्छकटदासानयनरूपकार्यस्येत्यर्थः इदं मया दीयमानं वस्त्विति शेषः । कामं यथेच्छम् अपर्याप्तम् अननुरूपम् तथापि तस्याऽपर्याप्तत्वेऽपि गृह्यताम् आदीयताम् । इति इत्यभिधाय स्वगात्रात् निजशरीरात् अवतार्य उन्मुच्य प्रयच्छति ददाति ।

शकटदासः—अमात्य की जो आज्ञा ।

(विचित्र ढङ्गसे बैठ जाता है) ।

राक्षसः—सखे ! शकटदास ! यह कौन हमारे इस प्रकार हृदयानन्द का विशेष हेतु है ।

शकटदासः—(सिद्धार्थक को बतलाकर) अमात्य ! प्रियमित्र सिद्धार्थक के द्वारा घातकजनों को मारकर मैं वध्यस्थान से यहां लाया गया हूं ।

राक्षसः—(खुशी से) भद्र सिद्धार्थक ! इस प्रियपात्रके योग्य यह पुरस्कार नहीं है । तो भी लो । (यह कह कर अपने शरीर से अलङ्करणों को देता है) ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सिद्धार्थकः—(गृहीत्वा पादयोर्निपत्य स्वगतम्) अअं क्खु अज्जोवदेसो होदु तथा करिस्सं (प्रकाशम्) अमच्च ! एत्थ मे पढमप्पविट्ठस्स णत्थि कोवि परिचिदो, जहिं एदं अमच्चस्स प्पसादं णिक्खिविअ णिव्वुदो भविस्सं; ता इच्छामि अहं इमाए मुद्दिआए मुद्दिदं अमच्चस्स ज्जेव भाण्डागारे णिक्खिविदुं, जदा मे एदिणा प्पओअणं भविस्सदि तदा गेह्निस्सं [अयं खलु आर्योपदेशो भवतु । तथा करिष्यामि । अमात्य ! अत्र मे प्रथमप्रविष्टस्य नास्ति कोऽपि परिचितः, यत्रेममात्यस्य प्रसादं निक्षिप्य निर्वृतो भविष्यामि; तदिच्छाम्यहमेतया मुद्रया मुद्रितममात्यस्यैव भाण्डागारे निक्षेप्तुम् । यदा मे एतेन प्रयोजनं भविष्यति, तदा ग्रहीष्यामि]

राक्षसः—भद्र ! भवतु, को दोषः ? शकटदास ! एवं क्रियताम् ।

गृहीत्वेति । गृहीत्वा आदाय अलङ्करणमित्यादि । पादयोश्चरणयोः निपत्य शिरस्संयोज्य स्वगतम् अव्यक्तं यथा तथा ब्रवीति । अयं खलु आर्योपदेशः चाणक्यशिक्षा भवतु अस्तु तथा करिष्यामि पारितोषिकग्रहणार्थं । कौटिल्येन यथा शिक्षितोऽस्मि तथाऽनुष्ठास्यामीत्यर्थः । प्रकाशं सुस्पष्टं यथा तथाऽभिदधाति । अमात्य मन्त्रिन् ! अत्रास्मिन् स्थाने प्रथमप्रविष्टस्याऽभूतपूर्वागमनस्य मे मम कोऽपि परिचितः सुहृत् नाऽस्ति न वर्तते, यत्र यस्मिन् जने इमम् भवता दीयमानं प्रसादम् अनुग्रहं निक्षिप्य न्यासीकृत्य संस्थाप्येत्यर्थः । निर्वृतः सुखी भविष्यामि; तत्तस्माद्धेतोः अहम् एतया भवदीयया मुद्रया अङ्गुलिमुद्रया मुद्रितं चिह्नितं प्रसादमिति शेषः । अमात्यस्यैव सचिवस्यैव भाण्डागारे कोषगृहे निक्षेप्तुं स्थापयितुम् इच्छामि अभिलषामि, यदा यस्मिन्काले एतेन भवद्दत्तालङ्करणात्मकवस्तुना मम प्रयोजनं कार्यं भविष्यति तदा ग्रहीष्यामि आदास्यामि, यदा भवदन्वेषणार्थं कटकान्निर्गमिष्यामि तदा आदास्यामिति भावः ।

भद्रेति । भद्र साधो सिद्धार्थक ! भवतु अस्तु को दोषः मत्कोषागारे अलङ्कर-

---

सिद्धार्थकः—(राक्षससे दिये गए अलङ्करणों को लेकर और उनको प्रणामकर मनहीं मन) यह आर्यका उपदेश है, वैसा ही करता हूं । अमात्य ! यहाँपर पहिले कभी मैं नहीं आया हुआ हूं । मेरा कोई परिचित नहीं है, कि जिसके समीप आपका दिया हुआ पुरस्कार रखकर मैं सुखी होऊँ । इसलिये मैं इस मोहरसे चिह्न किये हुए पुरस्कारको आपके भण्डार ही में रख देना चाहता हूं । जब हमको प्रयोजन होगा, तब लूँगा ।

राक्षसः—भद्र ! तो इसमें क्या क्षति है शकटदास ! ऐसा ही करो ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शकटदासः—यदाज्ञापयतीति (मुद्रां विलोक्य जनान्तिकम्) अमात्य ! भवन्नामाङ्कितेयं मुद्रा ।

राक्षसः—(विलोक्य सविषादं सवितर्कमात्मगतम्) सत्यं नगरात् निष्क्रामतो मम हस्ताद्ब्राह्मण्या उत्कण्ठाविनोदार्थं गृहीता तत् कथमस्य हस्तमुपगता ? (प्रकाशम्) भद्र ! सिद्धार्थक ! कुतस्त्वयेयमधिगता ?

रणस्थापने का हानिः, शकटदास एवं क्रियताम् सिद्धार्तको यदभिदधाति तद्विधीयतामित्यर्थः । सिद्धार्थकस्याऽलङ्करणं स्वकोशागारे स्थाप्यतामिति भावः ।

यदिति । अमात्यः सचिवो भवानिति शेषः । यद् आज्ञापयति निर्दिशति तत्करोमीत्यर्थः । मुद्राम् अङ्गुलिमुद्राम् अवलोक्य दृष्ट्वा जनान्तिकम् अस्पष्टं कर्णे कथनमिति यावत्–यदुक्तम्—

जनान्तिकं तु तत्प्रोक्तं यत्तृतीयाद्यगोचरम् ।

साहित्यदर्पणे च—

त्रिपताककरेणान्यानपवार्यान्तरा कथाम् ।
अन्योऽन्यामन्त्रणं यत्स्यात्तज्जनान्ते जनान्तिकम् ।

जनान्तिकमप्रकाश इति त्रिकाण्डशेषे च ।

अमात्य मन्त्रिन् ! इयं मुद्रा अङ्गुलिमुद्रा भवन्नामाङ्किता भवन्नामचिह्निता अस्तीति शेषः ।

विलोक्येति । विलोक्य दृष्ट्वा सविषादं सचिन्तं · सवितर्कं सविचारम्—आत्मगतम् अनतिस्पष्टं–(क्रियाविशेषणमिदम्पदत्रयम्) सत्यं यथार्थमेव नगरात्पुरः निष्क्रामतो बहिर्निस्सरतः मम हस्तात् कराद् ब्राह्मण्या मम स्त्रिया उत्कण्ठाविनोदनार्थम् उन्मनस्कत्वप्रशमनार्थं गृहीता आदत्ता, तत् तस्मात्कारणात् कथं केन प्रकारेण अस्य सिद्धार्थकस्य हस्तं करम् अधिगता प्राप्ता, प्रकाशं सुस्पष्टम् भद्र साधो सिद्धार्थक ! त्वया भवता इयं मुद्रा कुतः कस्मात् अधिगता प्राप्ता ।

शकटदासः—जो आपकी आज्ञा (मुद्राको देखकर एकान्त में) अमात्य ! आपके नामसे चिन्ह की हुई यह मुद्रा है ।

राक्षसः—(देखकर विषाद-और विचारके साथ मनही मन) ठीक है, कुसुमपुरसे बाहर जाते समय हमारे हाथसे ब्राह्मणी (मेरी स्त्री) ने उदासीनताको हटाने के लिये इस मुद्राको ले ली थी । इसके हाथमें कैसे आई (जोरसे) भद्र सिद्धार्थक ! तुमने इसको किसतरह पाया ?

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सिद्धार्थकः—अमच्च ! अत्थि कुसुमपुरणिवासी मणिआरसेट्ठी चन्दणदासो णाम तस्स गेहदुआरे भूमिए पडिदा, मए समासादिदा [अमात्य ! अस्ति कुसुमपुरनिवासी मणिकारश्रेष्ठी चन्दनदासो नाम, तस्य गेहद्वारे भूमौ पतिता, मया समासादिता] ("समासादिदा" इत्यत्र "लद्धा" इति पाठे—"लब्धा" इति सं०)

राक्षसः—युज्यते ।

सिद्धार्थकः—अमच्च ! किं एत्थ जुज्जदि ? [अमात्य ! किमत्र युज्यते]

राक्षसः—भद्र ! यतो महाधनानां गृहे पतितस्यैवंविधस्योपलब्धिरिति ।

शकटदासः—सखे सिद्धार्थक ! अमात्यनामाङ्कितेयं मुद्रा, तदितो बहुतरेणाऽर्थेन भवन्तममात्यस्तोषयिष्यति तद् दीयतामेषा मुद्रा ।

अमात्येति । अमात्य मन्त्रिन् ! कुसुमपुरे निवसति तच्छीलः कुसुमपुरनिवासी कुसुमपुरवास्तव्यः चन्दनदासो नाम मणिकारश्रेष्ठी वैश्यजातीयः अस्ति वर्तते । तस्य चन्दनदासस्य गेहद्वारे भवनप्रतीहारे भूमौ पृथिव्यां पतिता स्रस्ता, इयं मुद्रेति शेषः, मया समासादिता प्राप्ता लब्धेति यावत् ।

राक्षसस्य मुद्राधीशत्वगोपनमवगच्छन्नपि सिद्धार्थकोऽनवगच्छन्निव राक्षसं पृच्छति-अमात्य किमत्र युज्यत इति ।

भद्रेति । भद्र कल्याणिन् ! यतो यस्मात् महत् प्रचुरं धनम् अर्थो येषां ते महाधनास्तेषां प्रचुरविभवशालिनां पुरुषाणामिति शेषः । गृहे सद्मनि पतितस्य स्रस्तस्य एवंविधस्य महामूल्यस्य वस्तुनः उपलब्धिः प्राप्तिः भवितुमर्हतीति शेषः ।

सखे इति । सखे सिद्धार्थक ! इयं प्रत्यक्षदृश्यमाना मुद्रा अङ्गुलिमुद्रा अमात्यनामाङ्किता मन्त्रिराक्षसनामचिह्निता अस्तीति शेषः, तत्तस्मात् इतो मुद्रामूल्यात्

सिद्धार्थकः—अमात्य! कुसुमपुर में चन्दनदास नामका एक वैश्य है, उसके दरवाजेपर यह मुझे पृथ्वीमें पड़ी मिली थी । वहीं मैंने इसको पाया था।

राक्षसः—हो सकता है ।

सिद्धार्थकः—क्या हो सकता है ?

राक्षसः—भद्र ! धनवानों के घरमें इसका गिरना सम्भव हो सकता है ।

शकटदासः—सखे सिद्धार्थक ! मन्त्री राक्षसकी नामाङ्कित यह मुद्रा है । इसके लिये अमात्य आपको बहुत धनदेगें, इसलिये उन्हें यह मुद्रा देदो ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सिद्धार्थकः—अज्ज ! ऐसो मे परितोसो, जं अमच्चो इमाए मुद्दाए परिग्गहप्पसादं करेदित्ति [आर्य्य ! एष मे परितोषो, यदमात्योऽस्या मुद्रायाः परिग्रहप्रसादं करोतीति । (इति मुद्रां समर्पयति)

राक्षसः—सखे शकटदास ! अनयैव मुद्रया स्वाधिकारे व्यवहर्तव्यं भवता ।

शकटदासः—यदाज्ञापयत्यमात्यः ।

सिद्धार्थकः— अमच्च ! विणवेमि किंपि । [अमात्य ! विज्ञापयामि किमपि]

राक्षसः—भद्र ! विश्रब्धं ब्रूहि ।

सिद्धार्थकः—जाणादि ज्जेव अमच्चो जधा चाणक्कहदअस्स विप्पिअं कदुअ, णत्थि मे पुणो पाडलिउत्ते प्पवेसो त्ति, ता इच्छामि अहं अज्जस्स ज्जेव सुप्पसणे पादे सेविदुं [जानात्येवामात्यो, यथा चाणक्यहतकस्य विप्रियं कृत्वा, नास्ति मे पुनः पाटलिपुत्रे प्रवेश इति, तदिच्छाम्यहममात्यस्यैव सुप्रसन्नौ पादौ सेवितुम्]

बहुतरेण प्रचुरेण अर्थेन धनेन भवन्तं त्वाम् अमात्यो राक्षसः तोषयिष्यति आनन्दयिष्यिति, तत्तस्मात् एषा भवदीया मुद्रा अङ्गुलिमुद्रा दीयतां वितीर्यताम् ।

आर्येति । आर्य, बुद्धिमन् ! मे मम एषः परितोषः सन्तोषः, अस्तीति शेषः । यत् यस्मात् अमात्यो राक्षसः अस्याः विद्यमानायाः मुद्राया अङ्गुलिमुद्रायाः परिग्रहेण ग्रहणेन स्वीकारेणेति यावत् प्रसादं प्रसन्नतां करोति जनयति ।

अनयेति । भवता त्वयाऽनयैव मुद्रया राक्षसाङ्गुलिमुद्रया स्वनियोगे आत्मनिदेशे व्यवहर्तव्यं व्यवहारः कर्तव्य इत्यर्थः ।

ज्ञानातीति । अमात्यो भवान् जानात्येवावगच्छत्येव यथा यत् चाणक्यहत-

---

सिद्धार्थकः—आर्य ! यही मेरे लिए बहुत बड़ा पुरस्कार है कि मन्त्रि राक्षस इस मुद्राके पानेसे प्रसन्न होते हैं । (यह कहकर मुद्राको देता है) ।

राक्षसः—मित्र शकटदास ! अब तुम इसी मुद्रासे अपना कार्य किया करना ।

शकटदासः—आमात्यकी जो आज्ञा ।

सिद्धार्थकः—अमात्य ! मैं कुछ निवेदन करता हूँ ।

राक्षसः—भद्र ! विश्वस्त होकर कहो ।

सिद्धार्थकः—आप जानतेही हैं कि चाणक्य का अनिष्ट करने के कारण अब पाटलिपुत्र नगरमें मेरा प्रवेश नहीं है । इसलिये मैं आपही के चरणों की सेवा करनेकी इच्छा करता हूँ ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राक्षसः—भद्र! प्रियं नः, किन्तु त्वदभिप्रायपरिज्ञानेनाऽन्तरितोऽस्माकमनुनयः। तदेवं क्रियताम्।

सिद्धार्थकः—(सहर्षम्) अणुग्गहिदोह्मि [अनुगृहीतोऽस्मि]

राक्षसः—सखे शकटदास ! विश्रामय सिद्धार्थकम्।

शकटदासः—यदाज्ञापयत्यमात्यः (इति सिद्धार्थकेन सह निष्क्रान्तः)

राक्षसः—सखे विराधगुप्त ! वर्णयेदानीं कुसुमपुरवृत्तान्तशेषम्। अपि क्षमन्ते कुसुमपुरनिवासिनोऽस्मदुपजापं चन्द्रगुप्तप्रकृतयः ?

विराधगुप्तः—अमात्य ! बाढं क्षमन्ते, ननु यथाप्रधानमनुगच्छन्त्येव।

कस्य दुष्टकौटिल्यस्य विप्रियं कृत्वा विरोधं विधाय मे मम पाटलिपुत्रे तदाख्यनगरे नास्ति प्रवेशः स्थितिः तत्तस्मात् अहमार्यस्यैव भवत एव सुप्रसन्नौ सुन्दरौ पादौ चरणौ सेवितुमवलम्बितुमिच्छामि कामये।

भद्रेति। भद्र सिद्धार्थक ! प्रियं नः अस्माकं प्रियम् इष्टम् मन्निकटे त्वत्स्थितिरिष्टेवेत्यर्थः, त्वदभिप्रायपरिज्ञानेन त्वदाशयबोधेन अस्माकम् अनुनयः अनुवर्तनम् अनुरोध इति यावत्। अन्तर्हितः तिरोहितः। तव तात्पर्यज्ञानात्प्राक् नाऽभिमत इह वास इदानीन्तु तज्ज्ञात्वा अभिमत एवेति भावः।

वर्णयेति। मित्र विराधगुप्त ! इदानीं साम्प्रतं कुसुमपुरस्य वृत्तान्तं कुसुमपुरवृत्तान्तं तस्य शेषस्तं तथोक्तम् कुसुमपुरोदन्ताऽवशिष्टभागमित्यर्थः वर्णय कथय। कुसुमपुरनिवासिनः कुसुमपुरवास्तव्याः चन्द्रगुप्तप्रकृतयः मौर्यप्रजाः अस्मदुपजापम् अस्मत्कृताऽन्योऽन्यभेदम् अपि क्षमन्ते सहन्ते किम् मौर्ये नाऽप्रणयिन्य इत्यर्थः ? (प्रश्नार्थकोऽत्राऽपिशब्दः)।

बाढमिति। (स्वीकारार्थकमव्ययमिदम्) क्षमन्ते त्वत्कृतोपजापमित्यादिः।

राक्षसः—हमारे निकट तुम्हारा रहना सर्वथा प्रिय है। किन्तु स्वयं तुम्हारा अभिप्राय जान लेने से मेरा अनुरोध स्थगित हो गया, इस लिये ऐसाही करो।

सिद्धार्थकः—(खुशीसे)। मैं आपका कृपापात्र हुआ।

राक्षसः—सखे शकटदास ! सिद्धार्थक को ले जाकर ठहराओ।

शकटदासः—अमात्यकी जो आज्ञा। (यह कहकर सिद्धार्थकके साथ बाहर चला गया)।

राक्षसः—सखे विराधगुप्त ! अब कुसुमपुर का शेष वृत्तान्त कहो। कुसुमपुर में रहनें वाली चन्द्रगुप्तकी प्रजा हमलोगोंके इस परस्पर संघर्षको सहन करती है क्या ?

विराधगुप्तः—अमात्य ! हां, सहन करती हैं, और राजा तथा मन्त्री दोनों का अनुगमन करती है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtioh by eGangotri

राक्षसः—सखे ! किं तत्र कारणम् ?

विराधगुप्तः—अमात्य ! इदं तत्र कारणम् ;-मलयकेतोरपक्रमणात् प्रभृति पीडितश्चन्द्रगुप्तेन चाणक्य इति, चाणक्योऽपि जितकाशितयाऽसहमानस्तैस्तैराज्ञाभङ्गैश्चन्द्रगुप्तस्य चेतसः पीडामुपचिनोति, अयमपि ममानुभवः ।

राक्षसः—(सहर्षम्) सखे विराधगुप्त ! तद्गच्छ त्वम् अनेन आहितुण्डिकच्छद्मना पुनः कुसुमपुरमेव । तत्र हि मे सुहृत् वैतालिक-

---

मौर्यप्रजानां न केवलं मौयप्रजानामेवापि तु मौर्यामात्यादीनां भद्रभटादीनामपि, यथाप्रधानमिति प्रधानं राजानं चन्द्रगुप्तं मन्त्रिणं कौटिल्यञ्चाऽनतिक्रम्येत्यर्थ, राजामन्त्रिणावप्यन्योऽन्यभेदं प्राप्नुतः किमितरे तदनुवर्त्तिन इति भावः । अनुगच्छन्ति अन्योऽन्यभेदात्मकं कार्यमनुसरन्ति । प्राक्परिगृहीतोपजापैरित्यादिपञ्चमाङ्के वक्ष्यमाणं तत् ।

किं तत्रेति । हेसखे मित्र ! तत्र राजसचिवयोर्भेदे किं कारणम् को हेतुरित्यर्थः

अमात्येति । मन्त्रिन् ! मलयकेतोः पर्वतकपुत्रस्यापक्रमणात्प्रभृति पलायनमारभ्य चन्द्रगुप्तेन मौर्येण चाणक्यः कौटिल्यः पीडितो नितरां व्यथितः चाणक्योऽपि कौटिल्योऽपि जितेन जयेन शत्रुपराजयेन काशते स्पर्द्धते इति जितकाशी तस्य भावो जितकाशिता तया जितकाशितया अतिगर्विततयेत्यर्थः । असहमानोऽक्षाम्यन् चन्द्रगुप्तमित्यादिः तैस्तैः चन्द्रगुप्तक्लेशजनकैः आज्ञाभङ्गैर्निदेशापालनैः चन्द्रगुप्तस्य वृषलस्य चेतसो हृदयस्य पीडां व्यथामुपचिनोति उत्पादयति इति ततोऽन्योऽन्यभेदे कारणम् । अयमपि ममाऽनुभवः इत्थं तत्रत्योदन्तमवगत्यैवागतमित्यर्थः (इदमति बीजान्वेषणम्) ।

सहर्षमिति । सानन्दं यथा स्यात्तथा ब्रवीतीत्यर्थः । सखे विराधगुप्त । तत्त-

---

राक्षसः—सखे ! राजा और मन्त्रीके भेदमें क्या कारण है ।

विराधगुप्तः—अमात्य ! उसमें यह कारण है कि जिस दिन से मलयकेतु चला गया उसी दिन से लेकर चन्द्रगुप्तने चाणक्यको बहुत पीड़ा दी । चाणक्य भी विजयी होने के कारण इस का उत्पीडन नहीं सहन करता हुआ उसकी आज्ञा नहीं मानता । वह आज्ञा भङ्गों के द्वारा चन्द्रगुप्त के हृदय में पीड़ा पैदा करता है । यह भी मेरा अनुभव है ।

राक्षसः—(खुशीसे) मित्र विराधगुप्त ! इसीलिये तुम इसी आहितुण्डिक वेश से फिर कुसुमपुर जाओ । वहां वैतालिक चिह्नवाला स्तनकलश हमारा मित्र रहता

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व्यञ्जनः स्तनकलशो नाम प्रतिवसति । स त्वया मद्वचनात् वाच्यः, यथा चाणक्येन क्रियमाणेष्वाज्ञाभङ्गेषु चन्द्रगुप्तस्त्वया समुत्तेजनसमर्थैः श्लोकैरुपश्लोकयितव्य इति । कार्यञ्चातिनिभृतं करभकहस्तेन सन्देष्टव्यम् इति ।

विराधगुप्तः—यदाज्ञापयत्यमात्यः ।

(इति निष्क्रान्तः)

पुरुषः—(प्रविश्य) जेदु अमच्चो । अमच्च! सअड़दासो विण्णवेदि, एदे क्खु तिण्णि अलङ्कारविसेसा विक्कीअन्ति, ता पच्चक्खीकरेदु अमच्चो [जयति जयत्यमात्यः । अमात्य ! शकटदासो विज्ञापयति, एते खलु त्रयोऽलङ्कारविशेषा विक्रीयन्ते, तत् प्रत्यक्षीकरोत्वमात्यः]

स्मात् त्वम् अनेन पूर्वाङ्गीकृतेन आहितुण्डिकच्छद्मना व्यालोपजीविव्याजेन पुनर्भूयः कुसुमपुरमेव चन्द्रगुप्ताधिवासस्थानमेव गच्छ याहि । तत्र कुसुमपुरे मे मम सुहृत् सखा वैतालिकव्यञ्जनः स्तुतिपाठकस्य मागधस्य लिङ्गधारीत्यर्थः । स्तनकलशो नाम स्तनकलशाख्यः प्रतिवसति तिष्ठति । स स्तनकलशः त्वया भवता वाच्योऽभिधातव्यः किन्तदाह यथेति । यथा येन प्रकारेण चाणक्येन कौटिल्येन आज्ञाभङ्गेषु निदेशव्याघातेषु क्रियमाणेषु विधीयमानेषु चन्द्रगुप्तो मौर्यः समुत्तेज्जनसमर्थैः मन्युदीपनयोग्यैः श्लोकैः स्तुत्यर्थकपद्यैः उपश्लोकयितव्यः स्तोतव्यः, इति कार्यञ्च स्वकीयकृत्यमपि करभकहस्तेन करभकद्वारा सन्देष्टव्यं प्रेषयितव्यम् ।

प्रविश्येति । रङ्गस्थानमित्यादिः, ब्रवीतीति शेषः । अमात्यः सचिवो जयतिं सर्वोत्कर्षेण वर्तताम् । अमात्य मन्त्रिन् ! शकटदासः एतदाख्यः कायस्थः भवत्सुहृत् विज्ञापयति निवेदयति, एते खलु त्रयोऽलंकारविशेषा महार्हास्त्रयोऽलंकाराः विक्रीयंते तत् अलंकारत्रयमित्यर्थः । अमात्यो भवान् प्रत्यक्षीकरोतु-पश्यतु (इदमपि बीजान्वेषणम्) ।

है । तुम उसको हमारे कहने के अनुसार कहना कि चाणक्यके द्वारा आज्ञाभङ्ग किये जाने पर तुम क्रोधोत्पादक श्लोकों से चन्द्रगुप्त की स्तुति करना और शीघ्र ही उसके द्वारा समाचार भेजना ।

विराधगुप्तः—आपकी जो आज्ञा । (यह कहकर चला गया)

पुरुषः—(प्रवेशकर) । अमात्य की जय हो जय हो । अमात्य ? शकटदास निवेदन करता है कि ये तीनों अलङ्कार बिकने आये हैं इनको आप देखिये ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राक्षसः—(विलोक्यात्मगतम्) अहो ! महार्हाण्याभरणानि ।

(प्रकाशम्) भद्र ! उच्यतां शकटदासः, परितोष्य विक्रेतारं गृह्यन्तामिति ।

पुरुषः—जं अमच्चो आणवेदि [यदमात्य आज्ञापयति]

(इति निष्क्रान्तः)

राक्षसः—(स्वगतम्) यावदहमपि कुसुमपुराय करभकं प्रेषयामि (उत्थाय) अपि नाम दुरात्मनश्चाणक्याच्चन्द्रगुप्तो भिद्येत, अथवा सिद्धमेव समीहितं पश्यामि । कुतः ?—

विलोक्येति । विलोक्य सम्यगालोच्य आत्मगतं सर्वैरश्राव्यं यथा स्यात्तथा कथयतीत्यर्थः । अहो आश्चर्यम्, महान् अधिकोऽर्हो मूल्यं येषां तानि महार्हाणि अधिकमूल्यानि आभरणानि अलङ्करणानि सन्तीति शेषः । प्रकाशं सुस्पष्टं वदति, भद्र- कल्याणिन् शकटदासः उच्यताम् अभिधीयताम् विक्रेतारम् अलङ्करणविक्रयणकारिणं सन्तोष्य प्रसाद्य गृह्यन्ताम् आदीयन्ताम् आभरणानीत्यादिः ।

यावदिति । यावत् कालम् अहमपि कुसुमपुरं गन्तुमित्यर्थः । करभकं तन्नामानं चरं प्रेषयामि प्रहिणोमि । दुरात्मनः दुःस्वभावात् चाणक्यात् कौटिल्यात् चन्द्रगुप्तो मौर्यो भिद्येत् वैमनस्यं प्राप्नुयात् । आकर्णितः । ततः प्रभृतीत्यादिविराधगुप्तोक्तवचनो राक्षसश्चन्द्रगुप्तविनाशसम्पादकोद्यमे निरुत्साहः ।

आशा बलवती राजन् शल्यो जेष्यति पाण्डवान् ।

इति न्यायात् अतोऽग्रे स्तनकलशद्वारा मौर्य–चाणक्यान्योऽन्यवैमनस्यसम्पादनपूर्वकेप्सितनिष्पत्तिमिच्छति–अपि नामेति ।

राक्षसः—(देखकर मनहीं मन) अहो यह बहुत मूल्य वाले अलङ्कार हैं ? (जोर से) । भद्र ! शकटदास से कहो कि वेचनेवाले को दाम देकर इन्हें ले लें ।

पुरुषः—आपकी जो आज्ञा । (यह कह कर चला गया) ।

राक्षसः—(मनही मन) मैं तब तक कुसुमपुर जाने के लिये करभक को भेजता हूं । (उठकर) दुरात्मा चाणक्य से चन्द्रगुप्त अलग हो जाय तो अच्छा हो । अथवा अब मनोरथ सिद्ध ही है । क्यों कि—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मौर्यस्तेजसि सर्वभूतलभुजामाज्ञापको वर्त्तते
चाणक्योऽपि मदाश्रयादयमभूद्राजेति जातस्मयः ।
राज्यप्राप्तिकृतार्थमेकमपरं तीर्णप्रतिज्ञार्णवं
सौहार्द्दात्कृतकृत्यतैव नियतं लब्धान्तरा भेत्स्यति ॥ २३ ॥

(इति निष्क्रान्ताः सर्वे)

इति द्वितीयोऽङ्कः ॥ २ ॥

मौर्य इति । तेजसि प्रभावे विद्यमान इति शेषः । गर्वित इत्यर्थः । मौर्यश्चन्द्रगुप्तः सर्वभूतलभुजां सकलभूपतीनाम् आज्ञापकः शासको वर्तते । अयं मौर्यो मदाश्रयात् मम साहाय्यात् राजा नृपोऽभूत् इति हेतोश्चाणक्योऽपि कौटिल्योऽपि जातस्मयो गर्वितः, आभ्यां हेतुभ्यां लब्धान्तरा प्राप्तावकाशा उभयोः कृतकृत्यतैव एकं राज्यप्राप्तिकृतार्थं राज्यप्राप्त्या सिद्धाभीष्टं मौर्यम् अपरं तीर्णप्रतिज्ञार्णवं सम्पादितप्रतिश्रुतकार्यं चाणक्यञ्च नियतं निश्चितं सौहार्दात् स्नेहात् भेत्स्यति पृथक् करिष्यति । चन्द्रगुप्तो राज्यप्राप्तिकृतार्थ इत्यस्य चाणक्यस्तीर्णप्रतिज्ञार्णव इत्यस्य च क्रमशो निर्देशनात् अत्र यथासंख्यनामालङ्कारः । शार्दूलविक्रीडितं वृत्तम् ॥२३॥

इत्थं पताकाप्राप्त्याशानुगुण्येन गर्भसन्धेर्द्वादशाङ्गानि निरूपितानि गर्भसन्धिश्च समाप्तः ।

इति मुद्राराक्षसभावबोधिनीव्याख्यायां द्वितीयोऽङ्कः ॥

तेजस्वी चन्द्रगुप्त, सब राजाओं का शासन करनेवाला है । और चन्द्रगुप्त उसी की सहायतासे राजा हुआ है, इस कारण चाणक्य भी गर्वित है । इन दोनों कारणों से अवकाश पानेवाली दोनों की कृतकृत्यताही राज्यपाने से सिद्ध अभीष्टवाले चन्द्रगुप्त और प्रतिज्ञासमुद्रके पार गये हुए चाणक्य को निश्चय ही अलग कर देगी ।

(सब चले गये) ।

इति आशुबोधिनीव्याख्यायां द्वितीयोऽङ्कः ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तृतीयोऽङ्कः ।

(ततः प्रविशति कञ्चुकी) ।

कञ्चुकी—रूपादीन् विषयान् निरूप्य करणैर्यैरात्मलाभस्त्वया
लब्धस्तेष्वपि चक्षुरादिषु हताः स्वार्थावबोधक्रियाः ।
अङ्गानि प्रसभं त्यजन्ति पटुतामाज्ञाविधेयानि मे
न्यस्तं मूर्ध्नि पदं तवैव जरया, तृष्णे ! मुधा माद्यसि ॥१॥

अथ राक्षसेप्सितकौटिल्यमौर्यवैमनस्यमभिधातुं विमर्शसन्धिमारभते । स च तृतीयोङ्करूपश्चतुर्थोऽङ्करूपश्च । विमर्शसन्धेर्लक्षणं यथा—

गर्भसन्धौ प्रसिद्धस्य बीजार्थस्यावमर्शनम् ।
हेतुना येन केनाऽपि विमर्शः सन्धिरुच्यते ॥ इति

गर्भसन्धौ प्रसिद्धस्य मुहुरन्विष्टस्य कौटिल्यनयात्मकबीजस्य कौमुदीमहोत्सव-निवारणादिना प्रकरीनामान्यकथया चावमर्शनात् अनुसन्धानात् नियताप्ति-प्रकर्योः सम्बन्धस्य चाऽत्र सद्भावादेष विमर्शसन्धिः । अस्मिन्नङ्के नियताप्तिः । चतुर्थेऽङ्के राक्षस-चारसम्वादरूपा कथा प्रकरी नाम्नी वर्णनीया । नियताप्ति-प्रकर्योरानुगुण्येनास्य विमर्शसन्धेस्त्रयोदशाङ्गानि । एतल्लक्षणं यथा—

तत्रापवादसंफेटौ विद्रवद्रवशक्तयः । द्युतिप्रसङ्गश्छलनं व्यवसायो निरोधनम् ॥
प्ररोचना विचलनमादानञ्च त्रयोदश ।

रूपादीनिति । हे तृष्णे हे स्पृहे ! त्वया भवत्या यैः करणैरिन्द्रियैश्चक्षुरादिभिः रूपादीन् रूपप्रभृतीन् रूप-रस-गन्ध-स्पर्श-शब्दान् विषयान् इन्द्रियोपादेय-पदार्थान् निरूप्य अवगत्य आत्मलाभः स्वप्रतिष्ठा लब्धः प्राप्तः, इदानीं जरायामित्यर्थः, तेषु आत्मलाभोपायभूतेष्वपि चक्षुरादिषु इन्द्रियेषु स्वार्थावबोधक्रियाः स्व-विषयीभूतरूपादिग्रहणात्मकव्यापारा हता नष्टाः । ते तव आज्ञाविधेयानि नियोग-पालकानि अङ्गानि कर-चरणादीनि ममेत्यादिः प्रसभं हठात् पटुतां ग्रहणासामर्थ्यं-

---

(कञ्चुकी का प्रवेश) ।

कञ्चुकी—हे तृष्णे ! तूने पहिले जिन चक्षु आदि इन्द्रियोंके द्वारा रूप-रस-गन्ध-स्पर्श आदि विषयों को जानकर अपनी शक्ति फैलाई थी । अब उन चक्षु आदि इन्द्रियों की विषय जाननेवाली शक्ति नष्ट हो गई । आज्ञा पालन करनेवाले हाथ पैर आदि मेरे अङ्ग भी सामर्थ्य को छोड़ देते हैं, वृद्धावस्थाने तेरे ही सिर पर पैर रख दिया है, अब तू झूठ मूठ क्या खुश होती है ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(परिक्रम्याकाशे) भो भोः सुगाङ्गप्रासादाधिकृताः पुरुषाः ! सुगृहीतनामा देवश्चन्द्रगुप्तो वः समाज्ञापयति । यथा,-"प्रवृत्तकौमुदीमहोत्सवरमणीयतरं कुसुमपुरमवलोकयितुमिच्छामि, तत् संस्क्रियन्तामस्मद्दर्शनयोग्याः सुगाङ्गप्रासादस्योपरिभूमयः" इति । तत्

त्यजन्ति जहति, अतस्तवैव भवत एव मूर्ध्नि शिरसि जरया पदं चरणं न्यस्तं स्थापितं यस्मात् साम्प्रतं मुधा व्यर्थं माद्यसि वर्द्धसे । हे तृष्णे ! वार्द्धके रूपादिविषयस्वरूपज्ञापकानां चक्षुरादिज्ञानेन्द्रियाणां त्वदाज्ञावर्त्तिकरचरणादिकर्मेन्द्रियाणाञ्च सामर्थ्यक्षयात् त्वदीया वाञ्छा निष्फलैवेति भावः । नाटके कञ्चुकिनिर्वेदवर्णनं सर्वमतसिद्धम् । पद्यमिदं विभावनानाम्नाऽलङ्कारेण समलंकृतम् । हेत्वसद्भावेऽपि कार्योत्पत्तेरेतदलंकारविषयत्वात्-तदुक्तं दर्पणे—

विभावना विना हेतुं कार्योत्पत्तिर्यदुच्यते ।

इति । प्रकृते तृष्णाया मादनोत्पादकहेतुत्वाभावात्तद्रूपकार्यसमुत्पत्त्योक्तालङ्कारः सिद्धः । जरा-तृष्णयोरभिन्नलिङ्गत्वाज्जराप्रस्तावेऽप्रस्तुतबलवतीनायिकाऽभ्युदयप्रस्तावकरणात् तृष्णाप्रस्तावे चाऽप्रस्तुतव्यर्थमादनव्यवहृतेः प्रस्तावकरणात् (समारोपात्) समासोक्तिरलङ्कारः सङ्कीर्यते चायं पूर्वोक्तया विभावनयेति केचित् । श्लोकोऽयं शार्दूलविक्रीडितेन वृत्तेन निबद्धः ॥ १ ॥

परिक्रम्येति । परिक्रम्य सञ्चर्य आकाशे वियति दत्तदृष्टिः ब्रवीतीत्यनयोः शेषः । कञ्चुकिः द्वित्रिपदानि गत्वा आकाशे सन्निधापितचक्षुः सन् वक्ष्यमाणवचनं कथयतीत्यर्थः । भो भोः, अभिप्रेतार्थबोधने त्वरासूचनार्थं भोस्शब्दस्य द्विःप्रयोगः, सुगाङ्गश्चासौ प्रासादः सुगाङ्गप्रासादः सुगाङ्गप्रासादे अधिकृता नियुक्ताः सुगाङ्गप्रासादाधिकृताः पुरुषाः अनुचराः । सुगृहीतं प्रातःस्मरणीयं नाम यस्य स सुगृहीतनामा प्रातःस्मरणीयाऽभिधानो देवो नृपः चन्द्रगुप्तो मौर्यः समाज्ञापयति आदिशति । तदेव दर्शयति-अथेति । प्रवृत्तो यः कौमुदीमहोत्सवः प्रवृत्तकौमुदीमहोत्सवस्तेन रमणीयतरं प्रवृत्तकामुदीमहोत्सवरमणीयतरम् आरब्धशारदपूर्णिमासाध्यव्रतविशेषाधिकमनोज्ञं कुसुमपुरं पुष्पपुरम् अवलोकयितुं द्रष्टुमिच्छामि वाञ्छामि, तत् तस्मात्कारणात् अस्मद्दर्शनयोग्याः मदवलोकनीयाः सुगाङ्गप्रासादस्योपरिभूमयः उपरिष्ठा-

---

(घूम फिरकर आकाशमें) ओ सुगाङ्गप्रासादके रखवाले पुरुषो ! प्रातःस्मरणीय नामवाले राजा चन्द्रगुप्त तुम लोगों को आज्ञा देते हैं कि आरम्भ किये गये शारदीय पूर्णिमासाध्य व्रतविशेषोत्सव से अधिक सुन्दर किये हुए कुसुमपुरको देखना चाहता हूं । इस वास्ते हमारे देखने योग्य-सुगाङ्गप्रासादकी ऊपर वाली भूमि को

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किं चिरयन्ति भवन्तः ? (अकाशे आकर्ण्य) "किं ब्रूथ आर्य्य ! किमविदित एवायं देवस्य चन्द्रगुप्तस्य कौमुदीमहोत्सवप्रतिषेधः" इति ? आः दैवोपहताः ! किमनेन वः प्राणहरेण कथोद्धातेन ? शीघ्रमिदानीम्,—

आलिङ्गन्तु गृहीतधूपसुरभीन् स्तम्भान् पिनद्धस्रजः/fastened
सम्पूर्णेन्दुमयूखसंहतिरुचां सच्चामराणां श्रियः । glory

त्प्रदेशाः संस्क्रियन्तां कुसुमादिभिरलंक्रियन्ताम् । तत् तस्मात् भवन्तो यूयं किं किमर्थं चिरयन्ति विलम्बन्ते आकाशे वियति आकर्ण्य श्रुत्वा-आकाशोद्भूतशब्दं श्रुत्वेत्यर्थः । आर्य माान्य ! किं ब्रूथ किं कथयथ यूयमिति शेषः । अयं विष्णुगुप्तेन विधीयमान इत्यर्थः । कौमुदीमहोत्सवप्रतिषेधः शारदपूर्णेन्दुपूजनात्मकोत्सवनिषेधः, देवस्य राज्ञश्चन्द्रगुप्तस्य मौर्यस्य किम् अविदित एव अज्ञात एव अस्तीति शेषः । (इदं विष्णुगुप्तनीत्यात्मकबीजावमर्शनम्) आः दैवोपहताः दैवेन भाग्येन विनष्टा इत्यर्थः । उत्सवा इति शेषः । अनेन प्राणहरेण जीवविनाशकेन (चन्द्रगुप्तानभिमतत्वात्कथोद्घातस्य प्राणहरत्वं बोध्यम्) कथोद्धातेन वार्ताप्रसङ्गेन किं न किमपि प्रयोजनमित्यर्थः, कथाप्रसङ्गस्यानवसरान्मदुक्तं शीघ्रं विधेयमिति भावः ।

आलिङ्गन्त्विति । सम्पूर्णश्चासाविन्दुश्चेति सम्पूर्णेन्दुस्तस्य मयूखाः किरणाः सम्पूर्णेन्दुमयूखास्तेषां संहतिः समुदायः तस्या रुगिव रुक् कान्तिर्येषां ते तथोक्तास्तेषां सम्पूर्णेन्दुमयूखसंहतिरुचां समग्रचन्द्रकिरणसमुदायसदृशकान्तीनां सन्तश्च ते चामराश्च सच्चामरास्तेषां सच्चामराणां प्रशस्तवालव्यजनानां श्रियो द्युतयः गृहीताश्च ते धूपाश्च गृहीतधूपास्तैः सुरभयस्तान् गृहीतधूपसुरभीन् धृतधूपामोदान् (अथवाऽत्र बहुव्रीहिः) गृहीतो धूपसुरभिर्यैस्ते गृहीतधूपसुरभयस्तान् गृहीतधूपसुरभीन्, पिनद्धाः संवेष्टिताः स्रजः पुष्पमाल्यानि येषु ते पिनद्धस्रजस्तान् पिनद्धस्रजःसम्वेष्टितपुष्पमाल्यान् स्तम्भान् स्थूणान् आलिङ्गन्तु आश्रयन्तु । सिंहोऽङ्को यस्मिन् तत्सिंहाङ्कं तच्च तदासनं सिंहाङ्कासनं तस्य धारणं तस्मात् सिंहाङ्कासनधारणात्

सजाओ ? देर क्यों कर रहे हो ? (आकाश में सुनकर) आर्य ! तुम सब क्या कहते हो कि क्या राजा चन्द्रगुप्तको यह कौमुदीमहोत्सव का प्रतिषेध ज्ञात नहीं है ? आः ! भाग्य से कौमुदीमहोत्सव नष्ट हो गया । तुम सब का इस प्राण नाशक कथाप्रसङ्ग से क्या प्रयोजन है ? अभी जल्दी से—

धूपकी सुगन्धियों को ग्रहण करनेवाले और माला पहनाये गये स्तम्भ, सम्पूर्ण चन्द्रकिरणसमूहकी कान्तिवाले सुन्दर चमरों की श्री (लक्ष्मी) का आलिङ्गन करें ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सिंहाङ्कासनधारणाच्च सुचिरं सञ्जातमूर्च्छामिव
क्षिप्रं चन्दनवारिणा सकुसुमः सेकोऽनुगृह्णातु गाम् ॥ २ ॥

(आकाशे) किं कथयन्ति भवन्तः "एते त्वरामह इति ? भद्राः ! त्वरध्वम् , अयमागत एव देवश्चन्द्रगुप्तः । य एषः,—

सुविश्रब्धैरङ्गैः पथिषु विषमेष्वप्यचलता

सिंहचिह्नितनृपासनस्थापनात् (पक्षान्तरे, सिंहेन मृगेन्द्रेण अङ्कासने निजक्रोडरूपासने धारणात् स्थापनात् सञ्जाता समुत्पन्ना मूर्च्छा वैकल्यं यस्याः सा सञ्जातमूर्छा तां सञ्जातमूर्च्छाम् समुत्पन्नवैकल्यामिव गां पृथ्वीं धेनुञ्च कुसुमेन पुष्पेण सहितो युक्तः सकुसुमः पुष्पयुक्तः चन्दनेन संश्लिष्टं वारि चन्दनवारि (मध्यमपदलोपी समासः) तेन चन्दनवारिणा श्रीखण्डसंश्लिष्टजलेन सेकः सेचनं क्षिप्रं द्रुतम् अनुगृह्णातु अनुकम्पताम् । यथा सिंहाङ्कपतनान्मूर्च्छिता गौर्जलसेकादिनाऽऽश्वास्यते तथैव गुरुतरनृपासनस्थापनात्परिश्रान्ता भूमिः श्रीखण्डमिश्रितजलसेकादिभिराश्वास्यतामिति भावः । अत्रालङ्कारस्तु—

समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणैः । व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः ॥

इति दर्पणोक्तलक्षणात् पूर्वार्द्धे अप्राकरणिकपूर्णेन्दुगभस्तिसमुहानामुपमागर्भविशेषणसादृश्यात् प्राकरणिकचामरेषु व्यवहृत्यारोपेण समासोक्तिः, उत्तरार्द्धे सञ्जातमूर्च्छामिवेत्यत्रोत्प्रेक्षाबोधकेवशब्दसत्त्वादुत्प्रेक्षा । सा च सिंहाङ्कपदगोपदयोर्द्व्यर्थत्वेन श्लेषविषयत्वाच्छ्लेषेण संसृष्टा । शार्दूलविक्रीडितं वृत्तम् ॥ २ ॥

आकाश इति । आकाशे आकाशस्थपुरुषमुद्दिश्येत्यर्थः । यद्वा आकाशोद्भवशब्दं श्रुत्वेत्यर्थः । भवन्तः किं कथयन्ति यूयं किं ब्रूथ एते वयं त्वरामहे भवदादिष्टकार्यसम्पादनाय शीघ्रतां कुर्मः । भद्राः कल्याणिनः त्वरध्वम् शीघ्रतां कुरुत अयम् एष राजा चन्द्रगुप्तो मौर्य आगत एव सम्प्राप्त एव ।

सुविश्रब्धैरिति । विषमेषु दुर्गमेषु पथिषु सरणिषु । ('सरणिः पद्धतिः

बहुत दिनतक सिंहासनके धारणसे मूर्च्छित पृथ्वी को पुष्प के साथ चन्दनमिश्रित जल से शीघ्र सींचो ॥ २ ॥

(आकाश में) तुम लोग क्या कहते हो कि हम लोग शीघ्रता से सब सम्पन्न करते हैं। भद्र ! तुम लोग शीघ्रता करो। यह राजा चन्द्रगुप्त आये ही हुए हैं। जो किः—

दुर्गम रास्ते में तथा दुरधिगम राजनीति में भी धैर्यवान् , इस मौर्य के पिता

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चिरं धुर्येणोढा गुरुरपि भुवो याऽस्य गुरुणा ।
धुरं तामेवोच्चैर्नववयसि वोढुं व्यवसितो
मनस्वी दम्यत्वात् स्खलति न च दुःखं वहति च ॥ ३ ॥

(नेपथ्ये) इत इतो देवः ।

पन्था' इत्यमरः) विषमेषु दुरवगमेषु पथिषु राजनीतिप्रभृतिषु च अचलता धैर्यवता धैर्य्येण भारोद्वहनकुशलेन अस्य मौर्यस्य गुरुणा पित्रा नन्देनेत्यर्थः । सुविश्रब्धैः विश्वासपात्रैः सुदृढैश्च अङ्गैः मन्त्रिप्रभृतिभिः स्कन्धाद्यवयवैश्च गुरुरपि महत्यपि या धूः भारश्चिन्ता च चिरं बहुकालपर्यन्तम् ऊढा धृता । तामेव नन्दोढामेव धुरं भारं नववयसि तारुण्यावस्थायां वोढुं धारयितुम् उच्चैरतिशयितं व्यवसितः उद्यतः मनस्वी प्रशस्तमनाः असौ मौर्यो दम्यत्वादसमर्थत्वात् स्खलति खिद्यते दुःखं क्लेशं न च वहति न प्राप्नोति प्रशस्तमनस्त्वादुत्साहशालित्वाच्च न क्लेशभाग्भवतीत्यर्थः । गुरुतरभारोद्वहनोत्साहवानल्पवयस्कवृषभ इव मौर्योऽपि नन्दोढभारं वोढुमुद्युङ्क्ते न च क्लिश्यतीति भावः । भारोद्वहनात्मकसमानकार्येणाऽप्राकरणिकाल्पवयस्कवृषभस्य प्राकरणिकनवमहीपतौ व्यवहारारोपणात्समासोक्त्यलङ्कारः स च सुविश्रब्धैः, अङ्गैः, पथिषु, विषमेष्वित्यादिद्व्यर्थकपदन्यासप्रतिभोत्थापितः । उपमानाऽपेक्षयोपमेयगतोत्कर्षे वापकर्षे सत्येव व्यतिरेकालङ्कार इति प्रकाशप्रदीपादिकृन्मये यथा बालवृषभोऽतिगुरुमपि भारं वोढुमुत्सहते न च क्लिश्यति तथाऽयं मौर्योऽप्यतिगुरुं भारं वोढुं व्यवसितो न च क्लिश्यति इत्यर्थे बालवृषभरूपोपमानापेक्षयोपमेयभूतमौर्ये न्यूनत्वाऽधिक्ययोरेकस्याऽप्यभावात्पद्येऽस्मिन् व्यतिरेकालङ्कारकथनं न युक्तियुक्तं प्रतिभातीति ब्रूमः । वैदर्भी रीतिः । शिखरिणी वृत्तम् ॥ ३ ॥

नेपथ्य इति । नेपथ्ये वेशरचनालये स्थितः कश्चिदनुचरः (कञ्चुकी) राजानं प्रति ब्रवीति । देवो भवान् इत इतः अनेन पथा आगच्छत्वित्यर्थः ।

अन्तर्जवनिकासंस्थैः सूचनार्थस्य चूलिका ।

इति दर्पणोक्तलक्षणात् इत इतो देव इति इयं चूलिका ॥

नन्दराजाने अपने विश्वासपात्र अङ्गों तथा मन्त्रियों के साथ बड़े भारी जिस भार को बहुत दिनतक धारण किया, उसी भारको यह मौर्य नवीन अवस्था में धारण करने के लिये तैयार है । यह मनस्वी मौर्य असमर्थ रहने के कारण खिन्न अवश्य होता है, पर क्लेश को नहीं पाता ॥ ३ ॥

(नेपथ्य में) राजन् ! इधर इधर ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(ततः प्रविशति राजा प्रतीहारी च)

राजा—(स्वगतम्) राज्यं हि नाम राजधर्मानुवृत्तिपरतन्त्रस्य भूपतेर्महदप्रीतिस्थानम् । यतः,—

परार्थानुष्ठाने जडयति नृपं स्वार्थपरता
परित्यक्तस्वार्थो नियतमयथार्थः क्षितिपतिः ।
परार्थश्चेत् स्वार्थादभिमततरो, हन्त परवान्
परायत्तः प्रीतेः कथमिव रसं वेत्तु पुरुषः ॥ ४ ॥

राज्यमिति । राज्ञो धर्मो राजधर्मस्तस्याऽनुवृत्तिरनुगमनं राजधर्मानुवृत्तिस्तत्र पर आसक्तस्तस्य राजधर्मानुवृत्तिपरस्य प्रजारक्षणात्मकनृपधर्मानुसरणासक्तस्य नृपतेः राज्ञः राज्यम् आधिपत्यं नाम (सम्भावनार्थकोऽत्र नामशब्दः) महती चासावप्रीतिर्महदप्रीतिस्तस्याः स्थानं महदप्रीतिस्थानम् अधिकाऽतृप्त्यास्पदम् , यद्वा अप्रीतेः स्थानमप्रीतिस्थानम् महच्च तदप्रीतिस्थानञ्च महदप्रीतिस्थानम् , परमातृप्त्यास्पदम् । अधिकक्लेशजनकं राज्यमिति भावः ।

न्यायेनार्जनमर्थस्य वर्द्धनं पालनं तथा । सत्पात्रे प्रतिपत्तिश्च राजवृत्तं चतुर्विधम् ॥ इति काकन्दकीयनीतिसारे राजवृत्तमुक्तम् ।

परार्थेति । परेषामर्थाः परार्थास्तेषामनुष्ठानं परार्थानुष्ठानं तस्मिन् परार्थानुष्ठाने अन्यप्रयोजनसम्पादने आसक्तम् (इदमाक्षेपलभ्यम्) नृपं राजानं स्वस्यार्थः स्वार्थस्तत्र परः स्वार्थपरस्तस्य भावः स्वार्थपरता स्वातन्त्र्यं रहयति त्यजति (त्यागार्थकचौरादिकरहधातोर्लटि रूपम्) परित्यक्तः परिहृतः स्वार्थः आत्मप्रयोजनं येन स परित्यक्तस्वार्थः परिहृतात्मप्रयोजनः क्षितिपतिः नृपतिः नियतं निश्चितम् अयथार्थः असत्यभूतः अनुगतसंज्ञक इति यावत् । परार्थोऽन्यकार्यं चेद्यदि स्वार्थात् आत्मप्रयोजनात् अभिमततरः ईप्सिततरः स्यात् तदा हन्त खेदे स क्षिति पतिः परवान् पराधीनः, परायत्तः पराधीनः पुरुषः प्रीतेः सन्तोषस्य सुखस्येति

(राजा और प्रतीहारी का प्रवेश होता है)

राजा—(मनही मन) राज्य तो प्रजारक्षणरूपी राज्यधर्म में तत्पर राजाके लिये विशेष अप्रीति का स्थान है। क्यों कि:—

दूसरेका कार्यसाधन करनेवाले राजाको स्वतन्त्रता छोड़ देती है, और दूसरे के कार्यको नहीं साधन करनेवाला राजा राजा ही नहीं है । जिसको अपने कार्य से दूसरे का कार्य विशेष प्रिय है, वह पराधीन है । पराधीन पुरुष सन्तोष के रसको किसतरह जान सकता है ॥ ४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अपि च । दुराराध्या हि राजलक्ष्मीरात्मवद्भिरपि राजभिः ।

कुतः ?—तीक्ष्णादुद्विजते, मृदौ परिभवत्रासान्न सन्तिष्ठते
मूर्खान् द्वेष्टि न गच्छति प्रणयितामत्यन्तविद्वत्स्वपि ।
शूरेभ्योऽप्यधिकं बिभेत्युपहसत्येकान्तभीरूनहो
श्रीर्लब्धप्रसरेव वेशवनिता दुःखोपचर्या भृशम् ॥ ५ ॥

यावत् । रसम् आस्वादं कथमिव केनप्रकारेण वेत्तु जानातु अनुभवत्विति यावत् । यथा पराधीनोऽनुचरादिर्न सुखानुभविता तथा प्रजाधीनो नृपोऽपीति भावः । चतुर्थपादे पादत्रयवाक्यानां कारणत्वात्काव्यलिङ्गमलङ्कारः । शिखरिणी छन्दः ॥४॥

दुराराध्येति । आत्मवद्भिः स्थिरमानसैः वश्येन्द्रियैरपीति यावत् । किम्पुनरवश्येन्द्रियैरित्यर्थः राजभिर्नृपैः राजलक्ष्मीर्नृपश्रीः दुराराध्या क्लेशेन सेव्येत्यर्थः । तदेव दर्शयति कुतः प्रभृतिना—

तीक्ष्णादिति । अहो आश्चर्यम् श्रीर्लक्ष्मीः तीक्ष्णात् उग्रात् नृपात् (अपादानपञ्चम्यन्तम् उद्विजते पृथग्भवति परिभवत्रासात् परकृताऽनादरभयात् मृदौ सहनशीले अपराक्रमिणीति यावत् । नृपे न सन्तिष्ठते न स्थितिं लभते (सम्पूर्वकात्तिष्ठतेरात्मनेपदविधायकानुशासनन्तु 'समवप्रविभ्यःस्थ' इति) । मूर्खम् अज्ञम् अविचारशीलमिति यावत् । नृपं द्वेष्टि नावलम्बते, अत्यन्तविद्वत्सु भूरिविद्याशालिष्वपि प्रणयिताम् अनुरक्ततां न गच्छति नाप्नोति । शूरेभ्यः प्रबलेभ्योऽपि अधिकमतिशयं बिभेति त्रस्यति, एकान्तभीरून् अधिकभयशीलान् उपहसति तिरस्करोति । अतः लब्धप्रसरा प्राप्तावसरा वेशवनिता वाराङ्गना इव श्रीः भृशमत्यर्थं दुःखोपचर्याक्लेशेनाऽऽश्रयणीया भवतीति शेषः । श्रियस्तीक्ष्णनृपादुद्वेगे कादाचित्कस्वकर्तृकात्मकर्मविनाशसम्भावना हेतुः, क्षमाशीलनृपाधिकरणकात्मकर्तृकस्थित्यभावे परकृताऽवमानभीतिर्हेतुः, अविचारशीलनृपानाश्रयणे असत्पात्रापणशङ्कनं हेतुः विद्वत्स्वननुरागे अन्यस्मिन् तदनुरागाभावो हेतुः, शूरतोभये कादाचित्करिकरप्रापणसम्भा-

और भी—जितेन्द्रिय राजाओं द्वारा राज्यलक्ष्मी क्लेशसे सेवित होता है ।

जैसे कि-राज्यलक्ष्मी अत्यन्त उग्र राजा से अलग हो जाती है,शत्रुकृत पराभव के भय से सहनशील राजा के पास भी नहीं ठहरती और मूर्ख राजाओं से द्वेष करती है, अत्यन्त विद्वान् राजाओं से भी प्रेम नहीं करती और पराक्रमी राजाओं से भी बहुत डरती है, अत्यन्त डरपोक राजाओं का भी उपहास करती है । आश्चर्य है कि लक्ष्मी अवसर पाई हुई वाराङ्गना की तरह बहुत ही क्लेश से सेवा योग्य होती है ॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अन्यच्च । कृतककलहं कृत्वा, स्वतन्त्रेण त्वया कञ्चित् कालं व्यवहर्त्तव्यमित्यार्योपदेशः स च कथमपि मया पातकमिवाभ्युपगतः, अथवा शश्वदार्योपदेशसंस्क्रियमाणमतयः सदैवास्वतन्त्रा वयम् ।
कुतः ?—इह हि रचयन् साध्वीं शिष्यः क्रियां न निवार्यते
त्यजति तु यदा मार्गं मोहात्, तदा गुरुरङ्कुशः ।

वना हेतुः, अतिभयशोलोपहासे भयहेतुककादाचित्कान्यकरार्पणशङ्कनं च हेतुः । लक्ष्मीस्थैर्यसम्पादनार्थमवश्यमेव राज्ञा यत्नो विधेय इति भावः ।

अप्रस्तुतप्रस्तुतयोर्दीपकं तु निगद्यते । अथ कारकमेकं स्यादनेकासु क्रियासु चेत् ॥

इति दर्पणोक्तलक्षणलक्षितद्विविधदीपकमध्ये एकश्रीकर्तृकारकस्यानेकोद्वेजनादिक्रियासम्बन्धाद्द्वितीयदीपकालङ्कारेणालंकृतं चतुर्थचरणे वेशवनितेवेत्यत्रोपमाबोधकेवशब्दसद्भावादुपमालङ्कारेण चालङ्कृतं काव्यलिङ्गमित्यवसेयम् । वैदर्भी रीतिः ओजो गुणः । शार्दूलविक्रीडितं वृत्तम् ॥ ५ ॥

कृतककलहमिति । कृतकः कृत्रिमश्चासौ कलहो विवादः कृतककलहस्तं कृतककलहं कृत्रिमविवादं कृत्वा विधाय स्वं आत्मा तन्त्रं प्रधानं यस्य स स्वतन्त्रस्तेन स्वतन्त्रेण अनायत्तेन त्वया भवता किञ्चित्कालं व्यवहर्त्तव्यं वर्तितव्यम् इत्येषः आर्यादेशः चाणक्यनिर्देशः अस्तीति शेषः । स च आर्यादेश इत्यर्थः । मया आत्मना कथमपि केनापि प्रकारेण पातकमिव निन्द्यकर्मेव अभ्युपगतः स्वीकृतः । अथवा किंवा शश्वत् सर्वदा य आर्योपदेशः स शश्वदार्योपदेशस्तेन संस्क्रियमाणा विशोध्यमाना मतिर्बुद्धिर्येषां ते शश्वदार्योपदेशसंस्क्रियमाणमतयः अनवरतचाणक्यनिदेशविशोध्यमानबुद्धयः वयम् सदैव सर्वस्मिन्नेव कालेऽस्वतन्त्राः अस्वाधीनाः स्म इति शेषः ।

इहेति । इहास्मिन् संसारे साध्वीं न्याय्याम् अविरुद्धामिति यावत् क्रियां कार्यं रचयन् विदधत् शिष्योऽन्तेवासी न निवार्यते प्रतिषिध्यते गुरुभिरिति शेषः ।

और भी—'कृत्रिम विवाद करके तुम स्वतन्त्रता के साथ कुछ दिनतक वहां पर रहना'यही चाणक्य की आज्ञा है। वह पातक की तरह किसी प्रकार मुझ से स्वीकृत हुआ अथवा सर्वदा चाणक्य के उपदेश से विशुद्ध बुद्धिवाले हमलोग सर्वदा ही पराधीन रहते हैं।

इस संसारमें उत्तम कार्य करता हुआ शिष्य गुरुद्वारा रोका नहीं जाता। शिष्य मोहवश जब उत्तम पथको छोड़ता है, तब गुरु निवारण करते हैं। इस कारण विनय

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विनयरुचयस्तस्मात् सन्तः सदैव निरङ्कुशाः
परतरमतः स्वातन्त्र्येभ्यो वयं हि पराङ्मुखाः ॥ ६ ॥

(प्रकाशम्) आर्य वैहीनरे ! सुगाङ्गप्रासादमार्गमादेशय ।

कञ्चुकी—इत इतो देवः ।

राजा —(परिक्रामति)

कञ्चुकी—(परिक्रम्य) अयं सुगाङ्गप्रसादः, शनैरारोढुमर्हत्यार्यः ।

यदा स शिष्यो मोहादविवेकात् मार्गं सत्पथं त्यजति जहाति तदा गुरुः शिक्षकः अङ्कुशो निवारको भवतीति शेषः । तस्मात् विनये शिक्षकोपदेशे रुचिः प्रीतिर्येषां ते विनयरुचयः शिक्षकोपदेशप्रीतयः विनीता इति यावत् । सन्तः सदैव सर्वस्मिन्नेव निरङ्कुशाः अनिवार्याः स्वतन्त्रा इति यावत् । अतोऽस्माद्धेतोः वयं हि निश्चितं स्वातन्त्र्येभ्यः स्वाधीनताभ्यः (विरामार्थानामिति विहितपञ्चम्यन्तमिदम्) परतरम् अतिशयं पराक् परागतं मुखं येषां ते पराङ्मुखाः पराचीनाः (पराङ्मुखः पराचीन इत्यमरः) स्म, नातः परं स्वाच्छन्द्यमभिलषाम इत्यर्थः । आर्यनियोगेन किञ्चित्कायवशादेतत्स्वाच्छन्द्यमात्मनि संस्थाप्य स्वच्छन्दवद्व्यवहराम इति भावः । यथोन्मत्तगजनिवारकोऽङ्कुशस्तथा गुरुरप्यसन्मार्गगामिनिवारक इत्यर्थप्रतीत्या निवारणात्मककार्योपयोगीति गुरावङ्कुशत्वेन तदारोपणादत्र परिणामालङ्कारः । वैदर्भी रीतिः । प्रसादो गुणः । हरिणीवृत्तम् । "नसमरसला गः षड्वेदैर्हरिणी मता" इति तल्लक्षणम् ॥ ६ ॥

प्रकाशमिति । प्रकाशं व्यक्तं यथा स्यात्तथा राजा कथयतीत्यर्थः । आर्य पूज्य वैहीनरे ! कञ्चुकिन् ! सुगाङ्गप्रासादमार्गं सुगाङ्गसंज्ञकहर्म्यपथम् आदेशय येन पथा तत्र गन्तव्यं तं पन्थानं दर्शयेत्यर्थः । **परिक्रामति** । गच्छति ।

परिक्रम्य सञ्चर्य, अयम् एषः सुगाङ्गप्रासादः तन्नामकसौधः अस्तीति शेषः । आर्यः पूज्यो भवान् शनैर्मन्दं यथा तथा आरोढुमुपरिष्टाद्गन्तुमर्हति शक्नोति ।

में रुचिवाले सज्जन पुरुष सर्वदैव निरङ्कुश होते हैं, इस हेतु हमलोग स्वाधीनता से अत्यन्त विमुख हैं ॥ ६ ॥

(जोर से) आर्य वैहीनरे ! सुगाङ्गप्रसादका रास्ता बताओ ? ।

कञ्चुकी—इधर, इधर आइए ? ।

राजा—(घूमता है)

कञ्चुकी—(घूमकर) यही सुगाङ्गप्रसाद है, इसपर आप धीरे से चढें ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राजा—(नाट्येनारुह्य दिशोऽवलोक्य) अहो ! शरत्समयसम्भृतशोभाविभूतीनां दिशामतिरमणीयता !! कुतः !—

शनैः शान्ता भूताः सितजलधरच्छेदपुलिनाः
समन्तादाकीर्णाः कलविरुतिभिः सारसकुलैः ।
चिताः चित्राकारैर्निशि विकचनक्षत्रकुमुदैः
नभस्तः स्यन्दन्ते सरित इव दीर्घा दश दिशः ॥ ७ ॥

नाट्येति । नाट्येन नटोचितव्यापारविशेषेण आरुह्य सौधोपरिप्रदेशं प्राप्य दिशः ककुभः अवलोक्य दृष्ट्वा । अहो आश्चर्यम् शरदेव समयः कालः शरत्समयस्तेन सम्भृतोपचिता शोभा विभूतयो यासां यास्तथोक्तास्तासां शरत्समयसम्भृतशोभाविभूतीनां दिशामाशानाम् अतिरमणीयता प्रभूतसौन्दर्यम् । तदेव दर्शयति कुत इत्यादिना ।

शनैरिति । सितजलधरच्छेदाः पुलिनानीव यासां तां सितजलधरच्छेदपुलिनाः धवलजलदखण्डसिकतामयभूमयः शनैः क्रमेण शान्ताः वर्षापगमेन निर्मला भूता जाता, कला मधुरा विरुतिः शब्दो येषां ते तथोक्तास्तैः कलविरुतिभिः अव्यक्तमधुरशब्दैः सारसकुलैः सारसपक्षिसमूहैः समन्तात्सर्वतः आकीर्णा आक्रान्ता व्याप्ता इति यावत् निशि रात्रौ चित्राकारैः अनेकविधैः विकचानि विकसितानि नक्षत्राणि कुमुदानीवेति विकचनक्षत्रकुमुदानि तैर्विकचनक्षत्रकुमुदैः विकसितकुमुदसदृशनक्षत्रैः चिता व्याप्ता दीर्घा अतिविस्तृता दश दिश आशाः सरितो नद्यश्च नभस्तः आकाशात् श्रावशमासाच्च स्यन्दन्ते निस्सरन्ति । सरितामप्युक्तविशेषणानि बोध्यानि, तत्र सरित्पक्षे सितजलधरेति विशेषणस्य सितजलधरच्छेदमिव पुलिनं सैकतं यासामित्यर्थः, इतरविशेषणानान्तूक्त एवार्थः । नभश्शब्दः श्रावणमासाकाशयोर्वाचकः तदुक्तं कोशे—"नभः श्रावणिकश्च सः" । "नभोऽन्तरिक्षं गगनम्" इति । वर्षासु मेघव्याप्तत्वात् निरतिशयसलिलाप्लुतत्वाच्च न दिक्सरिताम् स्फुटतया प्रतीतिः

राजा—(विचित्र ढंग से चढ़कर और चारों तरफ देखकर) अहा ! शरत्समय की बढ़ी हुई शोभा तथा सम्पत्तिशाली दिशाओंकी कैसी रमणीयता है । क्यों कि—

सिकतामय भूमि के समान स्वच्छमेघखण्डवाली दिशायें निर्मल और मधुरशब्द करनेवाले सारस पक्षियों से अच्छी तरह व्याप्त हो गयीं । रात्रि में उदीयमान चन्द्रमा तथा तारागणों से शोभित और अत्यन्त विस्तृत दस दिशायें नदी की तरह आकाश और श्रावण मास से पृथक् होती हैं ॥ ७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अपि च—अपामुद्वृत्तानां निज उपदिशन्त्या स्थितिपदं
दधत्याशालीनामवनतिमुदारे सति फले ।
मयूराणामुग्रं विषमिव हरन्त्या मदमहो !
कृतः कृत्स्नस्यायं विनय इव लोकस्य शरदा ॥ ८ ॥

शरदि तु तथा प्रतीतिर्भवतीति भावः । एतत्शारदगुणप्रशंसया चन्द्रगुप्तेन निजजैत्रयात्रासन्नाहसमयः सूचितः । वक्ष्यति चाग्रे सोऽयं व्यायामकालो नोत्सवकाल इति । शरदृतौ दिक्सरितोभयवर्णनस्य प्रसिद्धत्वादिवशब्दावर्तनेन सरित इव दिशो दिश इव सरित इति परस्परोपमानोपमेयभावप्रतीत्या श्लोकेऽस्मिन् उपमेयोपमानामालङ्कारः । तदुक्तं साहित्यदर्पणे—

पर्यायेण द्वयोरेतदुपमेयोपमा मता । इति ।

सा च नभःपदस्य श्लिष्टत्वेन श्लेषानुप्राणिता । पाञ्चाली रीतिः । प्रसादो गुणः । शिखरिणी छन्दः ॥ ७ ॥

अपामिति । उद्वृत्तानामुपचितानाम् (उन्मार्गप्रवृत्तानामिति ध्वनिः) अपां जलानां निजं प्राकृतिकं स्थितिपदं स्थानं (मर्यादामिति ध्वनिः) उपदिशन्त्या घोषयन्त्या शिक्षयन्त्येति यावत् । उदारे प्रभूते फले शस्यात्मके विद्यात्मके च सति शालीनां धान्यानाम् अवनतिं नम्रत्वम् अधोमुखतामिति यावत् । दधत्या कुर्वन्त्या उग्रं तिग्मं विषमिव हालाहलमिव मयूराणां बर्हिणां मदम् अवलेपं हरन्त्या शरदा शरदृतुना कृत्स्नस्य सर्वस्य लोकस्य भुवनस्य अयमेष विनय उपदेश कृत इव अहो आश्चर्यम् । शरदृतोरागमनात्सर्वेऽभिमानपरित्यागपूर्वकं शान्ता जाता इत्यर्थः । विषमिवेत्यत्र सादृश्यार्थकेवशब्दस्य विषरूपोपमानोपमेयस्य मदस्योग्रत्वरूपसाधारणधर्मस्य चाभिधानात्पूर्णोपमालङ्कारः, विनयः कृत इवेत्यत्राभेदसंसर्गकोपमानप्रकारकोपमेयविशेष्यकोत्कटैककोटिकसंशयवाचकत्वाद्वाच्योत्प्रेक्षालङ्कारः । विनये हेतुभूतस्य पादत्रयस्य वाक्यार्थत्वात्तयोः काव्यलिङ्गालंकारयोगः । वैदर्भी रीतिः । प्रसादगुणः । शिखरिणी छन्दः ॥ ८ ॥

और भी—बढ़े हुए जलके प्राकृतिक स्थान को बताता और अधिक फल होने के कारण धान्यों की नम्रता को करता और कठोर विष की तरह मयूरों का मद दूर करता हुआ शरदृतु समस्त लोगों का उपदेशक सा मालूम होता है ॥ ८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain. Digitizagtion by eGangotri

अपि च—भर्त्तुस्तथा कलुषितां बहुवल्लभस्य
मार्गे कथञ्चिदवतार्य तनूभवन्तीम् ।
सर्वात्मना रतिकथाचतुरेव दूती
गङ्गां शरन्नयति सिन्धुपतिं प्रसन्नाम् ॥ ९ ॥

(समन्तान्नाट्येनावलोक्य) अये ! कथमप्रवृत्तकौमुदीमहोत्सवः ?

भर्त्तुरिति । शरत् तन्नामा ऋतुः रतिकथायां सरसालापे चतुरा पटवी रतिकथाचतुरा सरसालापपट्वी दूती सञ्चारिकेव तथा तादृक् कलुषोऽस्त्यस्या इति कलुषिता तां कलुषितां (तारकादिभ्य इतीतच्) वर्षाधिक्येन पङ्काधिक्यादनिर्मलां (पक्षान्तरे) भर्त्तुरनेकभार्यत्वेन दोषित्वात्सेर्ष्यामित्यर्थः । अत एव तनूभवन्तीं वर्षापगमेनातिक्षीणां (पक्षान्तरे) कान्तवियोगजाधितः कृशशरीरां बह्व्यो वल्लभा यस्य स बहुवल्लभस्तस्य बहुवलभस्यअनेकभार्यस्य भर्त्तुः स्वामिनः पत्युश्च मार्गे स्वखातप्रदेशे मर्यादायाञ्च कथञ्चित्क्लेशतोऽवतार्य संस्थाप्य समुद्रगामिमार्गे प्रवाहयन्ती (पक्षान्तरे) पतावुत्कण्ठितां विधायेत्यर्थः । प्रसन्नां स्वच्छसलिलां (पक्षान्तरे) प्रसन्नहृदयां गङ्गां सुरसरितं नारीञ्च सिन्धु पतिरिव सिन्धुपतिस्तं सिन्धुपतिं समुद्रं (पक्षान्तरे) सिन्धुरिव पतिः सिन्धुपतिस्तं सिन्धुपति सिन्धुसदृशगाम्भीर्यशालिनं प्रतिं स्वामिनं सर्वात्मना सर्वप्रकारेण नयति प्रापयति । सरसालापपट्वी यथाऽनेकभार्यस्य नायकस्यागसा संक्रुद्धां विरहिणीं नायिकां मधुरकोमलालापैः प्रसन्नां कृत्वा पतिं प्रापयति तथा शरद् गङ्गां सिन्धुं प्रापयतीति भावः ॥

पटुदूतीवोत्कृष्टविष्णुगुप्तनीतिर्नन्दसचिवबुद्धिपरिग्रहणात्सेर्ष्यां संशयापन्नांनन्दश्रियमतिगाम्भीर्यवन्तं मौर्यम्प्रापयतीत्यर्थस्य ध्वननाच्छ्लोकेऽस्मिन्नर्थश्लेषानुप्राणितपूर्णोपमालङ्कारः । (एषोऽपि बीजावमर्शः) ॥ ९ ॥

समन्तादिति । समन्तात्सर्वतश्चतुर्दिक्ष्वित्यर्थः नाट्येन नटोचितव्यापारेण

और भीः—

जैसे सरस आलाप करने में चतुर दूती स्वामी के अनेक दोष से क्रोधित और पति के वियोगसे मानसी व्यथा के कारण कृश शरीर वाली नायिका को बहुत यत्न से पति में उत्कण्ठित बनाकर प्रसन्न हृदय कर देती और समुद्र के सदृश गम्भीर स्वामी के निकट पहुंचाती है, उसी तरह शरदृतु, अधिक वर्षा होने से मलिन जलवाली और वर्षा समय बीतने पर अल्प जल वाली तथा समुद्रगामी मार्ग में स्थित निर्मल जलवाली गङ्गा को सर्वभावसे पतिसदृश समुद्र के समीप पहुंचाती है ९

(विचित्र ढङ्ग से चारों तरफ देखकर) अये ! आज का दिन कौमुदी महोत्सव से

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कञ्चुकी—देव ! अथ किम् ? । आघोषितो देवस्याज्ञया कुसुमपुरे कौमुदीमहोत्सवः ।

राजा—आर्य्य ! तदेवं किं न परिगृहीतमस्मद्वचनं पौरजनेन ?

कञ्चुकी—(कर्णौ पिधाय) देव ! शान्तं पापं, शान्तं पापं, पृथिव्यामस्खलितपूर्वं देवस्य शासनं, कथं पौरेषु स्खलितुमर्हति ?

राजा—आर्य्य वैहीनरे ! तत् कथमप्रवृत्तकौमुदीमहोत्सवमधुनाऽपि कुसुमपुरं पश्यामि ? पश्य,—

भङ्ग्यात्मकेनेत्यर्थः अवलोक्य दृष्ट्वा कथं कस्मात्कारणात् अप्रवृत्तोऽनारब्धः कौमुदीमहोत्सवः शारदपूर्णचन्द्रपर्वोत्सवो यस्मिन् सोऽप्रवृत्तकौमुदीमहोत्सवः अनारब्धशारदपूर्णचन्द्रपर्वोद्भवः दिवसो दृश्यत इत्यनयोः शेषः ।

देवेति । देव राजन् अथ किम् ? एवमित्यर्थः । देवस्य भवतः आज्ञया निदेशेन कुसुमपुरे तदाख्यनगरे कौमुदीमहोत्सवः शारदपूर्णचन्दपर्वोद्भवः आघोषितः प्रख्यापितः ।

कर्णाविति । कर्णौ श्रवणौ पिधाय आवृत्य ब्रवीतीति शेषः । (शान्तं पापमिति वीप्सायां द्विरुक्तिः) पौरैर्नास्मद्वचनं गृहीतमिति न वाच्यमित्यर्थः । "शान्तं पापमनिर्वाच्ये" इत्युक्तेः । पृथिव्यां भूमौ देवस्य भवतः शासनं निदेशः, अस्खलितपूर्वं न स्खलितं नास्वीकृतं सम्प्रत्यपि न स्खलितमस्तीत्यर्थः । तदा पौरेषु पुरवासिजनेषु कथं केन प्रकारेण स्खलितुं त्यक्तुमर्हति योग्यमिति ।

तदिति । तत्तस्मात् कथं केन हेतुना अमुना साम्प्रतम् अप्रवृत्तकौमुदीमहोत्सवम् अनारब्धशारदपूर्णचन्द्रपर्वोद्भवं कुसुमपुरं तदाख्यनगरं पश्यामि प्रेक्षे ।

शून्य क्यों देख पड़ता है ?

कञ्चुकी—राजन् ! और क्या ? आपकी आज्ञा से कुसुमपुर में कौमुदीमहोत्सव की घोषणा की गयी थी ।

राजा—तब पुरवासियों ने मेरे वचन को क्यों नहीं माना !

कञ्चुकी—(दोनों कानों को ढांककर) राजन् ! यह कहने योग्य नहीं है, पृथिवी में आप पहिले से ही अमाननीय नहीं है, फिर पुरवासियों में किस तरह अमाननीय हो सकते हैं ।

राजा—तब किस कारण इस समय तक मैं कुसुमपुर को कौमुदीमहोत्सव से शून्य देखता हूं ? देखो—

 Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धूर्तैरन्वीयमानाः स्फुटचतुरकथाकोविदैर्वेशनार्यो
नालङ्कुर्वन्ति रथ्याः पृथुजघनभराक्रान्तिमन्दैः प्रयातैः
अन्योन्यं स्पर्द्धमाना न च गृहविभवैः स्वामिनो मुक्तशङ्काः
साकं स्त्रीभिर्भजन्ते विधिमभिलषितं पार्वणं पौरमुख्याः॥१०॥

कञ्चुकी—देव ! एव मेतत् ।

धूर्तैरिति । वेशनार्यो वारस्त्रियः स्फुटाः सुस्पष्टाश्चतुरा निपुणाश्च ताः कथाः आभाषणानि इति स्फुटचतुरकथास्तासु कोविदाः विपश्चित इति स्फुटचतुरकथाकोविदास्तैः स्फुटचतुरकथाकोविदैः सुस्पष्टनिपुणभाषणविप्रश्चिद्भिः धूर्तैर्वञ्चकैः अन्वीयमानाः अनुयायमानाः सत्यः पृथू विशाले च ते जघने पृथुजघने तयोर्भरो भारस्तस्याक्रमणं तया मन्दैः सालसैः पृथुजघनभराक्रान्तिमन्दैः गुरुकटिपुरोभागभाराक्रमणसालसैः प्रयातैर्गमनैः रथ्याः प्रशस्तराजमार्गान् नालङ्कुर्वन्ति न शोभयन्ति । च शब्दोऽत्र किञ्चेत्यर्थकः- किञ्च पुरे भवा पौरास्तेषां मुख्याः पौरमुख्याः पुरवासिप्रधानाः स्वामिन एश्वर्यशालिनः गृहस्वामिनो वा गृहविभवैर्गृहसम्पत्तिभिः अन्योऽन्यं परस्परं स्पर्द्धमानाः जेतुकामाः मुक्ता शङ्का यैस्ते मुक्तशङ्काः नृपादेशात्त्यक्तभयाः सन्तः स्त्रीभिर्नारीभिः साकं सह अभिलषितम् ईप्सितं पार्वणं शारदपूर्णचन्द्रनिमित्तकं विधिं महोत्सवं व भजन्ते न श्रयन्ते । उपपतिभिरनुगम्यमाना वारस्त्रियो राजपथान् मन्दगतिभिर्न भूषयन्ति पुरवासिनश्च स्वस्त्रीभिः सह कौमुदीमहोत्सवं नाश्रयन्तीति भावः । कस्मिंश्चित्प्रस्तुते महोत्सवे वारस्त्रीणां राजमार्गे गमनं पुरवासिनां स्त्रीभिः सह विहरणं च स्वाभाविकमिति स्वभाववर्णनादत्र स्वभावोक्तिनामालंकारः । उक्तञ्च लक्षणं दर्पणे यथा—

स्वभावोक्तिर्दुरूहार्थस्वक्रियारूपवर्णनम् ।

स्रग्धरानाम छन्दः ॥ १० ॥

एवमिति । हे देव महाराज ! एतत् कौमुदीमहोत्सवाविधानम् एवं भवता यथोक्तं तथैवेत्यर्थः ।

बातें करने में निपुण धूर्तों से अनुगम्यवान वेश्यायें मोटे जघनके भार से मन्दगमनों द्वारा राजमार्गों को सुशोभित नहीं करतीं, सम्पत्तिशाली प्रधान परिजन घरकी सम्पत्तियों द्वारा परस्पर जीतनेकी कामना करते हुए स्त्रियों के साथ कौमुदीमहोत्सव नहीं करते ॥ १० ॥

कञ्चुकी—राजन् ! यह ऐसा ही है ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राजा—किमेतत् ?

कञ्चुकी—देव ! अत इदम्—" ।

राजा—आर्य्य ! स्फुटमभिधीयताम् ।

कञ्चुकी—"—देव ! प्रतिषिद्धः कौमुदीमहोत्सवः ।

राजा—(सक्रोधम्) आः केन ?

कञ्चुकी—नातः परमस्माभिर्देवो विज्ञापयितुं शक्यते ।

राजा—न खल्वार्य्येण चाणक्येनापहृतः प्रेक्षकाणामतिशयरमणीयश्चक्षुषो विषयः ?

कञ्चुकी—देव ! कोऽन्योजीवितुकामो देवस्य शासनमुल्लङ्घयिष्यति

अत इति । अतोऽस्मादभिधास्यमानचाणक्यकर्तृकप्रतिषेधात्मकात्कारणात् इदमुक्तोत्सवाविधानमित्यर्थः ।

नातः परमिति । अतोऽस्मात्परं विशेषवचनम् अस्माभिर्देवो भवान् विज्ञापयितुं बोधयितुं न शक्यते न युज्यते । चाणक्यस्यातिक्रोधित्वादस्मदभिधानाकर्णनादनिष्टसम्भावनेति भावः ।

न खल्विति । आर्येण श्रेष्ठेन चाणक्येन कौटिल्येन प्रेक्षकाणां अतिशयेन रमणीयोऽतिशयरमणीयः अति मनोज्ञ इत्यर्थः । चक्षुषो नेत्रस्य विषयः दृश्यपदार्थ इत्यर्थः । न खल्वपहृतो नैव प्रतिषिद्धः । चाणक्यव्यतिरिक्तजनादेशादेवोत्सवप्रतिषेधस्तर्क्यते न त्वार्यचाणक्यनिदेशादिति भावः ।

कोऽन्य इति । देव राजन् ! अन्यश्चाणक्यव्यतिरिक्तो जीवितुकामो जीवनाभिलाषी कः किन्नामधेयः पुरुषः देवस्य भवतः शासनं निदेशम् उल्लंघयिष्यति अतिक्रमिष्यति । जीवितुं काम इच्छा यस्य स जीवितुकामः । 'लुम्पेदवश्यमः कृत्ये तुंकाममनसोरपि' इति तुमुनो मकारलोपः ।

राजा—यह क्या ?

कञ्चुकी—इस कारण ऐसा हुआ ।

राजा—आर्य ! स्पष्ट कहो ।

कञ्चुकी—कौमुदीमहोत्सव रोक दिया गया ।

राजा—(क्रोध के साथ) आः ! किसने रोका ?

कञ्चुकी—मैं इससे विशेष कुछ नहीं कह सकता ।

राजा—आर्य चाणक्यने तो देखनेवाला का दृश्य पदार्थ अपहरण नहीं किया

कञ्चुकी—राजन् ! कौन दूसरा जीने की कामनावाला प्राणी आपकी आज्ञा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राजा—शोणोत्तरे ! उपवेष्टुमिच्छामि ।

प्रतीहारी—देव ! एदं सिंहासणं, उपविसदु देवो [देव ! एतत् सिंहासनम् , उपविशतु देवः]

राजा—(नाट्येनोपविश्य) आर्य वैहीनरे ! आर्य्यचाणक्यं द्रष्टुमिच्छामि ।

कञ्चुकी—यदाज्ञापयति देवः (इति निष्क्रान्तः)

(ततः प्रविशत्यासनस्थः स्वभवनगतः कोपानुविद्धां चिन्तां नाटयन् चाणक्यः)

चाणक्यः—(आत्मगतम्) कथं स्पर्द्धते मया सह दुरात्मा राक्षसहतकः ! कुतः ?—

तत इति । ततस्तदनन्तरं कञ्चुकिनिष्क्रमणानन्तरम् आसने आस्तरणे तिष्ठतीत्यासनस्थः आस्तरणारूढः स्वस्य भवनं स्वभवनं तद्गत इति स्वभवनगतो निजगृहप्राप्तश्चाणक्यः कौटिल्यः कोपेन क्रोधेनानुविद्धा तां कोपानुविद्धां क्रोधसहितामित्यर्थः । चिन्तां स्मृतिं नाटयन् अभिनयन् कुर्वन्नित्यर्थः प्रविशति रङ्गस्थानमित्यादिः ।

आत्मगतमिति । आत्मगतं (क्रियाविशेषणमिदम्) अस्पष्टं यथा तथा मनस्येव ब्रवीतीत्यर्थः । दुष्ट आत्मा जीवो यस्यासौ दुरात्मा दुष्टजीवो राक्षसहतकः कुत्सितराक्षसः मया आत्मना सह सार्धं कथं कुतः केनप्रकारेण वा स्पर्द्धते मत्प्रयासवैफल्यमिच्छतीत्यर्थः । परोपकारित्वात्प्रशस्तधीशालित्वाच्च मान्योऽपि शत्रुपक्षावलम्बनात्तत्तुल्यत्वाद्दुरात्मेति निष्ठुरोक्तिः ।

का उल्लंघन कर सकेगा ।

राजा—शोणोत्तरे ! मैं बैठना चाहता हूं ।

प्रतीहारी—राजन् ! यह सिंहासन है, आप बैठिए ।

राजा—(विचित्रढंग से बैठकर) आर्य वैहीनरे ! मैं आर्य चाणक्य को देखना चाहता हूं ।

कञ्चुकी—आपकी जो आज्ञा । (यह कहकर चला जाता है) । (तब घर में आसनपर बैठा हुआ क्रोध युक्त चिन्ता करता हुआ चाणक्य प्रवेश करता है) ।

चाणक्यः—(मनहीं मन) दुरात्मा राक्षस मेर साथ किस प्रकार तुलना करना चाहता है । क्यों कि—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कृतागाः कौटिल्यो भुजग इव निर्य्याय नगरात्,
यथा नन्दं हत्वा नृपतिमकरोन्मौर्य्यवृषलम् ।
तथाऽहं मौर्य्येन्दोः श्रियमपहरामीति कृतधीः,
प्रभावं मद्बुद्धेरतिशयितुमेष व्यवसितः ॥ ११ ॥

(प्रत्यक्षवदाकाशे लक्ष्यं बद्ध्वा) राक्षस ! राक्षस ! विरम्यतामस्माद्दुर्व्यवसितात् ।

कृतागा इति । कृतं विहित.मागोऽनिष्टं यस्य स कृतागाः विहितानिष्टो भुजग इव सर्प इव कृतं विहितमागोऽप्रयासनानुपवेशनपूर्वकबहिर्निष्कासनात्मकापराधो यस्य स कृतागाः कृतापराध इत्यर्थः । कौटिल्यश्चाणक्यो नगरात्कुसुमपुरात् निर्याय निःसृत्य यथा नन्दं तदाख्यनृपं हत्वा विनाश्य मौर्यवृषलं चन्द्रगुप्तं नृपतिम्भूपतिमकरोत् व्यदधात्, तथा अहं मौर्य इन्दुरिव मौर्येन्दुस्तस्य मौर्येन्दोः चन्द्रगुप्तस्य श्रियं राज्यलक्ष्मीम् अपहरामि आत्मसात्करोमि इतीत्येवं कृता धीर्येन स कृतधीः कृतबुद्धिः एष राक्षसः मद्बुद्धेर्मन्मतेः प्रकर्षं सामर्थ्यम् अतिशयितुमतिवर्तितुं व्यवसितः समुद्यतः अस्तीति क्रियाशेषः । नन्दं विनाश्य चन्द्रगुप्तो यथा चाणक्येन राजासने स्थापितस्तथा मयापि मलयकेतुर्मौर्यं हत्वा राजासने स्थाप्य इति बुद्ध्या कार्येऽस्मिन्प्रवृत्तोऽयमिति भावः । भुजग इवेत्यत्रेवशब्दसत्वात् यथादितथान्तस्य नन्दं हत्वा मौर्यं वृषलमिव मौर्यवृषलं हत्वा मलयकेतुं नृपतिं विधास्यामीत्यर्थस्य स्फुटत्वात् मौर्यवृषलमिव मलयकेतुमित्यत्रेवशब्दस्य प्रतीयमानत्वाच्चोपमालङ्कारः । शिखरिणी छन्दः ॥ ११ ॥

राक्षसेति । वीप्सायां द्विरुक्तिः । भो राक्षस सुबुद्धे । अस्मात् दुर्दुष्टं व्यवसितं व्यापारस्तस्माद्दुर्व्यवसितात् वृषलराज्यलक्ष्मीहरणात्मककष्टव्यापारादित्यर्थः । विरम्यतां निवृत्यताम् । दुर्व्यवसितादित्यत्र पञ्चमी तु (विरामार्थानामुपसंख्यानमित्यनेनापादानसंज्ञायाम् अपादाने पञ्चमीत्यनेन बोध्या) ।

अपराधी सर्प की तरह चाणक्य ने नगर (कुसुमपुर) से बाहर जाकर जैसे नन्द को मारकर चन्द्रगुप्त को राजा बनाया । उसी तरह मैं चन्द्रगुप्त की राज्यलक्ष्मी को अपहरण करता हूं । ऐसे विचारवाला यह राक्षस मेरीबुद्धि के प्रभाव को जीतने के लिये तैयार है ॥ ११ ॥

(प्रत्यक्षकी तरह आकाश में राक्षसको स्थितजानकर) राक्षस ! राक्षस ! इस दुष्ट कार्य से हट जाओ ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उत्सिक्तः कुसचिवदृष्टराज्यतन्त्रो,
नन्दोऽसौ न भवति चन्द्रगुप्त एषः।
चाणक्यस्त्वमपि च नैव केवलं ते,
साधर्म्यंमदनुकृतेः प्रधान वैरम् ॥ १२ ॥

(विचिन्त्य) अथवा, नातिमात्रमस्मिन् वस्तुनि मया मनः खेदयितव्यम् । कुतः ?—

उत्सिक्त इति । असौ एष नन्दस्तदाख्यो नृपः उत्सिक्तः उद्रिक्तो गर्वित इति यावत् कुत्सिताः सचिवाः कुसचिवास्तैः कुसचिवैर्दृष्टं राज्यतन्त्रं यस्य स कुसचिवदृष्टराज्यतन्त्रः, भवद्विधकुत्सितामात्यावलोकितराज्यभारः अस्तीति शेषः । एषोऽयं चन्द्रगुप्तो मौर्यो न भवति नन्दसदृशो नास्तीत्यर्थः । त्वमपि भवानपि चाणक्यः कौटिल्यो नैव नास्त्येवेत्यर्थः । केवलं प्रधानवैरं प्रभूतशत्रुभावः परिवृद्धमत्सरः ते तव मदनुकृतेर्मदनुकरणस्य साधर्म्यम् सादृश्यं नास्मत्सादृश्ये तव बुद्धिप्रकर्षादिरूपस्सदृशधर्मोऽस्तीत्यर्थः । नन्देऽभिमानकुमन्त्र्यवेक्षितराज्यभारत्वसत्त्वाद्राज्यंभ्रष्टं मौर्ये तदभावान्नास्य राज्यभ्रंशो भवितुमर्हति तथा च चाणक्येनोन्मूलितो नन्द इव मयाप्युन्मूलितश्चन्द्रगुप्तः स्यादित्यभिप्रेत्य मया सह ते स्पर्द्धा नतूभ्रधीमाहात्म्यादिति भावः । उत्सिक्तकुसचिवेति विशेषणद्वयस्य साभिप्रायत्वेनाभिधानादत्रालङ्कारः परिकरो नाम ।

'उक्तिर्विशेषणैः साभिप्रायैः परिकरो मतः ।'. इतिदर्पणोक्तवचनात् ।

नन्दस्याभिमानकुमन्त्र्यवेक्षितराज्यत्वेन मौर्यस्यातथात्वेन नन्दोन्मूलनसमर्थचाणक्यवद्राक्षसस्य मौर्योन्मूलनसामर्थ्यासत्वेन च न्यूनत्वेन वर्णनादत्र न्यूनत्वात्मको व्यतिरेकालङ्कारद्वयस्य मिथोऽनपेक्षया तिल-तण्डुलवत्संसृष्टिरिति । पद्यमिदं प्रहर्षिणीनामछन्दसा निबद्धम् ।

त्र्याशाभिर्मनजरगाः प्रहर्षिणीयमित्युक्तलक्षणात् ॥ १२ ॥

अथवेति । किम्वा अस्मिन्वस्तुनि राक्षसकर्तृकमौर्योन्मूलने मया आत्मना अतिक्रान्तो मात्रा प्रमाणं यस्मिन्कर्मणि तदतिमात्रं (क्रियाविशेषणमिदम्) अति-

---

वह राजा नन्द अभिमानी था और तेरे जैसे दुष्ट मन्त्रियों के अधीन राज्यभार धारण किये था, यह चन्द्रगुप्त वैसा नहीं है । तुम चाणक्य नहीं हो, हमारे अनुकरण का सादृश्य करना ही मेरे साथ तुम्हारी प्रधान शत्रुता है ॥ १२ ॥

(विचार कर) अथवा इस कार्य में हमको खेद नहीं करना चाहिये । क्योंकि—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizaqtion by eGangotri

मद्भृत्यैः किल नाम पर्वतसुतो व्याप्तः प्रतिष्ठान्तरैः,
उद्युक्ताश्च नियोगसाधनविधौ सिद्धार्थकाद्याः स्पशाः ।
कृत्वा सम्प्रति कैतवेन कलहं मौर्येन्दुना, राक्षसं,
भेत्स्यामि स्वमतेन, भेदकुशलो ह्येष प्रतीपं द्विषः ॥ १३ ॥

शयं यथा स्यात्तथेत्यर्थः । मनश्च न खेदयितव्यम् न क्षोभास्पदं विधेयमित्यर्थः ।

मद्भृत्यैरिति। मन्निदेशोऽन्तरेऽभ्यन्तरे येषां ते तथोक्तास्तैः प्रतिष्ठान्तरैः, मन्निदेशाभ्यन्तरैः यद्वा प्रतिष्ठा नामख्यापनमन्तराऽन्तर्हिता तिरोहितेति यावत् । येषां ते तथोक्तास्तैः प्रतिष्ठान्तरैः अलक्षिताकारैः (प्रविष्टान्तरैरिति पाठे) प्रविष्टमायत्तीकृतमन्तरन्तःकरणं मानसमिति यावत् । यैस्ते तथोक्तास्तैः प्रविष्टान्तरैरायत्तीकृतारिमानसैरित्यर्थः, मद्भृत्यैरस्मदनुचरैः भागुरायणप्रभृतिभिः पर्वतस्य तदाख्यनृपतेः सुतः पुत्रः मलयकेतुरित्यर्थः । व्याप्तः मन्निदेशानुसारेण परिवृतो वश्यः । तां प्रापित इत्यर्थः, किल निश्चितं नाम सम्भावनायाम् । सिद्धार्थक आद्यः प्रथमो येषां यस्मिन् वा ते सिद्धार्थकाद्याः सिद्धार्थकप्रमुखा इत्यर्थः । स्पशा दूता नियोगस्य निदेशस्य साधनं सम्पादनं तदेव विधिर्व्यापारस्तस्मिन् नियोगसाधनविधौ मलयकेतुराक्षसोभयभेदनरूपनिदेशसम्पादनात्मकव्यापारे इत्यर्थः । उद्युक्तास्तत्पराः सन्तीति शेषः । सम्प्रति साम्प्रतम् एष भेदे पार्थक्ये कुशलो निपुणो भेदकुशलः पार्थक्यविधानपटुः अहं कैतवेन व्याजेन मौर्य इन्दुरिव मौर्येन्दुः मौर्यश्चासाविन्दुः मौर्येन्दुरिति वा तेन मौर्येन्दुना चन्द्रगुप्तेन सहेत्याक्षिप्तो बोध्यः सहार्थे तृतीयाविधानात्, कलहं विवादं कृत्वा विधाय प्रतीपं प्रतिकूलं राक्षसं नन्दसचिवं स्वमतेन स्वबुद्ध्या द्विषः शत्रोर्मलयकेतोरित्यर्थः । सकाशात् भेत्स्यामि पृथक् करिष्यामि । भागुरायणप्रभृतिद्वारा मलयकेतोर्वशीकृतत्वाद्राक्षसमलयकेतुभेदने सिद्धार्थकादेर्नियोजितत्वाच्च चन्द्रगुप्तेन सह कृतमिथ्याविवादोऽहं प्रयासमन्तरैव राक्षसमलयकेत्वोर्विरोधं सम्पादयिष्यामीत्यर्थः स्वविचारेणैव राक्षसो भेदकुशलो नत्वस्य ममेव बुद्धिबलं सामग्रीप्रभूतत्वञ्चेति भावः ।

पर्वतकपुत्र मलयकेतु गुप्तरूप धारण करने वाले भागुरायण आदि हमारे नौकरों द्वारा निश्चय ही वश में कर लिया जायगा और सिद्धार्थक आदि राक्षस तथा मलयकेतु दोनों में परस्पर भेद रूप कार्य करने में तत्पर ही हैं । भेद कराने में चतुर मैं भी छल से चन्द्रगुप्त के साथ विवाद करके प्रतिकूल (विरुद्ध) राक्षस को मलयकेतु से अपनी बुद्धि द्वारा भेदन करूंगा ॥ १३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कञ्चुकी—(प्रविश्य) कष्टं खलु सेवा नाम ! कुतः ?—

भेतव्यं नृपतेस्ततः सचिवतो राज्ञस्ततो वल्लभा—
दन्येभ्यश्च वसन्ति येऽस्य भवने लब्धप्रसादा विटाः ।
दैन्यादुन्मुखदर्शनापलपनैः पिण्डार्थमायास्यतः,
सेवां लाघवकारिणीं कृतधियः स्थाने श्ववृत्तिं विदुः॥१४॥

(परिक्रम्यावलोक्य च) इदमार्य्यचाणक्यस्य गृहं यावत् प्रविशामि

अपायाभावतः प्राप्तिर्नियताप्तिस्तु निश्चिता ।

इत्युक्तलक्षणादियं नियताप्तिः । अत्र मौर्येन्दुनेत्यत्र कर्मधारयोपमितसमासद्वयसम्भवादुपमाख्यो रूपकाख्यो वाऽलङ्कारो बोध्यः । गौडी रीतिः । ओजो गुणः । शार्दूलविक्रीडितं वृत्तम् ॥ १३ ॥

कष्टमिमि । सामान्ये नपुंसकम् । सेवा परकीया परिचर्या कष्टं खलु क्लेशरूपैवेत्यर्थः ।

भेतव्यमिति । प्राक् नृपतेः क्षितिपतेः सकाशात् भेतव्यं शङ्कितव्यं ततस्तदुत्तरं सचिवतः प्रधानामात्यात् भेतव्यं ततस्तदुत्तरं राज्ञो भूपतेर्वल्लभात् प्रियजनात् भेतव्यं ततोऽस्य राज्ञो भवने गृहे ये लब्धः प्राप्तः प्रसादोऽनुग्रहो यैस्ते लब्धप्रसादाः प्राप्तानुग्रहा विटा धूर्ता वसन्ति तिष्ठन्ति तेभ्योऽन्येभ्यश्च जनेभ्यः सकाशात् भेतव्यं शङ्कितव्यम् । कृता शिक्षिता धीर्बुद्धिर्येषां ते कृतधियः शिक्षितबुद्धयो विद्वांस इत्यर्थः । दीनस्य भावो दैन्यं तस्माद्दैन्यात् निर्द्धनत्वाद्धेतोः उत् ऊर्ध्वं मुखं यस्मिन्कर्मणि तदुन्मुखम् उद्ग्रीवं यथा स्यात्तथा दर्शनानि अपलपनानि च तैः उन्मुखदर्शनापलपनैः उद्ग्रीवप्रेक्षणकाकुभाषणैः पिण्डार्थमुदरसंरक्षणार्थम् आयास्यतः क्लेशं कुर्वतो जनस्य लघोर्भावो लाघवं तत्करोति तच्छीला लाघवकारिणीं लघुतासम्पादिनीं सेवां शुश्रूषां श्ववृत्तिं कुक्कुरवृत्तिं विदुः ज्ञायन्ते । यथा श्वा स्वो-

---

कञ्चुकी—(प्रवेश कर) सेवा अत्यन्ततकलीफ देनेवाली वस्तु होती है। क्योंकि—पहले राजा से भय करना चाहिये-तब मन्त्री से, तब राजाके प्रियपात्र से—तब और जितने राजा के घरमें रहनेवाले कृपापात्र धूर्त्तलोग रहते हैं, उन लोगों से। दीनताके कारण ऊपर मुख उठाकर देखने और बोलने से उदरपूर्ति के वास्ते कष्ट करनेवाले मनुष्य की लघुता करनेवाली सेवा को पण्डित लोग सचमुच श्ववृत्ति के समान कहते हैं ॥ १४ ॥

(घूमकर और देखकर) यह आर्य चाणक्य का घर है, तब तक मैं भीतर चलता

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(नाट्येन प्रविश्यावलोक्य च) अहो ! राजाधिराजमन्त्रिणो गृह-
भूतिः !! कुतः ?

उपलशकलमेतद् भेदकं गोमयानां,
वटुभिरुपहृतानां बर्हिषां स्तोम एषः ।
शरणमपि समिद्भिः शुष्यमाणाभिराभि-
र्विनमितपटलान्तं दृश्यते जीर्णकुड्यम् ॥ १५ ॥

दररक्षणार्थं स्वामिनमवलोक्योन्मुखः सन् पश्यति बुक्कति ताडनभयाद्देहं सङ्कुचति तथा सेवकोऽपि नृपतिप्रकृत्यादिवर्गानुकूलविधया सेवमानः कालं यापयतीति सेवकशुनोस्तुल्या वृत्तिरित्यर्थः । ईप्सितकार्यानुरोधाच्चाणक्यचन्द्रगुप्तयोः कपट-वैमनस्यं यथार्थत्वेनावगच्छतः कञ्चुकिनोऽयं निर्वेदः । तुरीयपादप्रतिपाद्यार्थे हेतु-भूतानां पादत्रयप्रतिपाद्यार्थानां वाक्यार्थत्वेनाभिधानादत्र काव्यलिङ्गमलङ्कारः ।

हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम् ।

इति दर्पणोक्तवचनात् । वैदर्भी रीतिः । प्रसादगुणः । शार्दूलविक्रीडितं वृत्तम् ॥ १४ ॥

उपलेति । एतत्पुरोवर्त्ति उपलस्य प्रस्तरस्य शकलं खण्डम् गोमयानां करीषाणां नीरसानामिति शेषः । भेदकं भञ्जनम् दृश्यत इति क्रियाशेषः । एष पुरो दृश्यमानो वटुभिः छात्रभूतैर्ब्राह्मणपुत्रैरित्यर्थः । उपहृतानां समानीतानां बर्हिषां कुशानां स्तोमः समूहो दृश्यते । आभिः साक्षाद्दृश्यमानाभिः शुष्यमाणाभिः समिद्भिः काष्ठैः विनमितो नम्रीभूतः पटलान्तः छदिप्रान्तो यस्मिन्तत् विनमितपटलान्तं नम्रीभूतछदिप्रान्तं जीर्णोऽतिप्राचीनकालीनत्वाद्विशीर्णः कुड्या भित्तिर्यस्मिन् तत् जीर्णकुड्यम् विशीर्णभित्ति शरणं गृहमति दृश्यते । 'शरणं गृहरक्षित्रो'रित्यमरः । उपलोऽपि शकलो न समग्र इति विभूतिनैरपेक्ष्यमस्योपलशकलजीर्णकुड्यादिभिरभिहितम् । प्राचीनकालीनब्राह्मणगृहस्यैतद्रूपत्वं स्वभावसिद्धमिति स्वभावोक्तिनामालङ्कारः । वैदर्भी रीतिः । प्रसादगुणः । मालिनी वृत्तम् । उक्तञ्च तल्लक्षणं छन्दोमञ्जर्यां यथा—'ननमयययुतेयं मालिनी भोगिलोकैः' ॥ १५ ॥

हूं । (विचित्र ढङ्गसे प्रवेश कर—और देखकर) । अहा, राजाधिराज चन्द्रगुप्तके मन्त्री की गृहसम्पत्ति कैसी सुन्दर है । जैसे किः—

सूखे गोहरों (गोमयों) को चूर करनेवाला यह पत्थर का टुकड़ा धरा है, शिष्यों द्वारा लाया गया कुश का समूह दीख पड़ता है और इन सूखे काष्ठों से नम्र छवि-प्रान्त और फटी हुई दीवारवाला यह घर भी दीख पड़ता है ॥ १९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ततः स्थाने खल्वस्य वृषलो देवश्चन्द्रगुप्त इति । कुतः ?

स्तुवन्त्यश्रान्तास्याः क्षितिपतिमभूतैरपि गुणैः,
प्रवाचः कार्पण्याद्‌ यदवितथवाचोऽपि कृतिनः ।
प्रभावस्तृष्णाया स खलु सकलः स्यादितरथा
निरीहाणामीशस्तृणमिव तिरस्कारविषयः ॥ १६ ॥

(अवलोक्य सभयम्) तदयमार्यचाणक्यस्तिष्ठति ।

तत इति । ततस्तस्मात् विभूतिनैरपेक्ष्यात् महामहिमशालित्वाच्चेत्यर्थः । हेतोः अस्य प्रधानसचिवस्य चाणक्यस्येत्यर्थः देवो महाराजश्चन्द्रगुप्तो वृषल इत्यभिधानं स्थानं स्थाने युक्तमित्यर्थः । चन्द्रगुप्तस्य मुरागर्भोद्भवत्वाद्वृषल इत्यामन्त्रणप्रीतिजनकमपि जात्यभिप्रायेण निस्पृहत्वाच्चाणक्यस्य युक्तमेवेति भावः ।

स्तुवन्तीति । अवितथा सत्या वाक् येषां तेऽवितथवाचः सत्यगिरोऽपि कृतिनः विद्वांसः सज्जना इत्यर्थः । कृपणस्य दैन्यस्य भावः कार्पण्यं तस्मात्कार्पण्याद्दैन्यात् हेतोः प्रकृष्टा मधुरा वाक् गिरो येषां ते प्रवाचः मधुरगिरः अश्रान्तं श्रमरहितमास्यं मुखं येषां तेऽश्रान्तास्याः श्रमरहितमुखाश्च सन्तः अभूतैरविद्यमानैरपि गुणैर्दयादाक्षिण्यप्रभृतिभिः क्षितेः पतिः क्षितिपतिस्तं क्षितिपतिं महीपालं स्तुवन्ति यत् स खलु (खलुशब्दोऽत्र वाक्यालङ्कारार्थकः) तृष्णाया लिप्सायाः सकलः समग्रः प्रभावो माहात्म्यं स्यात्, इतरथाऽन्यथा धनलिप्साऽभावे इत्यर्थः ईहाया निष्क्रान्ता निरीहा; तेषां निरीहाणां धनलिप्सारहितानाम् ईशः प्रभुः धनवानित्यर्थः। तृणमिव शष्पमिव तिरस्कारविषयः अनादरास्पदो भवतीत्यर्थः । सत्यवादिनामतथ्यगुणैर्दैन्याद्राजप्रशंसनं तृष्णामाहात्म्यमिति भावः ।

सत्यवादिनामसत्यवचनैः क्षितिपतिस्तुतेर्विरुद्धत्वात्तृष्णामाहात्म्यात्मकत्वेन तत्परिहारादत्र विरोधाभासनामाऽलङ्कारः । स च तृणमिवेत्यत्र सादृश्यार्थकेवशब्दस-

---

इस कारण चाणक्य का राजा चन्द्रगुप्त के प्रति वृषल यह नाम कहना युक्त ही है । क्यों कि—

सत्य वचन बोलनेवाले विद्वान् दीनता के कारण प्रियभाषी-तथा श्रान्त मुखवाले नहीं रहते हुए भी गुणों से राजा की जो स्तुति करते हैं तो वह सब निश्चय ही तृष्णा का प्रभाव है । अन्यथा निस्पृहों के लिये प्रभु (स्वामी धनवान् पुरुष) तृणके समान तिरस्कार का विषय होता है ॥१६॥

(देखकर-डरता हुआ) यही आर्य चाणक्य हैं—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

योनन्दमौर्यनृपयोः परिभूय लोकम्,
अस्तोदयौ प्रतिदिशन्नविभिन्नकालम् ।

simultaneously

द्भावादुपमालङ्कारसंसृष्टः । उक्तञ्च तल्लक्षणं दर्पणादौ यथा—

जातिश्चतुर्भिर्जात्याद्यैर्गुणो गुणादिभिस्त्रिभिः ।
क्रिया क्रियाद्रव्याभ्यां यद् द्रव्यं द्रव्येण वा मिथः ।
विरुद्धमिव भासेत विरोधोऽसौ दशाकृतिः ॥

जातिर्गोत्वादिर्जात्याद्यैश्चतुर्भिर्जातिगुणक्रियाद्रव्यैः गुणो नीलत्वादिर्गुणादिभिस्त्रिभिः गुणक्रिया गमनादिः क्रियाद्रव्याभ्यां द्रव्यं द्रव्येण सह मिथो यद्विरुद्धमिव भासेत असौ दशविधो विरोधो विरोधालङ्कार इति कारिकार्थः । प्रकृते सत्यवचनशीलात्मकद्रव्येण सहासत्यगुणकरणकस्तवनक्रियया विरोध इति लक्षणसंघटनमुपपन्नमेवेति ।

उपमालङ्कारलक्षणमुक्तं दर्पणे यथा—

सा पूर्णा यदि सामान्यधर्म औपम्यवाचि च ।
उपमेयं चोपमानं भवेद्वाच्यमिति ।

उक्तालङ्कारद्वयस्य मिथो नैरपेक्ष्यादत्र समावेशेन संसृष्टिनामालङ्कारस्तदुक्तं दर्पणे—

मिथोऽनपेक्षयैतेषां स्थितिः संसृष्टिरुच्यते

एतेषामुक्तानामुपमायमकादीनामलङ्काराणामेकत्र पद्ये वा गद्येऽवस्थितत्वात्संसृष्टिरलङ्कार इति तदर्थः । तथा च प्रकृते विरोधाभासोपमयोरलङ्कारयोर्नैरपेक्ष्येण स्थितत्वादुक्तलक्षणं संघटितम् । वैदर्भी रीतिः । प्रसादगुणः छन्दश्चात्र शिखरिणी नाम ॥ १६ ॥

य इति । यश्चाणक्यो लोकं प्रधानसचिवादिकं सहायतासम्पादकं परिभूय पराजित्य नन्दश्च मौर्यश्च नन्दमौर्यौ तौ च तौ नृपौ नन्दमौर्यनृपौ तयोर्नन्दमौर्यनृपयोः नन्दनृपस्य मौर्यनृपस्य चेत्यर्थः । अस्तश्चोदयश्चास्तोदयौ ह्रासोपचयौ, न विभिन्नः कालो यस्मिन्तदविभिन्नकालं (क्रियाविशेषणम्) समकालमित्यर्थः । यथा स्यात्तथा प्रतिदिशन् यच्छन् ददन्निति यावत् । लोकं भुवनं लोकालोकपर्वतं वा परिभूय सन्ताप्य अतिक्रम्य वा पर्यायेण क्रमेण न त्वेककालावच्छेदेनेत्यर्थः । पातितं

जो आर्य चाणक्य प्रधानसचिवादिका अनादर कर एकही काल में नन्द और चन्द्रगुप्त दोनों राजाओं को अस्त-उदय करता हुआ, जगत् (या) लोकालोकपर्वत

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पर्य्यायपातितहिमोष्णिमसर्वगामि-
धाम्नाऽतिशाययति धाम सहस्रधाम्नः ॥ १७ ॥

(जानुभ्यां भूमौ निपत्य) जयति जयत्यार्यः

चाणक्यः—(नाट्येनावलोक्य) वैहीनरे ! किमागमनप्रयोजनम् ?

कञ्चुकी—आर्य ! प्रणतसम्भ्रमसमुच्चलितभूमिपालमौलिमाणिक्य-

दत्तं हिमम् उष्णिमोष्णत्वञ्च येन तत् पर्यायपातितहिमोष्णिम सर्वस्मिन् गच्छति तच्छीलं सर्वगामि सर्वव्यापीत्यर्थः। सहस्रं धामानि यस्य स सहस्रधामा तस्य सहस्रधाम्नः दश शततेजोविशिष्टस्य भानोरित्यर्थः। धाम तेजः। "धाम देहे गृहे रश्मौ स्थाने जन्मप्रभावयोः"। इति मेदिनी। धाम्ना स्वतेजसा प्रतापेनेत्यर्थः। सहस्रधामापि सूर्यः क्रमेण शीतोष्णप्रदोऽयं तु युगपदेव क्षयवृद्धिकर इति ततोऽप्य-यमतिशयप्रतापशालीति भावः। विभिन्नकाले सम्भवतोर्दययोरविभिन्नकालेऽसम्भ-वात्कार्यकारणपौर्वापर्यभावस्य च प्रसिद्धत्वात्तस्यागादतिशयोक्तिनामा ऽत्रालंकारः। द्व्यर्थप्रतिपादकलोकशब्दस्य सत्त्वाच्छ्लेषानुप्राणितः चाणक्येन स्वतेजसा सूर्यतेजो-ऽतिक्रमणात्ततोऽपि चाणक्यस्याधिकतेजस्वित्वादुपमेयस्याधिक्यप्रतिपादनाद्व्यति-रेकालंकारसंकीर्णश्च। उक्तञ्च तेषां लक्षणं दर्पणे—

सिद्धत्वेऽध्यवसायस्यातिशयोक्तिर्निगद्यते।
भेदेऽप्यभेदः सम्बन्धेऽसम्बन्धस्तद्विपर्य्ययौ।
पौर्वापर्यात्ययः कार्यहेत्वोः सा पञ्चधा ततः॥

अस्तोदययोर्हेतुहेतुमतोः पौर्वापर्यभावत्यागादिह हेतुमत्पौर्वापर्यभावात्यया-त्मिकाऽतिशयोक्तिः।

श्लिष्टैः पदैरनेकार्थाऽभिधाने श्लेष इष्यते॥
आधिक्यमुपमेयस्योपमानान्न्यूनताऽथवा। व्यतिरेक एक इति"॥

पाञ्चाली रीतिः। ओजो गुणः। वसन्ततिलकं नाम छन्दः॥ १७॥

प्रणतेति। प्रणता नम्रीभूता अत एव ससंभ्रमं ससत्वरं यथा तथा उच्च-

---

को सन्तप्त (या) अतिक्रमण करने से शैत्य-और उष्णता को देनेवाला तथा सर्व-व्यापी सूर्य के तेज को अपने तेजसे जीतता है॥ १७॥

(पृथ्वी पर दण्डवत् कर) आर्य चाणक्य की जय हो, जय हो।

चाणक्यः—(विचित्र ढङ्ग से देखकर)। वैहीनरि ! आने का क्या प्रयोजन है ?

कञ्चुकी—(प्रणामकर) शीघ्र आते-जाते राजाओंके मस्तक पर स्थित मुकुट के

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शकलशिखापिशङ्गीकृतपादपद्मयुगलः सुगृहीतनामधेयो देवश्चन्द्रगुप्त आर्यं शिरसा प्रणिपत्य विज्ञापयति, अकृतक्रियान्तरायमार्यं द्रष्टुमिच्छामि इति ।

चाणक्यः—वृषलो मां द्रष्टुमिच्छति ? वैहीनरे ! न खलु वृषलश्रवणपथं गतोऽयं मत्कृतः कौमुदीमहोत्सवप्रतिषेधः ?

कञ्चुकी—आर्य ! अथ किम् ?

चाणक्यः—(सक्रोधम्) आः ! केन कथितम् ?

कञ्चुकी—(भयं नाटयित्वा) प्रसीदत्वार्यः स्वयमेव सुगाङ्गप्रासाद-

---

लिता व्यग्रा इति यावत् इति प्रणतससम्भ्रमोच्चलितास्ते च ते भूपालाः प्रणतससम्भ्रमोच्चलितभूपालमौलयस्तेषां मालाः पङ्क्तयः प्रणतससम्भ्रमोच्चलितभूपालमौलिकमालास्तासु यानि माणिक्यशकलानि तदाख्यमणिखण्डानि इति प्रणतससम्भ्रमोच्चलितमालामाणिक्यशकलानि तेषां शिखा ज्वालास्ताभिः पिशङ्गीकृतं पिङ्गलीकृतं पादपद्मयुगलं चरणकमलयुग्मं यस्य स प्रणतससम्भ्रमोच्चलितभूपालमौलिमालामाणिक्यशकलशिखापिशङ्गीकृतपादपद्मयुगलो नम्रीभूतससत्वराकुलनृपतिकेशबन्धराजिमणिखण्डकान्तिपिङ्गलीकृतचरणकमलयुग्मः । सुगृहीतं प्रातःस्मरणीयं नाम धेयं नाम यस्य स सुगृहीतनामधेयः देवो महाराजश्चन्द्रगुप्तो मौर्यः आर्यं भवन्तं शिरसा उत्तमांगेन प्रणिपत्य प्रणम्य विज्ञापयति निवेदयति, अकृतः क्रियायाः कर्मणोऽन्तरायः प्रत्यूहो यस्य सोऽकृतक्रियान्तरायस्तमकृतक्रियान्तरायम् अन्तरायशून्यकर्माणम् आर्यं भवन्तं द्रष्टुं प्रेक्षितुमिच्छामि कामये ।

प्रसीदत्वार्य इति । आर्यः श्रीमान् प्रसीदतु प्रसन्नो भवतु ममोपरीति शेषः

मणिखण्ड से पिङ्गलवर्ण के दोनों चरणकमल और प्रातः स्मरणीयनामवाले राजा चन्द्रगुप्त आप को सिर से प्रणाम करके निवेदन करते हैं कि यदि क्रिया में किसी तरह बाधा न हो (अथवा-निर्विघ्नपूर्वक कर्म समाप्ति करने पर) आर्य चाणक्य को मैं देखना चाहता हूँ!

चाणक्यः—वृषल (चन्द्रगुप्त) मुझको देखना चाहता है ? वैहीनरि ! मेरे द्वारा कियागया कौमुदीमहोत्सवका प्रतिषेध वृषल (चन्द्रगुप्त) ने सुनलिया क्या ?

कञ्चुकी—आर्य ! और क्या ।

चाणक्यः—(क्रोध से) आः ! किसने कहा ?

कञ्चुकी—(डरकर) आप प्रसन्न होइये । आर्य ! सुगाङ्गप्रासादके ऊपर चढ़कर

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शिखरगतेन देवेनावलोकितमप्रवृत्तकौमुदीमहोत्सवं कुसुमपुरम् ।

चाणक्यः—आः ज्ञातं, भवद्भिरेव मदन्तरा प्रोत्साह्य रोषितो वृषलः, किमन्यत् ?

कञ्चुकी—(सभयं तूष्णीमधोमुखस्तिष्ठति)

चाणक्यः—अहो ! राजपरिजनस्य चाणक्योपरि विद्वेषपक्षपातः । अथ क्व वृषलस्तिष्ठति ?

कञ्चुकी—(भयं नाटयन्) आर्य ! सुगाङ्गप्रसादगतेन देवेनाहमार्य-

सुगाङ्गश्चासौ प्रासादः सुगाङ्गप्रसादस्तस्य शिखरः उन्नतप्रदेशः सुगाङ्गप्रासादशिखरस्तं गतः प्राप्तस्तेन सुगाङ्गप्रासादशिखरगतेन सुगाङ्गनामधेयहर्म्योन्नतप्रदेशप्राप्तेन देवेन राज्ञा चन्द्रगुप्तेनेत्यर्थः, अप्रवृत्तोऽनारब्धः कौमुदीमहोत्सवः शरत्पूर्णचन्द्र महोत्सवो यस्मिन्तत् अप्रवृत्तकौमुदीमहोत्सवम् अनारब्धशरत्पूर्णचन्द्रमहः कुसुम पुरनामनगरं स्वयं साक्षादेव अवलोकितं दृष्टमित्यर्थः ।

आः ज्ञातमिति । आ इतीर्ष्यासूचकमव्ययम् ज्ञातम् अवगतम् भवद्भिरेव युष्माभिरेव अन्तरा मध्ये मदनुपस्थितिकाले इत्यर्थः, प्रोत्साह्य उत्तेजकवचनैरुद्दीप्येत्यर्थः, वृषलो मौर्यो रोषितः क्रोधितः । अन्यदपरं किं न किमपीत्यर्थः ।

राजपरिजनस्येति । राज्ञः परिजनो राजपरिजनस्तस्य राजपरिजनस्य नृपानुचरस्य चाणक्योपरि विष्णुगुप्तोपरि विष्णुगुप्ते इत्यर्थः, विशिष्टो द्वेषो विद्वेषः पक्षे पातः पक्षपातः विद्वेषे पक्षपातो विद्वेषपक्षपातः विद्वेषे आसक्तिविशेष इत्यर्थः अहो आश्चर्यम् । अथशब्दोऽत्र वाक्यालङ्कारार्थकः आश्चर्यजनकोऽयमासक्तिविशेषः । वृषलो मौर्यः क्व तिष्ठति कुत्रास्ते । चाणक्यविद्वेषे नृपानुयायिनामाश्चर्यजनकोऽयमासक्तिविशेषः (तत्परतेति) भावः ।

भयं नाटयन्निति । भयं साध्वसम् । 'भीतिर्भीः साध्वसं भयमि'त्यमरः ।

राजा चन्द्रगुप्तने स्वयं कौमुदीमहोत्सव से रहित कुसुमपुरको देखा था ।

चाणक्यः—आः ! मैंने जाना कि आप ही लोगोंने मेरे न रहने पर उत्साह बढ़ाकर चन्द्रगुप्त को क्रोधित किया है, और कारण क्या है ?

कञ्चुकी—(डरसे चुप हो नीचे मुख करके खड़ा रहता है)

चाणक्यः—आश्चर्य है कि चाणक्य के ऊपर राजाके परिजनों का भी विरोधभाव है । अब कहो कि वृषल कहाँ और कैसा है ?

कञ्चुकी—(डरेता हुआ) । आर्य ! अभी सुगाङ्गप्रसाद के ऊपर बैठे हुए राजा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पादमूलं प्रेषितः ।

चाणक्यः—(उत्थाय) कञ्चुकिन् ! सुगाङ्गप्रासादमार्गमादेशय !

कञ्चुकी—इत इत आर्यः । (इत्युभौ परिक्रामतः)

कञ्चुकी—अयं सुगाङ्गप्रासादः शनैरारोढुमर्हत्यार्य्यः ।

चाणक्यः—(नाट्येनारुह्यावलोक्य च सहर्षमात्मगतम्) अये ! सिंहासन-मध्यास्ते वृषलः । साधु साधु ।—

नन्दैर्वियुक्तमनपेक्षितराजराजैरध्यासितञ्च वृषलेन वृषेण राज्ञाम् ।

नाटयन् अभिनयन् कुर्वन्निति यावत् । आर्य श्रीमन् । सुगाङ्गप्रासादगतेन हर्म्यस्थितेन देवेन राज्ञा चन्द्रगुप्तेन अहम् आर्यस्य भवतः पादौ चरणावार्यपादौतयोर्मूलं समीपम् आर्यपादमूलं भवच्चरणसमीपं प्रेषितः प्रापितोऽस्मीति शेषः ।

कञ्चुकिन्निति । कञ्चुकिन् ! वैहीनरे ! सुगाङ्गश्चासौ प्रासादः सुगाङ्गप्रासादस्तस्य मार्गस्तं सुगाङ्गप्रासादमार्गं तदाख्यहर्म्यपथम् आदेशय दर्शयेत्यर्थः ।

नाट्येनेति । नाट्येन नटोचितव्यापारेण शरीरभङ्ग्यात्मकेनेत्यर्थः । आरुह्य प्राप्य प्रासादमित्यादिः अवलोक्य संप्रेक्ष्य राजानमिति शेषः । सहर्षं सानन्दम् आत्मगतम् मनोगतं वाचा मनस्येव ब्रवीतीत्यर्थः । अये इदं कोमलालापे सम्बोधनम् , वृषलश्चन्द्रगुप्तः सिंहाङ्कितमासनं सिंहासनम् (मध्यमपदलोपी समासः) नृपासनमित्यर्थः। अध्यास्ते अधितिष्ठति ('अधि शीङ्स्थासां कर्म' इत्याधारस्य कर्मत्वे सिंहासनमिति) ।

नन्दैरिति । अनपेक्षितोऽनादृतो राजराजो धनाधिपो यैस्तेऽनपेक्षितराजराजास्तैरनपेक्षितराजराजैः अनादृतधनाधिपैः, (अनपेक्षितराजवृत्तैरिति पाठे) तिरस्कृतनृपव्यवहारैरित्यर्थः । नन्दैः वियुक्तं विरहितं सिंहासनं नृपासनम् राज्ञां नृपा-

---

चन्द्रगुप्तने मुझे आपके पास भेजा है ।

चाणक्यः—(उठकर) । कञ्चुकिन् । सुगाङ्गप्रासादका रास्ता बताओ ।

कञ्चुकी—इधर से आइए, इधर से (दोनों घूमते हैं) ।

कञ्चुकी—यही सुगाङ्ग प्रासाद है, आप धीरे से चढ़िये ।

चाणक्यः—विचित्र ढङ्ग से चढ़कर और राजाको देखकर खुशी से मन हीं मन) । बहुत ही आनन्द की बात है कि वृषल (चन्द्रगुप्त) सिंहासनपर बैठा है । ठीक है, ठीक है—

कुबेरको भी तिरस्कार करनेवाले नन्दों का वियोगी यह सिंहासन आज राजाओं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सिंहासनंसदृशपार्थिवसङ्गतञ्च प्रीतिं परां प्रगुणयन्ति गुणा ममैते ॥१८॥

(उपसृत्य) विजयतां वृषलः ।

राजा—(सिंहासनादुत्थाय चाणक्यस्य पादौ गृहीत्वा) आर्य ! चन्द्रगुप्तः प्रणमति ।

चाणक्यः—(पाणौ गृहीत्वा) उत्तिष्ठोत्तिष्ठ वत्स !–

आशैलेन्द्राच्छिलान्तस्खलितसुरधुनीशीकरासारशीतात् ,

णां वृषेण श्रेष्ठेन वृषलेन मौर्येण अध्यासितम् अधिष्ठितम् , तच्च सिंहासनं नृपासनं सदृशाश्च ते पार्थिवाः सदृशपार्थिवास्तैः सङ्गतं सदृशपार्थिवसंगतं सिंहासनाध्यासोचितनृपाक्रान्तञ्च जातमिति शेषः । एते मम गुणाः नन्दोद्धरणचन्द्रगुप्ताभिषेचननृपासनोचितपार्थिवसंगतिकरणात्मकव्यापारा मम परामुत्कृष्टामतिशयितामिति यावत् प्रीतिं हर्षं प्रगुणयन्ति जनयन्तीत्यर्थः । नन्दा विनाशिताः चन्द्रगुप्तोऽभिषेचितः सिंहासनं योग्यनृपाक्रान्तमतः सकलकृत्यसम्पादनादतिशयानन्दयुक्तोऽस्मीति भावः । सिंहासनस्योचितनृपयोगत्वोक्त्या मौर्यप्रशंसनस्य फलितत्वादत्र समनामालंकारस्तदुक्तं प्रकाशदर्पणयोर्यथा—

समं योग्यता योगो यदि सम्भावितः क्वचित् ।, का० प्र०

यदि क्वचिद्योग्यतयाऽऽनुरूप्येण योगः सम्भावितस्सर्वसम्मतस्तदा सममलङ्कार इत्यर्थः ।

समं स्यादानुरूप्येण श्लाघा योग्यस्य वस्तुनः । सा० द० ।

रीतिरत्र वैदर्भी नाम । प्रसादश्च गुणः । वसन्ततिलकं वृत्तम् ॥ १८ ॥

आशैलेन्द्रादिति । शिलानामन्ता अन्तिमभागाः शिलान्तास्तेषु स्खलिताः शिलान्तस्खलिताः प्रस्तरप्रान्तभागपतिता इत्यर्थः, यद्वा शिलान्तात्प्रस्तरोन्नतप्रदेशात् स्खलिताः शिलान्तस्खलिताः प्रस्तरोन्नतप्रदेशपतिता इत्यर्थः । सुराणां दे-

---

में श्रेष्ठ चन्द्रगुप्तसे सुशोभित है और योग्य राजासे युक्त मेरे गुण तो अत्यन्त आनन्द देते हैं ॥ १८ ॥

(समीप जाकर) वृषल ! विजयी होओ ।

राजा—(सिंहासनसे उठकर चाणक्य के दोनों चरण पकड़कर) आर्य ? चन्द्रगुप्त आपको प्रणाम करता है ।

चाणक्यः—(हाथ पकड़कर) । वत्स ! उठो, उठो ।

शिलाके अग्रभाग में गिरी हुई गङ्गाकी अम्बुकणा के वर्षण से शीतल हिमालय

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आ तीरान्नैकरागस्फुरितमणिरुचो दक्षिणस्यार्णवस्य ।
आगत्यागत्य भीतिप्रणतनृपशतैः शश्वदेव क्रियन्तां,
चूडारत्नांशुगर्भास्तवचरणयुगस्याङ्गुलीरन्ध्रभागाः ॥ १९ ॥

राजा—आर्यप्रसादादनुभूयत एवैतत्, नाऽऽशास्यते । उपविश त्वार्यः । (इत्युभौ यथासनमुपविष्टौ) ।

वानां नदी सरित् सुरनदी तस्याः शीकराः शिलान्तस्खलिताश्च ते सुरनदीशीकरा इति शिलान्तस्खलितसुरनदीशीकरास्ते एवासारा अतिवर्षणानि तैः शीतस्तस्मात् शिलान्तस्खलितसुरनदीशीकरासारशीतात् प्रस्तरोन्नतप्रदेशपतितामरसरित्कणाति-वर्षणशीतलात् आशैलेन्द्रात् आहिमालयात्, न एका नैकास्ते च ते रागा नैकरागा अनेकविधवर्णा इत्यर्थः, तादृशाः स्फुरितमणिरुचो यस्मिन् स तथोक्तस्तस्य नैकरा-गस्फुरितमणिरुचः अनेकविधवर्णभासमानमणिकान्तेः, दक्षिणस्य याम्यदिग्वर्तिनोऽ-र्णवस्य समुद्रस्य आतीरात् आतटात् आगत्य आगत्य पुनः पुनः समेत्य भीत्या प्रणता भीतिप्रणताः नृपाणां शतानि नृपशतानि भीतिप्रणताश्च तानि नृपशतानि भीतिप्रणतनृपशतानि तैर्भीतिप्रणतनृपशतैः साध्वसायत्तीभूतभूपसमूहैः शश्वदेव सर्वदैव तव चरणयुगस्य पदयुगलस्य अंगुलीरन्ध्रभागा अंगुलीछिद्रप्रदेशाः चूडार-त्नानामंशवश्चूडारत्नांशवस्ते गर्भेऽभ्यन्तरे येषां ते चूडारत्नांशुगर्भा मुकुटमणिकि-रणाभ्यन्तराः क्रियन्तां विधीयन्ताम् । दक्षिणोत्तरार्णवसीमान्तरालवर्तिनो नृपतयो वशीभूतास्त्वां सदैव प्रणमन्त्विति भावः ॥ १९ ॥

आर्यप्रसादादिति । आर्यस्य प्रसाद आर्यप्रसादस्तस्मादार्यप्रसादात् पू-ज्यस्य भवतोऽनुग्रहादित्यर्थः । एतत् सकलनृपमण्डलशासनकर्तृत्वम् अनूभूयत एव प्राप्यत एव, नाशास्यते नेष्यते तदिति शेषः, आर्यः पूज्यो भवान् उपविशतु आ-स्ताम् ।

पर्वत और अनेक वर्णवाले प्रकाशमान मणिके सदृशकान्तियुक्त दक्षिणसमुद्रके तीर पर्यन्त रहनेवाले भयभीत और प्रणत राजसमूह से आ आकर आपके चरणयुगल अङ्गुलियों के रन्ध्रभाग से निकली उन राजों के मुकुट के रत्न की किरणों द्वारा सर्वदा शोभित हों ॥ १९ ॥

राजा—आप की कृपा से सब राजाओं का आधिपत्य तो प्राप्त ही है । अब मैं कुछ नहीं चाहता । आइये बैठिये । (दोनों अपने अपने आसन पर बैठते हैं) ।

 Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चाणक्यः—वृषल ! किमर्थं वयमाहूताः ?

राजा—आर्यस्य दर्शनेनात्मानमनुग्राहयितुम् ।

चाणक्यः—(स्मितं कृत्वा) वृषल ! अलमनेन प्रश्रयेण, न निष्प्रयोजनमधिकारवन्तः प्रभुभिराहूयन्ते; तत् प्रयोजनमभिधीयताम् ।

राजा—आर्य! कौमुदीमहोत्सवप्रतिषेधस्य किं फलमार्यः पश्यति ?

चाणक्यः—(स्मितं कृत्वा) वृषल ! उपालब्धुं तर्हि वयमाहूताः !

राजा—आर्य ! नोपालब्धुम् ।

चाणक्यः—किं तर्हि ?

राजा—विज्ञापयितुम् ।

चाणक्यः—वृषल ! यद्येवं तर्हि विज्ञापनीयानामवश्यं शिष्येण रुचयोऽनुरोद्धव्याः ।

आर्यस्येति । आर्यस्य पूज्यस्य भवतो दर्शनेन निरीक्षणेन आत्मानं जीवम् अनुग्राहयितुं प्रसन्नतास्पदं कर्तुम् भवन्त आहूता इति शेषः ।

अलमिति । अनेन एतेन त्वत्कृतेनेत्यर्थः । प्रश्रयेण विनयेन अलं व्यर्थम् प्रभुभिः राजभिः अधिकारवन्तः कार्यकारिणः सचिवप्रभृतयो निष्प्रयोजनं निर्हेतुकं नाहूयन्ते तत्तस्मात्प्रयोजनं कार्यमभिधीयतामुच्यताम् ।

वृषलेति । वृषल मौर्य तर्हि तदा उपालब्धुं तिरस्कर्तुं वयमाहूता आकारिताः ।

यदीति । यदि यदा एवं विज्ञापनार्थमस्मदाह्वानं तदा शिष्येणान्तेवासिना

चाणक्यः—वृषल (चन्द्रगुप्त) ! हम किस वास्ते बुलाये गये हैं ?

राजा—आप के दर्शन से अपनी आत्मा को प्रसन्न करने के लिये ।

चाणक्यः—(हँस कर) वृषल ! इस विनय को रहने दो। राज विना प्रयोजन मन्त्री आदि अनुचरों को नहीं बुलाते इसलिये मतलब की बात कहो !

राजा—आर्य ! आप कौमुदीमहोत्सव रोकने से क्या लाभ समझते हैं ?

चाणक्यः—(हँस कर) तब हम तिरस्कार करने के लिये बुलाये गये हैं ।

राजा—आर्य ! तिरस्कार करने के लिये नहीं ।

चाणक्यः—तब क्यों ?

राजा—निवेदन करने (कहने) के लिये ।

चाणक्यः—यदि कहने के लिये हमें बुलाया है तो शिष्य को गुरु की इच्छा का अनुगमन करना चाहिये ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राजा—आर्य ! कः सन्देहः ? किन्तु न कदाचिदप्यार्यस्य निष्प्रयोजना प्रवृत्तिरित्यस्ति नः प्रश्नावकाशः ।

चाणक्यः—वृषल ! सम्यग्गृहीतवानसि मदाशयम् । न हि प्रयोजनमनपेक्षमाणः स्वप्नेऽपि चाणक्यश्चेष्टते ।

राजा—आर्य ! अत एव मां प्रयोजनशुश्रूषा मुखरयति ।

चाणक्यः—वृषलः ! श्रूयताम्, इह खलु अर्थशास्त्रकाराः त्रिविधां सिद्धिमुपवर्णयन्ति । तद्यथा-राजायत्तां सचिवायत्ताम्, उभयाय-

---

विज्ञापनीयानां गुरूणां रुचयः इच्छा अनुरोद्धव्या अनुवर्तयितव्याः ।

किन्त्विति । भवतो निर्हेतुका प्रवृत्तिर्न कदाचिदपि भवतीति मे पृच्छाऽवसरोऽस्तीत्यर्थः ।

सम्यगिति । सम्यक् साधु मदाशयं मदीयाभिप्रायम् गृहीतवान् अवगतवान् । प्रयोजनं कार्यम् अनपेक्षमाणोऽनवलोकमानश्चाणक्यः कौटिल्यः स्वप्नेऽपि निद्रायामपि नहि चेष्टते नोद्युङ्क्ते ।

अत एवेति । अत एव प्रयोजनमनुद्दिश्याऽप्रवृत्तेरेवेत्यर्थः । प्रयोजनशुश्रूषा हेतुश्रवणेच्छा मुखरयति वक्तुं प्रवर्त्तयति ।

श्रूयतामिति । वृषल मौर्य ! श्रूयताम् सावधानेन त्वयाऽऽकर्ण्यताम् मदुक्तमित्यादिः, इहाऽस्मिन् लोके अर्थशास्त्रकारा नीतितन्त्रप्रणेतारः तिस्रो विधाः प्रकारा यस्याः सा त्रिविधा तां त्रिविधां त्रिप्रकारां सिद्धिमुपपत्तिमुपवर्णयन्ति ब्रुवन्ति । राजायत्तां नृपाधीनां साचवायत्ताम् अमात्याधीनाम्, उभयस्य राज्ञः मन्त्रिणश्चायत्ता उभयायत्ता तामुभयायत्तां नृपामात्यद्वयाधीनाञ्चेत्येवं त्रिप्रकारां सिद्धिं कथयन्ती-

---

राजा—आर्य ! इस में क्या सन्देह है ! कभी भी आप की निष्प्रयोजनप्रवृत्ति नहीं होती थी । इस लिये हमारे पूछने की आवश्यकता है ।

चाणक्यः—वृषल ! तू हमारे अभिप्राय को अच्छी तरह समझता ही है । चाणक्य विना प्रयोजन स्वप्न में भी कोई काम नहीं करता ।

राजा—आर्य ! इसी से तो वह प्रयोजन सुनने की इच्छा हमको बोलने के लिये प्रेरित करती है ।

चाणक्यः—वृषल ! सुनो, अर्थशास्त्रकार इस संसार में तीन प्रकार की सिद्धि बतलाते हैं । जैसे—पहली राजायत्तसिद्धि, दूसरी सचिवायत्तसिद्धि, तीसरी उभयायत्तसिद्धि, तब सचिवायत्त सिद्धिवाले आपको फलजिज्ञासा से क्या प्रयोजन, क्योंकि इस कार्य में हम नियुक्त हैं हम ही जानेंगे ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्ताञ्चेति। तत् सचिवायत्तसिद्धेर्भवतः। क फलान्वेषणेन यतो वयमेवात्र नियुक्ता वेत्स्यामः।

राजा—(सकोप इव मुखं परिवर्त्तयति)।

(ततो नेपथ्ये वैतालिकौ पठतः)।

एकः,—आकाशं काशपुष्पच्छविमभिभवता भस्मना शुक्लयन्ती,
शीतांशोरंशुजालैर्जलधरमलिनां क्लिन्दती कृत्तिमैभीम्।

त्यर्थः, तत्तस्मात् सचिवायत्तसिद्धेः अमात्याधीनोपपत्तेः फलान्वेषणेन प्रयोजनजिज्ञासाया तव किं न किमपीत्यर्थः। यतो यस्मादत्र सचिवायत्तसिद्धौ वयमेव नियुक्ताः सन्तः वेत्स्यामः तत्तत्कार्यानुगुण्येन वर्त्तिष्यामहे।

सकोप इति। कोपेन क्रोधेन सहितः सकोपः कृत्रिमक्रोधयुक्तः, मुखमाननं परावर्त्तयति अन्यतो नयति। कौटिल्यादेशेनैव कृत्रिमक्रोधस्यावश्यकर्त्तव्यत्वात्कृत्रिमकोपो जातो राज्ञो नतु वास्तविक इति भावः।

तत इति। ततस्तदन्तरं राज्ञो मुखपरावर्त्तनानन्तरमित्यर्थः। वैतालिकौ स्तुतिपाठकौ पठतः वक्ष्यमाणश्लोकद्वयमिति शेषः। विशिष्टो विविधः तालो मङ्गलगीतवाद्यादिकृतः शब्दः प्रयोजनमस्येत्यर्थे वितालशब्दाट्ठक्प्रत्यये वैतालिकशब्दसिद्धिः—

"वैतालिका बोधकराश्चाक्रिका घण्टिकार्थजाः।

स्युर्मागधास्तु मगधा वन्दिनः स्तुतिपाठकाः"। इत्यमरः।

आकाशमिति। काशपुष्पस्य च्छविरिव च्छविर्यस्य स काशपुष्पच्छविस्तं काशपुष्पच्छविं काशकुसुमकान्तिम् आकाशमन्तरिक्षम् अभिभवता तिरस्कुर्वता भस्मना भूत्या शुक्लयन्ती श्वेतयन्ती, शीता अंशवो यस्य स शीतांशुस्तस्य शीतांशोः शिशिरकिरणस्य शिरोऽलङ्करणभूतस्य चन्द्रस्येत्यर्थः। अंशुजालैः किरणसमूहैः जलधर इव मलिना जलधरमलिना तां जलधरमलिनां पयोदकृष्णाम् इभस्येयमैभी ता मैभीं गजासुरसम्बन्धिनीं कृत्तिं चर्म शिवपरिधानभूतचर्मेत्यर्थः। क्लिन्दती सिञ्चन्ती (क्लिश्नातीति पाठे तद्गतनैर्मल्यं तिरस्कुर्वन्तीत्यर्थः) कौमुदीं चन्द्रिकामिव धवलां स्वच्छां कपालानामियं कापाली तां कापालीं नरकपालरचितां स्रजं मालामुद्वहन्ती धारयन्ती हासस्य श्रीरिव श्रीर्येषां ते। तथाविधा राजहंसा यस्यां सा हासश्रीराजहं-

---

राजा—(क्रोधी की तरह मुख फिराते हैं। नेपथ्य में दोनों वैतालिक पढ़ते हैं)—

पहला—काशपुष्प के सदृश कान्तिवाले आकाश को तिरस्कार करती हुई, भस्म से शुक्लवर्ण और सजल मेघ के समान श्यामवर्ण गजचर्म को सींचती हुई चन्द्रिकाकी

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कापालीमुद्वहन्तो स्रजामव धवलां कौमुदीमित्यपूर्वा,
हासश्रीराजहंसा हरतु तनुरिव क्लेशमैशी शरद्वः ॥ २० ॥

अपि च—प्रत्यग्रोन्मेषजिह्मा क्षणमनभिमुखी रत्नदीपप्रभाणाम् ,

सा प्रशस्ताट्टहाससम्पत् इतीत्यतो हेतोरपूर्वाऽतिरमणीया ईशस्येयमैशी ईशसम्बन्धिनी शैवीत्यर्थः । तनुर्मूर्त्तिरिव (पक्षे शरदो विशेषणं सर्वं तच्च क्वचिद्विभक्तिविपरिणामेन क्वचिच्च यथोक्तरूपेणेति बोध्यम् , काशपुस्पच्छविं भस्मनेत्युभयत्र तृतीया-प्रथमाविभक्तिभ्यां विपरिणामः अभिभवतेत्यत्र च लिङ्गविपरिणामो बोध्यः) भस्मना भस्म अभिभवताऽभिभवन्त्या तिरस्कुर्वन्त्या काशपुष्पच्छव्या काशकुसुमशोभया आकाशं गगनं शुक्लयन्ती भासयन्ती शीतांशोरिन्दोः अंशुजालैः किरणसमूहैः ऐभीं गजसंवन्धिनीं कृत्तिमिव जलधरमलिनां मेघमालिन्यं क्लिन्दती अपसारयन्ती (धातूनामनेकार्थत्वात्क्लिन्देरपसारणमर्थः) कापालीं कपालनिर्मितां स्रजं मालामिव धवलां निर्मलां कौमुदीं ज्योत्स्नामुद्वहन्ती हासश्रीरिव राजहंसो यस्यां सा हासश्रीराजहंसा (शरदि मानससरोवरतो राजहंसानां परावर्त्तनादिति भावः) अपूर्वाऽतिरमणीया शरत् वो युष्माकं क्लेशं कष्टं (राक्षसमलयकेतूभयकृतं दुःखमिति ध्वनिः) हरतु नाशयतु । तवाध्यात्मिकक्लेशहारिणीशतनुरिव शरत्फलसंपदा तत्र लोकानां च दुःखं नाशयत्विति भावः । जलधरमलिनां हासश्रीराजहंसेत्युभयत्रौपम्यवाचकेवशब्दस्य लुप्तत्वाल्लुप्तोपमा, स्रजमिव तनुरिवत्यत्र चौपम्यप्रतिपादकेवशब्दसत्त्वादुपमालङ्कारः । स्रग्धरावृत्तम् ॥ २० ॥

प्रत्यग्रेति । फणानां चक्रवालं फणाचक्रवालं उपधीयते स्थाप्यते शिरोऽस्मिन् तदुपधानं फणाचक्रवालमेवोपधानं यस्य यस्मिन्वा तत्फणाचक्रवालोपधानं स्फटामण्डलोपवर्हं । "स्फटायां तु फणा द्वयोः" । "चक्रवालं तु मण्डलम्" "उपधानं तूपवर्हमि" त्यमरः) । नागस्याङ्कं नागाङ्कं भुजगक्रोडरूपमित्यर्थः । उरु महत् शयनं शय्यां मोक्तुं त्यक्तुम् इच्छोः कामयमानस्य हरेर्विष्णोः प्रत्यग्रश्चासावुन्मेषः प्रत्यग्रोन्मेषस्तेन जिह्मा प्रत्यग्रोन्मेषजिह्मा नवोन्मीलनालसा क्षणं

तरह शुक्लवर्ण नरकपालरचित माला को धारण किये प्रशस्त अट्टहास रूपी सम्पत्ति से युक्त शिव मूर्तिकी तरह शुभ शरद् ऋतु आपलोगों का दुःख दूर करे ॥ २० ॥

और भी—फणासमूहरूप शिरोधान (तकिया) वाले सर्पराज के क्रोधरूप महान् शय्या का त्याग करने की इच्छा करनेवाले भगवान् की तुरत खोलने से आलस्य युक्त और कुछ देर तक शिरस्थ रत्नरूपी दीपों की प्रभाओं का सामना न करनेवाली,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आत्मव्यापारगुर्वी जनितजललवा, जृम्भितैः साङ्गभङ्गैः ।
नागाङ्कं मोक्तुमिच्छोः शयनमुरुफणाचक्रवालोपधानं,।
निद्राच्छेदाभिताम्रा चिरमवतु हरेर्दृष्टिराकेकरा वः ॥२१॥

द्वितीयः–सत्त्वोत्कर्षस्य धात्रा निधय इव कृताः केऽपि कस्यापि हेतोः,
जेतारः स्वेन धाम्ना मदसलिलमुचां नागयूथेश्वराणाम् ।

किञ्चित्कालमभिव्याप्येत्यर्थः रत्नान्येव दीपा रत्नदीपास्तेषां प्रभा रत्नदीपप्रभास्तासां रत्नदीपप्रभाणां भुजगशिरःस्थमणिप्रदीपकान्तीनाम् अनभिमुखी असम्मुखी अङ्गानां भङ्गानि अङ्गभङ्गानि अङ्गभङ्गैः सहितानि साङ्गभङ्गानि तैः साङ्गभङ्गैः जृंभितैः गात्रविनामैः निद्रालस्यापहारकमुखव्यादानात्मकव्यापारैरित्यर्थः, जनिता उत्पन्ना जललवा यस्याः सा जनितजललवा उत्पन्नसलिलविन्दवः अतएव आत्मनो व्यापार आत्मव्यापारस्तस्मिन् गुर्वी आत्मव्यापारगुर्वी दर्शनात्मकस्वक्रियाऽसमर्था निद्रायाश्छेदो निद्राच्छेदस्तेनाऽभिताम्रा निद्राच्छेदाभिताम्रा निद्राभङ्गातिरक्ता आकेकरा ईषत्संकुचिता दृष्टिश्चक्षुः वो युष्मान् चिरं बहुकालम् अवतु रक्षतु शरदि विष्णुजागरणस्य शास्त्रसम्मतत्वात्तद्वर्णनं जातमेवेत्यवधेयम् । रत्न-नागाङ्कफणाचक्रवालेषु दीपत्व-शयनत्वोपधानत्वसंमारोपणात् स्वभाववर्णनाच्च रूपकस्वभावोक्त्योरलंकारयोः संसृष्टिः । प्रसादगुणः । लाटी रीतिः । स्रग्धरावृत्तम् ॥ २१ ॥

सत्त्वोत्कर्षस्येति । नृणां वरो नृवरस्तत्सम्बुद्धौ हे नृवर नरश्रेष्ठ ! धात्रा ब्रह्मणा कस्यापि हेतोः कस्मैचिदपि प्रयोजनायेत्यर्थः ('षष्ठी हेतुप्रयोगे' इत्येनेन षष्ठी) सत्त्वस्योत्कर्षः सत्त्वोत्कर्षस्तस्य सत्त्वोत्कर्षस्य वीर्यातिशयितस्य—("सत्त्वं गुणे पिशाचादौ बले द्रव्य-स्वभावयोः," "आत्मनि व्यवसाये च चित्ते प्राणिषु जन्तुषु" इति विश्वः) निधीयन्ते एष्विति निधय आधारा इव कृता उत्पादिताः, स्वेन स्वकीयेन धाम्ना तेजसा मद एव सलिलं मदः सलिलमिवेति वा, मदसलिलं तन्मुञ्चन्तीति मदसलिलमुचस्तेषां मदसलिलमुचां प्रकटदानराजीनां

निद्राजन्य आलस्य को दूर करनेवाले शरीरव्यापारों द्वारा उत्पन्न जलकणावाली, अतएव अपने व्यापार में शिथिल, निद्राभङ्ग होने से रक्तवर्ण और ईषत् संकुचित दृष्टि आपलोगों की रक्षा करे ॥ २१ ॥

दूसरा—हे राजन् ! किसी कारण ब्रह्माद्वारा अत्यन्त बलके आधार के समान उत्पन्न किये गये अभिमानशाली हस्तिपतियों को अपने तेजसे जीतनेवाले बहुत

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दंष्ट्राभङ्गं मृगाणामधिपतय इव व्यक्तमानावलेपा,
नाऽऽज्ञाभङ्गं सहन्ते नृवर! नृपतयस्त्वादृशाः सार्वभौमाः॥ २२॥

अपि च—भूषणाद्युपभोगेन प्रभुर्भवति न प्रभुः ।
परैरपरिभूताज्ञस्त्वमिव प्रभुरुच्यते ॥ २३ ॥

चाणक्यः—(आकर्ण्यात्मगतम्).प्रथमं तावद्विशिष्टदेवतास्तुतिरूपेण

मदस्राविणामित्यर्थः, नागानां यूथा नागयूथास्तेषामीश्वरा नागयूथेश्वरास्तेषां नागयूथेश्वराणां करिसमूहाधिपतीनां, मदसलिलमुचाम् अभिमानशालिनां नागयूथेश्वरसदृशानां नृपाणाञ्चेति ध्वनिः । जेतारः अभिभावयितारः, मानश्चावलेपश्च मानावलेपौ व्यक्तौ मानावलेपौ येषां ते व्यक्तमानावलेपाः प्रकटाभिमानगर्वाः केऽपि उत्कृष्टसामर्थ्यवन्तः त्वादृशा भवद्विधाः सार्वभौमाः सर्वभूमिपतयः नृपतयो राजानो मृगाणामधिपतयः केसरिणः दंष्ट्राभङ्गमिव दन्तोत्पाटनमिव आज्ञाभङ्गम् आदेशव्याघातं न सहन्ते न मृष्यन्ति । उत्कृष्टसामर्थ्यशालिकेसरिदन्तोत्पाटयितुर्यथा प्राणदण्डस्तथा तवाज्ञाव्याहन्तुरपि प्राणदण्डेन भाव्यमिति भावः । निश्चय इवेत्यत्रोत्प्रेक्षाबोधकेवशब्दसत्त्वात् अधिपतय इवेत्यत्रौपम्यवाचकेवशब्दसत्त्वादुत्प्रेक्षोपमयो संसृष्टिः । ओजो गुणः । वैदर्भी रीतिः । स्रग्धरावृत्तम् ॥ २२ ॥

भूषणादिति । प्रभुर्नृपः भूषणाद्युपभोगेन अलङ्करणादिपरिधारणादिजन्यसुखसाक्षात्कारेणेत्यर्थः । प्रभुर्न भवति प्रभुशब्दवाच्यो न भवतीत्यर्थः । परै रन्यैः अपरिभूता अप्रतिहता आज्ञा यस्य सपरैरपरिभूताज्ञः त्वमिव भवानिव प्रभुः नृपतिः उच्यते कथ्यते जनैरिति शेषः । यदीयशासनं कुत्राप्यस्खलत्सर्वदैव सर्वैः शिरोभि रूह्यते स एव प्रभुर्नतु स्खलितशासनोऽपीति कौटिल्यकृतत्वदाज्ञाव्याघातेन प्रभुशब्दवाच्यत्वस्य त्वयि संदिग्धप्रायत्वात्तदालोचनीयमिति भावः । अत्रोपमाऽलंकारः । अनुष्टुप् वृत्तम् । एतत्पद्यद्वयं राक्षसप्रणिधिस्तनकलशपठितम् ॥ २३ ॥

आकर्ण्येति । आकर्ण्य राक्षसप्रणिधिस्तनकलशपठितं मौर्योत्तेजकं पद्यद्वयं-

---

अभिमानी तथा उत्कृष्ट बलवाले आपके ऐसे राजा सिंहके दन्तभङ्ग की तरह लोगों के आज्ञाभङ्ग को नहीं सहन कर सकते ॥ २२ ॥

और भी—अनेक उत्तमर अलङ्करण धारण करने तथा सुख प्राप्त करने से ही राजा राजा नहीं कहलाते, किन्तु दूसरों से अतिरस्कृत आज्ञावाले तुम्हारे ऐसे राजा ही राजा कहे जाते हैं ॥ २३ ॥

चाणक्यः—(सुनकर मन ही मन) पहिले तो विशिष्ट देवता की स्तुतिरूप उपस्थित

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रवृत्तशरद्गुणप्रख्यापनमाशीर्वचनम् इदमपरं किमिति नावधारया-मि । (विचिन्त्य) आः ज्ञातम् । राक्षसस्यायं प्रयोगः । आः दुरात्मन् राक्षसहतक ! दृश्यसे, जागर्त्ति खलु कौटल्यः ।

राजा—आर्य वैहीनरे ! दापयाभ्यां वैतालिकाभ्यां सुवर्णशतसहस्रम् ।

कञ्चुकी—यदाज्ञापयति देवः (इत्युत्थाय परिक्रामति)

चाणक्यः—(सक्रोधम्) वैहीनरे ! तिष्ठ तिष्ठ, न गन्तव्यम् । वृषल ! किमयमस्थाने एव महानर्थोत्सर्गः क्रियते ?

श्रुत्वेत्यर्थः। आत्मगतं (क्रियाविशेषणमिदम् मनोगतं तथा तथा ब्रवीतीत्यर्थः) प्रथमं प्राक् तावच्छब्दोऽत्र वाक्यालंकारे, विशिष्टा चासौ देवता विशिष्टदेवता तस्याः स्तुतिर्विशिष्टदेवतास्तुतिः सैव रूपन्तेन विशिष्टदेवतास्तुतिरूपेण, प्रवृत्ता चासौ शरत्प्रवृत्तशरत् गुणानां प्रख्यापनं गुणप्रख्यापनं प्रवृत्तशरदो गुणप्रख्यापनं यस्मिन्तत् प्रवृत्तशरद्गुणप्रख्यापनम् उपस्थितशरद्गुणकीर्त्तनम् आशीर्वचनम् आशीर्वादः इदम् अपरं द्वितीयवैतालिकोक्तं किमिति नावधारयामि न जानामीत्यर्थः । विचिन्त्य, विचार्य, आः ज्ञातम् ईर्ष्यासूचकमव्ययम् राक्षसस्यायं प्रयोगः नन्दसचिवनियुक्तस्य कस्यचिद्वैतालिकस्य चन्द्रगुप्तमुत्तेजयितुमुक्तिरियमित्यवगतमित्यर्थः । दुरात्मन् राक्षसहतक ! दृश्यसे मयेति शेषः । चाणक्यः कौटिल्यो जागर्त्ति स्वकार्येषु सावधानत्वेन त्वत्कृतमौर्यानिष्टलेशसम्भावनापीति भावः ।

आभ्यामिति । आभ्यां नेपथ्यस्थिताभ्यां वैतालिकाभ्यां स्तुतिपाठकाभ्यां सुवर्णानां शतानि तेषां सहस्रं सुवर्णशतसहस्रं शतसहस्रसंख्याकसुवर्णमुद्रात्मकं पारितोषिकं दापय कोशाध्यक्षेन त्वमिति शेषः ।

सक्रोधमिति । क्रोधेन कोपेन सहितं सक्रोधं सकोप यथा तथा ब्रवीति चाणक्य इत्यर्थः । वृषल मौर्य ! किं किमर्थम् अस्थानेऽसत्पात्रे अयमेष महानर्थो-

---

शरद् ऋतु का गुण कथनात्मक आशीर्वाद कहा गया, यह दूसरा क्या है उसको मैं नहीं जानता (विचार कर) आः जाना यह राक्षस का चक्र है । आः दुष्ट ! राक्षसाधम ! मैं तुझे देखता हूं, चाणक्य अभी जागता है ।

राजा—आर्य वैहीनरि ! इन दोनों वैतालिकोंको सौ सौ सहस्र अशर्फी दिला दो ।

कन्चुकी—आपकी जो आज्ञा (यह कह कर उठ कर चला जाता है)

चाणक्यः—(क्रोधसे) वैहीनरि ! ठहरो, अभी न जाओ ? वृषल ! बिना प्रयोजन इतने अधिक धनका व्यय क्यों करते हो ?

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राजा—आर्येणैवं सर्वतो निरुद्धचेष्टाप्रसरस्य मम वन्धनमिव राज्यं, न राज्यमिव ।

चाणक्यः—वृषल ! स्वयमनभियुक्तानां राज्ञामेते दोषा भवन्ति । तद्यदि न सहसे, तदा स्वयमेवाभियुज्यस्व ।

राजा—एते वयं स्वकर्मण्यभियुज्यामहे ।

चाणक्यः—प्रियं नः, वयमपि स्वकर्मण्यभियुज्यामहे ।

त्सर्गो धनव्ययः क्रियते त्वयेति शेषः । (चाणक्य–चन्द्रगुप्तयो रोषसम्भाषणां सम्फेटः) ।

आर्येणेति । आर्येण पूज्येन भवता एवं वैतालिकोद्‍द्देश्यकार्थत्यागवत् सर्वतः सर्वथा निरुद्धचेष्टाप्रसरस्य प्रतिहतोद्योगावसरस्य मम राज्यं प्रजाधिपत्यं बन्धनमिव कारागृहसदृशमिव नाऽऽधिपत्यमिवेत्यर्थः !

स्वयमिति । स्वयमनभियुक्तानां राजकार्येष्वस्वतन्त्राणां राज्ञां नृपाणां एते इमे दोषाः मादृशपूज्यजनादेशामर्षणात्मका इत्यर्थः । सम्भवन्ति जायन्ते । निजस्वाधीनताकांक्षयाऽन्यस्वाधीनतां न क्षमन्ते इति भावः । तत्तस्मात्कारणात् यदि न सहसे गुरुजनगौरवमिति शेषः । तदा स्वयमेव साक्षादेव अभियुज्यस्व राजकार्यसम्पादने तत्परो भव । स्वातन्त्र्यं गृहाणेत्यर्थः ।

एते इति । एते वयमिति शेषः । स्वकर्मणि राजकार्ये अभियुज्यामहे स्वतन्त्रा भवामः (एतद् गुरोरमाननं छलम्) ।

प्रियमिति । नोऽस्माकं प्रियमिष्टं स्वातन्त्र्येण राजकार्यावलोकनमिति शेषः । वयमपि । स्वकर्मणि ब्राह्मणानां कृत्येऽग्निहोत्रादौ मन्त्रिकार्ये वा, अभियुज्यामहे उद्युक्ता भवामः । (अग्निहोत्राद्यात्मककर्मण्यभियोगो ममेति बाह्योऽर्थः) राक्षसायत्तीकरणात्मककर्मण्यभियोगस्तु गुप्तोऽर्थः ।

राजा—इसी तरह यदि सर्वदा आप मुझे रोकते रहेंगे तो मानो राज्य मेरे लिए बन्धन की तरह है, न कि राज्य की तरह है ।

चाणक्यः—वृषल ! राजकार्य में पराधीन राजाओं के ये बन्धन होते ही हैं । यदि इसे न सहन कर सको तो तुम स्वतन्त्र हो सकते हो ।

राजा—यही तो मेरा अभिप्राय है, हम अपने कार्य में स्वतन्त्र हैं ।

चाणक्यः—यह तो हमको इष्ट ही है तो आज से हम भी अपने कार्य में स्वतन्त्र होते हैं ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राजा—यद्येवं, तर्हि कौमुदीमहोत्सवप्रतिषेधस्य प्रयोजनं श्रोतुमिच्छामि ।

चाणक्यः—वृषल ! कौमुदीमहोत्सवानुष्ठानस्य किं प्रयोजनमित्यहमपि श्रोतुमिच्छामि ।

राजा—प्रथमं तावत् ममाज्ञाव्याघातः ।

चाणक्यः—वृषल ! ममापि खलु त्वादाज्ञाव्याघात एव कौमुदीमहोत्सवप्रतिषेधस्य प्रथमं प्रयोजनमिति । कुतः ?—

अम्भोधीनां तमालप्रभवकिसलयश्यामवेलावनानाम् ,
आपारेभ्यश्चतुर्णां चटुलतिमिकुलक्षोभितान्तर्जलानाम् ।

प्रथममिति । प्रथमं प्राक् तावच्छब्दो वाक्यालङ्कारे, मम आत्मनः आज्ञाव्याघातः आदेशभङ्गः । आज्ञाविधानमिति पाठे आदेशप्रचारणमेव फलमित्यर्थः । आज्ञाऽव्याघात इति पाठे आदेशप्रतिपालनं (स्वीकार) इत्यर्थः ।

ममापीति । ममापि आत्मनोऽपि त्वदाज्ञाव्याघातः तवादेशाप्रतिपालनमेव प्रथममाद्यं प्रयोजनं फलमित्यर्थः ।

अम्भोधीनामिति । तमालेभ्यः प्रभवन्तीति तमालप्रभवाणि । यद्वा प्रभवत्यस्मादिति प्रभवस्तमालः प्रभवो येषां तानि तमालप्रभवाणि तानि च तानि किसलयानि तमालप्रभवकिसलयानि तैः श्यामानि कृष्णानि वेलावनानि येषां ते तथोक्तास्तेषां तमालप्रभवकिसलयश्यामवेलावनानाम् तापिच्छजातनवपल्लवासितकूलारण्यानाम् चटुलानि च तानि तिमिकुलानि चटुलतिमिकुलानि तैः क्षोभितमन्तजलं जलमध्यं येषां ते तथोक्तास्तेषां चटुलतिमिकुलक्षोभितान्तर्जलानाम् , सञ्चरद्राजमत्स्यविशेषसमूहविलोडितजलमध्यानां चतुर्णाम् अम्भांसि धीयन्ते एष्वित्यम्भोध-

---

राजा—यदि ऐसा ही है तो मैं कौमुदी महोत्सव रोकने का कारण सुनना चाहता हूँ ।

चाणक्यः—वृषल कौमुदी महोत्सव होने से क्यालाभ है ? यह मैं भी जानना चाहता हूँ ।

राजा—पहले तो हमारी आज्ञा का पालन ।

चाणक्यः—वृषल ! तुम्हारी आज्ञाभङ्ग करना ही कौमुदीमहोत्सव रोकने का उद्देश्य है ।

जैसेकि—तमालपत्रों से श्यामवर्ण वेलावनवाले, चञ्चल मत्स्यों के द्वारा कम्पित जलवाले चारों समुद्रों के पार से आए हुए अनेक राजाओं के मस्तक द्वारा आज्ञा-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मालेवाज्ञा सपुष्पा नतनृपतिशतैरुह्यते या शिरोभिः,
सा मय्येव स्खलन्ती प्रथयति विनयालंकृतं ते प्रभुत्वम् ॥ २४ ॥

राजा—अथापरमपि प्रयोजनं यत्तच्छ्रोतुमिच्छामि ।

चाणक्यः—तदपि कथयामि ?

राजा—कथ्यताम् ।

चाणक्यः—शोणोत्तरे ! शोणोत्तरे मद्वचनात् कायस्थमचलदत्तं ब्रूहि, यत् भद्रभटप्रभृतीनां लेख्यपत्रं तत्तावत् दीयतामिति ।

यस्तेषामम्भोधीनां सरित्पतीनाम् आपारेभ्यः पारेभ्यः पारतीरेभ्यः आपारात् प्राप्तैरित्यर्थः । परतीरपर्यन्तप्रदेशात्समागतैरिति वाऽर्थः । नताश्च ते नृपतयो नतनृपतयस्तेषां शतानि नतनृपतिशतानि तैः नतनृपतिशतैः वशवर्तिराजसमूहैः (कर्तृभिः) सपुष्पा पुष्पयुक्ता माला स्रगिव या आज्ञा त्वदीयेति शेषः । शिरोभिरुत्तमाङ्गैरुह्यते (वर्तमानसामीप्ये लट्) धारयिष्यते सा आज्ञा मय्यात्मन्येवस्खलन्ती व्याहता सती ते तव प्रभुत्वमाधिपत्यं विनयेन प्रश्रयेणालंकृतं भूषितं विनयालंकृतं प्रश्रयभूषितमित्यर्थः। प्रथयति ख्यापयति । (इत्यादि चाणक्यवचनजातं गुरुकीर्तनं प्रसङ्गः) कुत्राप्यस्खलितायास्तवाज्ञाया मयि स्खलनेऽपि क्षमता त्वयि विनयातिशयं सूचयतीति भावः । मालेवेत्यत्रेवशब्दसत्त्वादुपमालङ्कारः । तमालकिसलयेत्युक्त्यैव सामञ्जस्ये प्रभवशब्दस्याधिक्यादधिकपदत्वदोषः । ओजो गुणः गौडी रीतिः । स्रग्धरा वृत्तम् ॥ २४ ॥

मद्वचनादिति । मद्वचनात् मदुक्त्या अचलदत्तम् एतन्नामकं कायस्थं चित्रगुप्तसजातीयं ब्रूहि, किमित्याह—यदिति । इतः कुसुमपुरात् अपक्रम्य निर्गत्य अपरागान्मौर्येऽननुरागात् मलयकेतुं पर्वतकसुतम् आश्रितानां सेवमानानां भद्रभटप्रभृ-

---

माला की तरह जो माना जाता है, हमारे हो कारण वह आज्ञा तुम्हारे आधिपत्य को विख्यात करती है ॥ २४ ॥

राजा—दूसरा जो प्रयोजन है वह भी सुनना चाहता हूं ।

चाणक्यः—वह भी कहता हूं ।

राजा—कहिये ?

चाणक्यः—शोणोत्तरे ! हमारी जबानी अचलदत्त नामके कायस्थ से कहो कि कुसुमपुरसे आया हुआ मलयकेतुके पास रहनेवाले भद्रभट प्रभृति नौकरों का लिखा हुआ पत्र दे दें ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रतीहारी—जं अज्जो आणवेदित्ति (निष्क्रम्य पुनः प्रविश्य) अज्ज ! एदं पत्तं [यदार्य आज्ञापयति इति आर्य ! इदं पत्रम्]

चाणक्यः—(गृहीत्वा) वृषल ! श्रूयताम् ।

राजा—दत्तावधानोऽस्मि ।

चाणक्यः—(वाचयति) स्वस्ति, सुगृहीतनामधेयस्य देवस्य चन्द्रगुप्तस्य सहोत्थायिनां प्रधानपुरुषाणामितोऽपक्रम्य मलयकेतुमाश्रितानां परिमाणलेख्यपत्रम् । तत्र प्रथमं तावत् गजाध्यक्षो भद्रभटः, अश्वाध्यक्षः पुरुषदत्तः महाप्रतीहारस्य चन्द्रभानोर्भागिनेयो हिङ्गुरा-

---

तीनां भद्रभटादीनां यत् लेख्यपत्रं लिखितपत्रिका तत् दीयताम् अर्प्यताम् । (चाणक्यादेशाद्भद्रभटप्रभृतयोऽननुरागं मौर्ये प्रकाश्य कुसुमपुरान्निर्गत्य मलयकेतुमाश्रिता इति षष्ठेऽङ्के स्फुटी भविष्यति) ।

दत्तावधानोऽस्मीति । दत्तमवधानं चित्तं येन स दत्तावधानो दत्तचित्तोऽस्मि श्रवणे इति शेषः ।

वाचयतीति । प्रतीहारीसमानीतं पत्रं पठतीत्यर्थः । स्वस्ति मङ्गलमस्त्विति शेषः । मङ्गलार्थं पत्रादौ स्वस्तिशब्दोपादानस्य प्रसिद्धत्वात्स्वस्तिशब्द उपात्त इत्यवधेयम् । सुगृहीतं प्रातःस्मरणीयं नामधेयं नाम यस्य स तथोक्तस्तस्य सुगृहीतनामधेयस्य प्रातःस्मरणीयनाम्नः देवस्य राज्ञश्चन्द्रगुप्तस्य मौर्यस्य सह सार्द्धमुत्तिष्ठन्ति ये ते सहोत्थायिनस्तेषां सहोत्थायिनां युगपदुत्थितिशीलानामितोऽस्मात्कुसुमपुरादित्यर्थः । अपक्रम्य निर्गत्य मलयकेतुं पर्वतकपुत्रम् आश्रितानां सेवमानानां प्रधानपुरुषाणां कार्याधिपतीनामिदम् प्रमाणस्य लेख्यपत्रं, संख्यापत्रमित्यर्थः । अस्तीति शेषः । तत्र प्रमाणपत्रे तावच्छब्दो वाक्यालङ्कारे प्रथममेव आदावेव भद्रभटः, गजाध्यक्षो हस्तिपालकः पुरुषदत्त एतदाख्यः, आश्वानां वाजिनामध्यक्षः पालकः अश्वाध्यक्षोऽश्वपालकः, महांश्चासौ प्रतीहारो महाप्रतिहारस्तस्य महाप्रतीहा-

---

प्रतीहारी—आपकी जो आज्ञा । (जाकर फिर रङ्गस्थानमें प्रवेशकर) आर्य ! यह पत्र है ।

चाणक्यः—(लेकर) वृषल ! सुनो ?

राजा—मैं सावधान हूँ ।

चाणक्यः—(पढता है) मंगल हो, प्रातःस्मरणीय नामवाले राजा चन्द्रगुप्त का साथ देनेवाले कुसुमपुर से जाकर मलयकेतु के पास रहनेवाले कार्याधिपतियों का यह प्रमाणपत्र है । उनमें पहला भद्रभट नामका हाथीवान् है । दूसरा पुरुषदत्त नामक अ-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तः, देवस्य स्वजनगन्धी महाराजो वलगुप्तः, देवस्यैव कुमारसेवको राजसेनः, सेनापतेः सिंहबलस्य कनीयान् भ्राता भागुरायणः मालवराजपुत्रो रोहिताक्षः क्षत्रगणमुख्यतमो विजयवर्मा इति (आत्मगतम्) एते वयं देवस्य कार्येऽवहिताः स्म इति (प्रकाशम्) एतावदेतत् पत्रम्

राजा—आर्य ! एतेषामपरागहेतून् श्रोतुमिच्छामि ।

चाणक्यः—वृषल ! श्रूयताम्, अत्र यावेतौ गजाध्यक्षाश्वाध्यक्षौ

रस्य प्रधानद्वारपालकस्य चन्द्रभानोस्तदाख्यस्य भगिन्या अपत्यं भागिनेयः भगिनीपुत्रः हिङ्गुरातः, देवस्य राज्ञश्चन्द्रगुप्तस्येत्यर्थः । स्वजनस्याऽऽत्मीयजनस्य गन्धः सम्बन्धोऽस्यास्तीति स्वजनगन्धी आत्मीयजनसम्बन्धी । (गन्धो गन्धक आमोदे लेशे सम्बन्धगर्वयोः इति मेदिनी) नृपस्य चन्द्रगुप्तस्यैव कुमारे बाल्ये सेवको भृत्यः कुमारसेवकः बाल्यभृत्यः राजसेनः, सेनापतेः सैन्याध्यक्षस्य सिंहबलस्य कनीयान् अनुजो भ्राता सोदरः भागुरायणः, मालवराजस्य पुत्रो मालवराजपुत्रः, मालवाधीशसुतः लोहिते रक्तवर्णेऽक्षिणी नेत्रे यस्य स लोहिताक्षः ताम्रवर्णनेत्रः, अतिशयेन मुख्यो मुख्यतमः क्षत्रगणानां मुख्यतमः क्षत्रियवर्गप्रधानः विजयवर्मा । इतीत्येत्सर्वं पठित्वा आत्मगतम् अस्पष्टं यथा तथा ब्रवीति । एत वयं देवस्य राज्ञश्चन्द्रगुप्तस्येत्यर्थः । कार्ये कृत्ये अवहिताः सावधानाः स्मो भवामः । प्रकाशं सर्वैः श्राव्यं यथा तथा ब्रवीतीत्यर्थः । एतत्पठ्यमानं पत्रं दलमेतावत् एतद्वृत्तयुक्तमित्यर्थः । अस्तीति शेषः ।

एतेषामिति । एतेषां भद्रभटप्रभृतीनाम् अपरागाणां हेतवः कारणानि अपरागहेतवस्तानपरागहेतून् विरागकारणानीत्यर्थः । श्रोतुमाकर्णितुम् इच्छामि वाञ्छामि ।

वृषलेति । वृषल मौर्य ! श्रूयतां तेषां विरागकारणमाकर्ण्यताम् अत्र भद्रभ-

---

श्वपालक है । तीसरा-प्रधानद्वारपालक चन्द्रभानु का भगिनीपुत्र हिङ्गुरात है । चौथा-आपके आत्मीयजन महाराज बलगुप्त हैं । पांचवां-आप ही की बाल्यावस्था का सेवक राजसेन है । छठां सिंहबल नामक सेनापति का छोटा भाई भागुरायण है । सातवां-मालवराज का पुत्र रोहिताक्ष है । आठवां—क्षत्रियों में वीर विजयवर्मा है (मन ही-मन) इतने लोग आपका कार्य करने को सदा तैयार हैं ! (जोर से) इतना ही यह पत्र है ।

राजा—मैं इन सब की उदासीनता का कारण जानना चाहता हूं ।

चाणक्यः—वृषल ! सुनो, इनमें हस्तिपालक भद्रभट और अश्वपालक पुरुषदत्त

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भद्रभट-पुरुषदत्तनामानौ, एतौ खलु स्त्री-मद्य-मृगयाशीलौ, हस्त्यश्वावेक्षणेऽनभियुक्तौ इति स्वाधिकाराभ्यामवरोप्य मया स्वजीवनमात्रेणैव स्थापितावित्यपरक्तौ, गत्वा स्वेन स्वेन चाऽधिकारेण व्यवस्थाप्य मलयकेतुमाश्रितौ। यावेतौ हिङ्गुरातबलगुप्तौ, तावत्यन्तलुब्धप्रकृती दत्तं धनमबहुमन्यमानौ, तत्र बहु लभ्येत इति मलयकेतुमाश्रितौ। योऽप्यसौ भवतः कुमारसेवको राजसेनः सोपि तव प्रसादादतिप्रभूतकोषहस्त्यश्वं सहसैव सुमहदैश्वर्यमवाप्य पुनरुच्छेदशङ्क-

---

टादिष्वित्यर्थः। यावेतौ भद्रभट पुरुषदत्तनामानौ भद्रभट-पुरुषदत्तसंज्ञकौ गजाध्यक्षाश्वाध्यक्षौ हस्तिपालकाश्वपालकौ तौ खलुशद्बो वाक्यालङ्कारे स्त्री च मद्यं च मृगया च स्त्री-मद्य-मृगयास्ताः शीलं स्वभावो ययोस्तौ स्त्री-मद्य-मृगयाशीलौ नारी मध्वाखेटस्वभावौ हस्ती चाश्वश्च हस्त्यश्वं तस्यावेक्षणं सम्यक् पालनं तस्मिन् हस्त्यश्वावेक्षणे गजवाजिसंरक्षणेऽनभियुक्तौ असावधानौ इति हेतो', स्वाधिकाराभ्यां हस्त्यश्वसंरक्षणात्मकाभ्यामित्यर्थः। अवरोप्य पृथक्कृत्य, स्वयोर्जीवनं स्वजीवनं तदेव स्वजीवनमात्रं तेन स्वजीवनमात्रेण स्वजीविकाभ्विनैवेत्यर्थः। स्थापितौ इत्यतो हेतोः अपरक्तौ त्यक्तानुरागौ सन्तौ गत्वा मलयकेतुसन्निधिमिति शेषः। स्वेन स्वेन चाधिकारेण गजरक्षकत्वेन अश्वरक्षकत्वेन रूपेणेत्यर्थः। व्यवस्थाप्य निश्चित्य आत्मानमिति शेषः। मलयकेतुं पर्वतकपुत्रम् आश्रितौ तमाश्रित्य गजरक्षकोऽश्वरक्षकश्च जातौ। यावेतौ इमौ हिङ्गुरात-बलगुप्तौ तन्नामानौ तवापि अत्यन्तमतिशयितं लुब्धा प्रकृतिः स्वभावो ययोस्तावत्यन्तलुब्धप्रकृती अतिशयितलोभाभिभूतस्वभावौ दत्तं त्वया प्रागङ्गीकृतं धनं द्रव्यम् अबहुमन्यमानौ अल्पमवबुध्यमानौ, विशेषप्राप्तिकामनयाऽल्पत्वेनापरितुष्यन्तावित्यर्थः। तत्र मलयकेतुसन्निधावित्यर्थः। बहु अधिकं लभ्येत प्राप्येत इत्यस्माद्धेतोः मलयकेतुं पर्वतकपुत्रम् आश्रितौ-योप्यसौ यश्चैषः भवतस्तव कुमारसेवकः बाल्यभृत्यः राजसेनः राजसेननामा सोऽपि तव भवतः प्रसादादनुग्रहात् अतिप्रभूतः विवृद्धः कोशो धनराशिः हस्तिनोऽश्वाश्च यस्मिन् तत् अतिप्रभूतकोशहस्त्यश्वं विवृद्धधनराशिगजाश्वं सुमहत् ऐश्वर्यं सम्पि-

---

ये दोनों नीचकार्य में प्रवृत्त होनेके कारण अपने २ कार्य अच्छी तरह नहीं करते थे। इस लिये हटाये गये और वे मलय केतु के यहां उसी कार्य में नियुक्त हुए। हिङ्गुरात और बलगुप्त ये दोनों अत्यन्त लोभ के कारण विशेष द्रव्य मिलने की इच्छासे मलयकेतु के पास चले गये। आप का बाल-सेवक राजसेन भी आप की कृपा से अ-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

याऽपक्रम्य मलयकेतुमाश्रितः । योऽयमपरः सेनापतेः सिंहबलस्य कनीयान् भ्राता भागुरायणः, असावपि तत्र काले पर्वतकेन सह समुत्पन्नसौहार्दः तत्प्रीत्या च "पिता ते चाणक्येन घातितः" इति रहसि त्रासयित्वा, मलयकेतुमपवाहितवान् ततो भवदपथ्यकारिषु चन्दनदासप्रभृतिषु निगृह्यमाणेषु स्वदोषाशङ्कयाऽपक्रम्य मलयकेतुमाश्रितः । तेनाप्यसौ मम प्राणरक्षक इति कृतज्ञतामनुवर्तमानेन आत्मनोऽनन्तरममात्यपदं ग्राहितः । यौ तौ लोहिताक्ष–विजयवर्माणौ,

---

त्तिम् अवाप्य पुनर्भूयः उच्छेदशङ्कया विनाशत्रासेन अपक्रम्य इतो निर्गत्य मलयकेतुं पर्वतकसुतमाश्रितः सैन्याध्यक्षस्य सिंहबलस्यानुजः सोदरो भागुरायणोऽपि तत्र मलयकेतुसन्निधौ काले समये पर्वतकेन सह तन्नाम्ना मलयकेतुपित्रा सार्द्धं समुत्पन्नं सौहार्दं यस्य स समुत्पन्नसौहार्दः संजातमैत्रिकः, तस्मिन्प्रीतिस्तया तत्प्रीत्या पर्वतकस्नेहेन च, चाणक्येन कौटिल्येन ते तव पिता जनकः पर्वतक इत्यर्थः । घातितो विनाशितः इतीत्येवंवृत्तं रहसि एकान्ते त्रासयित्वा भाययित्वा मलयकेतुं पर्वतकपुत्रम् अपवाहितवान् अपसारितवान् । ततस्तदनन्तरं भवतोऽपथ्यं भवदपथ्यं तत्कर्तुं शीलं येषां ते भवदपथ्यकारिणस्तेषु भवदपथ्यकारिषु त्वदनिष्टविधायिषु चन्दनदासः प्रभृतिरादिर्येषां ते चन्दनदासप्रभृतयस्तेषु चन्दनदासप्रभृतिषु चन्दनदासादिषु निगृह्यमाणेषु दण्ड्यमानेषु सत्सु स्वदोषाशङ्कया निजापराधभयेन अपक्रम्य इतो निर्गत्य मलयकेतुं पर्वतकपुत्रमाश्रितः प्राप्तः । असौ भागुरायणो मम प्राणरक्षकः अस्मज्जीवत्राता इति कृतं जानातीति कृतज्ञः तस्य भावः कृतज्ञता तां कृतज्ञताम् स्वप्राणत्राणात्मकप्रत्युपकारिताम् अनुवर्तमानेन अपेक्षमाणेन अनुसरतेति यावत् । तेन मलयकेतुनाऽपि आत्मनः स्वस्मात् अनन्तरम् अव्यवहितं सन्निकृष्टमिति यावत् । अमात्यपदं मन्त्रिस्थानं ग्राहितः

धिक ऐश्वर्य पाकर फिर राजदण्ड के भय से जाकर मलयकेतु से मिलगया। दूसरा सिंहबल नामके सेनापति का छोटे भाई भागुरायणने भी समय पाकर पर्वतक के साथ मित्रता कर के उनमें प्रीति के कारण "तुम्हारा पिता चाणक्य द्वारा मारा गया है" आदि कहकर एकान्तमें डराकर मलयकेतु को भगा दिया। उसके बाद आपका अनिष्ट करनेवाले चन्दनदास आदिके पकड़े जानेपर अपने दोष प्रकट होनेके भयसे जाकर मलयकेतुके पास रह गया वह भागुरायण हमारे प्राणका रक्षक है इस कृतज्ञता का स्मरण करते हुए मलयकेतुने उसको अपने समीपस्थ मन्त्रिपद पर रख

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तावप्यतिमानित्वात् स्वदायादेभ्यस्त्वया दीयमानमसहमानौ, मल मलयकेतुमाश्रितौ । इत्येषामपरागहेतवः ।

राजा—आर्य ! एवमेतेषु परिज्ञातापरागहेतुषु क्षिप्रमेव कस्मान्न प्रतिविहितमार्येण ?

चाणक्यः—वृषल ! न पारितं प्रतिविधातुम् ।

राजा—किमकौशलात्, उत प्रयोजनापेक्षया ?

चाणक्यः—कथमकौशलं भविष्यति, प्रयोजनापेक्षयैव ।

प्रापितः । यौ तौ लोहिताक्ष-विजयवर्माणौ तावपि अतिमानित्वात् अत्यन्ताभिमानवत्त्वात् दायं पितृधनमाददते इति दायादाः (दायपूर्वकददातेर्डप्रत्यये दायादप्रयोगोपपत्तिः ।दायदस्तु भवेत्पुंसि सपिण्डे तनयोऽपि चेति मेदिनी । स्वस्य दायादाः स्वदायादास्तेभ्यः स्वदायादेभ्यः स्वबन्धुभ्यः त्वया भवता दीयमानं वितीर्यमानं धनादिकमिति शेषः। असहमानौ अमृष्यमाणौ सन्तौ मलयकेतुं पर्वतकपुत्रमाश्रितौ अवलम्बितौ । इत्येतेषां भद्रभटादीनामपरागहेतवःविरागकारणानि सन्तीतिं शेषः ।

एवमिति । एवमुक्तप्रकारेण परिज्ञाता अवगता अपरागाणां विरागाणांहेतवः कारणानि येषां ते तथोक्तास्तेषु परिज्ञातापरागहेतुषु अवगतविरागकारणेषु एतेषु भद्रभटादिषु आर्येण पूज्येन भवता क्षिप्रं शीघ्रमेव कस्मान्न कुतो न प्रतिविहितं प्रतीकारः कृतः ।

न पारितमिति । प्रतिविधातुं प्रतिकर्त्तुं न पारितं न युक्तमित्यर्थः ।

किमकौशलादिति । कुशलस्य भावः कौशलं सामर्थ्यं न कौशलमकौशलं तस्मादकौशलात् असामर्थ्यात् उत अथवा प्रयोजनस्याऽपेक्षा प्रयोजनापेक्षा तथा प्रयोजनापेक्षया यत्किञ्चिदीप्सितफलानुरोधेनेत्यर्थः ।

कथमकौशलमिति । अथ कस्मात् अकौशलमसामर्थ्यं भविष्यति प्रयोजनापेक्षयैव ईप्सितकार्यानुरोधेनैव, तेषु प्रतिविधानमसाम्प्रतमिति शेषः ।

लिया है । लोहिताक्ष और विजयवर्म्मा भी अधिक अभिमान के कारण अपने दायादों को आपके द्वारा दिये हुए धनको नहीं सहन करते हुए मलयकेतुके पास चले गये । यही इनकी उदासीनताका कारण है ।

राजा—आर्य ! इन लोगोंकी उदासीनता का कारण जान लेने पर भी आपने शीघ्र इसका प्रतीकार क्यों नहीं किया ?

चाणक्यः—वृषल ! मैं प्रतीकार नहीं कर सका ।

राजा—अपटुताके कारण या किसी प्रयोजन की अपेक्षा से ।

चाणक्यः—असामर्थ्य क्यों होगा, प्रयोजनकी अपेक्षा ही से ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राजा—तदप्रतिविधानप्रयोजनमिदानीं श्रोतुमिच्छामि ।

चाणक्यः—वृषल ! श्रूयतामवधार्यताञ्च ।

राजा—उभयमपि क्रियते, कथ्यताम् ।

चाणक्यः—वृषल ! इह खलु विरक्तानां प्रकृतीनां द्विविधं प्रतिविधानम्—अनुग्रहो निग्रहश्चेति। अनुग्रहस्तावत् आक्षिप्ताधिकारयोः भद्रभट-पुरुषदत्तयोः पुनः अधिकारारोपणमेव। अधिकारश्च पुनस्तादृशेषु व्यसनयोगात् अनभियुक्तेषु पुनरारोप्यमाणः सकलस्यैव राज्यस्य मूलं हस्त्यश्वमवसादयेत् हिङ्गुरात-बलगुप्तयोरत्यन्तलुब्धप्रकृतिकयोः

श्रूयतामिति । श्रूयताम् अप्रतिविधानप्रयोजनम् आकर्ण्यताम् अवधार्यतां विचार्यताञ्च ।

इहेति । इहाऽस्मिन् लोके विरक्तानामनुरागशून्यानां सन्तोषरहितानामिति यावत् । प्रकृतीनां प्रजानां द्वे विधे यस्य तद्द्विविधं द्विप्रकारं प्रतिविधानं प्रतीकारः । अनुग्रहोऽनुकम्पा निग्रहो दण्डः । तावत् आदौ आक्षिप्तः आच्छिद्य गृहीतोऽधिकारः कार्यभारो ययोस्तौ तथोक्तौ तयोराक्षिप्ताधिकारयोः स्वायत्तीकृतकार्यभारयोः भद्रभटश्च पुरुषदत्तश्च भद्रभटपुरुषदत्तौ तयोर्भद्रभटपुरुषदत्तयोः पुनर्भूयः अधिकारे आरोपणमधिकारारोपणम् कार्यावेक्षणस्थापनमेव अनुग्रहोऽनुकम्पा । व्यस्यते विक्षिप्यते चित्तमनेनेति व्यसनं दुःखं तस्य योगः सम्बन्धस्तस्माद्व्यसनयोगात् स्त्रीमद्याखेटाभिनिवेशात् । व्यसनं विपदि भ्रंशे दोषे कामजकोपयोः इति हलायुधः । अनभियुक्तेषु अयोग्येषु तादृशेषु आक्षिप्ताधिकारेषु पुनर्भूयः आरोप्यमाणः स्थाप्यमानः अधिकारः हस्त्यश्वरक्षणाध्यक्षत्वं राज्यस्याऽऽधिपत्यस्य सकलमेव सम्पूर्णमेव मूलं कारणं हस्तिनश्चाश्वाश्च हस्त्यश्वम् (*द्वन्द्वश्च प्राणितूर्यसेनाङ्गाना-

---

राजा—उसका प्रतीकार न करने का प्रयोजन सुनना चाहता हूँ ।

चाणक्यः—वृषल ! सुनो, और विचारो ।

राजा—मैं दोनों कार्य करता हूँ, आप कहिये ।

चाणक्यः—वृषल ! इस संसार में सन्तोषरहित प्रजाका प्रतीकार दो प्रकार से होता है, एक-अनुग्रह (दया)-दूसरा-निग्रह (दण्ड) । अनुग्रह तो अपने २ कार्य से हटाये गये भद्रभट-पुरुषदत्त आदि को फिर अपने २ कार्य का अधिकारी बना लेना । स्त्री-मद्य आदि व्यसन के सम्बन्ध से अयोग्य उन सबों को फिर दिया हुआ अधिकार समस्त राज्य के हाथी घोड़ो का नाश कर देता । अत्यन्त लोभी और स-

 Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सकलराज्यप्रदानेनाप्यपरितुष्यतोरनुग्रहः कथं कर्त्तुं शक्यः? राजसेन-भागुरायणयोस्तु धनप्रणाशभीतयोः कुतोऽनुग्रहस्यावकाशः? लोहिताक्ष-विजयवर्मणोरपि दायादमसहमानयोरतिमानिनोः कीदृशोऽनुग्रहः प्रीतिं जनयिष्यतीति परिहृतः पूर्वः पक्षः, उत्तरोऽपि खलु वयमचिरादधिगतनन्दैश्वर्याः सहोत्थायिनं प्रधानपुरुषवर्गमुग्रेण दण्डेन पीडयन्तो नन्दकुलानुरक्तानां प्रकृतीनामविश्वास्या

मिति द्वन्द्वैकवद्भावः) अवसादयेत् विनाशयेत्। अत्यन्तमधिकं यथा तथा लुब्धा प्रकृतिर्ययोस्तौ तथोक्तौ तयोरत्यन्तलुब्धप्रकृतिकयोः अतितृष्णाग्रस्तस्वभावयोः; सकलं च तद्राज्यं सकलराज्यं तस्य प्रदानं सकलराज्यप्रदानं तेन सकलराज्यप्रदादेन निखिलप्रजाधिपत्यवितरणेनापि अपरितुष्यतोः सन्तोषमप्राप्नुवतोरित्यर्थः। हिङ्गुरातश्च बलगुप्तश्च हिङ्गुरातबलगुप्तौ तयोर्हिङ्गुरातबलगुप्तयोः अनुग्रहो दया कथं केन प्रकारेण कर्त्तुं विधातुं शक्यो योग्यः। धनस्य प्रणाशो धनप्रणाशस्तस्माद्भीतौ धनप्रणाशभीतौ तयोर्द्धनप्राणाशभीतयोः वसुव्ययसंजातसाध्वसयोः। राजसेनश्च भागुरायणश्च राजसेनभागुरायणौ तयोः राजसेनभागुरायणयोः विषयेऽनुग्रहस्य दयायाः कुतः कथम् अवकाशोऽवसरः। दायादं ज्ञातिमसहमानयोरमृष्यतोःअतिमानिनोरत्यन्ताभिमानवतोः लोहिताक्षश्च विजयवर्मा च लोहिताक्षविजयवर्माणौ तयोर्लोहिताक्षविजयवर्मणोर्विषये कीदृशोऽनुग्रहो दया प्रीतिं हर्षं जनयति समुत्पादयति इत्यतो हेतोः पूर्वपक्षःप्रथमकोटिरनुग्रहरूपः परिहृतः त्यक्तः, खलु शब्दोवाक्यालंकारे। अचिरात् शीघ्रं नन्दानामैश्वर्यं नन्दैश्वर्यं अधिगतं प्राप्तं नन्दैश्वर्यं यैस्तेऽधिगतनन्दैश्वर्याः प्राप्तानन्दसम्पदः, सह सार्धमुत्तिष्ठति तच्छीलः सहोत्थायी तं सहोत्थायिनं युगपदुत्थानशीलं प्रधानपुरुषवर्गं मुख्यलोकश्रेष्ठम् उग्रेण तीक्ष्णेन दण्डेन निग्रहेण पीडयन्तः क्लेशयन्तः नन्दानां कुलं नन्दकुलं तस्मिन्ननुरक्ता

म्पूर्णराज्य देने पर भी नहीं सन्तुष्ट होनेवाले हिङ्गुरात और बलगुप्त इन दोनों के ऊपर किस तरह अनुग्रह किया जा सकता है। धनके नाश होने से डरे हुए राजसेन-भागुरायण के ऊपर अनुग्रह का अवकाश ही कहाँ से है। दायादको नहीं सहन करनेवाले और अत्यन्त अभिमानी लोहिताक्ष-विजयवर्मा को भी अनुग्रह प्रसन्न नहीं कर पाता। इसलिये अनुग्रह नहीं किया गया। हाल ही में नन्दराजा के ऐश्वर्य को प्राप्त करने वाले हम लोग थे अपना साथ देने वाले प्रधान पुरुषवर्गको उग्रदण्ड (निग्रह) देने से नन्दराजा की अनुरागी प्रजाके लोग हम पर अविश्वासी होजाते। इसलिये

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भवाम, इत्यतः परिहृत एव । तदेवमनुगृहीतास्मद्भृत्यपक्षो राक्षसोपदेशश्रवणप्रवणो महीयसा म्लेच्छबलेन परिवृतः पितृवधामर्षी पर्वतकपुत्रो मलयकेतुरस्मानभियोक्तुमुद्यत इति, सोऽयं व्यायामकालो नोत्सवकाल इति । अतो दुर्गसंस्कारे आरब्धव्ये किं कौमुदीमहोत्सवेन ? इति प्रतिषिद्धः ।

राजा—आर्य ! बहु प्रष्टव्यमत्र ।

नन्दकुलानुरक्तास्तासां नन्दकुलानुरक्तानां नन्दान्वयासक्तानां प्रकृतीनां प्रजनाम् अविश्वास्या अप्रतीत्याः प्रत्येतुं न योग्या इत्यर्थः (प्रतिपूर्वकादिणः कर्तरि क्यबुपपन्नबहुवचनान्तप्रतीत्यशब्दस्य नञा समासे रूपम्) भवामो भविष्यामः (भविष्यत्सामीप्ये लट्) इत्यतः अस्माद्धेतोः उत्तरोऽपि द्वितीयोऽपि निग्रहरूप इत्यर्थः । पक्षः परिहृतः परित्यक्त एव । एवमुक्तप्रकारेण अनुग्रहीतोऽनुकम्पयावलम्बितोऽस्मत्पक्षो भद्रभटादिर्येन सोऽनुग्रहीताऽस्मत्पक्षः अनुकम्पयावलम्बितभद्रभटादिवर्गः राक्षसस्योपदेशो राक्षसोपदेशो राक्षसोपदेशे प्रवणो राक्षसोपदेशप्रवणः राक्षसकर्तृकशिक्षणानुरक्तः, महीयसा महता म्लेच्छानां बलं तेन म्लेच्छबलेन म्लेच्छसैन्येन परिवृतो युक्तः, पितुर्वधः पितृवधः पितृवधेनाऽमर्षोऽस्यास्तीति पितृवधामर्षी तातव्यापादनजन्यक्रोधयुक्तः, पर्वतकस्य पुत्रः पर्वतकपुत्रः मलयकेतुः अस्मान् अभियोक्तुम् पराभवितुम् उद्यतः तत्परः, इत्यतो हेतोः सोऽयं व्यायामस्य कालः व्यायामकालः सैन्यसंग्रहाद्यात्मकोऽधिकप्रयाससमयः नोत्सवकालः कौमुदीमहोत्सवसमयोऽस्तीति शेषः। विपत्प्राप्तिक्षणे नोत्सवोऽननुष्ठेयश्चानन्दजनको भवतीत्यर्थः । अतोऽस्मात्कारणात् दुर्गसंस्कारे आरब्धव्ये प्रक्रमितव्ये किं किम्प्रयोजनं कौमुदीमहोत्सवेन शरदपूर्णचन्द्रनिमित्तकपर्वोत्सवानुष्ठानेनेत्यर्थः । इत्यतो हेतोः प्रतिषिद्धः परित्यक्तः कौमुदीमहोत्सव इति शेषः ।

निग्रह भी नहीं किया गया । इस प्रकार हमारे भृत्यों को अवलम्ब देनेवाले पिताके मारने के करण क्रोधी पर्वतकपुत्र मलयकेतु बहुत सी म्लेच्छ सेना लेकर हम लोगों को जीतने के लिये तैयार है । यह सेनासंग्रहरूपी उद्योग का समय है न कि उत्सव का इस लिये किले की रचनाके समय कौमुदीमहोत्सवसे क्या प्रयोजन ? इस कारण उत्सव रोक दिया गया ।

राजा—आर्य ! इसमें हमें बहुत कुछ पूछना है ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चाणक्यः—वृषल ! विश्रब्धं पृच्छ ममापि बह्वाख्येयमत्र ।

राजा—एवं पृच्छामि ।

चाणक्यः—अहमप्येष कथयामि ।

राजा—योऽयमस्माकमस्य सर्वस्यैवानर्थस्य हेतुर्मलयकेतुः स कस्मादार्येणापक्रामन्नुपेक्षितः ?

चाणक्यः—वृषल ! मलयकेतोरपक्रमणानुपेक्षणे द्वयी गतिः स्यात्, अनुगृह्येत निगृह्येत वा । अनुग्रहे पूर्वप्रतिश्रुतं राज्यार्द्धं प्रतिपाद्येत् । निग्रहे तावत् पर्वतकोऽस्माभिर्व्यापादित इति कृतघ्नतायाः स्वयं

विश्रब्धमिति । विश्रब्धं विश्वस्तं यथा स्यात्तथा पृच्छ ब्रूहीत्यर्थः । अत्रास्मिन्विषये ममापि बहु अधिकम् आख्येयं वक्तव्यम् ।

योऽयमिति । योऽयं य एषोऽस्माकम् अस्यैतस्य भवदुक्तस्येत्यर्थः । अनर्थस्यानिष्टस्य हेतुः कारणं मलयकेतुः पर्वतकपुत्रः अस्तीति शेषः । स मलयकेतुरित्यर्थः । कस्मात् कुतः कारणात् आर्येण पूज्येन भवतेत्यर्थः । अपक्रामन् इतो निस्सरन् उपेक्षितः परित्यक्तः कथं न तद्गमनमवरुद्धमित्यर्थः ।

वृषलेति । वृषल मौर्य ! नोपेक्षणमनुपेक्षणमपक्रमणस्यानुपेक्षणमपक्रमणानुपेक्षणं तस्मिन् अपक्रमणानुपेक्षणे मलयकेतोः पर्वतकपुत्रस्य अपक्रमणानुपेक्षणे निस्सरणावरोधपरित्यागे द्वयी द्विप्रकारा गतिरुपायो अस्तीति शेषः । अनुगृह्येत अनुकम्प्येत वाऽथवा निगृह्येत दण्ड्येत, अनुग्रहो निग्रहो वेत्युभयविध उपाय इत्यर्थः । अनुग्रहेऽनुकम्पायां पूर्वप्रतिश्रुतं प्रागङ्गीकृतं राज्यार्द्धम् अर्द्धराज्यमित्यर्थः । प्रतिपाद्येत दीयेत । निग्रहे दण्डे तावत् आदौ वाक्यालंकारे वा तावच्छब्दः अस्माभिः प-

---

चाणक्यः—वृषल ! अच्छी तरह पूछो, हमको भी अभी बहुत कुछ कहना है ।

राजा—अच्छा पूछता हूं ।

चाणक्यः—तो मैं भी कहने को तैयार हूं ।

राजा—हम लोगों के इन सब अनर्थों का कारण मलयकेतु है, वह भागता हुआ आपके द्वारा किस कारण छोड़ दिया गया ?

चाणक्यः—वृषल ! भागते हुए मलयकेतु को पकड़ने पर दो ही उपाय होता । वह या तो दयावश छोड़ दिया जाता—या दण्डित होता । अनुग्रह करने पर पहले का कहा हुआ—आधा राज्य देना पड़ता, दण्ड देने पर पर्वतकको हम लोगों ने मारडाला, इस कृतघ्नता को अपने मत्थे गढना होता ? पहले का कहा हुआ आधा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हस्तो दत्तः स्यात् । प्रतिश्रुतार्द्धराज्यप्रतिपादनेऽपि पर्वतकविनाशः केवलं कृतघ्नतामात्रफलः स्यात् इति मलयकेतुरपक्रामन्नुपेक्षितः ।

राजा—अत्र तावदेवम् । राक्षसः पुनरिहैवान्तर्नगरे वर्त्तमान आर्य्येणोपेक्षित इत्यत्र किमुत्तरमार्य्यस्य ?

चाणक्यः—राक्षसोऽपि खलु निजस्वामिनि स्थिरानुरागित्वात् सु-

र्वतको मलयकेतुतातः व्यापादितो विनाशित इति कृतं हन्तीति कृतघ्नता तस्याः कृतघ्नतायाः कृतोपकारस्यापकारितायाः हस्तो हस्तावलम्बनः स्वयमात्मनैव दत्तः स्यात् । प्रतिश्रुतं प्रतिज्ञातं च तद्राज्यार्द्धं प्रतिश्रुतराज्यार्द्धं तस्य प्रतिपादनं प्रतिश्रुतराज्यार्द्धप्रतिपादनं तस्मिन् प्रतिश्रुतराज्यार्द्धप्रतिपादने प्रतिज्ञातार्द्धप्रतिपादने प्रतिज्ञातार्द्धराज्यदानेऽपि पर्वतकविनाशो मलयकेतुपितृवधः अस्मत्कृत इति शेषः । केवलं कृतघ्नतैव कृतघ्नतामात्रं तदेव फलं यस्य स कृतघ्नतामात्रफलः अपकारितामात्रप्रयोजनः स्यात् इत्यतो हेतोः मलयकेतुः पर्वतकपुत्रः अपक्रामन् इतो निर्गच्छन् उपेक्षितः परित्यक्तः अगृहीत इति यावत् ।

अत्रेति । अत्र मलयकेत्वपक्रमणोपेक्षणे तावत् प्रथमम् एवम् इदमुत्तरं प्रतिवचनम् । राक्षसो नन्दप्रधानसचिवः इहास्मिन्नेव कुसुमपुर एवेत्यर्थः । नगरस्य मध्येऽन्तर्नगरे (विभक्त्यर्थेऽव्ययीभावसमासः, तृतीयासप्तम्योर्बहुलमिति सप्तम्या अम्भावस्य वैकल्पिकत्वेन नात्राम्भावः) नगरमध्ये इत्यर्थः । वर्तमानो विद्यमानः आर्येण पूज्येन भवता उपेक्षितो न गृहीत इत्यत्र राक्षसोपेक्षणे आर्यस्य पूज्यस्य भवतः किमुत्तरं किं प्रतिवचनम् अस्तीति शेषः ।

राक्षसोऽपीति । राक्षसोऽपि नन्दप्रधानसचिवोऽपि (खलुशब्दोऽत्र निश्चये वाक्यालंकारे वा) निजस्य स्वस्य स्वामी प्रभुर्निजस्वामी तस्मिन्निजस्वामिनि स्वप्रभौ नन्दे इत्यर्थः स्थिरश्चासावनुरागः स्थिरानुरागः सोऽस्त्यस्येति स्थिरानुरागी तस्य भावस्तत्वं तस्मात् स्थिरानुरागित्वात् दृढप्रेमवशात् सुचिरं बहुकालम् एकत्रैकस्मिन् स्थाने वासात् अवस्थानात् च शीलं जानन्तीति शीलज्ञास्तेषां शील-

---

राज्य देने पर भी राजा पर्वतक का मरण केवल कृतघ्नतामात्र का फलदायक होता, इस कारण भागता हुआ मलयकेतु छोड़ दिया गया ।

राजा—इस विषय में तो यह उत्तर है । पर इसी नगर में रहता हुआ राक्षस किस कारण छोड़ दिया गया । इस विषय में आपका क्या उत्तर है ?

चाणक्य:—अपने स्वामी नन्दराजा में स्थिर प्रेम के कारण—और बहुत दिनों तक

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चिरमेकत्र वासाच्च शीलज्ञानां नन्दानुरक्तानां प्रकृतीनामत्यन्तं विश्वास्यः, प्रज्ञा-पुरुषकाराभ्यामुपेतः, सहायसम्पदा युक्तः, कोषबलवानिहैवान्तर्नगरे वर्त्तमानो महान्तं खल्वन्तःकोपमुत्पादयेत्। दूरीकृतस्तु बाह्यकोपमुत्पादयन्नपि न दुःखसाध्यो भविष्यतीत्यतोऽपक्रामन्नुपेक्षितः।

राजा—तत् किमर्थमिहस्थ एवोपायैर्नोपक्रान्तः ?

चाणक्यः—अथ कथमपक्रान्तो भविष्यति ? ननु उपायैरेवासौ हृदयेशयः शङ्कुरिवोद्धृत्य दूरीकृतः। दूरीकरणस्य चोक्तं प्रयोजनम्।

ज्ञानां चरित्राभिज्ञानां नन्देऽनुरक्ता नन्दानुरक्तास्तासां नन्दानुरक्तानां नन्दस्नेहयुक्तानां प्रकृतीनां प्रजानाम् अत्यन्तं निरतिशयं विश्वास्यो विश्रम्भपात्रं प्रज्ञा च पुरुषकारश्च प्रज्ञापुरुषकारौ ताभ्यां प्रज्ञापुरुषकाराभ्यां बुद्धिपौरुषाभ्याम् उपेतो युक्तः सह सार्द्धमयते गच्छतीति सहायः भृत्यः स एव संपत् सहायसंपत् तया सहायसंपदा भृत्यात्मकसंपत्या युक्तोऽन्वितः, कोश एव बलं तदस्यास्तीति कोशबलवान् अर्थसामर्थ्ययुक्तः इहैव कुसुमपुर एव अन्तर्नगरे नगरस्य मध्ये वर्तमानस्तिष्ठन् महान्तं प्रचुरम् अन्तःकोपं आभ्यन्तरिकविद्वेषम् उत्पादयेत् जनयेत्। दूरीकृतस्तु पृथक्कृतस्तु राक्षस इति शेषः, बाह्यकोपं बहिर्विद्वेषमुत्पादयन् जनयन्नपि न दुःसाध्यो न क्लेशप्राप्यो भविष्यति इत्यतो हेतोः अपक्रामन् निर्गच्छन् उपेक्षितोऽगृहीतः।

तदिति। तत्तस्मात् इहस्थे नगरवर्तिन्येव राक्षसे किमर्थं कुतो नोपक्रान्तः वशीकरणोपायः कृत इत्यर्थः।

अथेति। कथं केन प्रकारेणासौ राक्षसोऽपक्रान्तोऽसन्निहितवर्त्ती भविष्यति, ननुशब्दः संबोधने भो वृषल! असौ राक्षसः हृदये शेते इति हृदयेशयःमनोवर्त्ती शङ्कुः कील इव उद्धृत्योत्पाट्य दूरीकृतोऽपसारितः दूरीकरणस्यापसारणस्य च

एक जगह निवास करने के कारण-नन्दानुरागी प्रजाका अत्यन्त विश्वास पात्र राक्षस भी बुद्धि पुरुषार्थ युक्त सहायसम्पत्ति तथा कोषबल युक्त इसी नगर में रहता हुआ राक्षस बड़े भारी आन्तरिक द्वेष को उत्पन्न करता। दूर रहने से बाह्य कोप दुःसाध्य न होगा। इसी लिये वह छोड़ दिया गया ?

राजा—तब उपायों द्वारा वह क्यों नहीं वशमें किया गया।

चाणक्यः—वह किस तरह दूरवर्ती होगा। राक्षस उपाय ही से तो हृदयस्थित कील की तरह उखाड़ कर फेंक दिया गया है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राजा—आर्य्य ! कस्माद्विक्रम्य न गृहीतः ।

चाणक्यः—वृषल ! राक्षसः खल्वसौ विक्रम्य निगृह्यमाणः स्वयं वा विनश्येत्, युष्मद्बलानि वा विनाशयेत् । एवं सत्युभयथापि दोषः ।

पश्य—स हि भृशमभियुक्तो यद्युपेयाद् विनाशं,
नन्तु वृषल ! वियोगस्तादृशेनापि पुंसा ।
अथ तव बलमुख्यान्नाशयेत् सापि पीडा,
वनगज इव तस्मात् सोऽभ्युपायैर्विनेयः ॥ २५ ॥

प्रयोजनं फलमुक्तं कथितम् । हृदयवर्त्ती शङ्कुस्तिष्ठन्नधिकदुःखदोऽपसारितस्तु न तथा एवमयमपि राक्षसः सन्निकृष्टोऽधिकविद्वेषकृदसन्निकृष्टस्तु न तथेति भावः ।

आर्येति । आर्य पूज्य ! कस्मात्कुतो हेतोः विक्रम्य सामर्थ्येन न गृहीतो न धृतो राक्षस इति शेषः ।

वृषलेति । वृषल मौर्य ! (खलुशब्दो वाक्यालंकारे) असौ राक्षसः एष नन्दसचिवः विक्रम्य बलेन निगृह्यमाणो ध्रियमाणः स्वयं साक्षात् विनश्येत् म्रियेत युष्माकं बलानि युष्मद्बलानि त्वत्सैन्यानि विनाशयेत् व्यापादयेत् । एवं सति स्वयं विनाशे त्वत्सैन्यविनाशने च सतीत्यर्थः । उभयथाऽपि दोषः उभयस्मिन्नपिहानिः ।

सहीति । ननु भो वृषल मौर्य ! स राक्षसः भृशमत्यर्थम् । अतिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भरः इत्यमरः । अभियुक्तो मत्सैन्यैराक्रान्तः सन् यदि विनाशमदर्शनमुपेयात् तथा तादृशेन लोकोत्तरगुणवता पुंसा पुरुषेण राक्षसेनेत्यर्थः । वियुक्तो विरहितः स्यास्त्वमिति शेषः । अहं विरहितः स्यामित्यर्थो वा अथ यदि तव भवतो बलमुख्यान् प्रधानसैन्यानि घाततेत् विनाशयेत् सापि विधेयप्राधान्येन स्त्रीलिङ्गनिर्देशः विनाशक्रियापीत्यर्थः, पीडा बाधा दुःखमित्यर्थः । तस्मादतो हेतो वनगज इव वन्यकरीव स राक्षसः अभ्युपायैः सामदामात्मकैरुपायैर्वशीकरण

राजा—आर्य वह बलप्रयोग से क्यों नहीं पकड़ा गया ?

चाणक्यः—चन्द्रगुप्त ! राक्षस यदि बलसे पकड़ा जाता तो वह स्वयं मरजाता या तुम्हारी सेना को ही नष्ट कर देता। ऐसा होने पर दोनों ही की हानि होती। देखो—

यदि राक्षस सेना द्वारा पकड़े जाने पर यदि स्वयं मरजाता तो चन्द्रगुप्त ! तुम जैसे लोकोत्तर गुणवान् पुरुष राक्षस से वियुक्त हो जाते । और यदि तुम्हारी सेना को मार डालता तो वह भी कष्ट ही होता, इसलिये वह नवीन हाथी की तरह अन्य उपायों से ही वश में करने योग्य है ॥ २५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राजा—न शक्नुमो वयमार्यस्य वाचा वाचमतिशयितुं, सर्वथा-ऽमात्यराक्षस एवात्र प्रशस्यतरः।

चाणक्यः—(सक्रोधम्) न भवानिति वाक्यशेषः। मा तावदेवम्। भो वृषल तेन किं कृतम् ?

राजा—यदि न ज्ञायते, तदा श्रूयताम्। तेन खलु महात्मना—

लब्धायां पुरि यावदिच्छमुषितं, कृत्वा पदं नो गले,
व्याघातो जयघोषणादिषु बलादस्मद्बलानां कृतः।

साधनैश्चेत्यर्थः। विनेयो वशीकार्यः शिक्षणीयश्च, सैन्याभियोगेन राक्षसविनाशे चिरकाले तद्विरहात्तत्कर्तृकास्मत्सैन्यविनाशे च क्षते जीयमानत्वाच्च वन्यहस्तीव युक्त्यासौ वशीकार्य इति भावः। वनगज इवेत्यत्र सादृश्यार्थप्रतिपादकेवशब्देन राक्षसस्य वन्यगजसाम्याभिधानादुपमाऽलंकारः। प्रसादो गुणः। वैदर्भी रीतिः। मालिनीनाम वृत्तम्। एतल्लक्षणं यथा छान्दोमञ्जर्याम्—

ननमयययुतेयं मालिनी भोगिलोकैः ॥ २५ ॥

न शक्नुम इति। वयम् आर्यस्य पूज्यस्य भवतः मतिं बुद्धिम् अतिशयितुम् उल्लङ्घयितुं न शक्नुमो न पारयामः। सर्वथा सर्वप्रकारेण अमात्यराक्षस एव नन्दप्रधानसचिव एव प्रशस्यतरः अतिशयेन प्रशस्यः श्रेष्ठ इत्यर्थः।

सक्रोधमिति। क्रोधेन कोपेन सहितं यथा तथा ब्रवीतीत्यर्थः। न भवानिति वाक्यशेषः। राक्षसान्यो न प्रशस्य इत्यवशिष्टवाक्यार्थः। मा तावदेवम् तत्र विलक्षणगुणस्य कस्याप्यदर्शनात् राक्षसान्यो न प्रशस्य इति नावधेयमिति तदर्थः। भोवृषल, मौर्य तेन राक्षसेन किं कृतम् किं विशिष्टकार्यं सम्पादितम्।

लब्धायामिति। येन महात्मना राक्षसेन लब्धायामस्माभिरायत्तीकृतायां पुरि नगरे कुसुमपुरराजधान्यामित्यर्थः। नोऽस्माकं गले कण्ठे पदं चरणं कृत्वा विधाय

राजा—मैं आपसे बातों में नहीं जात सकता, सब तरह से अमात्य राक्षस ही श्रेष्ठ है।

चाणक्यः—(क्रोधसे) यानी आप श्रेष्ठ नहीं हैं इसका यह तात्पर्य हुआ। चन्द्रगुप्त! आखिर उसने क्या किया !

राजा—यदि नहीं जानते तो सुनिये। उसमहात्माने—

जीते हुए (कुसुमपुर नामक) नगर में हम लोगों के कंधे पर पैर रखकर अपनी इच्छा नुसार निवास किया, और हमारी सेनाके जयघोषणादि कार्य में जबर्दस्त

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अत्यर्थं विपुलैः स्वनीतिविभवैः सम्मोहमापादिता,
विश्वास्येष्वपि विश्वसन्ति मतयो न स्वेषु वर्गेषु नः ॥२६॥

चाणक्यः—(विहस्य) वृषल ! एतत् कृतं राक्षसेन !!

यावदिच्छम् ईप्सितकालपर्यन्तम् उषितं स्थितम्, तथा अस्माकं बलानि अस्मद्बलानि तेषामस्मद्बलानामस्मत्सैन्यानां जयस्य घोषणाऽऽदिर्येषु तानि जयघोषणादीनि तेषु जयघोषणादिषु जयशब्दव्याहारादिकार्येष्वित्यर्थः। बलात् हठात् बलमाश्रित्य व्याघातः विरोधः प्रत्यूह इति यावत् । कृत आचरितः । विपुलैर्विशिष्टैः स्वस्य नीतयः स्वनीतयः स्वनीतय इव विभवाः स्वनीतिविभवास्तैः स्वनीतिविभवैः स्वनयचातुर्यैः अत्यर्थमतिशयं सम्मोहम् अविवेकम् आपादिताः प्रापिताः । नोऽस्माकं मतयो बुद्धयो विश्वास्येष्वपि प्रत्ययभाजनेष्वपि स्वेषु आत्मीयेषु वर्गेषु पक्षेषु भद्रभटादिषु न विश्वसन्ति न प्रतीयन्ति ।

स्वनयकौशलवशादस्मान् बलवतोऽप्यनादृत्य वशीकृतेऽस्माभिर्नगरे निर्भीकस्येव यथेच्छं वसतोऽस्मत्सैन्यकर्तृकजयघोषणादिप्रतिषेधमाचरतो राक्षसस्यातिप्रशस्तधीशालित्वावगमादात्मीयेष्वपि भद्रभटप्रभृतिषु नास्मद्बुद्धिः प्रत्येतीति भावः। एकस्यैव गद्यस्थतच्छब्दस्य वास-व्याघात-मोहापादनक्रियास्वन्वयात् पददानसंसर्गस्य गलेऽसत्वेऽपि तत्र तत्सत्वप्रतिपादनात् उत्कृष्टचरित्रवर्णनाच्च दीपकातिशयोक्त्युदात्तालंकारत्रयस्यैकत्र मिथोऽनपेक्षया स्थितत्वात्पद्येऽस्मिन्नुक्तालंकारत्रयसंसृष्टिः । यथा च साहित्यदर्पणे—

अप्रस्तुतप्रस्तुतयोर्दीपकन्तु निगद्यते । अथ कारकमेकं स्यादनेकासु क्रियासु चेत् ॥
सिद्धत्वेऽध्यवसायस्यातिशयोक्तिर्निगद्यते । भेदेऽप्यभेदः सम्बन्धेऽसम्बन्धस्तद्विपर्ययौ॥
पौर्वापर्यात्ययः कार्य–हेत्वोः सा पञ्चधा ततः । लोकातिशयसम्पत्तिवर्णनोदात्तमुच्यते ॥
यद्वापि प्रस्तुतस्याऽङ्गं महतां चरितं भवेत् । वृत्तं च शार्दूलविक्रीडितं नाम ॥ २६ ॥

विहस्येति । विहस्य हास्यं कृत्वा। राक्षसेन नन्दप्रधानामात्येनैतद्भवदुक्तं कार्यं कृतं सम्पादितम्। नन्दोन्मूलन-वृषलराज्यसम्पादनहेतुभूतात्मशक्तिप्रशंसना-

---

विघ्न डाला । अपनी नीतिरूप सम्पत्ति द्वारा हमलोगों में बहुत तरह की अविवेकता फैलायी, जिससे विश्वासपात्र भद्रभटादि आत्मीय वर्गों में भी हम लोगों की बुद्धि विश्वास नहीं करती ॥ २६ ॥

चाणक्य—(हंसकर) चन्द्रगुप्त ! राक्षसने यह किया !

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राजा—अथ किम् । एतत् कृतममात्यराक्षसेन ।

चाणक्यः—वृषल ! मया पुनर्ज्ञातं, नन्दमिव भवन्तमुद्धृत्य भवानिव भूतले मलयकेतुरधिराज्यमारोपितः ।

राजा—अलमुपालभ्य ? आर्य ! दैवेनेदमनुष्ठितं किमार्यस्य ?

चाणक्यः—हे मत्सरिन् !

आरुह्यारूढकोपस्फुरणविषमिताग्राङ्गुलीमुक्तचूडां,

दिदं राक्षसनीतिविभवाधिक्षेपार्थं सोत्प्रासवचनं स्वशक्तिप्रशंसनं व्यवसाय इत्यवधेयम् ।

अथ किमिति । एवमित्यर्थः । अमात्यराक्षसेन राक्षसनाम्ना नन्दसचिवेन एतत् लब्धायां पुरीत्याद्युक्तं कृतं विहितम् ।

वृषलेति । वृषल मौर्य ! मया आत्मना पुनर्ज्ञातमवगतं नन्दमिव नन्दनृपवत् भवन्तं त्वाम् उद्धृत्योन्मूल्य भवानिव त्वमिव भूतले पृथिव्यां मलयकेतुः पर्वतकपुत्रः अधिराज्यं सिंहासने आरोपितः स्थापितः । यथा नन्दं हत्वा त्वामधिराज्ये स्थापितो मया तथा त्वां हत्वा मलयकेतुरधिराज्ये स्थापितो राक्षसेनेत्येव ज्ञातमिति भावः ।

अलमिति । आर्य पूज्य ! उपालभ्य तिरस्कृत्य अलं व्यर्थं तिरस्कारो न विधेयः । इदम् चन्द्रगुप्तस्य राज्यसम्पादनं नन्दोन्मूलनं वा दैवेन भाग्येन अनुष्ठितं कृतम् अत्रास्मिन्विषये राज्यसम्पादने नन्दोन्मूलने वेत्यर्थः । आर्यस्य पूज्यस्य भवतः किं न किमपीत्यर्थः । (अयं गुरोरनादरो द्रवः) ।

मत्सरिन्निति । मत्सरोऽन्योत्कर्षासहनं सोऽस्यास्तीति मत्सरी तत्सम्बुद्धौ हे मत्सरिन् अन्योत्कर्षासहनशील ! मदनुष्ठितमाकर्णयेति शेषः ।

आरुह्येति ! आरूढश्चासौ कोप आरूढकोपस्तस्य स्फुरणमारूढकोपस्फुरणं

चाणक्यः—तो फिर मैंने समझ लिया कि नन्द की तरह आपको हटाकर उसने मलयकेतु को पृथ्वीमण्डल के दिव्य सिंहासन पर बैठा दिया ।

राजा—किसी का तिरस्कार करना व्यर्थ है । आर्य ! भाग्यने यह सब कार्य किया—इसमें आपका क्या ?

चाणक्यः—ओ पराये काउत्कर्ष नहीं सहन कर सकनेवाले अब मेरा किया हुआ काम सुन—

सद्यः उत्पन्न क्रोधसे असमान अङ्गुली के अग्रभाग से खोली हुई शिखायुक्त,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लोकप्रत्यक्षमुग्रां, सकलरिपुकुलोच्छेददीर्घां प्रतिज्ञाम् ।
केनान्येनावलिप्ता नवनवतिशतद्रव्यकोटीश्वरास्ते,
नन्दाः पर्य्यायभूताः पशव इव हताः पश्यतो राक्षसस्य ॥ २७ ॥
अपि च-गृध्रैराबद्धचक्रं वियति विचलितैर्दीर्घनिष्कम्पपक्षै-

तेन विषमिताऽऽरूढकोपस्फुरणविषमिता साचासावग्राङ्गुली आरूढकोपस्फुरणविषमिताग्राङ्गुली तया मुक्ता चूडा यस्यां सा तथोक्ता तामारूढकोपस्फुरणविषमिताग्राङ्गुलीमुक्तचूडाम् सञ्जातक्रोधावेशासमाकुल्यग्रभागच्यावितशिखाम् रिपोः कुलानि रिपुकुलानि सकलानि च तानि रिपुकुलानि सकलरिपुकुलानि तेषामुत्सादःसकलरिपुकुलोत्सादस्तेन दीर्घा तां सकलरिपुकुलोत्साददीर्घां निखिलशत्रुवंशविनाशमहतीं सपुत्रनन्दवशविध्वंसिनीम् अत एवोग्रां कठिनां प्रतिज्ञां प्रतिश्रुतिं लोकप्रत्यक्षं लोकसमक्षम् आरुह्य विधाय, अन्येन मदतिरिक्तेन केन जनेन अवलिप्ताः साभिमानाः नवनवतिशतद्रव्यकोटीश्वराः प्रभूतधनस्वामिनः नन्दास्तदाख्यनृपतयो नवनन्दा इत्यर्थः पर्यायभूता एकरज्जुबद्धाः पशव इव पश्यतोऽवलोकयतो राक्षसस्य नन्दसचिवस्य पश्यन्तं राक्षसमनादृत्येत्यर्थः (षष्ठी चानादरे इति षष्ठी) हता विनाशिताः । क्रोधवशाद्दारुणप्रतिज्ञां विधाय शिखामुन्मुच्यैकरज्जुनिबद्धपशूनिव नन्दान् राक्षसं तिरस्कुर्वन् मदन्यो नैव कश्चिद्विनाशितवान् किन्त्वहमेवेत्यर्थः । त्वदुक्तराक्षसकृत्यापेक्षयाऽस्मत्कृत्यस्यैव विशिष्टत्वादहमेव ततः प्रशस्य इति भावः । केनान्येन हता इत्युक्त्या मद्व्यतिरिक्तेन केनापि न हताः किन्तु मयैव हता इत्यर्थप्रतीत्या पद्येऽस्मिन्नर्थापत्त्यलंकारः । पशव इवेत्यत्रेवशब्देन नन्दानामेकरज्जुसंयतपशुसादृश्यबोधनादुपमालङ्कारश्च ॥ ओजो गुणः । गौडी रीतिः । स्रग्धरा वृत्तम् ॥ २७ ॥

गृध्रैरिति । वियति गगने आबद्धानि कृतानि चक्राणि चक्राकारवेष्टनानीत्यर्थः तद्यथा स्यात्तथा विचलितैरुड्डीयमानैः दीर्घा निष्कम्पाश्च पक्षाः येषां ते दीर्घनिष्कम्पपक्षास्तैर्दीर्घनिष्कम्पपक्षैः आयतनिश्चलदलैः गृध्रैर्दाक्षाय्यैः। 'आताति-चिल्लौ दाक्षा-

---

कठोर और सब लोगों के सामने शत्रुकुलका नाश करने से विस्तृत प्रतिज्ञा करके, अभिमानी तथा निन्नानवे कोटि द्रव्यके अधिपति नन्दों को पशुकी तरह देखते हुए राक्षस का अनादर कर किसने मारा अर्थात् मैंने ॥ २७ ॥

और भी—आकाश में चक्रके समान घूमती हुई विस्तृत तथा स्थिर पक्षवाले

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्धूमैर्ध्वस्तार्कभासां सघनमिव दिशां मण्डलं दर्शयन्तः ।
नन्दैरानन्दयन्तः पितृवननिलयान् प्राणिनः पश्य, चैतान्,
निर्वान्त्यद्यापि नैते स्रुतबहलवसावाहिनो हव्यवाहाः ॥ २८ ॥

राजा—अन्येनैवेदमनुष्ठितम्

चाणक्यः—आः केन ?

राजा—नन्दकुलविद्वेषिणा देवेन ।

घ्य-गृध्राविं'त्यमरः । तैरेव धूमैः (चिताग्निप्रशमाद्धूमत्वाभावेन गृध्रेषु धूमत्वारोपः) ध्वस्तस्तिरोहितोऽर्कभासः सूर्यतेजो यासु तास्तथोक्तास्तासां ध्वस्तार्कभासां तिरोहितसूर्यतेजसां दिशामाशानां मण्डलं चक्रवालं 'चक्रवालं तु मण्डलमि' त्यमरः। घनेन सहितं सघनं समेघमिव दर्शयन्तः लोकान्प्रत्यवलोकयन्तः कुर्वन्तो वा (धातूनामनेकार्थत्वाद्दृशेः कृधातुसमानार्थकता) पितृवनं श्मशानं निलय आवासोयेषां ते तथोक्तास्तान् पितृवननिलयान् श्मशानवासिनः एतान् प्राणिनः प्रेतवृकादीन् नन्दैः बहलवसावशिष्टैः आनन्दयन्तः प्रीणयन्तः एते इमे श्मशानभूमौ संदृश्यमाना इत्यर्थः । स्रुतबहलवसावाहिनः कायनिस्सृतहृन्मेदधारिणो हव्यवाहाः चिन्ताग्नयोऽद्यापि सम्प्रत्यपि न निर्वान्ति प्रशाम्यन्ति इति त्वं पश्यावलोकय । प्रचुरलोकक्षयेन चिताग्नेः सुप्रज्वलितत्वादद्यापि न मे नन्दकुलनिर्दहनकोपप्रशान्तिरिति भावः । अयं वधरूपो विद्रवः । कोपावेशादतीतविषयस्यापि साक्षाद्विषयप्रयोज्यैतदा निर्देशादत्र भाविकालङ्कारः ।

अद्भूतस्य पदार्थस्य भूतस्याथ भविष्यतः ।
यत्प्रत्यक्षायमाणत्वं तद्भाविकमुदाहृतम् ॥

इति दर्पणोक्तलक्षणात् स च गृध्रेषु धूमत्वारोपणाद् रूपकेण सघनमिवेत्यत्रोत्प्रेक्षणार्थकेवशब्दसत्त्वादुत्प्रेक्षया च संसृष्टः । स्रग्धरावृत्तम् ॥ २८ ॥

गृध्ररूपी धूम द्वारा छिपी हुई सूर्यकी कान्ति युक्त दिशामण्डलको मेघयुक्त के समान करते हुए तथा नन्दों द्वारा श्मशानवासी श्रृगाल, गृध्रआदि प्राणियों को प्रसन्न करती और बहते हुए बहुत मज्जावाली यह श्मशान की आग अब तक शान्त नहीं होती २८

राजा—यह दूसरेने किया ।

चाणक्यः—आः ! किसने ?

राजा—नन्द वंश के विद्वेषी भाग्यने ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चाणक्यः—दैवमविद्वांसः प्रमाणयन्ति ।

राजा—विद्वांसोऽप्यविकत्थना भवन्ति ।

चाणक्यः—(सक्रोधम्) वृषल ! वृषल !! भृत्यमिव मामारोढुमिच्छसि ?—

शिखां मोक्तुं बद्धामपि पुनरयं धावति करः,

(भूमौ पादप्रहारं कृत्वा)

प्रतिज्ञामारोढुं पुनरपि चलत्येष चरणः ।
प्रणाशान्नन्दानां प्रशममुपयातं त्वमधुना,
परीतः कालेन ज्वलयसि मम क्रोधदहनम् ॥ २९ ॥

दैवमिति । दैवं भाग्यम् अविद्वांसोऽज्ञानिनो जना इति शेषः । प्रमाणयन्ति कार्यसाधकमभ्युपगच्छन्ति न विद्वांस इत्यर्थः ।

विद्वांस इति । विद्वांसो विज्ञा अविकत्थना आत्मप्रशंसिनो न भवन्तीत्यर्थः।

सक्रोधमिति । सक्रोधं यथा तथा ब्रवीतीत्यर्थः । वृषलमौर्य ! माम् भृत्यमिवानुचरमिव आरोढुं तिरस्कर्तुमिच्छसि वाञ्छसि प्रवर्तसे इति यावत् ।

शिखामिति । अयमेष मम करो हस्तो बद्धां प्रतिश्रुतिपूरणात्संयतामपि शिखां चूडां पुनर्भूयो मोक्तुं बन्धनात्स्खलयितुं धावति प्रसरति, (भूमौ पादप्रहरणानन्तरम् ब्रवीति) एष चरणः पादः पुनरपि भूयोऽपि प्रतिज्ञां प्रतिश्रुतिमारोढुं कर्तुं चलति गच्छति, नन्दानां नवनन्दानां प्रणाशाद्विनाशात् प्रशमं शान्तिमुपयातं प्राप्तं मम क्रोधो दहन इव क्रोधदहनस्तं क्रोधदहनं कोपानलम् अधुना साम्प्रतं कालेन मृत्युना परीतः प्राप्त इव प्रेरित इव वा ज्वलयसि प्रदीपयसि । नन्दकुलविनाशतः प्रशान्तोऽपि मे क्रोधस्त्वद्वचनाकर्णनात्पुनर्वर्द्धित इति भावः । चतुर्थचरणे कालेन परीत इवेति तात्पर्यावधारणाल्लुप्तोपमया प्रतीयमानोत्प्रेक्षया वा संसृष्टः

चाणक्यः—मूर्खलोग भाग्य को प्रमाण मानते हैं ।

राजा—विद्वान् अपनी प्रशंसा नहीं करते ।

चाणक्यः—(क्रोधसे) वृषल ! वृषल !! नौकर की तरह समझ कर मेरा अनादर करना चाहते हो—

बँधी हुई शिखाको फिर खोलने के लिये हमारा हाथ दौड़ता है, मेरा पैर फिर प्रतिज्ञा करने के लिये आगे बढ़ता है । नन्दों का नाश करनेसे शान्त मेरे क्रोधरूपी अग्निको कालसे प्रेरित होकर तू फिर से जगारहा है ॥ २९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राजा—(सावेगं स्वगतम्) अये ! तत् कथं सत्यमेव कुपित आर्यः ? तथा हि—

संरम्भस्पन्दिपक्ष्मक्षरदमलजलक्षालनक्षामयापि
भ्रूभङ्गोद्भेदधूमं ज्वलितमिव पुनः पिङ्गया नेत्रभासा ।
मन्ये, रुद्रस्य रौद्रं रसमभिनयतस्ताण्डवे संस्मरन्त्या,
संजातोदग्रकम्पं कथमपि धरया धारितः पादघातः ॥३०॥

क्रोधे दहनत्वारोपान्निरङ्गरूपकालङ्कारः । ओजो गुणः । वैदर्भी रीतिः । क्रोधात्मकानुभावेन वर्द्धितो वीररसोऽत्र स्थायी । पादद्वये पुनः शब्दसत्वादनवीकृतत्वं दोषः । शिखरिणीवृत्तम् ॥ २९ ॥

सावेगमिति । आवेगेन सहितं सावेगं ससम्भ्रमं यथा तथा स्वगतमनतिस्पष्टं ब्रवीति । अये, चाणक्याज्ञया कार्यानुरोधव्याजेन क्रोधितोऽपि मयाऽसौ कथं कस्माद्यथार्थरूपेण क्रोधितः ।

सरम्भेति । संरम्भेण स्पन्दि संरम्भस्पन्दि तच्च तत्पक्ष्म संरम्भस्पन्दिपक्ष्म तस्मात्क्षरन्ति यान्यमलजलानि स्वच्छपयांसीति संरम्भस्पन्दिपक्ष्मक्षरदमलजलानि- तेषां क्षालनेनापसारणेन क्षामा तया संरम्भस्पन्दिपक्ष्मक्षरदमलजलक्षालनक्षामया कोपचलन्नेत्रलोमनिस्सरत्स्वच्छपयोऽपसारणक्षीणयाऽपि पिङ्गया रक्तवर्णया नेत्रभासा नयनकान्त्या कर्त्रिभूतया भ्रुवोर्भङ्गः भ्रूभङ्गो भ्रूभङ्गस्योद्भेदः कोपजन्यविकृतिभ्रूभङ्गोद्भेदः स एव धूमो यत्र तद्यथा स्यात्तथा पुरोऽग्रे ज्वलितमिव दीप्तमिव ताण्डवेषु नृत्येषु रौद्रं रसं क्रोधात्मकरसं अभिनयतः दर्शयतो रुद्रस्य शिवस्य स्मरन्त्या (अधीगर्थदयेशामिति षष्ठी) धरया पृथिव्या सञ्जातः समुत्पन्नः उदग्रो विशेषः । कम्पो यत्र तद्यथा स्यात्तथा कथमपि केनापि प्रकारेण पादघातश्चरणप्रहारो धारितोऽवस्थापित इति मन्ये सम्भावयामि । रौद्रताण्डवकारिणो रुद्रस्य पादप्रहार इव चाणक्यपादप्रहारोऽतिक्रूर इति भावः । रौद्ररसोऽत्र वीररसस्याङ्गम् (उद्वे-

राजा—(वेगके साथ मन ही मन) ! आर्य ! आप नराज होगये क्या ? क्योंकि—

क्रोध से चलायमान पलकों से निकले स्वच्छ जलके द्वारा धोजाने से क्षीण, रक्तवर्ण नेत्रकी कान्ति से कोपजन्य शिखारूपी धूम से वह इस तरह प्रदीप्त होगया है, जैसे ताण्डव (नृत्यमें) रौद्ररस का प्रदर्शन करते हुए रुद्रका स्मरण करती तथा काँपती हुई पृथ्वीने किसी तरह पादप्रहार सहन किया ॥ ३० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चाणक्यः—(कृतकं कोपं संहृत्य) वृषल ! वृषल !! अलमुत्तरोत्तरेण ? यद्यस्मत्तो वरीयान् राक्षसोऽवगम्यते, तस्मादिदं शस्त्रं तस्मै दीयतामिति (शस्त्रमुत्सृज्य उत्थाय च आकाशे लक्ष्यं बध्द्वा स्वगतम्)। राक्षस ! राक्षस !! एष भवतः कौटिल्यबुद्धिविजिगीषोर्बुद्धेः प्रकर्षः,

चाणक्यतः स्खलितभक्तिमहं सुखेन,
जेष्यामि मौर्य्यमिति सम्प्रति यः प्रयुक्तः ।

जनारूपा द्युतिरियम्) भ्रूभङ्गोद्भेदे धूमत्वारोपणाद्रूपकालंकारः । ज्वलितमिवेत्यत्र रुद्ररौद्रे प्रदीप्तवह्वेरुत्प्रेक्षणादुत्प्रेक्षालंकारः । प्रदीप्तवह्नौ धूमसत्वस्य स्वाभाविकत्वेन रौद्रात्मके रसे वह्नेरुत्प्रेक्षणाद्भ्रूभङ्गाद्भेदे धूमत्वारोपणस्यावश्यम्भावित्वात्तयोरङ्गाङ्गिभावेन संकीर्णत्वात्संकरालङ्कारः । स च मन्ये स्मरन्त्येत्युभयपदसत्वादुत्प्रेक्षास्मरणालङ्काराभ्यामनुप्राणितः । पाञ्चाली रीतिः । ओजो गुणः । स्रग्धरावृत्तम् ॥ ३० ॥

कृतकमिति । कृतकमतथ्यं कोपं क्रोधं संहृत्य परित्यज्य ब्रवीतीति शेषः। वृषलेति वीप्सायां द्विरुक्तिः उत्तरोत्तरेण वाग्विन्यासेन अलं व्यर्थम् निर्हेतुकवागाडम्बरो न कर्तव्य इत्यर्थः, यदि राक्षसो नन्दसचिवोऽस्मत्तोऽस्मदपेक्षया वरीयान् (उरुशब्दादीयसुनि वरादेशे च रूपम्) श्रेष्ठोऽवगम्यतेऽवबुध्यते त्वयेति शेषः, तस्मादिदमेतत् शस्त्रमायुधं तस्मै राक्षसाय दीयतां प्रत्यर्प्यताम् । शस्त्रमायुधमुत्सृज्य परित्यज्य स्वयञ्चोत्थाय आकाशे नभसि लक्ष्यं बद्ध्वा पुरुषाकारं निश्चित्य स्वगतमनतिस्पष्टं यथा तथा ब्रवीतीति शेषः। राक्षसेति वीप्सायां द्विरुक्तिः । कौटिल्यबुद्धिविजिगीषोः चाणक्यमत्यतिक्रमणाभिलाषिणो भवतस्तव एषोऽसौ बुद्धेर्धियः प्रकर्ष उत्कर्षः ।

चाणक्यत इति । हे शठ धूर्त्त ! अहं चाणक्यतः कौटिल्यात् स्खलिता त्यक्ता भक्तिः स्नेहो यस्य स स्खलितभक्तिस्तं स्खलितभक्तिं त्यक्तस्नेहं मौर्यं चन्द्रगुप्तं

चाणक्यः—(कृत्रिम क्रोध को हटाकर) वृषल ! वृषल !! उत्तर—प्रत्युत्तर (वाद-विवाद) से क्या लाभ ? राक्षस को हमसे श्रेष्ठ समझते हो तो लो, यह शस्त्र उसीको दे दो। (शस्त्र को छोड़-तथा उठकर आकाश में राक्षस को स्थित जान कर मन ही मन)। राक्षस ! राक्षस !! चाणक्य की बुद्धि जीतनेवाली तुम्हारी बुद्धि की यही विशेषता है ?

ओ शठ ! मैं चाणक्य से हटी हुई भक्तिवाले मौर्यको सुख से जीत लूंगा,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भेदः, किलैष भवता सकलः स एव,
सम्पत्स्यते, शठ ! तवैव हि दूषणाय ॥३१॥
(इति निष्क्रान्तः)

राजा—आर्य ! वैहीनरे ! अद्य प्रभृत्यनादृत्य चाणक्यं चन्द्रगुप्तः स्वयमेव राज्यकार्याणि करिष्यतीति गृहीतार्थाः प्रकृतयः क्रियन्ताम् ।

सुखेनाऽक्लेशेन जेष्यामि पराभविष्यामि इत्यतो हेतोः इत्येवं बुद्ध्या वा सम्प्रति अधुना एष सकलः सम्पूर्णो भेदो भवता त्वया प्रयुक्तो विहितः, स एव भेद एव तवैव भवत एव दूषणाय दोषाय मलयकेतोर्भेदायेत्यर्थः। सम्पत्स्यते परिणंस्यति (दूषणाय सम्पत्स्यत इत्यत्र क्लृपि सम्पद्यमाने चेति चतुर्थी) चाणक्यचन्द्रगुप्तभेदविधायिनी त्वत्प्रयुक्ता नीतिस्तवैवानिष्टविधायिनी भविष्यतीति भावः । (इदं स्वगुणाविष्करणं विचलनम्) राक्षसप्रयुक्तव्यापारस्यासाफल्यादनिष्टोत्पत्त्या पद्येऽस्मिन्विषमालङ्कारो बोध्यः ।

गुणौ क्रिये वा चेत्स्यातां विरुद्धे हेतुकार्ययोः ।
यद्वारब्धस्य वैफल्यमनर्थस्य च सम्भवः ॥
विरूपयोः संघटना या च तद्विषमं मतम् ॥

इति दर्पणोक्तलक्षणात् । प्रसादगुणः । वैदर्भी रीतिः । वसन्ततिलकं वृत्तम् ॥ ३१ ॥

आर्य वैहीनर इति । वैहीनरीति चन्द्रगुप्तकञ्चुकिनाम तस्मिन्नार्यपदप्रयोगो वयोवृद्धत्वात् । अद्य प्रभृति अद्यारभ्य चन्द्रगुप्तः अयम् (इदमाऽऽत्मनिर्देशः) चाणक्यं कौटिल्यम् अनादृत्य तिरस्कृत्य स्वयमेव साक्षादेव राज्यकार्याणि प्रकृतिनिग्रहानुग्रहात्मकामात्यकृत्यानि करिष्यति विधास्यति इति एतद्वृत्तं प्रकृतयः प्रजाः गृहीताऽवगतोऽर्थोऽभिप्रायो याभिस्ताः गृहीतार्थाः अवगताभिप्रायाः क्रियन्तां विधीयतां त्वयेति शेषः ।

इसलिये तूने जो भेद रचा है, वह सब भेद तेरे ही दोषका कारण होगा । (यह कह- कर चला जाता है) ॥ ३१ ॥

राजा—आर्य वैहीनरि! आज से चाणक्य को हटाकर चन्द्रगुप्त स्वयं राज्य कार्य्य करेगा । यह समस्त प्रजा को सूचित कर दीजिये ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कञ्चुकी—(स्वगतम्) कथं निरुपपद एव चाणक्य इति नार्यं चाणक्य इति-हन्त! सत्यमेव हृतोऽधिकारः–अथवा न खल्वत्र वस्तुनि देवदोषः।

स दोषः सचिवस्यैव, यदसत् कुरुते नृपः ।
याति यन्तुः प्रमादेन गजो व्यालत्ववाच्यताम् ॥ ३२ ॥

राजा—आर्य्य ! किं विचारयसि ?

स्वगतमिति । स्वगतं मनोगतं यथा तथा ब्रवीतीत्यर्थः । (क्रियाविशेषणमिदम्) कथं कुतः निर्नास्त्युपपदं सन्निहितश्रेष्ठत्वबोधकार्यादिपदं यस्य स निरुपपदः चाणक्य इत्युक्त इति शेषः । नार्यचाणक्य इति आर्यचाणक्य इति शब्दो न प्रयुक्त इत्यर्थः । हन्त इति खेदे सत्यमेव अधिकारो राज्यकार्याध्यक्षत्वं हृतः आदत्तो राज्ञा चाणक्यस्येति शेषः । अथवा न खल्वत्र वस्तुनि नैवास्मिन्नधिकारहरणे देवदोषः चन्द्रगुप्तापराधः अस्तीति शेषः ।

स दोष इति । नृपो राजा यत् असत् अयुक्तं कार्यमिति शेषः । सचिवानादरादिरूपमित्यर्थः । कुरुते विधत्ते स सचिवस्यैव मन्त्रिण एव दोषोऽपराधो न तु नृपस्येत्यर्थः । (विधेयप्राधान्यात्स इति पुंस्त्वनिर्देशः) गजो हस्ती यन्तुर्हस्तिपकस्य 'यन्ता हस्तिपके सूते' इति मेदिनी । प्रमादेन अनवधानतया व्यालत्वेन वाच्यता व्यालत्ववाच्यता तां व्यालत्ववाच्यतां दुष्टगजत्वनिन्द्यतां दुष्टतापवादमिति यावत् याति प्राप्नोति । 'व्यालो दुष्टगजे सर्पे श्वापदे नान्यवत्खले' । इति मेदिनी । असन्मार्गगामिनो नृपस्यामात्येनानिवारणममात्यस्यैव दोषो नतु नृपस्येत्यर्थः । नृपाशिक्षणं गजाशिक्षणमिव अशिक्षितो नृपोऽशिक्षितो गज इवेति वा प्रतिबिम्बनात्पद्यमिदं दृष्टान्तालङ्कारालङ्कृतम् । तदुक्तमलङ्कारसर्वस्वे—

तस्यापि विम्बप्रतिविम्बभावतया निर्देशे दृष्टान्तः ।
दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनात् ।

इति दर्पणेऽप्युक्तम् । अनुष्टुप्वृत्तम् ॥ ३२ ॥

कञ्चुकी—(मन ही मन) आज महाराज ने आर्य चाणक्य न कहकर केवल चाणक्य क्यों कहा ? बड़े दुःख की बात है । क्या सचमुच अधिकार छीन लिया ? अथवा इस विषय में चन्द्रगुप्तदेव जी का दोष नहीं है ।

राजा जो अनुचित कार्य करता है, वह मन्त्री का दोष है । जैसे कि—हस्तिपालक अपनी असावधानतासे दुष्ट गज द्वारा निन्दाका पात्र बन जाता है ॥ ३२ ॥

राजा—आर्य ! क्या सोचते हो ?

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कञ्चुकी—देव ! न किञ्चिद्विचारयामि, किन्तु एतद्विज्ञापयामि, दिष्ट्या देवः संवृत्त इति ।

राजा—(आत्मगतम्) एवमस्मासु गृह्यमाणेषु स्वकार्य्यसिद्धि-कामः, सकामो भवत्वार्य्यः (प्रकाशम्) शोणोत्तरे ! अनेन शुष्ककलहेन शिरोवेदना मां बाधते, तच्छयनगृहमादेशय ।

प्रतीहारी—एदु एदु महाराओ [एतु एतु महाराजः] ।

राजा—(आसनादुत्थायात्मगतम्) ।

आर्याज्ञयैव मम लङ्घितगौरवस्य

देवेति । देव राजन् ! न किञ्चिद्विचारयामि न किमपि चिन्तयामि, किन्तु दिष्ट्या भाग्येन देवो भवान् इदानीं देवः सम्वृत्तः अन्यायत्ततया मुक्त्वा देवपदवाच्यो जात इत्यर्थः । इत्येतद् वृत्तमिति शेषः । विज्ञापयामि निवेदयामि ।

एवमिति । आवयोः कृत्रिमविरोधस्य लोकैस्तथ्यत्वेन गृहीतत्वे सतीत्यर्थः । स्वस्य कार्यं स्वकार्यं तस्य सिद्धिः स्वकार्यसिद्धिस्तां कामयते इति स्वकार्यसिद्धिकामः आत्मकृत्यनिष्पत्त्यभिलाषी कामेन सहितः सकामः सफलमनोरथः । शुष्कश्चासौ कलहः शुष्ककलहस्तेन शुष्ककलहेन व्यर्थविवादेन, शिरसो वेदना शिरोवेदना शिरोव्यथा बाधते पीडयति । (इदं सिद्धवद्भाविश्रेयःकथनं प्ररोचना) ।

आर्याज्ञयैवेति । आर्यस्य भवत आज्ञया शासनेनैव लङ्घितमतिक्रान्तं गौरवमादरो येन स लङ्घितगौरवस्तस्य लङ्घितगौरवस्य अविक्रान्तादरस्य मम

कञ्चुकी—देव ! मैं कुछ नहीं विचारता, किन्तु यह निवेदन करता हूं कि आजसे आप सचमुच राजा हो गये ।

राजा—(मन ही मन) हम दोनों के कृत्रिम विरोध को यथार्थ समझने पर अपनी कार्यसिद्धि चाहनेवाले ! आप का मनोरथ सफल हो । (जोरसे) शोणोत्तरे ! इस व्यर्थ विवाद से मेरे सिर में उत्पन्न व्यथा मुझको दुःख देती है, इसलिये शयनागार का मार्ग दिखाओ ।

प्रतिहारी—इधर, इधर महाराज ! ।

राजा—(आसन से उठकर मन ही मन) ।

आपकी आज्ञा ही से गौरव को त्यागनेवाली हमारी बुद्धि रसातल जाने को

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बुद्धिः प्रवेष्टुमवनेर्विवरं प्रवृत्ता ।
ये सत्यमेव न गुरून् प्रतिमानयन्ति
तेषां कथं नु हृदयं न भिनत्ति लज्जा ? ॥३३॥

(इति निष्क्रान्ताः सर्वे)

इति मुद्राराक्षसे तृतीयोऽङ्कः ।

बुद्धि र्धीः अवनेः पृथिव्याः विवरं विलं । 'शुषिरं विवरं विलमि' त्यमरः प्रवेष्टुं गन्तुं प्रवृत्ता उद्यता लज्जाधिक्यादिति शेषः । ये जनाः सत्यमेव यथार्थमेव गुरून् पूज्यान् न प्रतिमानयन्ति न सत्कुर्वन्ति नु वितर्के तेषां जनानां हृदयं चित्तं कथं लज्जा व्रीडा (कर्त्री) न भिनत्ति न विदारयति अपि तु विदारणमुचितम् यद्यपि मत्कर्तृकविरोधाचरणे भवदादेश एव हेतुस्तथापि लज्जा मद्बुद्धिं भूविलं प्रवेशयन्ती हृदयं विदारयतीत्यर्थः । पूज्यानसत्कुर्वतो लज्जा पीडयत्येवेति भावः (इत्थमत्र नियताप्तिः प्रदर्शिता) ।

प्रथमचरणे आर्यनिदेशरूपाप्रश्नपूर्वककथितवस्तुनो नान्येत्यन्यनिराकरणात्परिसंख्यालङ्कारः सच गौरवोल्लङ्घने आर्यादेशस्य हेतुभूतस्य पदार्थत्वेनाभिधानात्पदार्थहेतुककाव्यलिङ्गालङ्कारसंसृष्टः । द्वितीयचरणे बुद्धेर्भूविवरप्रवेशो लङ्घितगौरवत्वस्य हेतुत्वेनोपन्यासात्पदार्थहेतुकं काव्यलिङ्गमलङ्कारः । तृतीयचतुर्थचरणयोः पूज्यानसत्कुर्वतो हृदयं लज्जा न भिनत्ति अपि तु भिनत्त्येवेत्यर्थस्य जातत्वादर्थापत्त्यलङ्कारः ।

प्रश्नादप्रश्नतो वापि कथिताद्वस्तुनो भवेत् ।
तादृगन्यव्यपोहश्चेच्छाब्द अर्थोऽथवा यदि ॥ परिसंख्या ।
हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम् ।
दण्डाऽपूपिकयाऽन्यार्थागमोऽर्थापत्तिरिष्यते ।

इति दर्पणोक्तलक्षणत्रयात् । वसन्ततिलकं वृत्तम् ॥ ३३ ॥

इति मुद्राराक्षसभावबोधिनीव्याख्यायां तृतीयोऽङ्कः ॥ ३ ॥

तैयार है । जो लोग सचमुच बड़ों का आदर नहीं करते, उन लोगों के हृदय को लज्जा क्यों नहीं विदीर्ण कर देती ? ॥ ३३ ॥

इति आशुबोधिनीव्याख्यायां तृतीयोऽङ्कः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चतुर्थोऽङ्कः ।

(ततः प्रविशत्यध्वगवेशः पुरुषः) ।

पुरुषः—हीमाणहे ! हीमाणहे !! [आश्चर्यम् ! आश्चर्यम्]

जोअणसअं समधिअं को णाम गदागदं इह करेइ ।
अत्थाणगमणगुरुई पहुणो अण्णा जइ ण होइ ॥१॥
[योजनशतं समधिकं को नाम गतागतमिह करोति ।
अस्थानगमनगुरुका प्रभोराज्ञा यदि न भवति ॥ १ ॥]

तत इति । ततस्तदन्तरं चाणक्य—चन्द्रगुप्तादिनिष्क्रमणानन्तरमित्यर्थः । अध्वानं गच्छतीत्यध्वगः (अध्वच्छदोपपदाद्गमेर्डप्रत्यये रूपम्) अध्वगस्य वेष इव वेषो यस्य सोऽध्वगवेषः पथिकाकृतिः । 'अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिक इत्यपि'। इत्यमरः। पुरुषो राक्षसदूतः प्रविशति रङ्गस्थानमिति शेषः । पथिकवेशधारी राक्षसदूतो रङ्गशालाभ्यन्तरगतो भवतीत्यर्थः ।

दूत—राक्षसयोर्नूनं कथा सम्वादरूपिणी ।
अल्पाऽस्मिन् प्रकरोनाम्नीचतुर्थेऽङ्केऽभिधीयते ॥

हीमाणह इति । आश्चर्यबोधकोऽयं निपातः । अतिशयार्थप्रतिपादनाय द्विरुक्तिः ।

योजनशतमिति । अस्थाने गमनमस्थानगमनम् अस्थानगमनेन गुरुकाऽस्थानगमनगुरुका अनवसरगमनगुर्वी अनुल्लङ्घनीया इत्यर्थः । प्रभोः स्वामिनः आज्ञा निदेशो यदि न भवति तदा इहाऽस्मिञ्जगति सङ्गतमधिकं यस्मिन्तत्समधिकं (प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः) इति गतपदलोपः । योजनानां शतं योजनशतं शतयोजनमित्यर्थः । व्याप्य को नाम न कोपीत्यर्थः । गतञ्चागतञ्चानयोः समाहारद्वन्द्वो गतागतं गमानागमनं करोति विदधाति स्वामिनिदेशेनैवेयद्दूरमागतम्मयेति भावः । पद्योत्तरांशप्रतिपाद्यस्यानतिक्रमणीयस्वामिनिदेशस्य पूर्वांशप्रतिपाद्ये योजनशताधिकगमने हेतुत्वात्पद्येऽस्मिन् वाक्यार्थहेतुकका-

---

(एक पथिकवेषधारी पुरुष का प्रवेश)

पुरुषः—आश्चर्य्यं है ! आश्चर्य्यं है !!

यदि नहीं उल्लंघन करने योग्य राजा की आज्ञा न हो तो भला सौ योजन से भी अधिक दूर कौन पुरुष जा सकता है ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ता जाव अमच्चरक्खसस्स ज्जेव गेहं गच्छामि (परिश्रान्तवत् परिक्रम्य) भो ! को एत्थ दुआरिआणं ? णिवेदेह दाव भट्टिणो अमच्चरक्खसस्स, एसो क्खु करहको करहक विअ कज्ज तुवरन्तो पाडलिपुत्तादो आगदो त्ति [तद्यावदमात्यराक्षसस्यैव गेहं गच्छामि । भोः ! कोऽत्र दौवारिकाणाम् ? निवेदय तावद् भर्त्तुः अमात्यराक्षसस्य "एष खलु करभकः करभक इव कार्यं त्वरयन् पाटलिपुत्रादागतः" इति]

दौवारिकः—(प्रविश्य) भद्द ! मा उच्चं मन्तेहि; एसो अमच्चो भट्टा कज्जचिन्ताजणिदेण जाअरेण समुप्पणसीसवेअणो, अज्ज बि दाव ण

व्यलिङ्गमलङ्कारः ।

हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम् । इति दर्पणोक्तलक्षणात् । आर्या छन्दः॥१॥

कोऽत्रेऽपि । द्वारे नियुक्ता दौवारिकास्तेषां दौवारिकाणां द्वारत्राणनियुक्तानाम् अत्रास्मिन् स्थाने द्वारत्राणे नियुक्तपुरुषाणां मध्ये कः किन्नामधेयो जनस्तिष्ठति । भर्त्तुः स्वामिनोऽमात्यराक्षसस्य राक्षसनाम्नो मन्त्रिणः सम्बन्धे षष्ठी । निवेदय कथय, एषोऽसौ करभकस्तन्नामको दूतः करभक इव करिशावक इव कार्यं कृत्यं त्वरयन् तूर्णं साधयन् पाटलिपुत्रात् एतदाख्यनगरात् आगतः प्राप्तः ।

प्रविश्येति । दौवारिको द्वाररक्षणनियुक्तपुरुषः प्रविश्य रङ्गस्थानमागत्य ब्रवीतीत्यर्थः । भद्र ! कल्याणशालिन् , शनैर्मन्दं मन्त्रयस्व ब्रूहि-तत्र हेतुमाह—कार्यचिन्ताजनितेनेति । कार्याणां कृत्यानां चिन्ता स्मरणं कार्यचिन्ता तया जनित उत्पादितस्तेन कार्यचिन्ताजनितेन कृत्यस्मरणोत्पादितेन जागरणेन निद्राक्षयेन समुत्पन्ना समुद्भूता शीर्षे शिरसि वेदना पीडा यस्य समुत्पन्नशीर्षवेदनः सञ्जातोत्तमाङ्गपीडः एषोऽसावमात्यो मन्त्री भर्त्ता स्वामी राक्षसः अद्यापि सम्प्रत्यपि शयनतलं शय्यां न मुञ्चति न त्यजति, तत्तस्मात् कारणात् मुहूर्त्तं क्षणमात्रं तिष्ठ विलम्बस्व वर्तस्वेति यावत् । यावत् यत्कालपर्यन्तं तस्य राक्षसस्य लब्धः प्राप्तोऽवस-

---

इसलिये अब अमात्य राक्षस ही के घर जाता हूँ (थके हुए की तरह घूमकर) भो ! यहां पर द्वारपालों में कौन है ? जाकर अमात्य राक्षस से कहो कि यह करभक नाम का दूत हाथी के बच्चे की तरह शीघ्र कार्य साधनकर पाटलि पुत्र से आया है ।

दौवारिकः—(सामने आकर) भाई जोर से मत बोलो, अमात्य राक्षस कार्य की चिन्ता से रातको ज्यादा जाग गये हैं । इसलिये सिर में वेदना हो गई है और अब

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सअणदलं मुञ्चदि; ता चिट्ठ दाव मुहुत्तअं, जाव से लद्धावसरो भविअ, भवदो आगमणं णिवेदेमि [भद्र ! मा उच्चैर्मन्त्रय; एष खलु भर्त्ता अमात्यराक्षसः कार्यचिन्ताजनितेन जागरणेन समुत्पन्नशीर्षवेदनोऽद्यापि तावत् न शयनतलं मुञ्चति; तस्मात् तिष्ठ तावन्मुहूर्त्तं, यावत् तस्य लब्धावसरो भूत्वा,भवत आगमनं निवेदयामि]

पुरुषः—भद्दमुह ! जधा दे रोअदि [भद्रमुख ! यथा ते रोचते]

(ततः प्रविशति शयनगत आसनगतेन शकटदासेन सह चिन्तितो राक्षसः)

राक्षसः—(आत्मगतम्)

मम विमृशतः कार्यारम्भे विधेरविधेयतां,
सहजकुटिलां कौटिल्यस्य प्रचिन्तयतो मतिम् ।

रोऽवकाशो येन स लब्धावसरः प्राप्तावकाशो भूत्वा आगमनं स्थितिं निवेदयामि विज्ञापयिष्यामि (भविष्यत्सामीप्ये लट्) ।

भद्रमुखेति । प्रधानामात्यराक्षसदौवारिकस्येयं संज्ञा । तुभ्यं यथा रोचते तथा कुर्वित्यर्थः । (अत्र 'रुच्यर्थानां प्रीयमाणः' इति सम्प्रदानसंज्ञोत्तरं 'सम्प्रदाने चतुर्थी'ति चतुर्थी । 'ते मयावेकवचनस्ये'ति तुभ्यमित्यस्य स्थाने त आदेशः) ।

तत इति । ततस्तदनन्तरं भद्रमुखेन करभकागमननिवेदनानन्तरमित्यर्थः । शयनगृहगतः निद्राभवनप्राप्तः आसने तिष्ठतीत्यासनस्थः आसनवर्त्ती सचिन्तश्चिन्तया युक्तो राक्षसस्तदाख्यो मन्त्री शकटदासेन स्वमित्रेण सह प्रविशति रङ्गशालाभ्यान्तरगतो भवतीत्यर्थः ।

ममेति । कार्यस्य कृत्यस्यारम्भः प्रक्रमः कार्यारम्भस्तस्मिन् कार्यारम्भे कृत्यप्रक्रमे विधेर्नियत्या भाग्यस्येत्यर्थः । अविधेयताम् अननुकूलतां विमृशतो विचारयतः दैवाधीनं जगत्सर्वं नतु दैवं कस्यापीति विचारयतः, कौटिल्यस्य चाणक्यस्य

तक भी शय्या को नहीं छोड़े हैं । इसलिये क्षणभर ठहरो, अवसर पाकर तुम्हारे आगमन की बात उनसे कहूँगा ।

पुरुषः—भद्रमुख ! जैसी तुम्हारी इच्छा हो ।

(आसन पर बैठे हुए शकटदास के साथ चिन्ता करते हुए शयनगत राक्षस का प्रवेश) ।

राक्षसः—(मन ही मन)

कार्य के आरम्भ में भाग्य की प्रतिकूलता तथा चाणक्य की स्वभावतः कुटिल

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ च विहिते मत्कृत्यानां निकाममुपग्रहे,
कथमिदमिहेत्युन्निद्रस्य प्रयान्त्यनिशं निशाः ॥२॥

अपि च-कार्योपक्षेपमादौ, तनुमपि रचयंस्तस्य विस्तारमिच्छन्
बीजानां गर्भितानां फलमतिगहनं गूढमुद्भेदयंश्च ।

सहजकुटिलां स्वभावक्रूरां मतिं बुद्धिं प्रचिन्तयतो विचारयतः । अथ च मत्कृत्यानां मम विषकन्यात्मककपटकर्मणाम् उपग्रहे प्रतीकारे निकामं यथेच्छं विहिते कृते सति, इहाऽस्मिन्नुद्यमे इदमस्मदीप्सितं कथं केन प्रकारेण सफलं स्यादिति भावनयेत्यर्थः । उद्गतोच्छिन्ना निद्रा यस्य स उन्निद्रस्तस्योन्निद्रस्य निद्रारहितस्येत्यर्थः । मम निशा रजन्योऽनिशं सततं प्रयान्ति व्यतियन्ति । कार्यस्यानल्पत्वात्तद्भावनयैव जाग्रतो मम सर्वा रजन्यो गच्छन्तीति भावः ।-

समुच्चयोऽयमेकस्मिन् सति कार्यस्य साधके ।
खले कपोतिकान्यायात्तत्करः स्यात्परोऽपि चेत् ॥

इति दर्पणानुक्रान्तलक्षणात्पद्येऽस्मिन् निद्राभावात्मककार्यम्प्रति भाग्यानुकूलत्वविमर्शादिरूपानेकसाधकसत्त्वात्समुच्चयो नामालंकारः । वैदर्भी रीतिः । हरिणीछन्दः ॥ २ ॥

इहातिशयाश्चर्यनयविषयकात्मविरचनश्रमं राक्षसवाक्छलेन कविः (प्रक्रमते) सूचयति—कार्योपक्षेपमिति । आदौ प्रथमं तनुमपि अत्यल्पमपि कार्यस्योपक्षेपः कार्योपक्षेपस्तं कार्योपक्षेपं कृत्योपायं रिपुपराभवात्मककृत्यजातसामाद्युपायमिति यावत् । रचयन् कुर्वन् तस्य कार्यस्य विस्तारमिच्छन्नभिलषन् गर्भो जात एषामिति गर्भितानि तेषां गर्भितानां गर्भयुक्तानां फलप्रसवोन्मुखानामित्यर्थः । गूढमनभिव्यक्तम् अतिगहनं दुरवगमं यथा तथोद्भेदयन् अभिव्यक्तीकुर्वन् बुद्ध्या मत्या विमर्शं कर्त्तव्यविवेकं कुर्वन् विदधत् पुनः प्रसृतमपि विस्तृतमपि कार्यजातं कृत्यवर्गं संहरन् सफलीकुर्वन् अस्मद्विधो मादृशोऽमात्यः । (पक्षान्तरे) आदौ अभिनेयारम्भे ।
यत्र बीजसमुत्पत्तिर्नानार्थरससम्भवा । प्रारम्भेण समायुक्ता तन्मुखं परिकीर्त्तितम् ॥

बुद्धि को विचारते हुए, हमारे कपटकार्यों का अच्छी तरह प्रतीकार करने पर यह मेरा उद्योग किस तरह सफल होगा, इस चिन्ता से जागते हुए हमारी रात्रि निरन्तर बीत रही है ॥२॥

और भी—पहिले थोड़ा भी कार्य का उपाय करते हुए उस कार्य की विस्तृति को चाहते हुए तथा शीघ्र फल देनेवाले हेतुओं के अत्यन्त दुष्प्राप्य फल को छिपे-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कुर्वन् बुद्ध्या विमर्षं प्रसृतमपि, पुनः संहरन् कार्यजातं
कर्त्ता वा नाटकानामिममनुभवति क्लेशमस्मद्विधो वा ॥३॥

इत्युक्तलक्षणे नाटकारम्भ इत्यर्थः, तनुमपि अत्यल्पमपि कार्योपक्षेपम्

काव्यार्थस्य समुत्पत्तिरुपक्षेप इति स्मृतः ।

इत्युक्तलक्षणं प्रस्तावनारूपमित्यर्थः । रचयन् प्रणयन् कुर्वन् तस्य बीजस्य विस्तारं प्राकट्यं

समुत्पन्नार्थबाहुल्यं ज्ञेयः परिकरः पुनः ।

इत्युक्तलक्षणं परिकरमित्यर्थः । प्रतिमुखसन्धाविच्छन्नमभिलषन् गर्भितां दृष्ट-नष्टानां बीजानाम्

अल्पमात्रं समुद्दिष्टं बहुधा यद्विसर्पति । फलस्य प्रथमो हेतुर्बीजं तदभिधीयते ॥

इत्युक्तलक्षणानां फलप्रधानहेतूनामित्यर्थः । अतिगहनं दुरधिगमं फलं गूढं यथा तथोद्भेदयन्

फलप्रधानोपायस्य प्रागुद्भिन्नस्य किञ्चन । गर्भो यत्र समुद्भेदो ह्रासान्वेषणवान् मुहुः ॥

इत्युक्तलक्षणगर्भसन्धौ प्रकटयन्—

यत्र मुख्यफलोपाय उद्भिन्नो गर्भतोऽधिकः ।
शापाद्यैः सान्तरायश्च स विमर्श इति स्मृतः ॥

इत्युक्तलक्षणे विमर्शसन्धौ तस्यैव बीजस्य बुद्ध्या मत्या विमर्शमनुसन्धानं कुर्वन् विदधत् पुनस्तथापसृतं विस्तृतमपि कार्यजातं नाटकीयं वस्तु संहरन्

बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम् ।
ऐकार्थ्यमुपनीयन्ते यत्र निर्वहणं हि तत् ॥

इत्युक्तलक्षणे निर्वहणसन्धावुपसंहरन् समापयन् नाटकानां—

नाटकं ख्यातवृत्तं स्यात्पञ्चसन्धिसमन्वितम् ।

रूप से प्रकट करते और बुद्धि से विचार करते तथा फैले हुए कार्यसमुदाय को एकत्रित करते हुए हमारे जैसा पुरुष भी नाटककार का दुःख अनुभव करता है ।

(पक्षान्तर में)—नाटक के प्रारम्भ में अत्यन्त अल्प प्रस्तावना को भी करता हुआ और उस प्रस्तावना के परिकरको प्रतिमुखसन्धि में चाहता तथा दृष्ट नष्ट फलप्रधान के हेतुओं के अत्यन्त दुर्ज्ञेय फल को गुप्तरूपसे गर्भसन्धिमें दिखाता हुआ तथा विमर्शसन्धि में बुद्धिसे उसी बीज का अनुसन्धान करता और फैलाये हुए नाटकीय वस्तुको निर्वहणसन्धि में समाप्त करता हुआ नाटकों की रचना करनेवाला (कवि) इस वर्णित दुःखको पाता है ॥ ३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तदपि नाम दुरात्मा चाणक्यवटुः,—"

दौवारिकः—(उपसृत्य) 'जेदु जेदु—" [जयति जयति,]

राक्षसः—"अभिसन्धातुं शक्यः स्यात्—"

इत्युक्तलक्षणानां दृश्यकाव्यानां, रूपकाणां कर्त्ता प्रणेता वा कविरित्यर्थः। इमं वर्णितरूपं क्लेशं दुःखम् अनुभवति अधिगच्छति। शत्रुविजयादिरूपोपायादि विरचने मुखप्रतिमुखगर्भविमर्शोपसंहारेति पञ्चसन्धिसमन्वितनाटकप्रणयने च समुत्पन्नक्लेशममात्यो नाटकप्रणेता वाऽनुभवति न त्वेतदुभयातिरिक्तस्तृतीय इति भावः। शत्रुविजयोपायविरचनादिरूपस्य प्राकरणिकार्थस्य अभिनेयार्थस्य प्रस्तावनात्मको-पक्षेपप्रणयनादिरूपस्याप्राकरणिकार्थस्य च सत्वाच्छ्लेषालङ्कारः। तदुक्तं साहित्य-दर्पणे—

शब्दैः स्वभावादेकार्थैः श्लेषोऽनेकार्थवाचनम्। इति

मन्त्रि—नाटककृतोः प्रस्तुताप्रस्तुतयोः (प्रकृताप्रकृतयोः) एकक्रियाभिसम्बन्धदीपकालङ्कारश्चेत्यनयोरङ्गाङ्गिभावेन साङ्कर्यम्।

अप्रस्तुतप्रस्तुतयोर्दीपकं तु निगद्यते।

इति दर्पणोक्तदीपकलक्षणात्। रीतिरत्र वैदर्भी नाम। स्रग्धरावृत्तम्। म्रभ्नैः-र्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्त्तितेयम् ॥ ३ ॥

तदपीति। दुर्दुष्ट आत्मा यस्य स दुरात्मा दुष्टजीवः चाणक्यश्चासौ वटुश्चाणक्यवटुः अल्पबुद्धिश्चाणक्य इत्यर्थः। तदपि तादृशं क्लेशमनुभवत्यपि न दुर्व्यसनाद्विरमतीति वाक्यशेषः। नाम सम्भावनायम्। यद्वा यदपि तथापि अमात्यस्योक्तविधक्लेशानुभावकत्वेऽपीत्यर्थः। दुरात्मा चाणक्यवटुर्नोद्यमं त्यजतीत्यर्थः।

उपसृत्येति। द्वाररक्षकः उपसृत्य राक्षसान्तिकं गत्वा कथयतीति शेषः। जयति जयतीत्यस्य सर्वोत्कर्षेण वर्ततामित्यर्थः (वीप्सायां द्विरुक्तिः) इदं तृतीयं पताकास्थानम्। तदुक्तं साहित्यदर्पणे—

अर्थोपक्षेपकं यत्तु लीनं सविनयं भवेत्। श्लिष्टप्रत्युत्तरोपेतं तृतीयमिदमुच्यते ॥इति॥

अभिसन्धातुमिति 'अभिसन्धातुं पराभवितुं प्रतारयितुमित्यर्थः। शक्यः

इस तरह के क्लेश को प्राप्त करने पर भी दुष्ट और अल्पबुद्धिवाला चाणक्य अपने दुर्व्यसन से नहीं हटता।

दौवारिकः—(समीप जाकर) जय हो, जय हो।

राक्षसः—वह दुरात्मा चाणक्य पराजय के योग्य है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दौवारिकः—अमच्चो [अमात्यः]

राक्षसः—(वामाक्षिस्पन्दं सूचयित्वात्मगतम्) "दुरात्मा चाणक्यवटुर्जयति, अभिसन्धातुं शक्यः स्यादमात्यः" इति वामाक्षिस्पन्दनेन प्रस्तावगतं प्रतिपादयति । तथापि नोद्यमस्त्याज्यः । (प्रकाशम्)भद्र ! किमसि वक्तुकामः ?

समर्थः (योग्यः) स्यात् भवेत् । दुरात्मा चाणक्यवटुस्त्वया मया वा प्रतारयितुं योग्यो भवेत् त्वं दुरात्मानं चाणक्यवटुं प्रतारयितुं समर्थः स्यादिति वा राक्षसोक्तेस्तात्पर्यम् । (क्वचिदतिसन्धातुमिति पाठः सम्मेलयितुमिति तदर्थः) ।

अमात्य इति । अमात्यो भवान् दुरात्मानं चाणक्यवटुमभिसन्धातुं शक्यः स्यादिति दौवारिकोक्तेस्तात्पर्यम् । परममात्यमते अमात्यो भवानेव दुरात्मना चाणक्यवटुनाऽन्येन शत्रुणा वा प्रतारयितुं योग्यो भवेदित्यर्थः । सम्पन्नः । अत एव वामाक्षिस्पन्दमित्यादिराक्षसोक्तिः संगच्छते ।

दुरात्मेति । दुरात्मा दुष्टहृदयश्चाणक्यवटुः अल्पमतिः कौटिल्यो जयति सर्वोत्कर्षेण वर्द्धताम् अमात्यो भवान् अभिसन्धातुं प्रतारयितुं शक्यो योग्य इतीत्येवमर्थं, वागीश्वरी वाग्देवता प्रस्तावं प्रकरणं गता प्राप्ता प्रस्तावगता प्रकरणप्राप्ता सती वामाक्षिस्पन्दनेन दक्षिणेतरनेत्रस्फुरणेन प्रतिपादयति अभिदधाति सूचयतीति यावत् । (चाणक्यकर्तृकराक्षसाऽभिसन्धानात्मककार्यस्य राक्षसेनैवाशुभोपश्रुतिदुःशकुनाभिधानद्वारा संग्रहणादिदं कार्यसंग्रहणमादानं नाम विमर्शसन्धेरन्त्यमङ्गम्) । तदुक्तं साहित्यदर्पणे—

कार्यसंग्रह आदानमिति ।

तथापि वागीश्वर्योक्तवचनप्रतिपादनेऽपीत्यर्थः । उद्यम उद्योगो न त्याज्यः न परिहरणीयः । वक्तुं कामयते इति वाक्तुकामः वचनप्रतिपादनाभिलाषीत्यर्थः । लुम्पेदवश्यमः कृत्ये तुंकाममनसोरपि । समो वा हिततयो मांसस्य पचि युड्घञोः।

दौवारिकः—आप······

(इसका तात्पर्य यह है कि आप ही दुष्टचाणक्यको जीतने योग्य हैं । अथवा- आप दुष्ट चाणक्य से जीते जाने योग्य हैं) ।

राक्षसः—(वामनेत्र का स्पन्दन सूचितकर मनही मन) । "दुरात्मा चाणक्य का जय हो" अमात्य (राक्षस) पराजयके योग्य है । यहकहकर वामनेत्र के स्पन्दन के द्वारा प्रकरणगत अर्थ को कहता है । तो भी उद्योग नहीं छोड़ना चाहिए । (जोरसे) भद्र ! तुम क्या कहना चाहते हो ?

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दौवारिकः—अमच्च ! एसो क्खु करहओ पाडलिपुत्तादो आअदो, इच्छदि अमच्चं पेक्खिदुं । [अमात्य ! एष खलु करभकः पाटलिपुत्रादागतः, इच्छति अमात्यं प्रेक्षितुम्] ।

राक्षसः—अवारितं प्रवेशयैनम् ।

दौवारिकः—जं अमच्चो आणवेदि । (इति निष्क्रम्य पुरुषमुपसृत्य) भद्द ! एसो क्खु अमच्चो चिट्ठति, ता उपसप्प णं [यदमात्य आज्ञापयति । भद्र ! एष खलु अमात्यस्तिष्ठति, तदुपसर्प एनम्] ।

(इति निष्क्रान्तो दौवारिकः) ।

करभकः—(राक्षसमुपसृत्य) जेदु जेदु अमच्चो । [जयति जयत्यमात्यः]

राक्षसः—(नाटयेनावलोक्य) भद्र करभक! स्वागतम्? उपविश्यताम् ।

करभकः—जं अमच्चो आणवेदि [यदमात्य आज्ञापयति] (इति भूमावुपविशति) ।

राक्षसः—(आत्मगतम्) अथ कस्मिन् प्रयोजने मयाऽयं प्रणिधिः प्रहित इति प्रभूतत्वात् प्रयोजनानां न खल्ववधारयामि ।

इति भाष्योक्तकारिकया वक्तुमित्यत्र तुमुनो मकारलोपे वक्तुकाम इति प्रयोग उपपन्नः ।

आत्मगतमिति । (इदं क्रियाविशेषणम्) अनतिस्पष्टं यथा तथा ब्रवीतीत्यर्थः । अथ करभकस्योपवेशनानन्तरं ब्रवीतीति क्रियया सम्बन्धः । कस्मिन्प्रयोजने कस्मिन् कार्येऽयं प्रणिधिर्दूतो मया प्रहितः प्रेषितः इति प्रयोजनानां कार्याणां प्रभूतत्वादाधिक्यात् न खल्ववधारयामि नैवावगच्छामीत्यर्थः । राक्षसकरभकान्योन्याभा-

---

दौवारिकः—अमात्य ! करभक (दूत) आपका दर्शन चाहता है ।

राक्षसः—उसको ले आओ ।

दौवारिकः—आपकी जो आज्ञा । (दौवारिक बाहर जाकर करभक के साथ लौट कर कहता है) । भद्र ! यहां अमात्य राक्षस बैठे हैं, उनके पास जाओ ।

(दौवारिक बाहर लौट जाता है)

करभकः—(राक्षस के समीप जाकर) अमात्य की जय हो, जय हो ।

राक्षसः—(विचित्र ढंग से देखकर) । भद्र करभक ! आओ बैठो ।

करभकः—अमात्य की जो आज्ञा । (नीचे बैठता है) ।

राक्षसः—(मनही मन) मैंने इसको किस कार्य से भेजा था ? कार्यों की अधिकता के कारण नहीं जान पड़ता । (यह कहकर सोचता है) ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(इति चिन्तां नाटयति)

(ततः प्रविशति वेत्रपाणिरपरः पुरुषः) ।

पुरुषः—ओसलध अज्जा ओसलध ! अवेध, माणहे अवेध, किं ण पेक्खध ?— [अपसरत आर्याः ! अपसरत। अपेत मान्याः ! अपेत। किं न पश्यत]—

दुले पच्चासत्ती दंसणमवि दुल्लहं अधण्णेहिं ।
कल्लाणकुलघराणं देवाणं अ मणुस्सदेवाणं ॥ ४ ॥
[दूरे प्रत्यासत्तिर्दर्शनमपि दुर्लभमधन्यैः ।
कल्याणकुलगृहाणां देवानाञ्च मनुष्यदेवानाम् ॥ ४ ॥]

षणक्षणे भागुरायणनाम्ना चाणक्यप्रणिधिना मलयकेतुं सम्मेलयितुं तयोः प्रवेशावकाशं दातुं राक्षसचिन्तानाटनं कविरुपनिबद्धवानित्यालोकनीयम् । (राक्षसमुद्दिश्य करभकेणाभिधास्यमानस्य चाणक्यचन्द्रगुप्तमिथोविरोधस्य पूर्वकार्यानुसञ्जतत्वादिदमङ्कावतरणम्) । तदुक्तं—यत्र स्यादुत्तराऽङ्कार्थं इत्यादिना ।

तत इति । ततस्तदनन्तरं वेत्रः पाणौ यस्य स वेत्रपाणिः वेत्रहस्तः द्वितीयः पुरुषः प्रविशति रङ्गशालाभ्यन्तरगतो भवतीत्यर्थः ।

अपसरतेति । आर्या मान्याः । यूयमपसरत अपसरत पलायध्वं पलायध्वम् मान्याः श्रेष्ठाः यूयमपेत अपेत अपगच्छत अपगच्छत किं न पश्यत किं नावलोकयत । राज्ञो मलयकेतोर्गमनशैघ्र्यभ्रमाद्द्विरुक्तिः ।

दूरे इति । कल्याणः कुलधरो येषां ते कल्याणकुलधरास्तेषां कल्याणकुलधराणां सुवर्णमयमेरुपर्वतवासिनामित्यर्थः । देवानां सुराणां कल्याणानां कुलं कल्याणकुलं धरन्तीति धराः कल्याणकुलस्य धराः कल्याणकुलधरास्तेषां कल्याणकुलधराणां मङ्गलसमूहभाजिनां मनुष्याणां मनुष्येषु वा देवा देवतुल्या मनुष्यदेवास्तेषां मनुष्यदेवानां राज्ञाञ्च अधन्यैरपुण्यवद्भिः दर्शनमपि साक्षात्कारोऽपि दुर्लभं दुष्प्रापं प्रत्यासत्तिः सामीप्यसम्बन्धस्तु दूरे तिष्ठतु । अपुण्यभाजां देवनृपदर्शनं न सम्भवति निकटस्थायित्वं तु सर्वथैवासम्भवीति युष्माकमपसारेणेति भावः । प्राकरणिकस्य

(हाथ में वेत लिये हुए पुरुष का प्रवेश) ।

पुरुषः—आर्य ! तुम सब भागो, भागो । मान्य ! तुम सब चले जाओ । क्या नहीं जानते—

सुमेरुपर्वत पर रहनेवाले देवताओं और अनेकविध आनन्द का भोग करनेवाले राजाओं का दर्शन भी पापियों को दुर्लभ होता है, समीप में रहना तो सर्वथा असम्भव ही है ॥ ४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(आकाशे) अज्जा ! किं भणाध, किं णिमित्तं एसा ओसालणा करीअदि ? अज्जा ! एसो क्खु कुमालो मलयकेदू, समुप्पण्णसीसवेअणंममच्चरक्खसं सुणिअ, पेक्खिदुं इह ज्जेव आअच्छदि । एदिणा कालणेण ओसालणा करीअदि [आर्याः ! किं निमित्तमेषाऽपसारणा क्रियते ? आर्याः ! एष खलु कुमारो मलयकेतुः समुत्पन्नशीर्षवेदनममात्यराक्षसं श्रुत्वा प्रेक्षितुमिहैवागच्छति । एतेन कारणेनापसारणा क्रियते] ।

(इति निष्क्रान्तः पुरुषः)

(ततः प्रविशति भागुरायणेन कञ्चुकिना चाऽनुगम्यमानो मलयकेतुः)

मलयकेतुः—(निःश्वस्यात्मगम्) अद्य दशमो मासस्तातस्योपर-

न्नृपस्याऽप्राकरणिकस्य देवस्य चैकक्रियासम्बन्धाद्दीपकालङ्कारालंकृतमिदं पद्यम् ॥ आर्या छन्दसा निबद्धञ्च ॥ ४ ॥

आकाश इति । असन्तमप्याकाशस्थपुरुषं लक्षीकृत्य ब्रवीतीत्यर्थः । एतल्लक्षणं यथा साहित्यदर्पणे—

किम्ब्रवीषीति यन्नाट्ये विना पात्रं प्रयुज्यते ।
श्रुत्वेवाऽनुक्तमप्यर्थं तत्स्यादाकाशभाषितम् ॥

इति । आर्या मन्याः किं भणथ किं ब्रूथ, किं निमित्तमपसारणा क्रियते कस्मात्कारणात् वर्त्ममध्यवर्त्तिनां पुरुषाणां तदेकपार्श्ववर्तित्वकरणं विधीयते ? आर्या एषोऽसौ कुमारः शिशुः मलयकेतुस्तदाख्यः पर्वतकपुत्रः समुत्पन्ना संजाता शीर्षे शिरसि वेदना पीडा यस्य स समुत्पन्नशीर्षवेदनस्तं समुत्पन्नशीर्षवेदनं सञ्जातशिरोव्यथममात्यराक्षसं प्रेक्षितुं द्रष्टुमित एवात्रैवागच्छति आयाति। एतेन कारणेन अमुना हेतुनाऽपसारणा क्रियते युष्माकं वर्त्मैकपार्श्ववर्त्तित्वं विधीयते ।

अद्येति । उपरतस्य मृतस्य तातस्य पितुः अद्य दशानां पूरणो दशमो मासो-

---

(आकाश में) आर्य ! क्या कहते हो कि किस कारण यहां से हमलोगों को भगाते हो ? आर्य ! कुमार मलयतेतु, अमात्यराक्षस की शिर की व्यथा से पीडित सुनकर देखने के लिये यहीं आते हैं । इस कारण तुमलोग भगाए जाते हो ।

(पुरुष बाहर चला जाता है) ।

(भागुरायण और कञ्चुकी के साथ मलयकेतु का प्रवेश।) ।

मलयकेतुः—(जोर से श्वास लेकर मनही मन) । पिताजी को स्वर्गलोक गये आज दसवां महीना बीत रहा है । व्यर्थ के कार्य करते हुए मैंने उनको तोयाञ्जलि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तस्य । न चास्माभिर्वृथा पुरुषकारमुद्वहद्भिस्तमुद्दिश्य तोयाञ्जलिरप्यावर्जितः । अथवा, प्रतिज्ञातमतत् पुरस्तात् ।

वक्षस्ताडनभिन्नरत्नवलयं भ्रष्टोत्तरीयांशुकं
हाहेत्युच्चरितार्तनादकरुणं भूरेणुरूक्षालकम् ।
तादृङ्मातृजनस्य शोकजनितं सम्प्रत्यवस्थान्तरं,
शत्रुस्त्रीषु मया विधाय गुरवे देयो निवापाञ्जलिः ॥ ५ ॥

ऽस्तीति शेषः । वृथा निष्फलं पुरुषकारं पुरुषाऽभिमानं पुरुषोऽस्मीत्येवं रूपमित्यर्थः । उद्वहद्भिः धारयद्भिः तं मृततातमुद्दिश्योपलक्ष्य तोयस्याञ्जलिरपि न आवर्जिता न दत्ता । अथवा किम्वा एतद्वक्ष्यमाणं पुरस्तात्पूर्वं प्रतिज्ञातम् प्रतिश्रुतम् ।

वक्ष इति । मया आत्मना माता एव जनो मातृजनस्तस्य मातृजनस्य शोकेन जनितं शोकजनितं चिन्तासमुत्पन्नं, वक्षसि वा वक्षसस्ताडनं वक्षस्ताडनं तेन भिन्नानि रत्नवलयानि यस्मिन्तद्वक्षस्ताडनभिन्नरत्नवलयं हृदयाघातभग्नरत्ननिर्मितकटकं भ्रष्टं स्वस्थानाच्च्युतमुत्तरीयांशुकमुत्तरीयवस्त्रं यस्मिन् तद्भ्रष्टोत्तरीयांशुकं, हा हेत्युच्चरितार्त्तनादस्तेन करुणं दीनं हाहेत्युच्चरितार्त्तनादकरुणं हाहेति निस्सृतार्त्तस्वरदीनं, भुवो रेणवो भूरेणवस्ताभी रूक्षा अस्निग्धा अलकाश्चूर्णकुन्तला यस्मिन्तत् भूरेणुरूक्षालकं भूमिरजोऽस्निग्धचूर्णकुन्तलम् । अलकाश्चूर्णकुन्तला इत्यमरः । तादृक् तादृशम् अवस्थान्तरं दशान्तरं सम्प्रति इदानीं शत्रुस्त्रीषु रिपुवधूषु विधाय कृत्वा गुरवे पित्रे निवापाञ्जलिस्तोयाञ्जलिः श्राद्धतर्पणमित्यर्थः । देयः समर्पणीयः । पितृदानं निवापः स्यादि त्यमरः । यथा शत्रुभिर्मम मातृषु शोचनीया दशा प्रापिता तथैव मयापि शत्रुस्त्रीषु शोचनीया दशा प्रापयिष्यते इति भावः । मातृजनेषु शत्रुकृतावस्थान्तरस्य शत्रुस्त्रीषु सम्बन्धासम्भवादन्यदवस्थान्तरस्य सम्बन्धादसम्भवद्वस्तुसम्बन्धरूपनिदर्शनालंकारः । तदुक्तम्—

सम्भवन् वस्तुसम्बन्धोऽसम्भवन् वाऽपि कुत्रचित् ।
यत्र बिम्बानुबिम्बत्वं बोधयेत् सा निदर्शना ॥

भी नहीं दी । अथवा पहिले ही यह प्रतिज्ञा कर चुका हूँ—

हृदयकी ताड़ना से रत्नवलय को भग्न करानेवाली और उत्तरीयवस्त्र को अपने स्थान से च्युत करानेवाली और 'हा हा' ऐसे आर्त्तशब्दों से दीन और पृथिवी की धूलि से चूर्णकुन्तल को रूखा करानेवाली चिन्ता से व्याकुल माता के समान ही शत्रुस्त्रियों को भी बनाकर मैं पिताजी को तोयाञ्जलि दूंगा ॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत् किमिह बहुना ?—

उद्यच्छता धुरमकापुरुषानुरूपां
गन्तव्यमाजिविहितेन पितुः पथा वा ।
आच्छिद्य वा स्वजननीजनलोचनेभ्यो
नेयो मया रिपुवधूनयनानि बाष्पः ॥ ६ ॥

शत्रुभिर्मातृजनेष्विव मयापि शत्रुस्त्रीषु दण्डः पातनीय इति समविनिमयरूपपरिवृत्तिरलंकार इति कश्चित् ॥ शार्दूलविक्रीडितं वृत्तम् ॥ ५ ॥

उद्यच्छतेति । मया कुत्सितः पुरुषः कापुरुषो न कापुरुषोऽकापुरुषः अनुगतं रूपं यस्याः साऽनुरूपा अकापुरुषस्यानुरूपाऽकापुरुषाऽनुरूपा तामकापुरुषानुरूपाम् आनन्दितपुरुषयोग्यां वीरपुरुषोचितामित्यर्थः । धुरं भारम् उद्यच्छता उद्वहता सता, (उद्यच्छतेत्यत्र 'समुदाङ्भ्यो यमोऽग्रन्थे' इत्यात्मनेपदस्य दुर्वारत्वेऽपि परस्मैपदं प्रयोक्तुः कवेरयमभिप्रायः 'स्वरितञितः कर्त्रभिप्राये क्रियाफले' इत्यतः कर्त्रभिप्राये इत्यनुवर्तनात्स्वजननीजनलोचनवाष्पानयनरूपस्यात्मपौरुषोयोगक्रियाफलस्य शत्रुस्त्रीलोचनगामित्वाभिप्रायेण परस्मैपदं सुलभमिति) अजन्त्यस्यामित्याजिः (अज्यतिभ्यामिति अजे रिणप्रत्यये रूपम्) आजौ निधनमाजिनिधनं तेन आजिनिधनेन संग्रामविनाशेन व अथवा पितुस्तातस्य पथा मार्गेण मरणरूपेणेत्यर्थः । गन्तव्यं यातव्यम् वा अथवा स्वस्य जननीजनाः स्वजननीजनास्तेषां लोचनानि स्वजननीजनलोचनानि तेभ्यः स्वजननीजनलोचनेभ्यः आत्ममातृजननेत्रेभ्यः आच्छिद्य अपनीय बाष्पो नेत्रजलं रिपुवधूनयनानि शत्रुस्त्रीनेत्राणि नेयः प्रापणीयः । वीरपुरुष इव संग्रामे प्राणं त्यक्ष्यामि तत्रारीन्विजित्य मातृजनखेदमपहरिष्यामि वेति भावः ।

विकल्पस्तुल्यबलयोर्विरोधश्चातुरीयुतः ।

इति दर्पणोक्तलक्षणादत्र विकल्पोऽलङ्कारः । तथाहि—मया मृतस्तातोऽनुगन्तव्यः शत्रुस्त्रीनेत्राणि वाष्पो नेय इति तुल्यबलयोर्विरोधस्य सत्त्वात् । वसन्ततिलकं वृत्तम् ॥ ६ ॥

इस विषय में बहुत कहने का क्या प्रयोजन ?

मैं वीरपुरुषोचित कार्यभार का उद्वहन करता हुआ युद्ध में स्वयं मर जाऊँगा अथवा अपनी माता की आंखों का अश्रु लेकर शत्रु की स्त्रियों के नेत्रों में लगाऊंगा अर्थात् उनके पतियों को मारकर उन्हें रुलाऊंगा ॥ ६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(प्रकाशम्) आर्य जाजले ! उच्यन्तामस्मद्वचनादनुयायिनो राजानः एक एवाहममात्यराक्षसस्यातर्कितागमनेन प्रीतिमुत्पादयितुमिच्छामि, अतः कृतमनुगमनक्लेशेनेति ।

कञ्चुकी—यदाज्ञापयति कुमारः (परिक्रम्याकाशे) भो भो राजानः कुमारः समाज्ञापयति, न खल्वहं केनचिदनुगन्तव्यः इति (विलोक्य सहर्षम्) कुमार ! कुमार ! एते भवदाज्ञासमनन्तरमेव प्रतिनिवृत्ताः सर्व एव राजानः । पश्यतु कुमारः—

सोत्सेधैः स्कन्धदेशैः खरतरकविकाकर्षणात्यर्थभुग्नैः
अश्वाः कैश्चिन्निरुद्धाः खमिव खुरपुटैः खण्डयन्तः पुरस्तात् ।
केचिन्मातङ्गमुख्यैर्विहतजवतया मूकघण्टैर्निवृत्ताः,
मर्यादां भूमिपाला जलधय इव ते देव ! नोल्लङ्घयन्ति ॥७॥

उच्यन्तामिति । अस्मद्वचनान्मदुक्त्या अनुयायिनोऽनुगमनशीला राजानो नृपा उच्यन्तामभिधीयन्ताम् , एकोऽद्वितीय एवाहम् अतर्कितगमनेन सहसोपस्थित्या अमात्यराक्षसस्य मन्त्रिराक्षसस्य प्रीतिं सुखम् उत्पादयितुं जनयितुम् इच्छामि अभिलषामि । तत्तस्मादनुगमनक्लेशेनाऽनुसरणप्रयासेन कृतं व्यर्थम् ।

सोत्सेधैरिति । खरतराणि कविकाः खरतरकविकाः खरतरकविकानामाकर्षणं तेनात्यर्थमतिशयं भुग्नैः कुटिलैः खरतरकविकाकर्षणात्यर्थभुग्नैः अतितीक्ष्णखलीनाकर्षणातिशयवक्रैः । 'कविका तु खलीनोऽस्त्री' त्यमरः । अत एव सोत्सेधैः मध्यभागोन्नतैः स्कन्धदेशैः ग्रीवाप्रदेशैः उपलक्षिताः तथा खुरपुटैः शफाग्रभागैः । 'शफं क्लीबे खुरः पुमानि' त्यमरः । पुरस्तादग्रे खमाकाशं खण्डयन्तो विदारयन्त इव अश्वाः कैश्चिद्भूपालैः निरुद्धा अवरुद्धाः । केचिद्भूपालाः विहतजवतया

(जोर से) आर्य जाजलि ! कुमारकी आज्ञा से पीछे आनेवाले राजाओं से कहो कि मैं अकेला राक्षस को देखने जाऊँगा, इसलिये तुमलोग लौट जाओ ।

कञ्चुकी—कुमार की जैसी आज्ञा । (जाकर अकाश में) हे राजाओं ! कुमार आज्ञा करते हैं कि मेरे पीछे कोई न आवे । (देखकर खुशी से) कुमार ! कुमार !! ये सब राजे आपकी आज्ञा से लौट गये । आप देखिये—

कितने राजाओं ने बहुत कड़ी लगाम खींचने से अत्यन्त टेढे और ऊंचे मध्यभागवाले ग्रीवाप्रदेशों से युक्त तथा खुरके अग्रभाग से मानो आकाशको विदारण करते हुए घोड़ों को रोका और कितने राजा रुक जाने से निश्शब्द घण्टावाले बड़े-बड़े हाथियों के साथ लौट गये । हे कुमार ! सब राजे समुद्र की तरह आपकी आज्ञा का नहीं उल्लङ्घन करते ॥ ७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मलयकेतुः—आर्यजाजले ! त्वमपि सपरिजनो निवर्तस्व । भागुरायण एको मामनुगच्छतु ।

कञ्चुकी—यदाज्ञापयति कुमारः ।

(इति सपरिजनो निष्क्रान्तः)

मलयकेतुः—सखे भागुरायण ! विज्ञापितोऽहमिहागच्छद्भिर्भद्रभटप्रभृतिभिः, यथा न वयममात्यराक्षसद्वारेण कुमारमाश्रयणीयमाश्रयामहे, किन्तु कुमारस्य सेनापतिं शिखरसेनं द्वारीकृत्य, दुष्टामात्यपरि-

---

निरुद्धवेगतया मूका घण्टा येषां ते मूकघण्टास्तैः मूकघण्टैः निःशब्दघण्टैः मातङ्गमुख्यैः करिवर्यैः सह निवृत्ता इति शेषः अतः हे देव ! भूमिपाला राजानः जलधय इव समुद्रा इव ते तव मर्यादामाज्ञां समुद्रपक्षे वेलां नोल्लङ्घयन्ति नातिक्रामन्ति । समुद्रवेलामिव नृपास्त्वदाज्ञां नातिक्रामन्ति किन्तु त्वदायत्ता एव सर्वेऽपीतिभावः अश्वमातङ्गानां स्वभाववर्णनादिह स्वभावोक्तिरलंकारः । तदुक्तम् ।

स्वभावोक्तिर्दुरूहार्थस्वक्रियारूपवर्णनम् ।

इति । स च खमिव जलधय इवेत्यत्रोत्प्रेक्षोपमानवाचकेवशब्दसत्वादुत्प्रेक्षोपमाभ्यां संसृष्टः । स्रग्धरावृत्तम् ॥ ७ ॥

त्वमपीति । त्वं परिजनैः सहितः सपरिजनः सहानुचरवर्गैः निवर्तस्व प्रतिनिवृत्तो भव । एकोऽसहायोऽद्वितीय इति यावत् भागुरायणस्तन्नामापुरुषो मामनुगच्छतु अनुसरतु ।

विज्ञापित इति । इहात्रागच्छद्भिः सम्प्राप्तैः भद्रभटप्रभृतिभिः भद्रभटादिभिः अहं विज्ञापितो निवेदितोऽस्मीति शेषः । किं निवेदितोऽस्मि तदाह—तथेति । यथा यत् वयम् अमात्यराक्षसद्वारेण मन्त्रिराक्षसद्वारा आश्रयणीयं सेवनीयं कुमारं मलयकेतुं नाश्रयामहे न सेवामहे किन्तु किन्त्व कुमारस्य मलयकेतोः सेनापतिं चमूनायकं शिखरकं तन्नामानम् ऊरीकृत्याश्रित्य दुष्टश्चासावमात्यो दुष्टामात्यस्तेन परिगृहीतस्तस्मात् दुष्टामात्यपरिगृहीतात् दुश्चरितमन्त्रिवशीकृतात् दुष्टामात्येति विशे-

---

मलयकेतुः—आर्य जाजलि ! तुम भी नौकरों के साथ लौट जाओ । केवल भागुरायण हमारे पीछे २ आवे ।

कञ्चुकी—कुमार की जो आज्ञा ।

(यह कहकर अनुचरों के साथ चला जाता है) ।

मलयकेतुः—मित्र भागुरायण ! यहाँ आये हुए भद्रभटादि सैनिकों ने कहा था कि हमलोग मन्त्रिराक्षस के द्वारा कुमार की सेवा नहीं करते, किन्तु शिखरसेन नामक

 Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गृहीतात् चन्द्रगुप्तादपरक्ताः सन्तः कुमारमाभिरामिकगुणयोगाश्रय-णीयमाश्रयामह इति, तन्मया सुचिरमपि विचारयता तेषां न वाक्या-र्थोऽधिगतः।

भागुरायणः—कुमार ! नायमत्यन्तदुर्बोधोऽर्थः। पश्य, विजिगीषु-मात्मगुणसम्पन्नं प्रियहितद्वारेणाश्रयणीयमाश्रयेदिति ननु न्याय्य एवायम्।

मलयकेतुः—सखे भागुरायण ! नायस्माकममात्यराक्षसः प्रियहि-ततमश्च।

षणं राक्षसस्य दुष्टत्वसूचनार्थेति बोध्यम्। चन्द्रगुप्तान्मौर्यात् अपरक्ताः सन्तो वि-रक्ताः भवन्त, आभिरामिकश्चासौ गुण आभिरामिकगुणस्तस्य योगः सम्बन्धस्त-स्मात् आभिरामिकगुणयोगात् प्रशस्तगुणभूषितत्वात् (चन्द्रगुप्तस्य दुष्टत्वसूचनाया-भिरामिकगुणेति विशेषणम्) आश्रयणीयं सेवनीयमाश्रयामहे सेवामहे इति यत्तैरहं विज्ञापितस्तत् सुचिरमपि सुदीर्घकालमपि विचारयता विचिन्तयता मया तेषां भद्र-भटप्रभृतीनां वाक्यार्थो वाक्याभिप्रायो नाधिगतो न ज्ञात इत्यर्थः। एतदग्रे भागु-राणस्य मलयकेत्वतिसन्धानवचनं सर्वं बीजार्थस्यावमर्शनम्।

नायमिति। अयं वाक्यार्थो नात्यन्तदुर्बोधो नातिशयक्लिष्टः। अनायासेन ज्ञातुं योग्य इत्यर्थः। विजेतुमिच्छुर्विजिगीषुस्तं विजिगीषुं विजयाभिलाषिणम् आ-त्मनो गुणा आत्मगुणास्तैः सम्पन्नः आत्मगुणसम्पन्नस्तम् आत्मगुणसम्पन्नं स-त्त्वोत्साहादिगुणशालिनम् आश्रयणीयं सेवनीयं प्रियश्चासौ हितः प्रियहितः स एव द्वारमुपायस्तेन प्रियहितद्वारेण प्रियजनोपायेन आश्रयेत् सेवेत इति अयं वाक्यार्थो न्याय्य एव न्यायादनपेतो युक्त इत्यर्थः।

कुमार की सेनापति के द्वारा आपका आश्रय लेते हैं। दुष्ट मन्त्री के वशीभूत चन्द्रगुप्त राजा से विरक्त होकर हमलोग कुमार की सेवा करते हैं। बहुत दिन तक विचार करके मैंने इसका तात्पर्य्य नहीं समझा है।

भागुरायणः—कुमार ! यह तात्पर्य अत्यन्त कठिन नहीं है। देखिये—विजय की चाहना करनेवाले और सत्त्वोत्साहादिरूप आत्मगुण युक्त आपके प्रिय तथा हित-जनों के द्वारा आपकी सेवा करें, यह उचित ही है।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भागुरायणः—कुमार ! एवमेतत्, किन्तु अमात्यराक्षसश्चाणक्ये-बद्धवैरो न तु चन्द्रगुप्ते, तद्यदि कदाचिच्चन्द्रगुप्तश्चाणक्यमतिजितका-शिनमसहमानः साचिव्यादवरोपयेत्, ततो नन्दकुलभक्त्या नन्दा-न्वय एवायमिति कृत्वा, सुहृज्जनापेक्षया च, अमात्यराक्षसश्चन्द्रगु-प्तेन सह सन्दधीत । चन्द्रगुप्तोऽपि पितृपारम्पर्यागत एवायमिति कृत्वा, सन्धिमनुमन्येत । एवं सत्यस्मास्वपि कुमारो न विश्वसेदि-त्ययमेषां वाक्यार्थः ?

किन्त्विति । किञ्चेत्यर्थः । अमात्यराक्षसः चाणक्ये कौटिल्ये बद्धं वैरं येन स बद्धवैरः धृतविद्वेषः न तु चन्द्रगुप्ते मौर्ये बद्धवैर इति शेषः तत्तस्मात् यदि कदा-चित् चन्द्रगुप्तो मौर्यः अतिजितेनातिजयेन काशते तच्छीलोऽतिजितकाशी तमति-जितकाशिनम् अनल्पमदशालिनं चाणक्यं कौटिल्यमसहमानः अमृष्यमाणः साचि-व्यात् मन्त्रिस्थानात् अवरोपयेत् च्यावयेत्, ततस्तदा नन्दकुलभक्त्या नन्दान्वय प्रेम्णा अयं चन्द्रगुप्तो नन्दान्वयो नन्दवंश्य एवेति कृत्वेति विचार्य सुहृज्जनापेक्षया चन्दनदासशकटदासप्रभृतिमित्रजनानुरोधेन च, प्राणत्राणलिप्सयेत्यर्थः अमात्यरा-क्षसो चन्द्रगुप्तेन मौर्येण सह सन्दधीत सन्धिं कुर्यात् । चन्द्रगुप्तोऽपि मौर्योऽपि पितृभ्यः सकाशात्पर्यायेण क्रमेणागतः प्राप्तः पितृपर्यायागतः पितृक्रमप्राप्त एवायं राक्षस इति कृत्वा इति विचार्य्य सन्धिं सम्मेलनम् अनुमन्येत स्वीकुर्वीत । एवं सति सम्मेलने सतीत्यर्थः । कुमारो मलयकेतुः अस्मासु न विश्वसेत् श्रद्दधीत इती-त्येवमेषां भद्रभटादीनामयमेष वाक्यार्थस्तात्पर्यम् ।

मलयकेतुः—मित्र भागुरायण ! क्या अमात्य राक्षस भी हमारा विशेष प्रिय तथा हितकारी नहीं है ।

भागुरायणः—कुमार ! ऐसा ही है । अमात्य राक्षसकी शत्रुता चाणक्य के साथ है—न कि चन्द्रगुप्त के साथ । इसलिये हो सकता है कि कभी चन्द्रगुप्त अत्यन्त अभिमानी चाणक्य को मन्त्रिपद से हटा दे, तब नन्दवंश में अनुराग रहने से और मित्र की अपेक्षा से यह नन्दवंशी ही है, ऐसा जानकर अमात्य राक्षस चन्द्रगुप्त के साथ मेल करले । चन्द्रगुप्त भी यह पितृपरम्परा ही से रहता आया है, ऐसा समझकर सन्धि कर ले । ऐसा होनेपर कुमार हमलोगों पर विश्वास नहीं करेंगे, यही भद्रभटादि का तात्पर्य है ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मलयकेतुः—युज्यते। सखे भागुरायण! अमात्यराक्षसस्य गृह-मार्गमादेशय।

भागुरायणः—इत इतः कुमारः (इत्युभौ परिक्रामतः) कुमार! इदम-मात्यराक्षसस्य गृहं, प्रविशतु कुमारः।

मलयकेतुः—एष प्रविशामि (इत्युभौ प्रवेशनं नाटयतः)।

राक्षसः—(आत्मगतम्) आः स्मृतम् (प्रकाशम्) भद्र! अपि दृष्ट-स्त्वया कुसुमपुरे वैतालिकः स्तनकलशः।

करभकः—अमच्च! अध इं [अमात्य अथ किम्]।

मलयकेतुः—सखे! भागुरायण! कुसुमपुरवृत्तान्तः प्रस्तूयते तन्नो-पसर्पावः शृणुवस्तावत्,—

सत्वभङ्गभयाद्राज्ञां कथयन्त्यन्यथा पुरः।
अन्यथा विवृतार्थेषु स्वैरालापेषु मन्त्रिणः॥ ८॥

कुसुमपुरेति। कुसुमपुरस्य वृत्तान्तः कुसुमपुरवृत्तान्तः कुसुमपुरोदन्त इत्यर्थः। प्रस्तूयते विधीयते तत्तस्मात् नोपसर्पावः न सन्निधिं गच्छावः।

सत्वभंगेति। मन्त्रिणोऽमात्याः अन्यथाऽन्यप्रकारेण विवृतः प्रकटीकृतोऽर्थ-स्तात्पर्यं येषां ते तथोक्तास्तेषु प्रकटीकृताऽभिप्रायेषु स्वैरालापेषु स्वच्छन्दभाषणेषु -स्वैरात्मीयैः सह भाषणेषु वा सत्वभङ्गभयात् मनोभङ्गभीत्या मन्त्रितार्थप्रकाश-भीत्या वा राज्ञां नृपाणामपि पुरोग्रेऽन्यथा प्रकारान्तरेण कथयन्ति भाषन्ते। सचि-वाः विचारितकार्यप्रकाशभयेन सहृदयेषु यथा विश्वसन्ति न तथात्मप्रभुषु राजस्व-

---

मलयकेतुः–हो सकता है। मित्र भागुरायण! अमात्य राक्षस के घरका रास्त बताओ।

भागुरायणः—इधर, इधर। (दोनों जाते हैं) कुमार! यह मन्त्रिराक्षस का घर है। आप अन्दर चलें।

मलयकेतुः—चलता हूं। (दोनों अन्दर जाते हैं)।

राक्षसः–(मन ही मन)। आः! स्मरण आ गया। (जोर से) भद्र! तुमने कुसुमपुर में स्तनकलश नाम के वैतालिक को देखा है?

करभकः—अमात्य! हां और क्या, देखा तो है।

मलयकेतुः–मित्र भागुरायण! कुसुमपुर का समाचार कहा जा रहा है, इसलिये हमदोनों समीप न जायं, तब तक यहीं से सुनें।

प्रायः सब मन्त्री अन्य तात्पर्यके स्वच्छन्द भाषण में भेद खुलजाने के भय से राजाओं के आगे उन बातों को दूसरी तरह कहते है॥ ८॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भागुरायणः—यदाज्ञापयति कुमारः ।

राक्षसः—भद्र ! अपि तत् कार्यं सिद्धम् ?

करभकः—अमच्चस्स प्पसाएण सिद्धम [अमात्यस्य प्रसादेन सिद्धम्]।

मलयकेतुः—सखे भागुरायण ! किं तत् कार्यम् ?

भागुरायणः—कुमार ! गहनः खलु सचिववृत्तान्तो नैतावता परिच्छेत्तुं शक्यते अवहितस्तावच्छृणु ।

राक्षसः—भद्र ! विस्तरेण श्रोतुमिच्छामि ।

करभकः—सुणादु अमच्चो, अत्थि दाव अहं अमच्चेणाणतो, जधा,—"करभअ ! कुसुमपुरे गच्छिअ, भणिदव्वो मम वअणेण तुए वेआलिओ त्थणकलसो, जधा, चाणक्यहदएण तेहुं तेसुं अणाभङ्गेसुं अणुचिट्ठीअमाणेसुं चन्दउत्तो समुत्तेअणसमत्थेहिं सिलोएहिं उव-

---

पीति भावः । सहृदयेषु यथार्थभाषिणां मन्त्रिणामवनीशेष्वयथार्थभाषणे सत्वभङ्ग भयरूपपदार्थस्य हेतुत्वेन पदार्थहेतुकं काव्यलिङ्गमलंकारः । तदुक्तं दर्पणे—

हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम् । अनुष्टुप् छन्दः ॥ ८ ॥

गहन इति । सचिवस्य वृत्तान्तः सचिववृत्तान्तः अमात्योदन्तः गहनः क्लिष्टः, अतिदुर्बोध इत्यर्थः, एतावताऽल्पकालेन परिच्छेत्तुं बोद्धुं निर्णेतुं वा न शक्यते । अतोऽवहितः सावधानो भूत्वा आकर्णय अमात्यराक्षसालापमिति शेषः ।

शृणोत्विति । यथा यत् चाणक्यहतकेन दुष्टेन कौटिल्येन तेषु पूर्वोक्तेषु आज्ञाभङ्गेषु अनुशासनापालनेषु अनुष्ठीयमानेषु क्रियमाणेषु सत्सु चन्द्रगुप्तो मौर्यः समुत्तेजने समर्थाः समुत्तेजनसमर्थास्तैः समुत्तेजनसमर्थैः क्रोधोत्पादनशक्तैः श्लोकैः

भागुरायणः—कुमारका कथन ठीक है ।

राक्षसः—भद्र ! वह कार्य सिद्ध हुआ ।

करभकः—अमात्य की कृपा से सिद्ध हो गया ।

मलयकेतुः—मित्र भागुरायण ! वह कौन सा कार्य है ?

भागुरायणः—कुमार ! मन्त्रियों का वृत्तान्त कठिन होता है, इतना कहने से आप नहीं जान सकेंगे । सावधान होकर सुनिये ।

राक्षसः—भद्र ! मैं विशेष रूप से सुनना चाहता हूं ।

करभकः—अमात्य सुनें, मुझे आपसे आज्ञा मिली थी कि करभक ! तुम कुसुमपुर जाकर हमारे वचन के अनुसार स्तनकलश नाम के वैतालिक से कहो कि चाणक्य के द्वारा आज्ञाभङ्गरूप कार्य किये जाने पर क्रोध बढ़ानेवाले श्लोकों से चन्द्रगुप्त की

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सिलोअइदव्वो" त्ति [अगोत्वमात्यः, अस्ति तावदहममात्येनाज्ञप्तो यथा,— "करभक! कुसुमपुरं गत्वा मम वचनेन त्वया भणितव्यो वैतालिकः स्तनकलशः, यथा चाणक्यहतकेन तेषु तेषु आज्ञाभङ्गेषु अनुष्ठीयमानेषु, चन्द्रगुप्तः समुत्तेजनसमर्थैः श्लोकैरुपश्लोकयितव्यः" इति]।

राक्षसः—ततस्ततः ?

करभकः—तदो मए पाडलिउत्तं गच्छिअ, सुणाविदो अमच्चसन्देसं वेआलिओ त्थणकलसो [ततो मया पाटलिपुत्रं गत्वा, श्रावितोऽमात्यस्य सन्देशं वैतालिकः स्तनकलशः]।

राक्षसः—ततस्ततः ?

करभकः—एत्थन्तरे णन्दकुलविणासदुम्मणस्स पोरजणस्स परिओसं समुप्पाअन्तेण चन्दउत्तेण आघोसिदो कुसुमउरे कौमुदीमहोसवो। सोवि चिरआलपवत्तमाणो जणिदपरिओसो अहिमदवन्धुजणसमागमो विअ, ससिणेहं बहुमाणिदो णअरजणेण [अत्रान्तरे

प्रार्थः उपश्लोकयितव्यः स्तोतव्यः।

अत्रान्तर इति। वैतालिकेनाऽमात्यस्य सन्देशश्रवणान्तर इत्यर्थः। नन्दानां कुलानि नन्दकुलानि तेषां विनाशो नन्दकुल विनाशस्तेन दुर्दुष्टं दुःखयुक्तमित्यर्थः, मनो यस्य स नन्दकुलविनाशदुर्मनास्तस्य नन्दकुलविनाशदुर्मनसः नन्दान्वयक्षयदुर्हृदयस्य पुरे भवः पौरः स चासौ जनः पौरजनस्तस्य पौरजनस्य पुरवासिनः परितोषं संतोषं समुत्पादयता जनयता चन्द्रगुप्तेन मौर्येण कौमुदीमहोत्सवः शारदपूर्णचन्द्रोद्देश्यकव्रतविशेषः। सोऽपि कौमुदीमहोत्सवोऽपि चिरकालप्रवर्तमानः

स्तुति करे।

राक्षसः—तब तब।

करभकः—मैंने पाटलिपुत्र जाकर आपका सन्देश स्तनकलश नामके वैतालिक को सुनाया।

राक्षसः—तब तब।

करभकः—इसके अनन्तर नन्दवंश के विनाश से दुःखित पौरोजनों को आनन्द देनेवाले चन्द्रगुप्त ने कुसुमपुर में कौमुदीमहोत्सव करने की घोषणा की। उस कौमुदीमहोत्सव को बहुतकाल पर आया सन्तोषदायक तथा स्नेही बन्धुजन के समागम को

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नन्दकुलविनाशदुर्मनसः पौरजनस्य परितोषं समुत्पादयता चन्द्रगुप्तेनाघोषितः कुसुमपुरे कौमुदीमहोत्सवः। सोऽपि चिरकालप्रवर्त्तमानो जनितपरितोषः, अभिमत-बन्धुजनसमागम इव, सस्नेहं बहुमानितो नगरजनेन]।

राक्षसः—(सबाष्पम्) हा देव ! नन्द !—

कौमुदी कुमुदानन्दे जगदानन्दहेतुना ।
कीदृशी सति चन्द्रेऽपि नृपचन्द्र ! त्वया विना ॥ ९ ॥

बहुकालं व्याप्य जायमानः जनितः परितोषो येन स जनितपरितोषः समुत्पादितानन्दः अभिमतो बन्धुजनसमागमो यस्मिन् सोऽभिमतबन्धुजनसमागमः ईप्सित-जनसमागम इव सस्नेहं सानुरागं यथा तथा नगरजनेन पुरवासिना बहुमानितः अतिसत्कृतः ।

कौमुदीति । नृपश्चन्द्र इव नृपचन्द्रस्तत्सम्बुद्धौ हे नृपचन्द्र हे क्षितीशवर्य ! (चन्द्रस्येव नृपस्य लोकानन्दजनकत्वाच्चन्द्रस्योपमानता) जगत आनन्दस्तस्य हेतुस्तेन जगदानन्दहेतुना पृथिवीहर्षोत्पादकेन त्वया भवता विना कुमुदान्यानन्दयति प्रकाशकत्वाद्धर्षयतीति कुमुदानन्दस्तस्मिन् कुमुदानन्दस्तस्मिन् कुमुदानन्दे कुवलयप्रीतिजनके यद्वा कोर्मुत्कुमुत्तमानन्दयति वर्द्धयतीति कुमुदानन्दे अवनिहर्षवर्द्धके चन्द्रे चन्द्रमसि पक्षान्तरे कुत्सिता मुद्येषां ते कुमुदस्तानानन्दयतिरञ्जयतीति कुमुदानन्दस्तस्मिन् कुमुदानन्दे अप्रशस्तहर्षशालिजनरञ्जके चन्द्रे चन्द्रगुप्ते च सत्यपि कौमुदी ज्योत्स्ना पक्षान्तरे कौमुदीमहोत्सवश्च कीदृशी किंविधा निष्फलेत्यर्थः। इन्दु-मौर्ययोः सत्वेऽपि त्वामन्तरा ज्योत्स्ना कौमुदीमहोत्सवौ नैव शोभेते इति भावः ।

विनोक्तिर्यद् विनाऽन्येन न साध्वन्यदसाधु या ।

यद्यन्यमन्तराऽन्यस्य साधुत्वमसाधुत्वम्वा तदा विनोक्तिरिति कारिकार्थः । प्रकृते त्वामन्तरा विधु-मौर्योभयसत्वेऽपि कौमुद्या अशोभनत्वाद्विनोक्तिरलङ्कारः ।

को तरह समझकर नागरिक जनों ने उसका बहुत आदर किया ।

राक्षसः—(आंखों में आंसू भरकर) हा देव ! नन्द—

हे राजाओं में चन्द्रमा के समान जगत को आनन्द देनेवाले ! आपके विना कुमुद को आनन्द देनेवाले चन्द्रमा के (पक्षान्तर में) निन्दित हर्षयुक्तजनोंको आनन्द देनेवाले चन्द्रगुप्त के रहने पर कौमुदी चन्द्रिका (पक्षान्तर में)-कौमुदी-महोत्सव निष्फल है ॥ ९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भद्र ! ततस्ततः ?

करभकः—अमच्च ! तदो सो लोअलोअणाणन्दभूदो अणिच्छन्त-स्सज्जेव णाअरजणस्स णिवारिदो चाणक्कहदकेणकौमुदीमहोस्सवो । एत्थन्तरे त्थणकलसेण पउत्ता चन्दउत्तस्स समुत्तेअणसमत्था सिलो-अपरिवाटी [अमात्य । ततः स लोकलोचनानन्दभूतोऽनिच्छत एव नगरजनस्य निवारित श्चाणक्यहतकेन कौमुदीमहोत्सवः । अत्रान्तरे स्तनकलशेन प्रवर्त्तिता चन्द्रगुप्तस्य समुत्तेजनसमर्था श्लोकपरिपाटी]

राक्षसः—कीदृशी सा ?

करभकः—("सत्त्वोत्कर्षस्य" इत्यादि १९८ पृष्ठोक्तं पूर्वोक्तं पठति) ।

स च चन्द्रे सत्यपि त्वया विना कौमुदी व्यर्थेत्युक्त्योपमानभूताच्चन्द्रादुपमेयस्य त्वम्पदार्थस्याधिक्यप्रतिपादनाद्व्यतिरेकालङ्कारेण सङ्कीर्णः ।

उपमानाद्यदन्यस्य व्यतिरेकः स एव सः ।

इति प्रकाशोक्तव्यतिरेकलक्षणात् । चन्द्र-कौमुदी-कुमुदानन्दशब्दानामनेकार्थ-त्वेन श्लेषालङ्कारेणाऽनुप्राणितश्च । अनुष्टुप् वृत्तम् ॥ ९ ॥

तत इति । ततस्तदनन्तरं पौरजनेनोक्तोत्सवस्यातिसम्मानानन्तरमित्यर्थः, लोकानां लोचनानि लोकलोचनानि तेषामानन्दभूतो लोकलोचनानन्दभूतो मनुज-नयनसुखप्रदः स कौमुदीमहोत्सवः अनिच्छतोऽनभिलषतस्तस्य चन्द्रगुप्तस्य कौमुदी-महोत्सवप्रतिषेधमनभिलषन्तं चन्द्रगुप्तमनादृत्येत्यर्थः (षष्ठी चानादरे इति षष्ठी) चाणक्यहतकेन दुष्टेन कौटिल्येन निवारितः प्रतिषिद्धः । अत्रान्तरे एतन्मध्ये स्तन-कलशेन तन्नाम्ना राक्षसदूतेन, चन्द्रगुप्तस्य समुत्तेजिका मौर्योद्दीपनकरी श्लोकस्य परिपाटी श्लोकपरिपाटी पद्यरचनापद्धतिः प्रवर्तिता कृता ।

भद्र ! तब तब ?

करभकः—अमात्य ! तब सब लोगों के नेत्रों को आनन्द देनेवाला वह कौमुदी महोत्सव-उसके प्रतिषेध को नहीं चाहनेवाले-चन्द्रगुप्त की आज्ञा के बिना ही दुष्ट चाणक्य द्वारा रोक दिया गया । इसके अनन्तर स्तनकलश नामके वैतालिक ने चन्द्रगुप्त को उत्तेजना बढ़ानेवाले श्लोक पढ़े ।

राक्षसः—वह कौन सा श्लोक ?

करभकः—('सत्त्वोत्कर्षस्य धात्रा' इत्यादि १९८ पेज का पूर्वोक्त श्लोक को पढ़कर सुनाता है) ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राक्षसः—(सहर्षम्) साधु सखे स्तनकलकश ! साधु । काले भेद-बीजमुप्तम् , अवश्यमेव फलमुपदर्शयिष्यति । यतः,—

सद्यः क्रीडारसच्छेदं प्राकृतोऽपि न मर्षयेत् ।
किमु लोकाधिकं धाम बिभ्राणः पृथिवीपतिः ॥ १० ॥

मलयकेतुः—एवमेतत् ।

राक्षसः—ततस्ततः ?

करभकः—तदो, चन्दउत्तेण आणाभङ्गकलुसिदहिअएण, सुइर अमच्च गुणं प्पसंसिअ, प्पब्भंसिदो अहिआरादो चाणक्कहदओ । [ततश्चन्द्रगुप्तेनाज्ञाभङ्गकलुषितहृदयेन, सुचिरममात्यगुणं प्रशंस्य, प्रभ्रंशितोऽधिकारात् चाणक्यहतकः] ।

सद्य इति । प्राकृतोऽपि पामरोऽपि जनः 'प्राकृतः पामरो नीच' इत्यमरः सद्यः हेतुमन्तरा क्रीडायां रसः क्रीडारसस्तस्य छेदो भङ्गस्तं क्रीडारसच्छेदं क्रीडा-स्वादभङ्गं न मर्षयेत् न सहेत, लोकेभ्योऽधिकं लोकाधिकं लोकोत्तरमलौकिकमि-त्यर्थः । धाम तेजो बिभ्राणो धारयन् पृथिवीपतिः क्षितीशः किमु मर्षयेत् नैव मर्षयेदित्यर्थः । अतिसाधारणोऽपि जनः उत्सवप्रतिषेधं न सहते नृपस्तु तं नैव सहत इत्यर्थः ।

दण्डापूपिकयाऽन्यार्थोऽगमोऽर्थापत्तिरिष्यते ।

इति द ण्ोकलक्षणात्पृथिवीपतिस्तु निर्हेतुकं क्रीडारसोपरमं नैव सहेतेत्य-न्यार्थप्रतीत्या श्लोकेऽस्मिन्नर्थापत्तिनामालङ्कारः । अनुष्टुप् वृत्तम् ॥ १० ॥

तत इति । आज्ञायाः भङ्गास्तेन कलुषितं हृदयं यस्य स तथोक्तस्तेन आज्ञा-

---

राक्षसः—(खुशी से) वाह मित्र स्तनकलश वाह ! तुम ने ठीक अवसर पर भेद का बीज बोया, वह अवश्य ही फल दिखावेगा ।

क्योंकि—साधारण पुरुष भी विना कारण क्रीडारस का भङ्ग नहीं सहन कर सकता तब असाधारण तेज को धारण करनेवाले राजा की तो बात ही क्या कहना ? ॥१०॥

मलयकेतुः—यह ऐसा ही है ।

राक्षसः—तब तब ?

करभकः—तब आज्ञाभङ्ग के कारण अप्रसन्नहृदयवाले चन्द्रगुप्त ने बहुत देरतक अमात्य आप के साशाल्यादि गुणों की प्रशंसा कर दुष्ट चाणक्य को मन्त्रिपद से हटा दिया ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मलयकेतुः—सखे भागुरायण ! गुणप्रशंसया दर्शितः चन्द्रगुप्तेन राक्षसे भक्तिपक्षपातः ।

भागुरायणः—कुमार ! न तथा गुणप्रशंसया, यथा चाणक्यवटोर्निराकरणेन ।

राक्षसः—भद्र ! किमयमेवैकः कौमुदीमहोत्सवप्रतिषेधश्चन्द्रगुप्तस्यचाणक्यं प्रति कोपकारणमुतान्यदप्यस्ति ?

मलयकेतुः—सखे भागुरायण ! चन्द्रगुप्तस्य अपरकोपकारणान्वेषणे किं फलमेष पश्यति ?

भागुरायणः—कुमार ! एतत् फलं पश्यति —अतिमतिमान् चाण-

भङ्गकलुषितहृदयेन निदेशोच्छेदाप्रसन्नचित्तेन चन्द्रगुप्तेन मौर्येण अमात्यगुणं राक्षसस्य सौशील्यादिकं प्रशस्य सुचिरं बहुकालं संस्तुत्य संवर्ण्येत्यर्थः, अधिकारात् साचिव्यपदात् चाणक्यहतको दुष्टचाणक्यः प्रभ्रंशित च्यावितः ।

गुणप्रशंसयेति । गुणानां सौशील्यादीनां प्रशंसा संस्तुतिः गुणप्रशंसा तया गुणप्रशंसया सौशील्यादिसंस्तुत्या (करणतृतीयान्तम्) चन्द्रगुप्तेन मौर्येण राक्षसे नन्दामात्ये भक्तिरनुराग एव पक्ष आश्रयस्तस्मिन् पात आसक्तिः भक्तिपक्षपातः अनुरागाश्रयासक्तिः दर्शितः प्रकटितः ।

न तथेति । चाणक्यवटोः अल्पबुद्धेः कौटिल्यस्य निराकरणेन तिरस्कारेण यथा मौर्येण राक्षसेऽनुरागो दर्शित इति शेषः, न तथा गुणप्रशंशया सौशील्यादिगुणवर्णनेन राक्षसे तादृशोऽनुरागो न दर्शित इत्यर्थः । सौशील्यादिगुणवर्णनापेक्षया कौटिल्यनिराकरणेनैव विशेषतोऽनुरागो दर्शित इति भावः ।

अतिमतिमानिति । अतिमतिमान् प्रशस्तधीशाली चाणक्यः कौटिल्यः

मलयकेतुः—मित्र भागुरायण ! चन्द्रगुप्त ने गुण प्रशंसा करके राक्षस में अतिशय स्नेह दिखाया ।

भागुरायणः—जिस तरह अल्पबुद्धिवाले चाणक्य का तिरस्कार करके राक्षस में प्रेम दिखाया, उस तरह इनकी गुणप्रशंसा से नहीं ।

राक्षसः—यह एक कौमुदीमहोत्सव का प्रतिषेध ही चन्द्रगुप्तका चाणक्य के प्रति क्रोध का कारण है या दूसरा भी ?

मलयकेतुः—मित्र भागुरायण ! राक्षस चन्द्रगुप्त का दूसरा क्रोधहेतु खोजने में कौन सा फायदा देखता है ?

भागुरायणः—कुमार ! वह इस फल को देखता है कि अत्यन्त बुद्धिमान् चाणक्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्यः निष्प्रयोजनमेव किमिति चन्द्रगुप्तं कोपयिष्यति। न च कृतवेदी चन्द्रगुप्त एतावता गौरवमुल्लङ्घयिष्यति । सर्वथा चाणक्य-चन्द्रगुप्तयोः पुष्कलात् कारणाद् यो विश्लेष उत्पद्येत स आत्यन्तिको भविष्यति इति !

करभकः—अमच्च ! अत्थि अणदपि चन्दउत्तस्स कोवकारणं चाणक्के [अमात्य ! अस्त्यन्यदपि चन्द्रगुप्तस्य कोपकारणं चाणक्ये] ।

राक्षसः—किं किम् ?

करभकः—जधा पढमं दाव उवेक्खिदो अणेण अवक्कमन्तो कुमारो मलयकेदू अमच्चरक्खसो अ [यथा प्रथमं तावदुपेक्षितः अनेन अपक्रामन् कुमारो मलयकेतुः अमात्यराक्षसश्च] ।

राक्षसः—(सहर्षम्) सखे शकटदास !!! हस्ततलगतो मे चन्द्रगुप्तो भविष्यति । इदानीं चन्दनदासस्य बन्धनान्मोक्षः, तव च पुत्र-

---

निष्प्रयोजनं निर्हेतुकमेव किमिति कुतः कारणादित्यर्थः । चन्द्रगुप्तं मौर्यं कोपयिष्यति । कृतं वेत्तुं शीलमस्य कृतवेदी कृतज्ञश्चन्द्रगुप्तो मौर्यः एतावता अल्पेन कारणेन गौरवं महत्त्वं कौटिल्यस्येति शेषः । न चोल्लङ्घयिष्यति, नैवातिक्रमिष्यति । सर्वथा सर्वतः चाणक्य-चन्द्रगुप्तयोः कौटिल्य-मौर्ययोः पुष्कलात् महतः कारणात् हेतोः यो विश्लेषो भेद उत्पद्येत जायेत स विश्लेष इत्यर्थः । आत्यन्तिकः प्रवृद्धः प्रतीकारायोग्य इत्यर्थः । भविष्यति सम्पत्स्यते ।

हस्ततलगत इति । चन्द्रगुप्तो मौर्यः मे मम हस्ततलगतः करतलप्राप्तः आयत्त इत्यर्थः । भविष्यति, चाणक्य-चन्द्रगुप्तयोरात्यन्तिकभेदे सति चन्द्रगुप्तः सुखेन जेयो मयेति भावः । इदानीं साम्प्रतं चन्दनदासस्य मम सहृदयस्य बन्धनात्

विना कारण चन्द्रगुप्त को किसलिये क्रोधित करेगा । कृतज्ञ चन्द्रगुप्त भी इतने बड़े अपराध के कारण चाणक्य के महत्त्व को नहीं भूल सकता । चाणक्य और चन्द्रगुप्त का विशेष कारण से वियोग होगा तो वह आत्यन्तिक वियोग होगा ।

करभकः—अमात्य ! चन्द्रगुप्त का चाणक्य पर क्रोध करने का दूसरा भी कारण है।

राक्षसः—क्या, क्या ?

करभकः—पहला कारण यह है कि चाणक्यने कुसुमपुरसे भागते हुए कुमार मलयकेतु और राक्षस को छोड़ दिया ।

राक्षसः—(खुशीसे) मित्र शकटदास! चन्द्रगुप्त अवश्य हमारे वशीभूत होगा । अब चन्दनदास बन्धन से छूट जायगा और तुम्हारे स्त्री पुत्रोंके साथ मेल होगा और

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दारैः सह समागमः, जीवसिद्धि प्रभृतीनां क्लेशच्छेदः ।

भागुरायणः—(आत्मगतम्) जातः सत्य जीवसिद्धेः क्लेशच्छेदः ।

मलयकेतुः—सखे भागुरायण ! 'हस्ततलगतो मे सम्प्रति चन्द्रगुप्तोभविष्यति" इति व्याहरतः कोऽयमस्याभिप्रायः ?

भागुरायणः—किमन्यत् ? चाणक्यादपकृष्टस्य चन्द्रगुप्तस्योद्धरणान्न किञ्चित्कार्यमवश्यं पश्यति ।

राक्षसः—भद्र ! हृताधिकारः साम्प्रतं क्वासौ वटुः ?

कारागृहात् मोक्षः मोचनं बहिर्निष्कासनमित्यर्थः, तव भवतश्च पुत्रदारैः सुतकलत्रादिभिः सह सार्द्धं समागमः सम्मेलनम् , जीवसिद्धिप्रभृतीनां जीवसिद्धयादीनां क्लेशच्छेदः दुःखव्यावृत्तिः ।

हस्ततलेति । चाणक्य-चन्द्रगुप्तयोर्भेदे चन्द्रगुप्तः सुखेन वश्यः स्यादिति व्याहरतः कथयतः । 'व्याहार उक्तिर्लपितं भाषितं वचनं वच' इत्यमरः अस्य—राक्षसस्य कोऽयमभिप्रायः किं तात्पर्यम् ।

चाणक्यादिति । भागुरायणः शुद्धमपि राक्षसतात्पर्यमन्यथा व्याख्याति । तथाहि चाणक्यात्कौटिल्यात् अपकृष्टस्य-पृथग्भूतस्य चन्द्रगुप्तस्य मौर्यस्योद्धरणादुन्मूलनात् राक्षसः किञ्चित्किमपि कार्यं कृत्यं नावश्यं प्रश्यति, नास्यातिशयाभीष्टसिद्धिः । हस्ततलकरणाद् वशीकरणात्तु आत्मनो मन्त्रित्वप्राप्त्या सर्वथा चन्दनदासप्रभृतीनां दुःखोच्छेदः स्वार्थसिद्धिरित्यस्याशयः ।

हृताधिकार इति । हृतो दूरीकृतोऽधिकारो नियोगो यस्य स हृताधिकारः दूरीकृतनियोगः असौ वटुश्चाणक्यः साम्प्रतमिदानीं क्व वर्तत इति शेषः । च्युतसाचिव्यपदः कौटिल्य इदानीं कुत्र तिष्ठतीत्यर्थः ।

जीवसिद्धि आदिका भी दुःख दूर हो जायगा ।

भागुरायणः—(मनही मन) अवश्य ही जीवसिद्धि का क्लेश छूट जायगा ।

मलयकेतुः—मित्र भागुरायण ? चन्द्रगुप्त हमारे वशीभूत हो जागगा, ऐसा कहने का क्या तात्पर्य है ?

भागुरायणः—दूसरा क्या ? चाणक्य से अलग भये चन्द्रगुप्तका उन्मूलन करने से कुछ भी लाभ नहीं होगा, किन्तु वशीभूत होने से स्वयं मन्त्रित्व ग्रहण करके जीवसिद्धि प्रभृति का दुःख दूर करेगा । यही राक्षस के कथन का तात्पर्य है ।

राक्षसः—भद्र ! अधिकार से च्युत वह अल्पबुद्धि चाणक्य अब कहां है ?

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

करभकः—तहिं ज्जेव पाडलिपुत्ते प्पडिवसदि [तस्मिन्नेव पाटलिपुत्रे प्रतिवसति]।

राक्षसः—(सावेगम्) भद्र ! तत्रैव प्रतिवसति, न तपोवनं गतः प्रतिज्ञां वा न पुनः समारूढवान् ?

करभकः—अमच्च तपोवणं गमिस्सदि त्ति सुणीआद [अमात्य ! तपोवनं गमिष्यतीति श्रूयते]।

राक्षसः—(सावेगम्) शकटदास ! नेदमुपपद्यते । पश्य;—

देवस्य येन पृथिवीतलवासवस्य
स्वाऽग्रासनापनयजा निकृतिर्न सोढा ।
सोऽयं स्वयङ्कृतनराधिपतेर्मनस्वी,
मौर्यात्कथं नु परिभूतिमिमां सहेत ? ॥ ११ ॥

सावेगमिति । तत्रैवावस्थितौ चन्द्रगुप्तप्रतिश्रुत्यविधाने वा कदाचित्सन्धिः स्यादित्यावेगहेतुः । (क्रियाविशेषणम्) सावेगं सरभसं यथा स्यात्तथा ब्रवीतीति शेषः । तत्रैव पाटलिपुत्र एवाधिवसति संतिष्ठते तपोवनम् अरण्यं न गतो नाश्रितः वा प्रतिज्ञां प्रतिश्रुतिं न समारूढवान् न कृतवान् ।

देवस्येति । येन चाणक्येन पृथिव्यास्तलं तत्र वासवः श्रेष्ठत्वात्तत्सदृशः तस्य वासवस्य क्षितीन्द्रस्य देवस्य नन्दस्य (अत्र कृद्योगा षष्ठी) स्वस्याऽग्रासनं स्वाग्रासनं तस्मादपनयस्तस्माज्जाता स्वाग्राऽसनापनयजा आत्मश्रेष्ठासननिष्कासनसमुत्पन्ना निकृतिः अनादरः न सोढा न क्षन्ता । मनस्वी प्रशस्तमनाः मानशीलो वा सोऽयं चाणक्यः स्वयंकृतश्चासौ नराधिपतिः स्वयंकृतनराधिपतिस्तस्मात्स्वयंकृतनराधिपतेः आत्मसम्पादितनृपतेः मौर्यात् चन्द्रगुप्तात् इमां परिभूतिं पराभवं

करभकः—उसी पाटलिपुत्र में ।

राक्षसः—(घबड़ा कर) भद्र ! वह वहीं रहता है ? तपोवन नहीं चला गया ? फिर से प्रतिज्ञा भी नहीं की ?

करभकः—अमात्य ! तपोवन जायगा, ऐसा सुना जाता है ।

राक्षसः—(जोरसे) शकटदास ! यह नहीं हो सकता ? देखिये—

जिसने पृथिवी में इन्द्र के समान नन्दराजा के द्वारा किये हुए अग्रासन से पृथक्करणजन्य अपमान को नहीं सहन किया । तब वह मनस्वी चाणक्य क्या अपने हाथों

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मलयकेतुः—सखे भागुरायण ! चाणक्यस्य तपोवनगमने पुनः प्रतिज्ञारोहणे वा कोऽस्य स्वार्थसिद्धिः ?

भागुरायणः—कुमार ! नात्यन्तदुर्बोधोऽयमर्थः यावद्यावत् चाणक्य हतकश्चन्द्रगुप्ताद्दूरो भवति तावत्तावदस्य स्वार्थसिद्धिः ।

शकटदासः—अमात्य ! अलमत्यन्तविकल्पितेन एतदुपपद्यत एव । कुतः ? पश्यत्वमात्यः—

राज्ञां चूडामणीन्दुद्युतिखचितशिखे मूर्ध्नि विन्यस्तपादः

कथं नु सहेत न कथमपि सहेतेत्यर्थः । यश्चाणक्यो नन्देन श्राद्धे भोजनार्थमागत आसनोपविष्टश्चानादृतः सन् अनादरं न सोढवान् स स्वसम्पादितराज्यस्य मौर्यस्याऽनादरं कथं सहेत नैव सहेतेत्यर्थः । चाणक्ये निकृतिसम्बन्धेऽप्यसम्बन्धद्योतनात्सम्बन्धेऽसम्बन्धरूपातिशयोक्त्यलंकारेण संसृष्टः कथं नु सहेतेत्यतः कथमपि नैव सहेतेत्यर्थान्तरावगमादर्थापत्तिरलङ्कारः । वसन्ततिलिकं वृत्तम् ॥ ११ ॥

चाणक्यस्येति । चाणक्यस्य कौटिल्यस्य तपोवनगमनेऽरण्यानुसरणे वाऽथवा पुनः प्रतिज्ञारोहणे मौर्योन्मूलनाय पुनः प्रतिश्रुत्यङ्गीकरणे अस्य राक्षसस्य का स्वार्थसिद्धिः आत्माभिप्रेतनिष्पत्तिः मन्त्रित्वपदप्राप्तिरित्यर्थः । भविष्यतीति क्रियाशेषः ।

नात्यन्तेति । अयमर्थः इदं वस्तु नात्यन्तदुर्बोधो नातिदुरवगमः । यावद्यावत्कालं चाणक्यहतको दुष्टश्चाणक्यः चन्द्रगुप्तान्मौर्यात् दूरीभवति असान्निध्ये वर्तते तावत्तावत्कालम् अस्य राक्षस्य स्वार्थसिद्धिः अभीष्टलाभः सचिवपदप्राप्तिरित्यर्थः ।

अलमिति । अत्यन्तविकल्पितेन अतिशयसन्देहेन अलं व्यर्थम् नातिसन्देहो विधेयः, एतत् चन्द्रगुप्तकर्तृकानादरासहनं चाणक्ये उपपद्यते युज्यते ।

राज्ञामिति । मौर्यश्चन्द्रगुप्तः राज्ञां भूपतीनां चूडायां स्थिता मणयः चूडाम-

---

बनाये हुये राजा चन्द्रगुप्त के इस पराभव को किस तरह सह सकता है, वह कभी भी नहीं सह सकता ॥ ११ ॥

मलयकेतुः—मित्र भागुरायण ! चाणक्य के तपोवन चले जाने और फिर से प्रतिज्ञा करने पर इसका क्या स्वार्थ साधन हो सकता है ?

भागुरायणः—कुमार ! यह कोई कठिन तात्पर्य्य नहीं है, जब कभी भी दुष्ट चाणक्य चन्द्रगुप्तसे अलग होगा तभी इसकी कोई न कोई स्वार्थसिद्ध होगी ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वैरेवोत्पाद्यमानं किमिति विषहते मौर्य आज्ञाविघातम् ? ।
कौटिल्यः कोपनोऽपि स्वयमभिचरणज्ञातदुःखः प्रतिज्ञां,
दैवात् पूर्णप्रतिज्ञः पुनरपि न करोत्यायतिज्यानिभीतः ॥ १२ ॥

राक्षसः—सखे शकटदास ! एवमेतत् , तद्गच्छ, विश्रामय करभकम् ।

शकटदासः—यदाज्ञापयत्यमात्य इति (करभकेण सहनिष्क्रान्तः) ।

राक्षसः—अहमपि कुमारं द्रष्टुमिच्छामि ।

णयस्ते इन्दव इवेति चूडामणीन्दवस्तेषां द्युतिभिः कान्तिभिः खचिता संश्लिष्टा शिखा यस्य यस्मिन् वा स तथोक्तस्तस्मिन् चूडामणीन्दुद्युतिखचितशिखे मूर्ध्नि शिरसि न्यस्तौ पादौ येन स न्यस्तपादः स्थापितचरणः तेषामधीश इत्यर्थः, अतः स्वैरात्मीयैरेव जनैः अनुचरैरित्यर्थः । उत्पाद्यमानं क्रियमाणम् आज्ञाभङ्गं किमिति कथं विषहते नैव सहते इत्यर्थः । स्वयमभिचरणे ज्ञातं दुःखं येन स स्वयमभिचरणज्ञातदुखः आत्माभिचारावगतक्लेशः क्रोपनोऽपि क्रुद्धोऽपि कौटिल्यश्चाणक्यो दैवात् भाग्यात् पूर्णा प्रतिज्ञा यस्य स पूर्णप्रतिज्ञः सफलप्रतिश्रुतिरपि पुनर्भूयः आयते र्ज्यानिस्तस्माद्भीतः आयतिज्यानिभीतः उत्तरकालिकफलहानिशङ्कः सन् प्रतिज्ञां प्रतिश्रुतिं न करोति न विदधाति । पूर्वकृतप्रतिश्रुतौ क्लेशाधिक्यमनुभूय निष्फलत्वशङ्कया पुनः प्रतिश्रुतिं न करोतीत्यर्थः । चाणक्यस्य पुनः प्रतिज्ञाकरणे कारणान्तरस्य सत्वेऽपि निःशङ्कोऽपि चाणक्यः साशङ्कः इवेति मिथ्या साशङ्कत्वस्य तत्रोत्प्रेक्षणादिवशब्दाप्रयोगेण प्रतीयमानोत्प्रेक्षालङ्कारः । आयतिफलाप्राप्तिभिया प्रतिश्रुत्यकरणायोगेऽपि तद्योगोक्तेरतिशयोक्तिरिति कश्चित् ॥ स्रग्धरावृत्तम् ॥ १२ ॥

शकटदासः—अमात्य ! ज्यादा सन्देह करना व्यर्थ है । यह हो सकता है कि चन्द्रमाके समान अत्यन्त निर्मल चूड़ामणि की कान्ति से सुशोभित शिखायुक्त राजाओं के मस्तक पर पैर रखनेवाला चन्द्रगुप्त अनुचरों द्वारा किये गये आज्ञाविघात को किस तरह सह सकता है और आत्मघात के दुःख का ज्ञाता तथा भाग्यवश सफलप्रतिज्ञ और क्रोधी चाणक्य भविष्य में फलहानी होने की शङ्कासे फिर से प्रतिज्ञा नहीं करे ॥ १२ ॥

राक्षसः—मित्र शकटदास ! यह बात ऐसी ही है, इस लिये जाओ करभक को बैठाओ ।

शकटदासः—अमात्य की जो आज्ञा ! (करभकके साथ बाहर चला गया)

राक्षस—मैं भी कुमार से मिलना चाहता हूं।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मलयकेतुः—अहमेवार्यं द्रष्टुमागतः ।

राक्षसः—(नाटयेनावलोक्य) अयेकुमार एवागतः । (आसनादुत्थाय) इदमासनमुपवेष्टुमर्हति कुमारः ।

मलयकेतुः—अहमुपविशामि । उपविशत्वार्यः (इत्युभौ यथासनमुपविष्टौ) आर्य ! अपि सह्या शिरोवेदना ?

राक्षसः—कुमारस्याधिराजशब्देनातिरस्कृते कुमारशब्दे, कुतः शिरोवेदनायाः सह्यता ?

मलयकेतुः—स्वयमूरीकृतमेतदार्येण, न दुष्प्रापं भविष्यति । तत् कियन्तं कालमस्माभिरेवं सम्भृतबलैरपि शत्रुव्यसनमवेक्षमाणैरुदासितव्यम् ।

आर्येति । आर्य श्रीमन्, शिरसो वेदना शिरोवेदना शीर्षव्यथा अपि सह्या सोढुं योग्या किम् । त्रियामधिकारे विहितेन कर्मार्थकवता सह्येति प्रयोगसिद्धिः ।

कुमारस्येति । कुमारस्य शिशोर्भवतः अधिको राजाऽधिराजः (राजाहः सखिभ्यष्टच्) इति टच् । स चासौ शब्दोऽधिराजशब्दस्तेनाऽधिराजशब्देनाऽतिरस्कृतोऽपरिभूते कुमारशब्दे सतीति शेषः । शिरोवेदनायाः शीर्षव्यथायाः कुतः सह्यता कथं शान्तिः । अधिराजशब्दपूर्वककुमारशब्दश्रवणमन्तरा न मे शिरोव्यथाशान्तिसम्भव इति भावः ।

स्वयमिति । स्वयं साक्षादात्मनेत्यर्थः । आर्येण भवता एतत् मयि अधिराजशब्दप्रयोगविधानम् ऊरीकृतम्, न दुष्प्रापं भविष्यति न दुर्लभं भविष्यति । तत्तस्मात् एवमित्थं सम्भृतानि सञ्चितानि बलानि सैन्यानि येषां ते सम्भृतबलास्तैः

मलयकेतुः—(प्रकट होकर) मैं स्वयं आपको देखने के लिये आया हूं ।

राक्षसः—(विचित्र ढङ्गसे देखकर) अये ! कुमार स्वयं आगये ? (आसन से उठकर) यह आसन है, बैठिये ।

मलयकेतुः—मैं बैठता हूं और आप भी बैठिये । (दोनों अपने अपने आसन पर बैठते हैं) आर्य ! सिरकी पीडा छूटी या नहीं ?

राक्षसः—आपका 'महाराजकुमार' ऐसा नाम सुने बिना सिर की व्यथा शान्त कैसे होगी ?

मलयकेतुः—यह तो आपने पहिले ही स्वीकार कर लिया है, तब दुर्लभ नहीं होगा । लेकिन इस प्रकार सेना एकत्रित किये हम लोग शत्रुके विपत्काल की प्रतीक्षा करते कब तक चुप चाप बैठे रहेंगे ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राक्षसः—कुमार ! कुतोऽद्यापि कालहरणस्यावकाशः ? प्रतिष्ठस्व रिपुजयाय ।

मलयकेतुः—अमात्य ! अपि किञ्चिच्छत्रुव्यसनमुपलब्धम् ?

राक्षसः—बाढमुपलब्धम् ?

मलयकेतुः—कीदृशम् ?

राक्षसः—सचिवव्यसनं किमन्यत् । अपकृष्टश्चाणक्याच्चन्द्रगुप्तः ।

मलयकेतुः—अमात्य ! सचिवव्यसनमेव ।

राक्षसः—कुमार ! अन्येषां भूपतीनां कदाचिदमात्यव्यसनमव्यसनमपि स्यात् , न पुनश्चन्द्रगुप्तस्य ।

मलयकेतुः—आर्य ! ननु विशेषतश्चन्द्रगुप्तस्येति ।

राक्षसः—किं कारणं यदस्यामात्यव्यसनमव्यसनम् ?

सम्भृतबलैः एकत्रीकृतसैन्यैरपि शत्रुव्यसनं रिपुविपत्कालम् अवेक्षमाणैः प्रतीक्षमाणैरस्माभिः कियन्तं कालं किमवधिकं समयम् उदासितव्यम् जोषं वर्त्तितव्यम् ।

कुतोऽद्यापीति । अद्यापि इदानीमपि कालहरणस्य समययापनस्याऽवकाशोऽवसरः कुतः कस्मात् नास्तीत्यर्थः रिपुविजयाय रिपुं विजेतुमित्यर्थः, (तुमर्थाच्च भाववचनादिति चतुर्थी) प्रतिष्ठस्व याहि ।

अपि किञ्चिदिति । अपिशब्दोऽत्र प्रश्नार्थकः किञ्चित् शत्रुव्यसनं रिपुलेशमुपलब्धमवगतं किम् ।

राक्षसः—अब समय बिताने की क्या आवश्यकता ? शत्रु को जीतने के लिये चलिये ।

मलयकेतुः—अमात्य ! कुछ शत्रु की विपत्ति की बात मालूम हुई क्या ?

राक्षसः— हाँ ।

मलयकेतुः—क्या ?

राक्षसः—मन्त्री का विरोध, और क्या । चन्द्रगुप्त चाणक्य से अलग हो गया ।

मलयकेतुः—बस, केवल मन्त्री का विरोध ?

राक्षसः—कुमार ! अन्य राजाओं का तो मन्त्रिविरोधरूपी दुःख छूट भी सकता है, किन्तु चन्द्रगुप्त का नहीं ।

मलयकेतुः—आर्य ! निश्चय, विशेषरूपसे चन्द्रगुप्त को ही ।

राक्षसः—चन्द्रगुप्तको मन्त्रिविरोधरूपी दुःख दुःख नहीं है, इसमें क्या कारण ?

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मलयकेतुः—चन्द्रगुप्तप्रकृतीनां हि चाणक्यदोषा एव विरागहेतवः। तस्मिन्निराकृते प्रथममपि चन्द्रगुप्तानुरक्ताः प्रकृतयः इदानीं पुनः सुतरामेव तत्रानुरागं दर्शयिष्यन्ति।

राक्षसः—कुमार! नैतदेवं, इह द्विप्रकाराः प्रकृतयः,-चन्द्रगुप्तसहोत्थायिन्यो नन्दकुलानुरक्ताश्च। तत्र चन्द्रगुप्तसहोत्थायिनीनां प्रकृतीनां चाणक्यदोषा एव विरागहेतवः, न नन्दकुलानुरक्तानाम्। तास्तु खलु नन्दकुलमनेन पितृकुलभूतं कृत्स्नं कृतघ्नेन घातितमित्य-

---

चन्द्रगुप्तप्रकृतीनामिति। चन्द्रगुप्तस्य प्रकृतयश्चन्द्रगुप्तप्रकृतयस्तासां चन्द्रगुप्तप्रकृतीनां मौर्यप्रजानां चाणक्यस्य दोषाश्चाणक्यदोषाः कौटिल्यौद्धत्यादय एव अपरागस्य हेतवोऽपरागहेतवो विरागकारणानि सन्तीति शेषः तस्मिन् चाणक्ये निराकृते दूरीकृते सति प्रथममपि प्रागपि प्रकृतयः चन्द्रगुप्तेऽनुरक्ताश्चन्द्रगुप्तानुरक्ताः मौर्याऽनुरागिण्यः इदानीं सम्प्रति पुनर्भूयः सुतरामेव सर्वथैव तत्र चन्द्रगुप्ते राज्ञि अनुरागं स्नेहं दर्शयिष्यन्ति अनुरागयुक्ता भविष्यन्तीत्यर्थः।

नैतदेवमिति। एतत् भवदुक्तं नैवं न युक्तमित्यर्थः, अयुक्तत्वे हेतुं प्रदर्शयति—इहेति। इह लोके प्रकृतयः प्रजाः द्विप्रकाराः द्विविधाः सन्तीति शेषः, चन्द्रगुप्तेन सह सार्द्धमुत्थातुं शीलं यासां ताश्चन्द्रगुप्तसहोत्थायिन्यः मौर्याऽनुरक्ता इत्यर्थः, नन्दकुलाऽनुरक्ताः नन्दान्वयानुरागिण्यश्च। तत्रोभयविधप्रकृतिमध्ये चन्द्रगुप्तसहोत्थायिनीनां मौर्यानुरक्तानां प्रकृतीनां प्रजानां चाणाक्यदोषाः कौटिल्यदूषणान्येव विरागहेतवः अपरागकारणानि न नन्दकुलानुरक्तानां नन्दान्वयानुरागवतीनां न चाणक्यदोषा विरागहेतव इत्यर्थः। तास्तु खलु खलुशब्दो वाक्यालंकारे नन्दकुलानुरक्ता इत्यर्थः। कृतघ्नेन अकृतज्ञेन अनेन चाणक्येन चन्द्रगुप्तेन वा

मलयकेतुः—चाणक्य के दोष ही चन्द्रगुप्त की प्रजा के अपरागके हेतु हैं! प्रजा पहिले ही चन्द्रगुप्तमें अनुरक्त थी। अब तो चाणक्य के हटजाने पर वह विशेषरूप से चन्द्रगुप्त में अनुराग दिखावेगी।

राक्षसः—कुमार! यह आपका कहना ठीक नहीं है। उस राज्य में दो प्रकार की प्रजायें हैं—एक चन्द्रगुप्त में और दूसरी नन्दकुलमें अनुराग रखनेवाली। उसमें चन्द्रगुप्त पर अनुराग रखनेवाली प्रजा को चाणक्य के दोष ही अपराग के कारण हैं, नन्दकुलमें अनुराग रखनेवाली प्रजा को नहीं। इस कृतघ्नने पितृवंशके समान समस्त नन्दवंशका घात कर दिया है, इस कारण वे सब अपराग और क्रोधके कारण

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परागामर्षाभ्यां विप्रकृताः सत्यः स्वाश्रयमलभमानाश्चन्द्रगुप्तमेवानुवर्त्तन्ते । त्वादृशं पुनः प्रतिपक्षोद्धरणे सम्भावितशक्तिमभियोक्तारमासाद्य, क्षिप्रमेनं परित्यज्य त्वामेवाश्रयिष्यन्ते इति । अत्र कुमारस्य वयमेव निदर्शनम् ।

मलयकेतुः—अमात्य ! किमेतदेवैकं सचिवव्यसनमभियोगकारणं चन्द्रगुप्तस्य ? अहोस्विदन्यदप्यस्ति ?

राक्षसः—कुमार ! किमन्यैः बहुभिरपि ? एतद्धि तत्र प्रधानतमम् ।

मलयकेतुः—अमात्य ! कथं प्रधानतमं नाम ? किमिदानीं चन्द्रगुप्तः स्वराज्यकार्यधुरामन्यत्र मन्त्रिणि आत्मनि वा समासज्य प्रतिविधातुमसमर्थः स्यात् ?

पितृकुलेन भूतं पितृकुलभूतं पितृवंशसमं (समानार्थकोऽत्र भूतशब्दः) "युक्तं क्ष्मादावृते भूतं प्राण्यतीते समे त्रिषु" इत्यमरकोशोक्तेः ।

कृत्स्नं सकलं नन्दकुलं नन्दान्वयं घातितं विनाशितमुन्मूलितमिति यावत् इत्यस्माद्धेतोः समुत्पन्नाभ्याम् अपरागामर्षाभ्यां विरागक्रोधाभ्यां विप्रकृताः विरक्तीकृताः सत्यः स्वाश्रयं स्वाधिपम् अलभमाना अप्राप्ताः चन्द्रगुप्तं मौर्यमेवाऽनुवर्तन्तेऽनुगच्छन्ति । पुनर्भूयः त्वादृशं भवत्सदृशं प्रतिपक्षोद्धरणे शत्रुनिराकरणे सम्भावितशक्तिं निश्चितसामर्थ्यम् अभियोक्तारं शत्रुपराभवकारिणम् आसाद्य प्राप्य क्षिप्रं शीघ्रमेनं चन्द्रगुप्तं परित्यज्य विहाय त्वामेव भवन्तमेव आश्रयिष्यन्ते सेविष्यन्ते ।

किमेतदिति । किम् । एतदेकं सचिवव्यसनं मन्त्रिविरोध एव चन्द्रगुप्तस्य मौर्यस्य अभियोगकारणं पराभवहेतुः आहोस्वित् अथवाऽन्यदपि हेत्वन्तरमपीत्यर्थः।

कथमिति । राज्यस्य कार्याणि राज्यकार्याणि स्वस्य राज्यकार्याणि स्वरा-

---

विरक्त हो कर अपने राजा को न पाकर चन्द्रगुप्तका अनुगमन करती हैं । अपनी शक्ति से शत्रु को जीतनेवाले तुम्हारे जसे राजा को पाकर फिर वह शीघ्र ही चन्द्रगुप्तको छोड़ आपके ही वशीभूतहो जायगी । इसमें आपको एक हमही दृष्टान्त हैं ।

मलयकेतुः—अमात्य ! यह एक मन्त्रिविरोध ही चन्द्रगुप्त के पराभव का कारण है या दूसरा भी ?

राक्षसः—कुमार ! दूसरे कारणोंसे क्या प्रयोजन, यही सर्वप्रधान कारण है ।

मलयकेतुः—अमात्य ! किस तरह यह प्रधान कारण है ? चन्द्रगुप्त अपने राज्य-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राक्षसः—बाढम् , असमर्थ एव ।

मलयकेतुः—किं कारणम् ?

राक्षसः—स्वायत्तसिद्धिषु, उभयायत्तसिद्धिषु वा भूमिपालेषु कदाचिदेतत्सम्भवति, न तु चन्द्रगुप्ते । चन्द्रगुप्तस्तु दुरात्मा, नित्यं सचिवायत्तसिद्धावेवावस्थितश्चक्षुर्विकल इवाप्रत्यक्षसर्वलोकव्यवहारः कथमिव स्वयं प्रतिविधातुं समर्थः स्यात् ? कुतः ?— ।

अत्युच्छ्रिते मन्त्रिणि पार्थिवे च विष्टभ्य पादावुपतिष्ठते श्रीः ।

ज्यकार्याणि तेषां धूस्तां स्वराज्यकार्यधुराम् निजराज्यकृत्यभारमन्यत्रान्यस्मिन् मन्त्रिणि सचिवे आत्मनि आत्मीये वा समासज्य विन्यस्य स्वयमात्मना प्रतिविधातुं प्रतिकर्तुमसमर्थोऽक्षमः ।

स्वायत्तसिद्धिष्विति । स्वेषु आत्मसु आयत्ता अधीना सिद्धिर्येषां ते तथोक्तास्तेषु स्वायत्तसिद्धिषु आत्माधीनराज्यकार्यसम्पादनेषु उभयोरायत्ता। सिद्धिर्येषां ते तथाक्तास्तेषु उभयायत्तसिद्धिषु मन्त्रिपार्थिवाधीनराज्यकार्यसम्पादनेषु वा भूमिपालेषु क्षितिपतिषु एतत् अभियोगप्रतिविधानं सम्भवति न तु चन्द्रगुप्ते मौर्ये अस्मदभियोगप्रतिविधानं सम्भवतीति शेषः । चन्द्रगुप्तः मौर्यस्तु दुरात्मा दुर्हृदयः नित्यं प्रतिक्षणं सचिवायत्तसिद्धौ मन्त्रिस्थितकार्यचिन्तने एवावस्थितः वर्तमानः चक्षुर्विकल इव नेत्ररहित इव अप्रत्यक्षोऽगोचरः सर्वलोकानां व्यवहारो यस्य सोऽप्रत्यक्षसर्वलोकव्यवहारः लोकव्यवहारानभिज्ञ इत्यर्थः कथमिव स्वयमात्मना प्रतिविधातुं प्रतिकर्त्तुं समर्थः क्षमः स्याद्भवेत् ।

अत्युच्छ्रित इति । श्रीः राज्यलक्ष्मीः अत्युच्छ्रितेऽत्युन्नते मन्त्रिणि सचिवे

भारको अन्य मन्त्री या किसी आत्मीय जन को देकर प्रतीकार करने में समर्थ नहीं है क्या ?

राक्षसः—हां, असमर्थ ही है ।

मलयकेतुः—क्यों ?

राक्षसः—स्वायत्तसिद्धि—(अथवा) उभयायत्तसिद्धि राजाओं में कदाचित् प्रतीकार करनेकी सामार्थ्य हो भी सकती है, किन्तु चन्द्रगुप्त में नहीं । चन्द्रगुप्त दुष्ट हृदय है और सर्वदा सचिवायत्तसिद्धि ही में रहता है। अन्धे पुरुषकी तरह समस्त लोकव्यवहार को नहीं देखनेवाला चन्द्रगुप्त किस तरह प्रतीकार करने में समर्थ हो सकता है ।

कैसे की—राज्यलक्ष्मी, अतिशय उन्नत मन्त्री तथा राजा पर मन्त्रशक्ति और

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सा स्त्रीस्वभावादसहा भरस्य तयोर्द्वयोरेकतरं जहाति ॥ १३ ॥

अपि च,—

नृपोऽपकृष्टः सचिवात्तदर्पणः स्तनन्धयोऽत्यन्तशिशुः स्तनादिव ।
अदृष्टलोकव्यवहारमन्दधीर्मुहूर्त्तमप्युत्सहते न वर्त्तितुम् ॥ १४ ॥

पार्थिवे नृपे च पादौ चरणौ मन्त्रशक्ति-प्रभुशक्तिरूपौ विष्टभ्य संस्थाप्य तयोरेकैकस्मिन्नेकैकं पादं धृत्वेत्यर्थः । उपतिष्ठते सङ्गतो भवतीत्यर्थः (उपाद्देवपूजासङ्गतिकरणदानेष्विति उपपूर्वकात्तिष्ठतेःसङ्गतिकरणे आत्मनेपदम्) सा श्रीः राज्यलक्ष्मीः स्त्रीस्वभावात् नारीजनसुलभत्वात्–नारीणां दौर्बल्यं चापल्यं च प्रसिद्धमिति तात्पर्यम् ; भरस्य मन्त्रि-पार्थिवोभयत्र स्थितिरूपक्लेशस्याऽसहा सोढुमसमर्थाऽक्षमा सती तयोर्द्वयोर्मन्त्रि—पार्थिवयोर्मध्ये एकतरं मन्त्रिणं पार्थिवं वा जहाति त्यजति । अत्युन्नतसमानवंशस्तम्भद्वयमङ्घ्रिद्वयेनावलम्ब्य सुस्थिरापि वंशस्तम्भद्वयवैषम्यप्रयुक्तपादच्युत्या कार्यभारस्याक्षमत्वादेकं विहायापरमवलम्बमाना तेन सह पतन्ती काचिन्नर्तकीव श्रीः मन्त्रि–पार्थिवोभयमवलम्ब्य स्थिता चापल्याद्भारस्याक्षमा सती तयोरन्यतरं परित्यजतीत्यर्थः । एवमुन्नतो मौर्योऽनुन्नतेऽन्यसचिवे भारमाधायाक्षमः स्यादिति भावः । प्रस्तुतराजलक्ष्म्यामप्रस्तुतनायिकाव्यवहारसमारोपणेन समासोक्तिरलङ्कारः ।

समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणैः ।
व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः ॥

इति दर्पणोक्तेः । प्रसादगुणः । वैदर्भी रीतिः । उपजातिवृत्तम् ॥ १३ ॥

नृप इति । स्तनन्धयतीति स्तनन्धयः स्तनपायी (स्तनशब्दोपपदाद्धेटः 'नासिकास्तनयोर्ध्माधेटोः' इति खशि, 'अरुर्द्विषदजन्तस्य मुम्' इति मुमि च रूपम्) अत एवाऽत्यन्तशिशुः अतिबालः स्तनात्पयोधरादिव सचिवादमात्यात् अपकृष्टः पृथग्भूतः तस्मिन्नेव सचिवेऽर्पणं राजयभारसमर्पणं यस्य स तदर्पणः स-

---

प्रभुशक्तिरूप दोनों पैरों को रखकर स्थित रहती है । पर दौर्बल्य तथा चापल्यरूप स्त्रीस्वभावके कारण वह भारको सहन करने में असमर्थ होकर उन दोनों में से एक को छोड़ देती है ॥ १३ ॥

और—स्तनपान करनेवाले छोटा सा बालक जैसे स्तन से पृथक् हुआ हो, उसी तरह मन्त्रीसे पृथक् राजा सचिवायत्तसिद्ध होता है, वह लोकव्यवहार को नहीं जानता । अत एव अल्पबुद्धि राजा क्षणभर भी नहीं ठहर सकता ॥ १४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मलयकेतुः—(आत्मगतम्) दिष्ट्या न सचिवायत्ततन्त्रोऽस्मि (प्रकाशम्) अमात्य ! यद्यप्येवं तथापि खलु बहुष्वभियोगकारणेषु सत्सु सचिवव्यसनमभियुञ्जानस्य शत्रुमभियोक्तुः नैकान्तिकी सिद्धिर्भवति।

राक्षसः—ऐकान्तिकीमेव सिद्धिमवगन्तुमर्हति कुमारः । कुतः?—

त्वय्युत्कृष्टबलेऽभियोक्तरि नृपे, नन्दानुरक्ते पुरे,
चाणक्ये चलिताधिकारविमुखे, मौर्ये नवे राजनि ।

चिवाधीनसिद्धिः । तथा न दृष्टो लोकानां व्यवहारो येन सोऽदृष्टलोकव्यवहारः अत एव मन्दा धीर्यस्य स मन्दधीः अदृष्टलोकव्यवहारश्चासौ मन्दधीः अदृष्टलोकव्यवहारमन्दधीः अप्रत्यक्षजनाचाराल्पबुद्धिः नृपो राजा मुहूर्तमपि क्षणमपि वर्तितुं स्थातुं नोत्सहते न क्षमते । अमात्यात् पृथग्भूतो नृपः स्वयं राज्यकार्यं सम्पादयितुमसमर्थो भवतीति भावः । अत्रोपमालङ्कारः । वृत्तञ्च वंशस्थं नाम ॥ १४ ॥

आत्मगतमिति । आत्मगतमप्रकाशं यथा तथा ब्रवीतीत्यर्थः । दिष्ट्या । (हर्षसूचकमव्ययम्) भाग्येनेत्यर्थः । सचिवस्य मन्त्रिण आयत्तं तन्त्रम् यस्य स सचिवायत्ततन्त्रः अमात्याधीनराष्ट्रः नास्मि अहमिति शेषः । अमात्ये त्वयि विरुद्धेऽपि न मे स्वतन्त्रस्य कापि हानिरिति भावः । यद्यप्येवं स्वाधीनराष्ट्रस्य क्षत्यभावे सतीत्यर्थः । अभियोगकारणेषु अपकारवाञ्छयाऽऽक्रमणहेतुषु सत्सु विद्यमानेषु सचिवव्यसनम् मन्त्रिविपदमभियुञ्जानस्यानुसंदधानस्य शत्रुं रिपुम् अभियोक्तुः आक्रमितुमुद्युक्तस्य मृगयत इति यावत् ऐकान्तिकी अवश्यम्भाविनी सिद्धिर्न भवति न जायते ।

त्वयीति । हे विभो हे राजन् ! उत्कृष्टानि बलानि यस्य स उत्कृष्टबलस्तस्मिन्नुत्कृष्टबले बलवत्सैन्ये त्वयि भवति नृपे राजनि अभियोक्तरि योद्धुमुद्यते सति तथा पुरे कुसुमपुरे नन्दानुरक्ते नन्दस्नेहिनि सति चाणक्ये कौटिल्ये चलितश्चासावधिकारश्चलिताधिकारस्तस्माद्विमुखस्तस्मिन् चलिताधिकारविमुखे मन्त्रिपद-

मलयकेतुः—(मनही मन) हर्षकी बात है कि मैं सचिवायत्तसिद्धि नहीं हूं। (जोरसे) अमात्य ! यद्यपि स्वतन्त्र राजा को कोई क्षति नहीं है तो भी अपकारकी इच्छा से भागने के हेतु रहने पर भी सचिवव्यसन का अनुसन्धान करनेवाले तथा शत्रु को जीतने के लिये उन्नत राजा को भी तो एकान्तिक सिद्धि नहीं होती ।

राक्षसः—आप ऐकान्तिक ही सिद्धि का मतलब समझ लें । कैसेकि—

प्रबल सेनावाले तथा युद्धके लिये आप उद्यत रहें और कुसुम पुर का प्रजा नन्द-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वाधीने मयि—" (इत्यर्द्धोक्ते लज्जां नाटयन्)

"—मार्गमात्रकथनव्यापारयोगोद्यमे,

त्वद्वाञ्छान्तरितानि सम्प्रति विभो ! तिष्ठन्ति साध्यानि नः ॥१५॥

मलयकेतुः—अमात्य ! यद्येवमभियोगकालममात्यः पश्यति, तत्किमास्यते ? पश्य,—

उत्तुङ्गास्तुङ्गकूलं स्रुतमदसलिलाः प्रस्यन्दिसलिलं

श्यामाः श्यामोपकण्ठद्रुममलिमुखराः कल्लोलमुखरम् ।

च्युते सति मौर्ये चन्द्रगुप्ते नवे नूतने राजनि नृपे सति तथा मार्गमात्रकथनव्यापारयोगोद्यमे रणपथमात्रोपदेशात्मकव्यापारोपाये यत्ने स्वाधीने स्वतन्त्रे मयि सति सम्प्रति इदानीं नोऽस्माकं साध्यानि वाञ्छितकार्याणि त्वद्वाञ्छान्तरितानि त्वदिच्छामात्रान्तर्हितानि तिष्ठन्ति वर्तन्ते । वाञ्छितकार्यसम्पादने भवदनुमतिप्रतीक्षणमेव विलम्ब इति तात्पर्यम् ।

समुच्चयोऽयमेकस्मिन् सति कार्यस्य साधके ।

खले कपोतिकन्यायात् तत्करः स्यात्परोऽपि चेत् ॥

इत्यादि दर्पणस्थलक्षणादेकस्येप्सितकार्यस्यानेककारणसत्वात्समुच्चयालङ्कारः । प्रसादगुणः । पाञ्चाली रीतिः । शार्दूलविक्रीडितं वृत्तम् ॥ १५ ॥

यद्येवमिति । आर्यो भवान् यदि एवमित्थम् अभियोगकालं शत्रोराक्रमणसमयं पश्यति तत्तस्मात्किं किमर्थमास्यते विलम्ब्यते ।

उत्तुङ्गेति । उत्तुङ्गाः अत्युन्नताः स्रुतं मदसलिलं येषां ते स्रुतमदसलिलाः क्षरद्दानवारयः श्यामाः कृष्णवर्णाः अलिभिर्मुखराः अलिमुखराः भ्रमरझङ्कारवन्तः उरुदशनैः विशालदन्तैः उत्सादितं विनाशितं तटं कूलं यैस्ते उत्सादितकूलाः अतिपराक्रमशालिनः सिन्दूरैस्तद्वद्रक्तविन्दुभिः शोणा रक्तवर्णाः मम शतशो गजपतयः

स्नेही हो, अधिकारच्युति के कारण चाणक्य विमुख हो जाय, चन्द्रगुप्त नवीन राजामात्र रहजाय और हम स्वाधीन हो जायँ (यह आधा वाक्य कहने पर लज्जा का करता हुआ) राजन् ! सम्प्रति हम लोगों के वाञ्छितकार्य की सिद्धि आप की इच्छामात्रसे अन्तरित है ॥ १५ ॥

मलयकेतुः—अमात्य ! आप यदि शत्रु पर आक्रमण करने योग्य समय देखते हैं तब किस कारण विलम्ब कर रहे हैं ? देखिए—

बहुत ऊँचे (और) बहते हुए मदजलवाले, कृष्णवर्ण तथा भ्रमरों के झङ्कार शब्द

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्रोतः खातावसीदत्तटमुरुदशनैरुत्सादिततटाः
शोणं सिन्दूरशोणा मम गजपतयः पास्यन्ति शतशः ॥ १६ ॥

अपि च,—

गम्भीरगर्जितरवाः स्वमदाम्बुमिश्रमासारवर्षमिव शीकरमुद्गिरन्त्यः ।
विन्ध्यं विकीर्णसलिला इव मेघमाला रोत्स्यन्ति वारणघटा नगरं मदीयाः ॥

तुङ्गमुन्नतं कूलं तटं यस्य स तथोक्तस्तं तुङ्गकूलमुन्नततटं प्रस्यन्दीनि सलिलानि यस्य स तथोक्तस्तं प्रस्यन्दिसलिलं प्रवहमाणजलं श्यामाः श्यामवर्णाः उपकण्ठे तटप्रदेशे द्रुमा यस्य तथोक्तस्तं श्यामोपकण्ठद्रुमं उपतटश्यामवृक्षं कल्लोलैर्मुखरं कल्लोलमुखरं तरङ्गशब्दयुतं स्रोतसा खातमत एवावसीदत्तटं यस्य स तथोक्तस्तं स्रोतःखातावसीदत्तटं शोणं शोणनामपाटलिपुत्रसमीपवर्त्तिनदविशेषं पास्यन्ति पानेन शोषयिष्यन्ति। कुसुमपुरप्रान्तीयकूलं शोण इवास्मत्करिवर्गः कुसुमपुरं नाशयिष्यतीत्यर्थः । शोणो यथा तथा गजपतय इत्यर्थप्रतीत्या शोणगजपतीनां गम्यौपम्येन शोणशब्दस्य श्लिष्टत्वेन च श्लेषानुप्राणितोपमालङ्कारः । गजपतिशोणोभयविशेषवर्गस्य यथासंख्यमन्वयेन यथासंख्यमलङ्कारश्च । ओजो गुणः । गौडी रीतिः । सुवदनावृत्तम् ।

ज्ञेया सप्ताश्वषड्भिर्मरभनययुता म्लौगः सुवदना ॥ १६ ॥

गम्भीरेति । गम्भीरञ्च तद्गर्जितं गम्भीरगर्जितं तद्वद्रवो येषां ते गम्भीरगर्जितरवाः सान्द्रगर्जनध्वनयः आसार एव वर्षं वर्षणमासारवर्षं धारासम्पातवर्षणमिव स्वस्य मदाम्बु स्वमदाम्बु तेन मिश्रं स्वमदाम्बुमिश्रं निजदानजलमिश्रितं शीकरम् अम्बुकणम् । शीकरोऽम्बुकणः स्मृतः । उद्गिरन्त्यः उद्वमन्त्यः ।

निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयम् ।
अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते ॥

इति दण्ड्युक्त्या गिरतेरप्रधानार्थतया न ग्राम्यदोषः मदीयाः मामकीनाः वारणघटा गजसमूहाः विकीर्णं विक्षिप्तं सलिलं याभिस्ता विकीर्णसलिला विक्षिप्त-

---

युक्त, विशाल दाँतों से तट का विदीर्ण करनेवाले, रक्त बिन्दुओं से रक्तवर्ण मेरे अनेकों गजपति ऊँचे तटवाले बहते हुए जल तथा श्यामवर्ण वृक्षवाले तरङ्ग के शब्द से शब्दायमान प्रवाह के द्वारा भग्नतटवाले पाटलिपुत्रवर्ती शोण नामक नदविशेष को पान करें ॥ १६ ॥

और भी—गम्भीर गर्जन के समान शब्द करनेवाले और धारासम्पात वर्षण की तरह अपने मदजल से मिश्रित जलकणाओं को फेंकते हुए हमारे गजसमूह निकले भये जलवाली मेघमाला को विन्ध्य पर्वत की तरह पुष्पपुर को घेरेंगे ॥ १७ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(इति भागुरायणेन सह निष्क्रान्तो मलयकेतुः)।

राक्षसः—कः कोऽत्र भोः ?

पुरुषः—(प्रविश्य) आणवेदु अमच्चो ! [आज्ञापयत्वमात्यः]।

राक्षसः—प्रियंवदक ! ज्ञायतां सांवत्सरिकाणां द्वारि कस्तिष्ठति।

प्रियंवदकः—जं अमच्चो आणवेदि। (इति निष्क्रम्य क्षपणकं दृष्ट्वा पुनः प्रविश्य च) अमच्च ! एसो क्खु संवत्सरिओ क्खवणओ [यदमात्य आ-आज्ञापयतीति) अमात्य ! एष खलु सांवत्सरिकः क्षपणकः]।

राक्षसः—(स्वगतमनिमित्तं सूचयित्वा) कथं प्रथममेव क्षपणकदर्शनम् ?

जलाः मेघमालाः घनपङ्क्तयः विन्ध्यं विन्ध्यपर्वतमिव नगरं पुष्पपुरं रोत्स्यन्ति आवरिष्यन्ति।

करि–घनयोरुपमानोपमेययोरौपम्यवाचकेवशब्दस्य गम्भीरगर्जितघनवत्त्वादिसामान्यधर्मस्य चोपादानादत्र पूर्णोपमाऽलंकारः। ओजो गुणः। पाञ्चाली रीतिः। वसन्ततिलकं वृत्तम् ॥ १७ ॥

कः कोऽत्रेति। नात्र (कस्कादिषु चे) ति सत्वं शक्यम् वाक्ये संहिताया विवक्षाधीनत्वात्सत्वात्मकसन्धौ तदनभ्युपगमात् (कस्कोऽत्रेति पाठस्यैव सम्यक्त्वमभ्युपगच्छन्ति केचित्)।

ज्ञायतामिति। साम्वत्सरिकाणां दैवज्ञानां मध्ये द्वारि प्रतीहारभूमौ कः किंनामधेयस्तिष्ठति वर्तते। 'साम्वत्सरो ज्योतिषिको दैवज्ञगणकावपी' त्यमरः।

स्वगतमिति। स्वस्मिन्नात्मनि गतं प्राप्तं स्वगतं तद्यथा स्यात्तथाऽनिमित्तमशुभलक्षणं सूचयित्वाऽभिनीय। प्रथमं पूर्वमेव कथं कुतः क्षपणकदर्शनं नग्नसन्यासिनिरीक्षणं जातमिति। क्षपणकस्य नग्नत्वात्तद्दर्शनमशुभसूचकमिति भावः।

(भागुरायण के साथ मलयकेतु बाहर चला जाता है)।

राक्षसः—यहां पर कौन है ?

पुरुषः—(प्रवेश कर) आज्ञा कीजिये।

राक्षसः—प्रियंवदक ! देखो तो प्रतीहारस्थान में कौन सा ज्यौतिषी है।

प्रियंवदकः—अमात्य की जो आज्ञा। (बाहर जा एक क्षपणक को देख फिर प्रवेश कर)। अमात्य ! क्षपणक नाम का ज्यौतिषी है।

राक्षसः—(मनही में अशुभ लक्षण समझ कर)। क्या पहिले ही क्षपणक का दर्शन हुआ ?

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रियंवदकः—जीवसिद्धी [जीवसिद्धिः]।

राक्षसः—(प्रकाशम्) अवीभत्सदर्शनं कृत्वा प्रवेशय।

प्रियंवदकः—जं अमच्चो आणवेदि [यदमात्य आज्ञापयति]।

(इति निष्क्रान्तः)

(ततः प्रविशति क्षपणकः)।

क्षपणकः—सासणमलिहन्ताणं पडिवज्जह, मोहवाहिवेज्जाणं।
जेपढममेत्तकडुअं, पच्छा पत्थं उवदिसन्ति ॥ १८ ॥
[शासनमर्हतां प्रतिपद्यध्वं मोहव्याधिवैद्यानाम्।
ये प्रथममात्रकटुकं पश्चात् पथ्यमुपदिशन्ति] ॥ १८ ॥

अवीभत्सदर्शनमिति। न वीभत्सं विधाय दर्शनं यस्य सोऽवीभत्सदर्शनस्तमबीभत्सदर्शनम् अनिन्दितवेषं कृत्वा विधाय प्रवेशय आनयमिति शेषः। प्राक्क्षपणकसामान्यज्ञानेनाशुभसंशयः पश्चाज्जीवसिद्धिं ज्योतिश्शास्त्रवेत्तारमनुमायगृहप्रवेसानुमतिः।

शासनमिति। मोह एव व्याधिस्तस्य वैद्यास्तेषां मोहव्याधिवैद्यानाम् अज्ञानरोगचिकित्सकानां ज्ञानप्रदानामित्यर्थः। अर्हतां पूज्यानां वौद्धविशेषाञ्च शासनमुपदेशं प्रतिपद्यध्वं प्रतिपालयत। ये अर्हन्तः मान्याः बौद्धसन्न्यासिविशेषाश्च प्रथममात्रकटुकं प्रागेव विरसं पश्चात् पथ्यं हितं वचनमिति शेषः उपदिशन्ति शिक्षयन्ति। येषां वचनं प्राग्विरसं पश्चात्परिणामहितं च तेषां वचनमवश्यं प्रतिपालनीयमित्यर्थः। इदानीं स्वयमभिधास्यमानवचनस्य विरसत्वेऽपि परिणामे राक्षसकल्याणोत्पादकत्वमिति बोधितमेतेनेति बोध्यम्। अप्रस्तुतमोहव्याधिवैद्यार्हमद्वचनप्रतिपालनस्यावश्यकत्वोक्त्या प्रस्तुतात्मवचनप्रतिपालनस्यावश्यकत्वावगतावप्रस्तुतप्रशंसाऽलङ्कारः। अर्हत्सुमोहव्याधिवैद्यत्वारोपाद्रुपकालङ्कारसंकीर्णः।

प्रियंवदकः—जीवसिद्धि नाम का संन्यासी है।

राक्षसः—(जोर से) उस को अनिन्दित स्वरूप बनाकर यहां लाओ।

प्रियंवदकः—अमात्य की जो आज्ञा।

(चला जाता है)।

(क्षपणक का प्रवेश)।

क्षपणकः—अज्ञानरूपी रोग के चिकित्सक और मान्यपुरुष बौद्धसंन्यासियों के उपदेश का पालन कीजिये। जो मान्यपुरुष और बौद्ध संन्यासी पहिले कठोर वचन बोलते, किन्तु पीछे हित की शिक्षा देते हैं ॥ १८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(उपसृत्य) धम्मलाहो सावका ! भोदु [धर्मलाभ उपासक ! भवतु]।

राक्षसः—भदन्त ! निरूप्यतां, तावदस्मप्रस्थानयोग्यदिवसः ।

क्षपणकः—(नाट्येन चिन्तयित्वा) सावका ! णिलूविदे मुहुत्ते । आ मज्झणादो णिव्वुत्तसत्तसकला सोहणा तिही संपुणचन्दा पुण्णमासी तुह्माणं उत्तलाए दिसाए दक्खिणां दिसं पत्थिदाणं दक्षिणदुवालिओ णक्खत्तओ ।

[उपासक ! निरूपितो मुहूर्त्तः । आ मध्याह्नात् निवृत्तसप्तशकला शोभना तिथिः सम्पूर्णचन्द्रा पौर्णमासी, युष्माकमुत्तरस्या दिशो दक्षिणां दिशं प्रस्थितानां दक्षिणद्वारिकं नक्षत्रम्] ।

आर्यावृत्तम् ॥ १८ ॥

भदन्तेति । भदन्तेति बौद्धसन्न्यासिनां सम्बोधनम् मान्येति तदर्थः । ज्योतिश्शास्त्रज्ञस्य वा नाम ज्योतिश्शास्त्रज्ञैरेवैतस्य व्यवहृतत्वात् । तावत्प्रथमम् अस्माकं प्रस्थानमस्मत्प्रस्थानं तस्य योग्यो दिवसोऽस्मत्प्रस्थानयोग्यदिवसोऽस्मद्रणयात्राऽनुरूपकालो निरूप्यतां निश्चीयतां यस्मिन्काले रणयात्रायाः प्राशस्त्यं स्यात्स कालस्त्वया निर्णेय इत्यर्थः ।

शारदपूर्णचन्द्रोत्सवनिराकरणान्नेदानीमुत्सवकालोऽपि तु संग्रामकाल इति चाणक्येनाभिधानात्तत्प्रभृतिमासद्वयं यावत् कौटिल्यराक्षसोभयप्रयुक्तारिवश्यतासाधकोपायेन भेदसाधनम् । साम्प्रतं मार्गशीर्ष्यां कुसुमपुरमवरोद्धुं जिगमिषुणा राक्षसेन प्रस्थानदिवसः पृष्टो जीवसिद्धिरभिदधाति—निरूपित इति । मुहुर्तः प्रस्थानकालो निरूपितो निर्णीतः । आमध्याह्नात् मध्याह्नकालमारभ्य निवृत्तं सप्तशकलं विष्टिभद्रात्मकः सप्तमतिथ्यंशो यस्याः सा निवृत्तसप्तशकला निवृत्तसर्वकल्याणेति पाठेऽप्रशस्ताखिलमङ्गलक्रियेत्यर्थः) सम्पूर्णश्चन्द्रो यस्यां सा सम्पूर्णचन्द्रा पूर्णेन्दु अत एव शोभना शुभप्रदा पूर्णमासी पूर्णिमा तिथिः, उत्तरस्याः कौवेर्या (अपादानप-

---

(समीप जाकर) उपासक ! आप धर्म का लाभ करें ।

राक्षसः—मान्य ! हमारी रणयात्रा के अनुकूल समय देखिए ।

क्षपणकः—(विचित्र ढङ्गसे सोचकर) । उपासक ! यात्रा का समय निश्चित कर दिया मध्याह्न समय से मङ्गलक्रिया के अयोग्य, पूर्णचन्द्रवाली शोभना पूर्णिमा तिथि है । उत्तर दिशा से दक्षिण दिशा को जानेवाले तुम लोगों को दक्षिणदिग्वर्ती नक्षत्र (तारा) है ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अवि अ,—अत्थाहिमुहे सूले, उदिदे संपुण्णमण्डले चन्दे ।
गमणं वुहस्स लग्गे, उदिदत्थमिदे अ केदुम्मि ॥१६॥

अपि च,—[अस्ताभिमुखे शूरे, उदिते सम्पूर्णमण्डले चन्द्रे ।
गमनं बुधस्य लग्ने, उदितास्तमिते च केतौ] ॥ १९ ॥

राक्षसः—भदन्त ! तिथिरेव तावन्न शुध्यति ।

रम्यन्तम्) दिशः ककुभः दक्षिणां याम्यां दिशं ककुभं प्रस्थितानां कृतयात्राणां युष्माकं भवतां दक्षिणद्वारि याम्यदिग्वर्त्ति नक्षत्रम् 'अस्ती'ति क्रियाशेषः । अद्य पौर्णमासी पञ्चचत्वारिंशन्नाडिका मध्याह्नपर्यन्तं विष्टिभद्रा नामकरणं तत्र प्रस्थानमशुभप्रदमित्यर्थः । तथाहि—न गच्छेद्विष्टिभद्रायाम् । षष्ठयष्टमीद्वादशेषु न गच्छेत्त्रिदिनस्पृशि । पूर्णिमाप्रतिपद्दर्शरिक्तावमदिनेषु चेति च निषेधवचनम् ।

प्रस्थानसमयमाह—अस्ताभिमुख इति । शूरे सूर्ये ('शूरःसूरोऽपि चादित्य' इति कोषः) । अस्ताभिमुखेऽस्ताचलशिखराश्रयिणि सति एतेन समयो दर्शितः सम्पूर्णं मण्डलं यस्य स सम्पूर्णमण्डलस्तस्मिन् संपूर्णमण्डले परिपूर्णबिम्बे 'चन्द्र निशाकरे उदिते प्रादुर्भूते सति (एतेन लग्नवलप्रदर्शनम्) बुधस्य लग्ने बुधस्वामिके राशौ कन्यालग्न इत्यर्थः (एतेन लग्नविशेषाऽभिधानम्) केतौ केतुग्रहे च उदितास्तमिते उदिताल्लग्नादस्तमिते सप्तमस्थानवर्तिनि सति गमनं प्रशस्तमिति शेषः (एतेन लग्नस्यादुष्टत्वकथनम्) पक्षान्तरे शूरे वलवति राक्षसे इत्यर्थः । अस्ताभिमुखे विनाशोन्मुखे चन्द्रे चन्द्रगुप्ते सम्पूर्णमण्डले समृद्धप्रकृतिसमुदाये उदिते उत्थिते सति बुधस्य चाणक्यस्य लग्ने सम्पर्के हेतुभूते केतौ मलयकेतौ गमनं मलयकेतुनिग्रहार्थमस्माकं प्रस्थानं युक्तमित्यर्थः । अत्र श्लेषालंकारः । आर्याछन्दः ॥ १९ ॥

और भी—सूर्य के अस्त होने पर (और) परिपूर्ण बिम्बवाले चन्द्रमा के उदय होने और बुधस्वामिक कन्यालग्न के होने पर केतु ग्रह के उदयलग्न से अस्तलग्न में जाने पर यात्रा शुभ है ॥

(पक्षान्तर में)

बलवान् (राक्षस) के विनाशोन्मुख होने और समृद्ध प्रजासमुदायवाले चन्द्रगुप्त के उठने पर चाणक्य के सम्पर्क में और मलयकेतु का उदयास्त होने पर यात्रा करना उपयुक्त है ॥ १९ ॥

राक्षसः—पहले तो तिथि ही शुद्ध नहीं है ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्षपणकः—सावकाः !—

एक्कगुणा होइ तिही, चउग्गुणे होइ णक्खत्ते ।
चउसट्ठिगुणे लग्गे, एसे जोइ सतन्त सिद्धंते ॥ २० ॥

उपासक !–[एकगुणा भवतितिथिश्चतुर्गुणं भवति नक्षत्रम् ।
चतुःषष्टिगुणं लग्नं, एतद्दृश्यते ज्यौतिषसिद्धान्ते] ॥ २० ॥

तस्माद् ! लग्गे होइ सुलग्गे कूलग्गहं पलिहलिज्जासु ।
पाविहि दीहं लाहं चन्दस्स वलेण गच्छन्ते ॥ २१ ॥
[लग्नं भवति सुलग्नं, क्रूरग्रहं परिहर आशु ।
प्राप्नुहि दीर्घं लाभं चन्द्रस्य बलेन गच्छन् सन्] ॥ २१ ॥

एकगुणेति । तिथिः एकगुणा एको गुणो यस्याः सा एकगुणा नक्षत्रं तारा चतुर्गुणं चत्वारो गुणा यस्य तच्चतुर्गुणम् तिथ्यपेक्षया नक्षत्रस्य चतुर्गुणफलदायित्वेन चतुर्गुणत्वमपेक्षितम् । लग्नं चतुःषष्टिगुणं चतुःषष्टिर्गुणा यस्य तत् चतुःषष्टिगुणं नक्षत्रापेक्षया लग्नस्य चतुःषष्टिगुणफलदायकत्वेन तत्त्वमपेक्षितम् , एष ज्योतिषतन्त्रसिद्धान्तः ज्योतिश्शास्त्रमीमांसेत्यर्थः ॥ २० ॥

लग्नमिति । लग्नं राश्युदयः । 'राशीनामुदयो लग्नं ते तु मेषवृषादयः' । इत्यमरः हीनमपि इति शेषः । सुलग्नं भवति शुभफलप्रदं भवति, दुष्टलग्नस्य शुभफलप्रदत्वे हेतुं दर्शयति—क्रूरग्रहमिति । आशु शीघ्रं क्रूरग्रहं मन्दग्रहसम्बन्धं परिहर परित्यज लग्नस्य क्रूरसम्बन्धासत्वे सुतरां शुभफलप्रदत्वं भवतीत्यर्थः ।

तारास्तत्र न गण्यन्ते यत्र चन्द्रो बलान्वितः ।
शुभे चन्द्रे प्रणश्यन्ति वृक्षा वज्रहता इव ॥
सहस्रेणाधिकः सूर्यश्चन्द्रोलक्षगुणाधिकः ।

इत्यादिवचनाच्चन्द्रस्यैव प्राबल्यबोधनात् विशेषयोगं दर्शयति—चन्द्रस्येति । चन्द्रस्येन्दोर्बलेन सम्बन्धेन गच्छन् त्वं दीर्घं चिरकालस्थायिनं लाभं

क्षपणकः—उपासक !

लग्न (मेष वृष आदि) शुभफल को देनेवाले हैं, मन्द ग्रह सम्बन्ध को शीघ्र छोड़ो । अर्थात् लग्न से दुष्ट ग्रह का सम्बन्ध न रहने पर अवश्य ही शुभफल होता है । चन्द्रमा के सम्बन्ध से जाते हुए आप चिरस्थायिनी सिद्धि को पावेंगे ॥

(पक्षान्तर में —ओ क्रूर राक्षस ! तू चाणक्य पराजयविषयक उद्योग रूप आग्रह को शीघ्र छोड़ दे (और) चन्द्रगुप्त की सेना भद्रभटादि के साथ जाता हुआ बहुत

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राक्षसः—भदन्त ! अपरैः सांवत्सरिकैसार्द्धं संवाद्यताम् ।

क्षपणकः—संवादेदु सावके । अहं णिअं गेहं गमिस्सं [संवादयतु उपासकः । अहं निजं गेहं गमिष्यामि] ।

राक्षसः—न खलु कुपितो भदन्तः ?

क्षपणकः—ण कुविदे तुह्माणं भद्न्ते [न कुपितो युष्माकं भदन्तः] ।

राक्षसः—कस्तर्हि ?

क्षपणकः—भअवं कअन्तो । जेण अत्तणो पक्खं उज्झिअ परपक्खंप्पमाणीकलोसि [भगवान् कृतान्तः । येन आत्मनः पक्षमुज्झित्वा परपक्षं प्रमाणीकरोषि] । (इति निष्क्रान्तः क्षपणकः) ।

सिद्धिं प्राप्नुहि लभस्व ।

(पक्षान्तरे)—हे क्रूर ! राक्षस ग्रहम् आग्रहं चाणक्यपराजयविषयकोद्योगमित्यर्थः । परिहर त्यज । चन्दस्य चन्द्रगुप्तस्य बलेन सैन्येन भद्रभटप्रभृतिनासह गच्छन् चलन् त्वं दीर्घं चिरकालव्यापिनं लाभं चन्द्रगुप्तामात्यपदवीं प्राप्नुहि लभस्व;अतो लग्नं दुष्टमपि सुलग्नं शुभफलदायकमित्यर्थः । अत्रापि श्लेषालङ्कारः॥२१॥

भदन्तेति । भदन्त ज्योतिषिक ! अपरैन्यैः साम्वत्सरिकैः ज्योतिश्शास्त्रविद्भिः सह सार्द्धं सम्वाद्यतां विचार्यताम् लग्नशुद्धिः प्रस्थानसमयो वेति शेषः ।

येनेति । येन त्वयाऽऽत्मनः स्वस्य पक्षः स्वपक्षस्तं स्वपक्षं ज्योतिश्शास्त्रवेत्तारं मामुज्झित्वा परित्यज्य परस्य पक्षः परपक्षस्तं परपक्षमन्यं ज्योतिस्तन्त्रविदं प्रमाणीकरोषि प्रमाणत्वेनाङ्गीकरोषि अतो भगवान् कृतान्तो ज्योतिस्तन्त्रसिद्धा-

---

काल तक चन्द्रगुप्त के अमात्यपदरूपी सिद्धि को लाभ करो । इस से दुष्ट लग्न भी शुभ फल देनेवाला होगा ॥ २१ ॥

राक्षसः—अन्य ज्योतिषियों के साथ भी परामर्श कर लीजिए ।

क्षपणकः—आप परामर्श कीजिये । मैं अपने घर को जाता हूँ ।

राक्षसः—ज्योतिषीजी ! आप क्रुद्ध हो गये क्या ?

क्षपणकः—आप लोगों पर ज्योतिषी नहीं क्रुद्ध हैं ।

राक्षसः—तब कौन ?

क्षपणकः—जिस से कि आप ज्योषिशास्त्र के वेत्ता हम को छोड़ कर अन्य ज्योतिषी को प्रमाण मानते हैं, इस लिये ज्योतिषशास्त्र का सिद्धान्त ही आप पर क्रुद्ध हैं ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राक्षसः—प्रियंवदक ! ज्ञायतां का वेला वर्त्तत इति ।

प्रियंवदकः—जं अमच्चो आणवेदि । (इति निष्क्रम्य पुनः प्रविश्य च) अत्थाहिलासी भअवं सुले [यत् अमात्य आज्ञापयति । अस्ताभिलाषी भगवान् सूर्यः । (पक्षान्तरीयसंस्कृतं यथा—"अर्थाभिलाषी भगवान् शूरः" इति)]।

राक्षसः—(आसनादुत्थाय विलोक्य च) अये । अस्ताभिलाषी भगवान् सहस्रदीधितिः । तथाहि,—

आविर्भूतानुरागाः क्षणमुदयगिरेरुज्जिहानस्य भानोः

न्तो व्याकुपितः । (पक्षान्तरे)—येन त्वयाऽऽत्मपक्षं नन्दवंशोद्भवं मौर्यमुज्झित्वा परित्यज्य परपक्षं शत्रुपक्षं मलयकेतुं प्रमाणीकरोषि आत्मीयत्वेन जानासि अतो भगवान् कृतान्तो यमः व्याकुपितः इति गूढार्थः । 'कृतान्तो यमसिद्धान्तावि' त्यमरः ।

ज्ञायतामिति । का वेला कियान् कालो वर्ततेऽस्ति ।

काले च सीमायामब्धेः कूलविकारयोरिति मेदिनी ।

अस्ताभिलाषीति । सूरः सूर्योऽस्ताभिलाषी अस्ताचलगमनोत्सुकः । यद्वा सूरो राक्षसोऽस्ताभिलाषी मौर्यसाचिव्यं प्राप्तुकाम इति च ध्वन्यर्थः ।

प्रियंवदोक्तिमन्यथयति राक्षसः—अस्ताभिलाषी सहस्रदीधितिरिति । अस्ताभिलाषी सूर इत्युक्तौ दूरशब्दस्यात्थेतिप्राकृतशब्दस्य चानेकार्थत्वमतोऽस्ताभिलाषी सहस्रदीधितिरित्युक्त्या तदन्यथाकरणम् ।

आविर्भूतानुरागा इति । एते इमे उपवनतरवः आरामवृक्षाः । 'आरामः

(पक्षान्तर में) आप आत्मपक्ष (नन्दवंशोद्भव) मौर्य को छोड़कर परपक्ष (शत्रुपक्ष मलयकेतु) को प्रमाण समझते हैं, इसलिये भगवान् कृतान्त (यम) आप पर क्रुद्ध हैं ।

(यह कहकर क्षपणक चला जाता है) ।

राक्षसः—प्रियंवदक ! देखो क्या समय है ?

प्रियंवदकः—अमात्य की जो आज्ञा । (इतना कहकर बाहर जा फिर प्रवेश कर) भगवान् सूर्य अस्ताचल पर जाने की तैयारी हैं । (पक्षान्तरमें) भगवान् शूर राक्षस अर्थाभिलाषी अर्थात् चन्द्रगुप्त के मन्त्रिपद को चाहनेवाले हैं ।

राक्षसः—(आसन से उठ और देखकर) आह ! सचमुच सूर्य भगवान् अस्ताचल गमनोत्सुक हो रहे हैं ।

कैसे कि—जिस प्रकार सेवा करनेवाले नौकर धनहीन प्रभु को छोड़ देते हैं, उसी

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पत्रच्छायैः पुरस्तादुपवनतरवो दूरमाश्वेव गत्वा ।
एते तस्मिन् निवृत्ताः पुनरपरककुप्प्रान्तपर्यस्तबिम्बे
प्रायो भृत्यास्त्यजन्ति प्रचलितविभवं स्वामिनं सेवमानाः॥ २२॥

(इति निष्क्रान्ताः सर्वे)

इति मुद्राराक्षसे चतुर्थोऽङ्कः ॥ ४ ॥

स्यादुपवनं कृत्रिमं वनमेव यत्' । इत्यमरः क्षणं मुहूर्तं व्याप्योदयकाल इत्यर्थः । आविर्भूतोऽनुरागो येषां ते आविर्भूतानुरागाः सञ्जातप्रीतयश्च, उदयगिरेः उदयपर्वतात् उज्जिहानस्योद्गच्छतो भानोः सूर्यस्य परस्तादग्रे पर्णच्छायैः पत्रच्छायारूपेण आशु शीघ्रमेव दूरं गत्वा पुनर्भूयः तस्मिन् भानौ अपरा चासौ ककुप् अपरककुप् तस्याः प्रान्ते पर्यस्तमवलम्बितं विम्वं मण्डलं यस्य स तथोक्तस्तस्मिन्नपरककुप्प्रान्तपर्यस्तबिम्बे इतरदिक्शृङ्गावलम्बिनि अस्ताचलशिखराश्रयिणीति यावत् । सति निवृत्ताः परावृत्ताः, सेवमानाः सेवां कुर्वन्तो भृत्याः प्रचलितविभवं विनष्टैश्वर्यं स्वामिनं प्रभुं सेवमानाः सेवका विनष्टसम्पदं तं परित्यजन्ति तथोपवनतरवः उदीयमानस्य भानोरग्रे पर्णच्छायारूपेण गत्वाऽस्ताचलाभिलाषिणं तं परित्यजन्तीवेति भावः । चतुर्थपादप्रतिपाद्यसामान्यार्थेन पादत्रयप्रतिपाद्यविशेषार्थस्य समर्थनादत्र सामान्येन विशेषसमर्थनात्मकोऽर्थान्तरन्यासोऽलङ्कारः । तदुक्तं साहित्यदर्पणे—

सामान्यं वा विशेषेण विशेषस्तेन वा यदि ।
कार्यञ्च कारणेनेदं कार्येण च समर्थ्यते ।
साधर्म्येणेतरेणार्थान्तरन्यासोऽष्टधा ततः ॥

स चाऽर्थान्तरन्यासः उपवनतरवो भानावस्ताचलशिखरावलम्बिनि सति प्रतिनिवृत्ता इवेत्युत्प्रेक्षणादिवशब्दाप्रयोगेण प्रतीयमानयोत्प्रेक्षयोत्थापितः । स्रग्धरावृत्तम् ॥ २२ ॥

इत्थं नियताप्तिप्रकरीरूपो विमर्शसन्धिः तस्याङ्गान्यपवादादीनि च निरूपितानि ।

इति मुद्राराक्षसभावबोधिनीव्याख्यायां चतुर्थोऽङ्कः ।

प्रकार उत्पन्न अनुरागवाले ये उपवन के वृक्ष उदयाचल को छोड़ते हुए सूर्य भगवान् के आगे पत्रों की छायाद्वारा शीघ्र ही दूर जाकर फिर सूर्य भगवान के अस्ताचलावलम्बी होने पर लौट आये ॥ २२ ॥

इति आशुबोधिनी व्याख्यायां चतुर्थोऽङ्कः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizaqtion by eGangotri

पञ्चमोऽङ्कः ।

(ततः प्रविशति लेखमलङ्करणस्थगिकाञ्च मुद्रितामादाय सिद्धार्थकः)

सिद्धार्थकः—ही हीमाणहे हीमाणहे !!—[आश्चर्यम् आश्चर्यम् !]—

बुद्धिजलणिज्झरेहिं सिञ्चन्ती देशकालकलसेहिं ।
दंसइस्सदि कज्जफलं गुरुअं चाणक्कणीदिलदा ॥१॥

वीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम् ।
ऐकार्थ्यमुपनीयन्ते यत्र निर्वहणं हि तत् ॥

इत्युक्तलक्षणेन फलागमकार्योभययोगो निर्वहणसन्धिरङ्कत्रयेणारभ्यते । वीजवन्तः सञ्जातवीजाः मुखसन्ध्यादीनामर्था आरम्भवोजयोगादयो यथायथं तत्तत्प्रसङ्गेन विप्रकीर्णा वैशद्येन यदर्थं प्रक्रान्ताः सन्तः ऐकार्थ्यमुपनीयन्ते तस्य फलागमयोगिनः कार्यस्य यत्र निर्वाहः स निर्वहणसन्धिः । कार्यफलागमद्वयमभिधास्ये । अङ्गानि चास्य फलागमानुरूपेण कर्तव्यानि । तदुक्तम्—

सन्धिर्विरोधो ग्रथनं निर्णयः परिभाषणम् ।
प्रसादानन्दसमयाः कृत्याभाषोपगूहनम् ।
पूर्वभावोपसंहारौ प्रशस्तिश्च चतुर्दश ॥ इति ।

तत इति । ततस्तदनन्तरं राक्षसप्रियंवदकादिनिष्क्रमणानन्तरमित्यर्थः । सिद्धार्थको मलयकेतुमित्रवेशी चाणक्यप्रणिधिः लेखं पत्रं मुद्रा सञ्जाताऽस्या इति मद्रिता तां मुद्रितां सञ्जातमुद्रां राक्षसाङ्गुलिमुद्राङ्कितामित्यर्थः । अलङ्करणस्थगिकां भूषणपेटिकामादाय गृहीत्वा प्रविशति रङ्गस्थानमिति शेषः ।

ही हीमाणहे इति । आश्चर्यसूचकोऽयं निपातसमुदायः, वीप्सायां द्विरुक्तिः।

बुद्धिजलेति । बुद्धय एव जलानि बुद्धिजलानि तेषां निर्झरा येभ्यस्ते तथोक्तास्तैर्बुद्धिजलनिर्झरैः धीपयःप्रवाहैः देशश्च कालश्च देशकालौ तावेव कलशास्तैर्देशकलकालशैः स्थानसमयकुम्भैः सिच्यमाना आर्द्रीक्रियमाणा चाणक्यस्य नीतिश्चाणक्यनीतिः सैव लता चाणक्यनीतिलता कौटिल्यनयव्रततिः गुरुकमधिकं कार्यफ-

---

(राक्षस की अङ्गुलिमुद्रा से मुद्रित लेख और अलङ्करण की पेटी लिये सिद्धार्थक का प्रवेश) ।

सिद्धार्थकः—आश्चर्य है ! आश्चर्य !!

देश-कालरूपी कलशों से तथा बुद्धिरूपी जलप्रवाहों से सींची हुई चाणक्य की

 अथ निर्वहणसन्धि रिति आचार्योपाध्यायाः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[बुद्धिजलनिर्झरैः सिच्यमाना देशकालकलशैः ।
दर्शयिष्यति कार्यफलं गुरुकं चाणक्यनीतिलता] ॥१॥

गहिदो मए अज्जचाणक्कण पढमलेहिदो लेहो, अमच्चरक्खसस्स मुद्दालंच्छिदो। तस्स ज्जेव मुद्दालंच्छिदा इअं आहरणपेड़िआ। चलिदेह्मि किल पाड़लिउत्तं, ता जाव गच्छह्मि (परिक्रम्य अवलोक्य च) कहं क्खवणआ आअच्छदि? जाव मे असउणभूदं इमस्स दंसणं, ता आदिच्चदंसणेण पड़िहणामि [गृहीतो मयाऽऽर्यचाणक्येन प्रथमलेखितो लेखः, अमात्यराक्षसस्य मुद्रालाञ्छितः। तस्यैव मुद्रालाञ्छितेयमाभरणपेटिका। चलितोऽस्मि किल पाटलिपुत्रं, तद्यावत् गच्छामि। कथं क्षपणक आगच्छति? यावन्मेऽशकुनभूतमस्य दर्शनं, तस्मादादित्यदर्शनेन प्रतिहन्मि]।

लमीप्सितनिष्पत्त्यात्मकं दर्शयिष्यति प्रकटयिष्यति। उपयुक्तस्थाने सुसमये विवेकपुरस्सरं क्रियमाणं कार्यं सफलं भवत्येवेति भावः। प्रथमाङ्के शकटदासनामकायस्थद्वारा चाणक्येन लिखितलेखस्य राक्षसभेदात्मकं फलमचिरमेव भविष्यतीति गूढाभिप्रायः। बुद्धयो जलानीव बुद्धय एव जलानीति वा देशकालो कलशा इव देशकालावेव कलशा वा चाणक्यनीतिर्लतेव चाणक्यनीतिरेव लतेति वेति तत्तत्पदेषूभयविधसमाससम्भवात् चाणक्यनीतौ लतात्वारोपेण तदङ्गबुद्धौ जलत्वारोपणादुपमासाङ्गरूपकयोः सन्देहसङ्करः ॥ १ ॥

गृहीत इति। मया आर्यचाणक्येन पूज्यकौटिल्येन प्रथमलेखितः प्रथमाङ्के शकटदासेन लेखितः अमात्यराक्षसस्य मुद्रालाञ्छितः राक्षसनामाङ्कितमुद्राङ्कितो लेखः पत्रं गृहीतं तस्यैवाऽमात्यराक्षसस्यैव मुद्रालाञ्छिताऽङ्गुलिमुद्राचिह्निता इयं प्रत्यक्षदृश्यमानाऽऽभरणपेटिका अलङ्करणमञ्जूषा। किलेत्यव्ययमलीकार्थकम् पाटलिपुत्रं तदाख्यनगरं चलितोऽस्मि मत्पाटलिपुत्रगमनमलीकमित्यर्थः। या-

---

नीतिरूपी लता विशेष फल को दिखावेगी ॥ १ ॥

मैंने आर्यचाणक्य से शकटदास के द्वारा लिखा गया और अमात्य राक्षस की मुद्रा से चिह्नित यह लेख ले लिया है। अमात्य राक्षस की ही मुद्रा से चिह्नित यह अलङ्करण की पेटी है। मैं पाटलिपुत्र जाने को तय्यार हूं। इस लिये जाता हूं। (घूम कर और देखकर)। क्या क्षपणक आता है? पहले ही मुझ को इस का अनिष्टसूचक दर्शन हुआ। इस लिये सूर्य भगवान् का दर्शन करके इस अनिष्ट दर्शनजनित दोष को हटाता हूं।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(ततः प्रविशति क्षपणकः) ।

क्षपणकः—अलिहन्ताणं प्पणमामो, जे दे गम्भीलदाए बुद्धीए ।
लोउत्तलेहि लोए सिद्धिं मग्गेहिं मग्गन्ति ॥२॥
[अर्हतां प्रणमामो ये ते गम्भीरतया बुद्धेः ।
लोकोत्तरैर्लोके सिद्धिं मार्गैर्मार्गयन्ति] ॥ २ ॥

सिद्धार्थकः—भदन्त ! प्पणमामि [भदन्त ! प्रणमामि] ।

वत् प्रथमम् मे अशकुनभूतम् अमङ्गलसूचकम् अस्य क्षपणकस्य बौद्धसंन्यासिनः दर्शनमवलोकनं जातमिति शेषः, तत्तस्मादादित्यदर्शनेन सूर्यावलोकनेन प्रतिहन्मि अशकुनभूतक्षपणकदर्शनजन्यामाङ्गल्यं दूरीकरोमीत्यर्थः । एतदशकुनभूतदर्शनं न मे जात्वशुभफलजनकमादित्यदर्शनेन तत्परिहारात् पाटलिपुत्रगमनस्य कपटरूपत्वेन निर्वाधगमनेन ममाभीष्टसिद्धयभावेन च गमनप्रतिबन्धस्येष्टत्वाद्वेति भावः । (इदं वीजोपगमनं सन्धिनामाङ्गम्) ।

अर्हतामिति । (अर्हतामिति कर्मणः शेषत्वविवक्षायां षष्ठी) अर्हतो बौद्धसंन्यासिनः मान्यांश्च प्रणमामो नमस्कुर्मः, ये ते अर्हन्तो मान्याश्च बुद्धेः मत्यादिपञ्चात्मकज्ञानस्य (तन्मते मतिश्रुतावधिमनः पर्यायकेवलेति पञ्चानां ज्ञानत्वाभ्युपगमात्) गम्भीरतया दुरूहतया (पक्षे) बुद्धेर्धियो गम्भीरतया धीरतया लोके संसारे लोकोत्तरैः लोकातिगैः प्रशस्तैरित्यर्थः । मार्गैः मोक्षसाधकव्यवहारैः (पक्षे) कार्यसाधकोपायैः सिद्धिं मोक्षं (पक्षे) कार्यसाफल्यं मार्गयन्ति अन्वेषयन्ति (पक्षे) साधयन्ति । एतेन चाणक्यनीतिगाम्भीर्यस्य लोकोत्कृष्टकार्यनिष्पादकत्वं चाणक्यस्यैव प्रणतियोग्यत्वञ्चध्वनितम् अप्रस्तुतबौद्धसन्न्यासिस्तुत्या प्रस्तुतचाणक्यस्तुत्यवगमात् बहूनाम्पदानां श्लिष्टार्थत्वाच्चाप्रस्तुतप्रशंसाश्लेषयोः सङ्करः । आर्या वृत्तम् ॥ २ ॥

(क्षपणक का प्रवेश)

क्षपणकः—हम बौद्धसंन्यासियों को प्रणाम करते हैं, जो बौद्ध संन्यासीयों मत्यादि पञ्चकात्मक ज्ञान की गम्भीरता के कारण प्रशस्त मोक्षसाधक व्यवहारों द्वारा मोक्ष का साधन करते हैं ॥

(दूसरा अर्थ यह है)—

हमलोग मान्यों को प्रणाम करते हैं, जो मान्य बुद्धि की धीरता के कारण प्रशस्त कार्यसाधक उपायों द्वारा अपने कार्यको सफल करते हैं ॥ २ ॥

सिद्धार्थकः—भदन्त ! प्रणाम करता हूँ ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्षपणकः—सावका ! धम्मलाहो दे होदु । (सिद्धार्थकं निर्वर्ण्य) सावका ! पत्थाणसमुव्वहणे किद्व्ववसाअं विअ दे हिअअं पेक्खामि [उपासक ! धर्म्मलाभस्ते भवतु । उपासक ! प्रस्थानसमुद्वहने कृतव्यवसायमिव ते हृदयं पश्यामि] ।

सिद्धार्थकः—कहं भदन्तो जाणादि ? [कथं भदन्तो जानाति ?] ।

क्षपणकः—सावका ! किं एत्थ जाणिदव्वं ? एसो दे देसकुसलो सउणो करगदो लेहो अ सूचेदि [उपासक ! किमत्र ज्ञातव्यम् ? ननु एष ते मार्गादेशकुशलः शकुनः करगतो लेखश्च सूचयति] ।

सिद्धार्थकः—जाणिदं भदन्तेण देसन्तलं चलिदोह्मि । ता कधेदु भदन्तो कीदिसो अज्ज दिअसो ? [ज्ञातं भदन्तेन देशान्तरं चलितोऽस्मि । तत् कथयतु भदन्त । कीदृशोऽद्य दिवसः ?] ।

क्षपणकः—(विहस्य) सावका ! मुण्डिअ मुण्डो तुमं णक्खत्ताइं पुच्छसि ? [उपासक ! मुण्डितमुण्डस्त्वं नक्षत्राणि पृच्छसि ?] ।

प्रस्थानेति । प्रस्थानसमुद्वहने यात्रासम्पादने विषये इत्यर्थः । कृतो व्यवसायो येन तत्कृतव्यवसायं कृतोद्योगमिव ते तव हृदयं चेतः पश्यामि प्रेक्षे ।

किमत्रेति । अत्रास्मिन् विषये किं ज्ञातव्यमवगन्तव्यमस्तीति शेषः। एषोऽयमेव मार्गस्यादेशो मार्गादेशस्तस्मिन्कुशलो मार्गादेशकुशलोऽध्वसूचननिपुणः शकुनः प्रस्थानसामयिकमुहूर्तविशेष इत्यर्थः। करं गतः प्राप्तः करगतो हस्तस्थितो लेखः पत्रं च सूचयति ज्ञापयति । (मार्गनौकर्णधार इति पाठे मार्ग एव नौ तत्र कर्णधारो नाविक एव लेख इत्यर्थः) ।

मुण्डितमुण्ड इति । मुण्डितो लूनकेशो मुण्डो यस्य स मुण्डितमुण्डःलूनकेशमस्तकः सन् नक्षत्राणि प्रस्थानदिवसं पृच्छसि जिज्ञाससे मुण्डानात्प्राक् नक्षत्रप्रा-

---

क्षपणकः—तुम को धर्म का लाभ हो । (सिद्धार्थक को देख कर) उपासक! मैं तुम्हें गमनात्सुक की तरह देखता हूँ ।

सिद्धार्थकः—आप कैसे जानते हैं ?

क्षपणकः—इस में जानना क्या है ? मार्ग बतानेवाला तुम्हारा यह शकुन और हस्तस्थित लेख ही बताता है ।

सिद्धार्थकः—मैं देशान्तर जाने को तैयार हूँ। यह आप ने जाना तो अब आप यह भी कहिये कि आजका दिन कैसा है ?

क्षपणकः—(हंस कर) उपासक ! माथा मुड़ा कर यात्राका दिन पूछते हो ?

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सिद्धार्थकः—भदन्त ! सम्पदं पि किं जादं ? ता कधेहि, जइ अत्तणो अणुऊलं भविस्सदि, ता गमिस्सं, अणधा णिवत्तिस्सं [भदन्त ! साम्प्रतमपि किं जातम् ? तत् कथय, यद्यात्मनोऽनुकूलं भवेत्, तदा गमिष्यामि, अन्यथा निवर्तिष्ये] ।

क्षपणकः—सावकाणं सम्पदं एदस्सिं मलयकेदुकडए अणुऊलेण अणणुऊलेण वा, अगहीदमुद्देण ण गच्छीअदि [उपासकानां साम्प्रतमेतस्मिन् मलयकेतुकटके अनुकूलेनाऽननुकूलेन वा, अगृहीतमुद्रेण न गम्यते] ।

सिद्धार्थकः—भदन्त ! कहेहि कुदो क्खु अअं ? [भदन्त ! कथय कुतः खल्वयम् ?] ।

क्षपणकः—सावका ! णिसामेहि, पढमं दाव एत्थ मलअकेदुकडए लोअस्स अणिवालिअणिक्कमणप्पवेसो आसी । दाणीं इदो पच्चास-

---

शस्त्यपृच्छेव प्रस्थानात्प्राक् दिवसप्राशस्त्यजिज्ञासा युक्ता पश्चान्निष्फलैव सेत्यर्थः ।

साम्प्रतमिति । साम्प्रतम् अधुना किं जातं भूतमित्यर्थः । नाहं प्रस्थितोऽस्मि किन्तु प्रस्थातुकाम इति साम्प्रतमपि प्रस्थानयोग्यदिवसनिर्णये न कोऽपि बाधक इति भावः ।

साम्प्रतमिति । अनुकूलेन प्रशस्तेन अननुकूलेनाऽप्रशस्तेन वा प्रस्थानदिवसेन न किञ्चित्प्रयोजनं यतः साम्प्रतमिदानीम् एतस्मिन् मलयकेतुकटके मलयकेतुशिबिरे (सैन्यावासे) अनुगृहीता मुद्रा येन सोऽगृहीतमुद्रस्तेनाऽगृहीतमुद्रेण अप्राप्तमुद्राङ्केन पुरुषेणेति शेषः । न गम्यते न प्रविश्यते । प्राप्तराक्षसनामाङ्कितमुद्राङ्कानां पुरुषाणां मलयकेतुशिविरेऽप्रवेशात्तव प्रस्थानदिवसाऽऽनुकूल्याऽऽनुकूल्यजिज्ञासा व्यर्थैवेति भावः ।

कथयेति । कुतः कस्माद्दिवसादारभ्य अयं नियमो जात इत्यर्थः ।

निशामयेति । निशामय आकर्णय त्वमिति शेषः । प्रथमं तावत् (तावच्छब्दो वाक्यालंकारे) पूर्वम् मलयकेतुकटके मलयकेतुशिबिरे लोकस्य जनस्य

सिद्धार्थकः—भदन्त ! अभी भी क्या हुआ ! कहिए, यदि अपने अनुकूल होगा तो जाऊँगा, नहीं तो लौट जाऊंगा ।

क्षपणकः—उपासकों को प्रशस्त अथवा अप्रशस्त यात्रा आदि से क्या प्रयोजन? अभी इस मलयकेतु के कटक में बिना मुद्रावाले पुरुष नहीं जा सकते ।

सिद्धार्थकः—उपासक ! पहले तो मलयकेतु के कटक में लोगों का जानाआना

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पणे कुसुमउरे, ण कोवि अमुद्दालंच्छिदो णिक्कमिदं प्पविसिदुं वा अणुमोदीअदि। ता जइ भाउराअणस्स मुद्दालंच्छिदोसि, तदो गच्छ वीसत्थो, अण्णधा णिव्वत्तिअ णिउक्कण्ठं चिट्ठ। मा तुमं गुम्मट्ठाणाधिवेहि संजमिदकलचलणो राअउलं प्पवेसीअसि [उपासक! निशामय, प्रथमं तावदत्र मलयकेतुकटके लोकस्यानिवारितनिष्क्रमणप्रवेशावास्ताम् इदानीमितः प्रत्यासन्ने कुसुमपुरे, न कोऽप्यमुद्रालाञ्छितो निष्क्रमितुं प्रवेष्टुं वाऽनुमोद्यते। तद् यदि भागुरायणस्य मुद्रालाञ्छितोऽसि, तदा गच्छ विश्वस्तः, अन्यथा निवृत्य निरुत्कण्ठं तिष्ठ। मा त्वं गुल्मस्थानाधिपैः संयमितकरचरणो राजकुलं प्रवेश्यसे]।

सिद्धार्थकः—किं ण आणादि भदन्तो, जधा अमच्चरक्खसस्स केलिअरो अन्तिओ सिद्धत्थओ अहं त्ति? ता अमुद्दालंच्छिदं पि मं णिक्कमन्तं कस्से सत्ती णिवारेदुं? [किं न जानाति भदन्तः, यथा अमात्यराक्षसस्य केलिकरोऽन्तिकः सिद्धार्थकोऽहमिति? तद् अमुद्रालाञ्छितमपि मां निष्क्रा-

---

अनिवारितनिष्क्रमणप्रवेशावप्रतिषिद्धनिर्गमागमावास्ताम्। इदानीं साम्प्रतम् इतः प्रत्यासन्ने अस्मान्निकटे कुसुमपुरे तन्नामनगरे न मुद्रालाञ्छितोऽमुद्रालाञ्छितः अप्राप्तनिष्क्रमणप्रवेशनिदेशःकोऽपि पुरुषः निष्क्रमितुं निर्गन्तुं प्रवेष्टुमन्तर्गन्तुं वा नानुमोद्यते नानुमन्यते। तत्तस्माद्यदि चेत् भागुरायणस्य मलयकेतुमित्रवेशिनश्चाणाक्यप्रणिधेर्मुद्रालाछितो मुद्राङ्कितोऽसि त्वमिति शेषः, तदा विश्वस्तो निर्भीकः सन् गच्छ याहि, अन्यथा मुद्राङ्काऽभावे निवृत्य परावृत्य निरुत्कण्ठं निरुत्सुकं यथा स्यात्तथा तिष्ठ वर्तस्व। गुल्मस्थानाधिपैः प्रहरिभिः संयमितकरचरणः सम्बद्धहस्तपादः सन् त्वं राजकुलं नृपालयं मा प्रवेश्यसे अन्तर्नीयसे। अमुद्राङ्कस्य तत्र गमने राजकीयशासनागारे हस्तपादौ संयम्य वासः स्यादिति भावः।

किमिति। भदन्तो ज्योतिषिको भवान् किं न जानाति किं नावगच्छति, यथा यत् अमात्यराक्षसस्य मन्त्रिराक्षसस्य केलिकरः हास्यकरः रहस्यवित् अन्ति-

---

विना रोक का था। यहां से कुसुमपुर के समीप रहने पर विना मुद्रा चिह्नवाला कोई भी मनुष्य नहीं आ जा सकता। इस लिये यदि भागुरायण के मुद्राचिह्नवाले होओ तो विश्वस्त होकर जाओ। नहीं तो लौटकर चुप मार के बैठो। पहरेदारों से हाथ-पैर बन्धवाकर तुम राजदरबार में मत जाओ।

सिद्धार्थकः—क्या आप नहीं जानते कि अमात्य राक्षसका रहस्यवेत्ता और समीप में रहनेवाला मैं सिद्धार्थक हूं। इस लिये मुद्राचिह्न लिये विना भी मुझ को रोकने

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अन्तं कस्य शक्तिर्निवारयितुम् ?] ।

क्षपणकः—सावका ! रक्खसस्स पिसाचस्स वा केलिअरो होहि । णत्थि उण दे अमुद्दालंच्छिदस्स इदो णिक्कमणोवाओ [उपासक । राक्षसस्य पिशाचस्य वा केलिकरो भव । नास्ति पुनस्ते अमुद्रालाञ्छितस्य निष्क्रमणोपायः] ।

सिद्धार्थकः—भदन्त ! ण कुप्य, भण मे कज्जसिद्धी होदुत्ति [भदन्त ! न कुप्य, भण मे कार्य्यसिद्धिर्भवतु इति] ।

क्षपणकः—सावका ! गच्छ होदु दे कज्जसिद्धी । अहंपि भागुरा अणादो पाड़लिउत्तं गन्तुं मुद्दं पडिच्छेमि [उपासक गच्छ, भवतु ते कार्य्यसिद्धिः । अहमपि भागुरायणात् पाटलिपुत्रं गन्तुं मुद्रां प्रतीच्छामि] ।

(इत्युभौ निष्क्रान्तौ)

को निकटवर्त्ती अहं सिद्धार्थको नामेति, तत्तस्मात्कारणात् अमुद्रालाञ्छितमलब्धाङ्गुलिमुद्राङ्कनमपि निष्क्रामन्तं निर्गच्छन्तं मां निवारयितुं प्रतिषेद्धुं कस्य जनस्येति शेषः । शक्तिः सामर्थ्यमस्तीति शेषः ।

राक्षसस्येति । राक्षसस्य रक्षसो निशाचरस्येत्यर्थः । वाऽथवा पिशाचस्य भूतयोनेः । केलिकरो निकटवर्त्तीत्यर्थः । भव वर्त्तताम् पुनर्भूयः अमुद्रालाञ्छितस्याऽऽप्राप्तमुद्राङ्कनस्य ते तव इतः कुसुमपुरात् निष्क्रमणोपायो निर्गमोद्योगो नास्ति न वर्तते ।

अहंमपीति । अहमपि भागुरायणात् मुद्रामंगुलिमुद्रां याचे भिक्षे. ईप्सितकार्यसम्पादनायेति शेषः । मुद्रायाचककपटेन भागुरायणम्प्रति गमिष्यामीति भावः । (इदं कार्यमार्गणं नाम विरोधोऽङ्गम्) । निष्क्रान्तौ रङ्गशालातः सिद्धार्थकक्षपणकौ निर्गतावित्यर्थः ।

का किस का शक्ति है ?

क्षपणकः—उपासक ! तू राक्षस अथवा पिशाच किसी का भी रहस्यवेत्ता क्यों न हो, पर विना मुद्राचिन्ह के तेरे भीतर जानेका कोई उपाय नहीं है ।

सिद्धार्थकः—भदन्त ! क्रोध मत करो, यह कहो कि कार्यसिद्धि हो ।

क्षपणकः—उपासक ! जाओ, तुम्हारे कार्य की सिद्धि हो । मैं भी पाटलीपुत्र जाने के लिये भागुरायण से मुद्रा लेने जाता हूं ।

(दोनों चले जाते हैं)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(इति प्रवेशकः)

(ततः प्रविशति पुरुषेणानुगम्यमानो भागुरायणः)

भागुरायणः—(आत्मगतम्) अहो !! विचित्रतार्य्यचाणक्यनीतेः ।

कुतः ?—मुहुर्लक्ष्योद्भेदा मुहुरधिगमाभावगहना
मुहुः सम्पूर्णाङ्गी, मुहुरतिकृशा कार्य्यवशतः ।
मुहुर्भ्रश्यद्बीजा, मुहुरपि बहुप्रापितफले-
त्यहो !! चित्राकारा नियतिरिव नीतिर्नयविदः ॥३॥

प्रवेशक इति । वृत्ताश्च वर्त्तिष्यमाणाश्च वृत्तवर्त्तिष्यमाणास्तेषां वृत्तवर्त्तिष्यमाणानां प्रथमाङ्के चाणक्यलेखितपत्रवृत्तान्तानां वृत्तानां, भागुरायणसकाशान्मुद्रायाचनादिवृत्तान्तानां वर्त्तिष्यमाणानां च कथांशानां नीचपात्राभ्यां क्षपणकसिद्धार्थकाभ्यां प्रयोजितत्वात् संसूचनादयं प्रवेशक इत्यर्थः । तदुक्तम् ।

वृत्तवर्त्तिष्यमाणानां कथांशानां निदर्शकः ।
प्रवेशकस्तु नाट्येऽङ्के नीचपात्रप्रयोजितः ॥ इति ।

मुहुरिति । मुहुर्वारंवारं लक्ष्योऽनुमेय उद्भेदः आविर्भावो यस्याः सा लक्ष्योद्भेदा अनुमेयाविर्भावा मुहुः कदाचित् अधिगमस्याभावोऽधिगमाभावस्तेन गहना अधिगमाभावगहना ज्ञानाभावदुर्बोधा मुहुः कदाचित् सम्पूर्णान्यङ्गानि यस्याः सा सम्पूर्णाङ्गी प्रचितावयवा मुहुः कदाचित् कार्यवशतः कृत्यानुरोधात् अतिकृशाऽतिक्षीणा स्तोकरूपगम्येत्यर्थः । मुहुः कदाचित् भ्रश्यद्बीजं यस्याः सा भ्रश्यद्बीजा नश्यत्कारणा मुहुः कदाचिदपि बहु निशेषं यथा स्यात्तथा प्रापितानि फलानि यथा सा बहुप्रापितफला साफाल्यमुपगता नियतिर्दैवमिव पक्षान्तरे मुहुर्लक्ष्योद्भेदा मुखसन्धावल्पोद्दिष्टा सती बहुधा विस्तारिणी मुहुरधिगमाभावगहना प्रतिमुखे लक्ष्यालक्ष्यव्यक्तेर्दुर्बोधाऽतिक्षीणा च मुहुः सम्पूर्णाङ्गी विमर्शे बीजस्य स्पष्टदर्शनात्परिपूर्णावयवा मुहुरतिकृशा कार्यवशतः, प्रतिमुखे लक्ष्यालक्ष्यव्यक्तेरतिक्षीणा च मुहुर्भ्रश्य-

---

इति प्रवेशकः ।

(पुरुष के साथ भागुरायण का प्रवेश) ।

भागुरायणः—(मनही मन) आश्चर्य है ? आर्य चाणक्य नीति बड़ी विचित्र है ।

कैसे कि—कभी तो अनुमान से जानने योग्य कभी ज्ञानाऽभाव के कारण दुर्ज्ञेय, कभी सर्वावयवसम्पन्न कभी कार्य के अनुरोध से अत्यन्त अल्प, कभी नष्ट बीज वाली और कभी बहुत फलवाली नीतिज्ञ पुरुषों की नीति भाग्य की तरह विचित्रहै।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(प्रकाशम्) भद्र भासुरक ! न मां दूरीभवन्तमिच्छति कुमारः । अतोऽस्मिन्नेवास्थानमण्डपे विन्यस्यतामासनम् ।

पुरुषः—एदं आसनं, उपविसदु अज्जो [एतदासनम्, उपविशत्वार्य्यः] ।

भागुरायणः—(उपविश्य) भद्र भासुरक ! यः कश्चिन्मुद्रार्थी द्रष्टुमिच्छति, स त्वया प्रवेशयितव्यः ।

द्बीजा कदाचिद्दृष्टनष्टान्वेषणान्नश्यदुद्योगा मुहुरपि बहुप्रापितफला निर्वहणे सर्वार्थोपसंहारादुपगतसाफल्या नयविदो नीतिज्ञस्य नीतिर्नयः चित्राकारा बहुप्रकारा अहो आश्चर्यम् । यथा विधे वैचित्र्यं तथा नीतिज्ञनीतेरिति भावः । असकृन्मुहुःशब्दपाठादनवीकृतत्वदोषः । काव्यलिङ्गानुप्राणितोपमाऽप्रस्तुतप्रशंसयोः संसृष्टिः । नियति-नीत्योरुपमानोपमेययोरिवशब्दस्यौपम्यवाचकस्य चित्राकारत्वरूपसाधारण धर्मस्य चोपादानाच्छ्रौती पूर्णोपमा, लक्ष्योद्भेदादीनां चित्राकारत्वे हेतुत्वेन काव्यलिङ्गम्, सामान्यरूपेण नीतिज्ञनीत्याधिक्यकथनाद्विशेषरूपेण चाणक्यनीत्याधिक्यप्रतीतेरप्रस्तुतप्रशंसेत्यलङ्कारत्रयसंघटनप्रकारः । प्रसादगुणः । पाञ्चाली रीतिः । शिखरिणीवृत्तम् ॥ ३ ॥

न मामिति । कुमारः शिशुर्मलयकेतुर्मां दूरीभवन्तमनिकटवर्त्तिनं नेच्छति नाभिलषति । मुद्रां दातुं शिविरद्वार्यवस्थानरूपदूरीभवनं न मे कुमाराय रोचत इति भावः अतोऽस्माद्धेतोः अस्मिन्नेव आतिष्ठन्ति जना अत्रेत्यास्थानं तदेव मण्ड-

---

(दूसरा अर्थ)

मुखसन्धि में अल्पोद्दिष्ट होती हुई भी बहुत विस्तृत, प्रतिमुखसन्धि में लक्ष्याऽलक्ष्यव्यक्ति की दुर्बोधता के कारण अत्यन्त क्षीण, विमर्शसन्धि में बीज के स्पष्ट दर्शन से सम्पूर्ण अवयववाली, प्रतिमुखसन्धि में लक्ष्यालक्ष्यव्यक्ति के आधिक्य से अति क्षीण, कदाचित् दृष्ट-नष्ट के अन्वेषण से नष्ट उद्योगवाली, कदाचित् निर्वहणसन्धि में सकल अर्थ के उपसंहार से सफलताको पानेवाली नीतिज्ञ पुरुषों की नीति बहुत प्रकार की होती है ॥३॥

(जोर से) भद्रभासुरक ! कुमार (मलयकेतु) हमारा दूर रहना पसन्द नहीं करते, इसलिये इसी सभामण्डप में आसन लगाओ ।

पुरुषः—यही आसन है, आप बैठिये ।

भागुरायणः—(बैठकर) । भद्र भासुरक ! जो, कोई मुद्रा के लिये मुझसे मिलना चाहे, उसे तुम यहां ले आना ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुरुषः—जं अज्जो आणवेदि [यदार्य आज्ञापयति]।

(इति निष्क्रान्तः)

भागुरायणः—(स्वगतम्) कष्टमेवमप्यस्मासु स्नेहवान् कुमारो मलयकेतुरतिसन्धातव्य इत्यहो दुष्करम् । अथवा—

कुले, लज्जायाञ्च, स्वयशसि च, माने च, विमुखः
शरीरं विक्रीय क्षणिकधनलाभाद्धनवति ।
तदाज्ञां कुर्वाणो हितमहितमित्येतदधुना;
विचारातिक्रान्तः, किमिति परतन्त्रो विमृशति ॥ ४ ॥

पमास्थानमण्डपं तस्मिन्नास्थानमण्डपे सदोरूपजनाश्रये । 'मण्डपोऽस्त्री जनाश्रय' इत्यमरः । आसनं विन्यस्यतां संस्थाप्यताम् ॥

एवमपीति । कष्टं खेदः एवमपि क्षणमात्रं मदनिकटवर्तनात्मकविरहासहनेऽपीत्यर्थः । अस्मासु प्रियपात्रेषु स्नेहवान् अनुरागयुक्तः कुमारो मलयके तुः ५ तकपुत्रः अतिसन्धातव्यः प्रतारणीयः इति मलयकेतुप्रतारणं दुःखेन कर्तुं योग्यं दुष्करं कठिनमित्यर्थः । अहो आश्चर्यम् । तदेव कष्टं निराकरोति अथवेति ।

कुल इति । परतन्त्रोऽन्यायत्तः पुरुषः कुले वंशे लज्जायां त्रपायां स्वयशसि आत्मकीर्त्तौ माने प्रतिष्ठायां च विमुखः विरक्तः सन् क्षणिकधनलाभात् अल्पकालिकवित्ताप्त्याशया धनवति वित्तशालिनि जने शरीरं कायं विक्रीय तदायत्तं कृत्वा तदाज्ञां कुर्वाणः तन्नियोगं सम्पादयन् अत एव विचारातिक्रान्तः परित्यक्तसदसद्विवेकः अधुना साम्प्रतम् एतत् हितमेतत् अहितमिति उचितमनुचितमित्यर्थः । किमिति विमृशति कथं विचारयति नैव विचारयतीत्यर्थः । परायत्तस्यास्वाधीनत्वान्नैव सदसद्विवेको भवतीति भावः । परतन्त्रस्य हिताहितयोरविमर्शे कुलादिषु वैमुख्यस्य धनाप्तिवाञ्छाहेतुकशरीरविक्रयणस्य स्वाम्यादेशपालनकर्तृत्वस्य विका-

---

पुरुषः—आपकी जो आज्ञा ।

(चला गया)

भागुरायणः—(मनही मन) कष्ट है !! मेरे पर ऐसा प्रेम रखने पर भी कुमार मलयकेतु ठगा जाय, यह बहुत कठिन है, आश्चर्य की बात है ।

अथवा—पराधीन पुरुष, कुल, लज्जा, कीर्ति और प्रतिष्ठा से विरक्त होकर अल्पकाल रहनेवाले धन के लाभकी आशा से धनवान् पुरुष के निकट अपना शरीर वेचकर उसकी आज्ञा पालन करता हुआ वह सत्-असत् विचारशून्य होकर उचित-अनुचित का विचार नहीं करता ॥ ४ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(ततः प्रविशति प्रतीहार्य्यनुगतो मलयकेतुः)

मलयकेतुः—(स्वगतम्) अहो ! राक्षसं प्रति मे विकल्पबाहुल्या-दाकुला बुद्धिर्न निश्चयमधिगच्छति । कुतः ?—

भक्त्या नन्दकुलानुरागदृढया नन्दान्वयालम्बिना,
किं चाणक्यनिराकृतेन कृतिना मौर्य्येण सन्धास्यते ? ।
स्थैर्य्यं भक्तिगुणस्य वा विगणयन् किं सत्यसन्धो भवे-

रातिक्रान्तस्य चैतेषां पदार्थानां हेतुत्वेन पदार्थहेतुककाव्यलिङ्गमलङ्कारः । कथं विमृशतीत्यनेन नैव विमृशतीत्यर्थान्तरावगमादर्थापत्तिरलङ्कारो वेति सन्देसङ्करः साङ्कर्यम्वा । प्रसादगुणः वैदर्भी रीतिः । शिखरिणीवृत्तम् ॥ ४ ॥

(मलयकेतुवचनेन राक्षसायत्तीकरणात्मककार्यस्योपेक्षणादिदं कार्योपेक्षपणं नाम ग्रन्थनम्) ।

तत इति । ततस्तदनन्तरं भागुरायणविमर्शोत्तरमित्यर्थः । प्रतीहार्या अनुगतः प्रतीहार्यनुगतो दौवारिक्यनुस्रियमाणो मलयकेतुः प्रविशति रङ्गस्थानमिति शेषः रङ्गशालाभ्यन्तरगतो भवतीत्यर्थः ।

स्वगतमिति । अनतिस्पष्टं यथा तथा ब्रवीतीत्यर्थः अहो आश्चर्यम् सम्प्रति सुदुद्धयपराख्यमन्त्रिणं प्रति विकल्पबाहुल्यात्सन्देहाधिक्यात् आकुला संक्षुब्धा मे मम बुद्धिर्मतिः निश्चयं न गच्छति न प्राप्नोति तदेव दर्शयति कुत इति ।

भक्त्येति । नन्दस्य कुलं नन्दकुलं तत्रानुरागो नन्दकुलानुरागस्तेन दृढा तया नन्दकुलानुरागदृढया नन्दान्ववायस्नेहस्थिरया भक्त्या सेवया अनुरागेणेति यावत् । हेतुना (निराकृतमिति भावे क्तः,) चाणक्यस्य निराकृतं निराकरणं येन स तथोक्तस्तेन चाणक्यनिराकृतेन कौटिल्यस्य निराकरणेनेत्यर्थः (व्यधिकरणपदबहुव्रीहिः) नन्दान्वयमवलम्बते इति नन्दान्वयावलम्बी तेन नन्दान्वयावलम्बिनन्दवंशाश्रयिणा 'कृतिना कुशलेन मौर्येण चन्द्रगुप्तेन सह किं सन्धिं करिष्यति राक्षस इति शेषः । वा अथवा भक्तिरेव गुणो यस्य स भक्तिगुणस्तस्य भक्तिगुणस्य

(प्रतीहारीके साथ मलयकेतु का प्रवेश)

मलयकेतुः—(मनही मन) आश्चर्य है ? राक्षस में अधिक सन्देह होने के कारण हमारा व्याकुल बुद्धि किसी निश्चित अर्थको नहीं प्राप्त कर पाती ।

कैसे कि—नन्द के वंश में रहे हुये स्नेह से स्थिर भक्ति होने के कारण चाणक्य से तिरस्कृत नन्द-वंशोत्पन्न बुद्धिमान् मौर्य के साथ राक्षस क्या सन्धि (मेल)करेगा? अथवा अनुरूप गुणयुक्त हमारी स्थिरता को विचारता हुआ वह सत्य प्रतिज्ञ

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दित्यारूढ़कुलालचक्रमिव मे चेतश्चिरं भ्राम्यति ॥ ५ ॥

(प्रकाशम्) विजये ! क भागुरायणः ?

प्रतीहारी कुमार ! एसो क्खु कड़आदो णिक्कमिदुकामाणं मुद्दासंपदाणं अणुचिट्ठदि [कुमार ! एष खलु कटकान्निष्क्रमितुकामानां मुद्रासम्प्रदानमधितिष्ठति]।

मलयकेतुः—विजये ! मुहूर्त्तं निभृतपदसञ्चारा भव, यावदस्यपरा-

अनुरागात्मकगुणशालिनो ममेति शेषः, स्थैर्यं दार्ढ्यमधिगणयन् विचारयन् सत्या सन्धा यस्य स सत्यसन्धः किं सत्यप्रतिज्ञो भवेत् , आरूढं कुलालचक्रं येन तदारूढकुलालचक्रम् अधिष्ठितकुम्भकारचक्रमिव मे मम चेतो हृदयं चिरं बहुकालं भ्राम्यति सन्देहास्पदं भवतीत्यर्थः । चन्द्रगुप्तस्य नन्दवंशीयत्वेन राक्षसस्य तत्रानुरागस्थैर्यमुत मयि राज्यप्रदानाय सत्यप्रतिज्ञत्वेन दृढानुराग इत्युभयविधसंशयापन्नं मे हृदयमिति भावः । राक्षसस्य चन्द्रगुप्तामात्यपदवीकामनाहेतुगर्भस्य चाणक्यनिराकृतेनेति विशेषणस्य चन्द्रगुप्तसन्धिपक्षप्राबल्यबोधकत्वं कृतेनेति विशेषणस्य च कृतकार्यस्य मौर्यस्य न पुनश्चाणक्येन सह सन्धिः स्यादित्यभिप्रायबोधकत्वम् इत्युक्तोभयविशेषणस्य साभिप्रायत्वेन परिकरालङ्कारः । तस्य चारूढकुलालचक्रमिवेत्युत्प्रेक्षसंसृष्टस्य विकल्पनामाऽलङ्कारेण साङ्कीर्यम् । विकल्पालंकारलक्षणं दर्पणोक्तं यथा—

विकल्पस्तुल्यबलयोर्विरोधश्चातुरीयुतः ।

इति प्रसादो गुणः । गौडी रीतिः । शार्दूलविक्रीडितं वृत्तम् ॥ ५ ॥

एष इति । एष भागुरायणः कटकात् शिविरात् निष्क्रमितुं कामो येषां ते तथोक्ताःतेषां निष्क्रमितुकामानां निर्गन्तुमुत्सुकानां पुरुषाणामिति शेषः । मुद्राणां सम्प्रदानं मुद्रासम्प्रदानम् गमनागमनादेशपत्रवितरणमित्यर्थः । अनुतिष्ठति करोति ।

विजय इति । इदं मलयकेतुप्रतीहारीनाम, मुहूर्तं किञ्चित्कालपर्यन्तं निभृतः

होगा ? इस प्रकार कुलाल चक्र पर चढ़े हुए की तरह मेरा चित्त बहुत काल से सन्देह में पड़ा है ॥

(जोरसे) विजये ! भागुरायण कहां है ?

प्रतीहारी—कुमार ! भागुरायण सैन्यशिविर से बाहर जानेवालों को जाने-आने की आज्ञा पत्र दे रहे हैं ।

मलयकेतुः—विजये ! क्षणमात्र खड़ा रहो तब मैं दूसरी तरह मुँह किये हुए भागुरायण

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ङ्मुखस्यैव पाणिभ्यां नयने पिद्धामि ।

प्रतीहारी—जं कुमारो आणवेदि [यत् कुमार आज्ञापयति] ।

भासुरकः—(प्रविश्य) अज्ज ! एसो क्खु क्खवणओ मुद्दाणिमित्तं अज्जं पेक्खिदुमिच्छदि [आर्य एष खलु क्षपणको मुद्रानिमित्तमार्यं प्रेक्षितुमिच्छति] ।

भागुरायणः—प्रवेशय ।

भासुरकः—जं अज्जो आणवेदि [यदार्य आज्ञापयति] ।

(इति निष्क्रान्तः)

क्षपणकः—(प्रविश्य) सावकाणं धम्मविद्धी होदु [उपासकानां धर्मवृद्धिर्भवतु] ।

भागुरायणः—(नाट्येनावलोक्य स्वगतम्) अये राक्षसस्य मित्रं,

पदसञ्चारो यस्याः सा निभृतपदसञ्चारा त्यक्तचरणप्रक्षेपा निवृत्त मनेति यावत् भव तिष्ठ, यावत् यत्कालपर्यन्तम् पराङ्मुखस्य परावर्तमानस्य (असंमुखाननस्य) अस्य भागुरायणस्य नयने नेत्रे पाणिभ्यां कराभ्यां पिदधामि छादयामि । पिदधामीत्यत्राप्युपसर्गाकारस्य—वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः । इत्यनेन लोपः । (मलयतुकेकर्तृकभागुरायणनयनपिधानान्मलयकेतुभागुरायणयोः शिशुत्ववशीकरणनैपुण्ययोरवगमः) । तेनेदानीं महत्प्रयोजनमनुष्ठेयं भविष्यतीति पूर्वमुपक्षिप्तस्य सम्प्रति जीवसिद्धिना क्रियमाणस्य मलयकेत्वतिसन्धानरूपस्य महाप्रयोजनस्यावसरप्रदानाय च कविसंविधानमिदमित्यसेयम्) मलयकेतोर्विजयाम्प्रत्युक्तः कविनिबद्धत्वे प्रागुक्तोभयतात्पर्यमेव बीजम् ।

नाट्येनेति । नाट्येन नटोचितव्यापारेण भङ्ग्यात्मनेत्यर्थः । स्वगतं मनस्येव ब्रवीतीत्यर्थः । अये ! (कोमलालापे सन्बोधनम्) राक्षसस्य नन्दसचिवस्य

के नेत्रों को मैं अपने हाथों से बन्द करता हूँ ।

प्रतीहारी—कुमारकी जो आज्ञा ।

भासुरकः—(प्रवेश कर) आर्य ! एक क्षपणक मुद्राचिह्न के लिये आपसे मिलना चाहता है ।

भागुरायणः—ले आओ ।

भासुरकः—जो आज्ञा (चला जाता है) ।

क्षपणकः—(प्रवेशकर) आपके धर्मकी वृद्धि हो ।

भागुरायणः—(विचित्रढङ्ग से देखकर मन ही मन) अये ! यह तो राक्षस का

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जीवसिद्धिः !! (प्रकाशम्) भदन्त ! न खलु राक्षसस्य प्रयोजनमेव किञ्चिदुद्दिश्य गम्यते ?

क्षपणकः—(कर्णौ पिधाय) सन्तं पावं, सन्तं पावं, सावका ! तहिं ज्जेब गमिस्सं, जहिं रक्खसस्स पिसाचस्स वा णामं पि ण सुणीअदि [शान्तं पापं शान्तं पापम् उपासक ! तत्रैव गमिष्यामि, यत्र राक्षसस्य पिशाचस्य वा नामापि न श्रूयते]।

भागुरायणः—भदन्त । बलीयांस्ते सुहृदि प्रणयकोपः । तत् किमपराद्धं राक्षसेन भदन्तस्य ?

क्षपणकः—सावका ! ण मम किं पि रक्खसेण अवलद्धं, सअञ्ज्जेव्व मन्दभाओ अत्तणो कम्मसु लज्जामि [उपासक ! न मे किमपि राक्षसेनापराद्धं, स्वयमेव मन्दभाग्य आत्मनः कर्मसु लज्जे]।

भागुरायणः—भदन्त ! वर्द्धयसि मे कुतूहलम्—"।

मलयकेतुः—(स्वगतम्) मम च ।

मित्रं सुहृत् जीवसिद्धिः क्षपणकवेशधारी जीवसिद्धिनामा समागतः । प्रकाशं व्यक्तं ब्रवीति, भदन्त ज्योतिर्विद् ! राक्षसस्य नन्दसचिवस्य किञ्चित्किमपि प्रयोजनं कार्यमुद्दिश्य निमित्तीकृत्यैव गम्यत इति काकुः । एतद्द्वारा मलयकेत्वतिसन्धानं विधेयमिति तात्पर्यम् ।

बलीयानिति । सुहृदि मित्रे राक्षसे विषय इत्यर्थः । बलीयान् महान् प्रणयकोपः स्नेहेन क्रोधः, तत्तस्मात् राक्षसेन भदन्तस्यज्यौतिषिकस्य भवतः किमपराद्धं कोऽपराधः कृतः ।

न मे इति । राक्षसेन किमपि नापराद्धं कोऽप्यपराधो न कृतः, किन्तु स्वय-

---

मित्र जीवसिद्धि है !! (जोरसे) भदन्त ! राक्षसके किसी कार्य ही के लियेजाते हैं न।

क्षपणकः—(कानों को बन्द कर) ऐसा मत कहिये। मैं उस जगह जाता हूं, जहां राक्षस अथवा पिशाच का नाम भी नहीं सुना जाता।

भागुरायणः—भदन्त ! मित्र (राक्षस) में आपका बड़ा सस्नेह क्रोध है। मैं आप से पूछता हूं कि राक्षस ने आपका क्या बिगाड़ा है ?

क्षपणकः—उपासक ? राक्षसने मेरा कुछ भी नहीं बिगाड़ा है, किन्तु मन्द भाग्य वाला मैं स्वयं अपने कार्यों से लज्जित हूं।

भागुरायणः—भदन्त ! तुम हमारी उत्कण्ठा को बढ़ा रहे हो।

मलयकेतुः—(मनही मन) हमारा भी उत्कण्ठा को।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भागुरायणः—श्रोतुमिच्छामि ।

मलयकेतुः—(स्वगतम्) अहमपि ।

क्षपणकः—सावका ! किं एदिणा असुणिदव्वेण सुदेण ? [उपासक किमेतेनाश्रोतव्येन श्रुतेन ?] ।

भागुरायणः—भदन्त ! यदि रहस्यं, तदा तिष्ठतु ।

क्षपणकः—सावका ! न हि रहस्सं [उपासक ! न हि रहस्यम्] ।

भागुरायणः—तर्हि कथ्यताम् ।

क्षपणकः—सावका ! णत्थि एदं, तधावि ण कधइस्सं अदिणिसंसं [उपासक ! नास्तीदं, तथापि न कथयिष्याम्यतिनृशंसम्] ।

भागुरायणः—भदन्त ! अहमपि [illegible] दास्यामि ।

क्षपणकः—(स्वगतम्) युक्तमिदानीमर्थिने कथयितुम् । (प्रकाशम्)

मेव मन्दभाग्यः भाग्यहीनोऽहम् आत्मनः कर्मसु स्वस्य कृत्येषु सुहृद्द्रोहात्मकेष्वि- र्थः, (एतदव्यवहितक्षणमेवैतेन राक्षसकर्तृकपर्वतककर्मकहननस्याभिधास्यमानत्वादिति तदाशयः) लज्जे जिह्रेमि ।

किमेतेनेति । एतेनानेन अश्रोतव्येन आकर्णनायोग्येन श्रुतेन श्रवणपथगतेन विषयेन (उदन्तेन) किं, न किमपि प्रयोजनमित्यर्थः ।

यदिति । यद्वृत्ताभिधाननिषेधोऽभिमतो भवतस्तत् यदि रहस्यमप्रकाश्यं तत्तदा तिष्ठतु नाभिधेहीत्यर्थः ।

नेति । तद्वृत्तं न रहस्यं न गोप्यं किन्तु अतिनृशंसमतिशयक्रूरमित्यर्थः । अतः क्रूरवृत्ताभिधाने जिह्रेमीति भावः ।

युक्तमिति । इदानीं अर्थिने श्रवणाभिलाषिणे प्रार्थनां कुर्वते च अस्मै भागु-

---

भागुरायणः—सुनना चाहता हूँ ।

मलयकेतुः—मैं भी ।

क्षपणकः—उपासक ! इस न सुनने लायक वचन के सुनने से क्या लाभ ?

भागुरायणः—भदन्त ! यदि कहने योग्य न हो तो न कहिये ।

क्षपणकः—उपासक ! वह कोई गोपनीय बात नहीं है ।

भागुरायणः—तब कहिये ।

क्षपणकः—उपासक ! ऐसा नहीं है, तो भी मैं वह कठोर बात नहीं कहूँगा ।

भागुरायणः—भदन्त ! तो मैं भी मुद्राचिह्नित आज्ञापत्र नहीं दूंगा ।

क्षपणकः—(मनही मन) सुननेके लिये उत्सुक भागुरायण से कहना ठीक है ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

का गदी ? एसे णिवेदेमि, सुणादु सावके। अत्थि दाव हगे अध-ण्णा पढमं पाड़लिउत्ते णिवसमाणो रक्खसस्स मित्तत्तणं उवगदे। तहिं अवसले रक्खसेण गूढं विसकण्णाप्पओअं समुप्पादिअ, घादिदे पव्वदीसले [का गतिः ? एष निवेदयामिः श्रृणोतु उपासकः। अस्ति तावद-हमधन्यः प्रथमं पाटलिपुत्रे निवसन् राक्षसस्य मित्रत्वमुपगतः। तस्मिन्नवसरे राक्षसेन गूढं विषकन्याप्रयोगं समुत्पाद्य घातितो देवः पर्व्वतेश्वरः]।

मलयकेतुः—(सवाष्पमात्मगतम्) कथं, राक्षसेन घातितस्तातो न चाणक्येन ?

भागुरायणः—भदन्त ! ततस्ततः ?

क्षपणकः—तदो हगे लक्खसस्स मित्तं कदुअ, चाणक्कहदएण सणिकालं णअरादो णिव्वासिदो। दाणीं पि लक्खसेण अणेअकज्जअकु-

---

रायणायेति शेषः। कथयितुमिधातुं युक्तं समुचितम् मदुक्तमादरेण श्रुतं मन्येतेति भावः। प्रकाशं सुस्पष्टं ब्रवीति का गतिः क उपायः, एषोऽहं निवेदयामि कथयामि तद्वृत्तमिति शेषः। उपासको भवान् श्रृणोतु (तावच्छब्दो वाक्यालंकारे) प्रथमं प्राक् अधन्यो भाग्यहीनोऽहं पाटलिपुत्रे तदाख्यनगरे निवसन् तिष्ठन् राक्षसेन सह मित्रत्वं सख्यमुपगतः प्राप्तोऽस्मि। नस्मिन्नवसरे तत्क्षणे राक्षसेन नन्दसचिवेन गूढं गुप्तं यथा स्यात्तथा विषकन्याप्रयोगं विषकन्यात्मकाभिचारोपायं समुत्पाद्य कृत्वा देवो राजा पर्वतेश्वरो मलयकेतुतातो घातितो विनाशितः मम हस्तेनेति शेषः।

तत इति। ततस्तदनन्तरम् अहं राक्षसस्य नन्दसचिवस्य मित्रं कृत्वा सुहृदित्युद्दिश्य यद्वा षठयर्थस्याऽभेदत्वाद्राक्षसाऽभिन्नं (राक्षसं) मित्रं कृत्वेत्यर्थः। चाणक्यहतकेन दुष्टचाणक्येन सनिकारं सापमानं यथा स्यात्तथा नगरात्पाटलिपुत्रनाम-

---

(जोरसे) तब उपाय ही क्या है ? अच्छा मैं कहता हूँ, आप सुनिये। मैं अभागा पहले जब पाटलिपुत्र नगर में रहता था, तब राक्षस का मित्र था। उसी समय राक्षस ने गुप्तविषकन्याप्रयोग द्वारा राजा पर्वतेश्वर को मारडाला।

मलयकेतुः—(आँसूभर कर) ऐं ! राक्षस ने पिताजी को मारा ? चाणक्यने नहीं ?

भागुरायणः—भदन्त ! तब क्या हुआ ?

क्षपणकः—तब मैं राक्षस का मित्र बनकर दुष्ट चाणक्य द्वारा अनादर के साथ नगर से बाहर निकाल दिया गया। अभी भी अनेक अनुचित कार्य करने वाला वह

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सलेण किंपि तादिसं आलहीअदि, जेण हगे जीअलोआदो णिक्कासिज्जेमि [ततोऽहं राक्षसस्य मित्रं कृत्वा, चाणक्यहतकेन सनिकारं नगरान्निर्वासितः । इदानीमपि राक्षसेनानेकाकार्यकुशलेन किमपि तादृशमारभ्यते, येनाहं जीवलोकान्निष्कासिष्ये] ।

भागुरायणः—भदन्त ! प्रतिश्रुतराज्यार्द्धमयच्छता चाणक्यहतकेनेदमकार्य्यमनुष्ठितं, न राक्षसेनेति श्रुतमस्माभिः ।

क्षपणकः—(कर्णौ पिधाय) सन्तं पावं । सावका ! चाणक्को विसकण्णाए णामंपि ण जाणादि । तेण ज्जेव दुट्टबुद्धिणा रक्खसेण एसा अकज्जसिद्धी किदा [शान्तं पापम् । उपासक ! चाणक्यो विषकन्याया नामापि न जानाति । तेनैव दुष्टबुद्धिना राक्षसेनैषाऽकार्यसिद्धिः कृता] ।

भागुरायणः—भदन्त ! कष्टमिदं मियं मुद्रा दीयते, एहि कुमारं संश्रावयावः ।

धेयात्पुरात् निर्वासितो निष्कासितः । इदानीमपि अनेकानि च तान्यकार्याणि अनेकाकार्याणि तेषु कुशलस्तेनानेकाकार्यकुशलेन बहुदुष्टकार्यकरिणा रासक्षसेन किमपि तादृशं पर्वतेश्वरघातनसदृशं (मलयकेतुनिग्रहमपीति गूढतात्पर्यम्) आरभ्यते क्रियते येन यत्कार्यानुष्ठानेन अहं जीवलोकात् संसारात् निर्वासिष्ये निष्काशिष्ये । (प्राक् राक्षसप्रयुक्तविषकन्यात्मकाभिचारोपायद्वारा पर्वतेश्वरघातनमुद्दिश्य नगरादहं निष्कासितश्चाणक्येन साम्प्रतं राक्षसकर्तृकाकार्यानुष्ठानद्वारा नान्यविनाशः किन्तु ममैव विनाश इत्यवगम्य प्रागेव स्थानान्तराश्रयणमुचितमिति भावः) (इदं भागुरायण भदन्तयोरन्योन्यपरिभाषणं जल्पनम्) ।

प्रतिश्रुतेति । प्रतिश्रुतं च तद्राज्यार्द्धं प्रतिश्रुतराज्यं अङ्गीकृतराज्यार्द्धभागम् । अयच्छता अददता चाणक्यहतकेन दुष्टचाणक्येन इदम् अकार्यं प 'तेश्वरघातनात्मकं

कुछ ऐसा कार्य कर रहा है कि जिससे मैं इस संसार से ही निकाल दिया जाऊँगा ।

भागुरायण:—भदन्त ! कहा हुआ आधा राज्य नहीं देनेवाले चाणक्य ने यह अनुचित कार्य किया है; राक्षस ने नहीं ! ऐसा हमलोगों ने सुना है ।

क्षपणक:—(कानों को बन्द कर) ऐसा मत कहिये । उपासक ! चाणक्य तो विषकन्या का नाम भी नहीं जानते । उसी दुष्टबुद्धि राक्षस ने ऐसा अनुचित कार्य किया है ।

भागुरायण:—भदन्त ! यह बड़े दुःख की बात है । लो, यह मुद्रा देता हूं । आओ, हम दोनों कुमार मलयकेतु के पास चलें ।

 Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मलयकेतुः—श्रुतं सखे ! श्रवणविदारणं वचः
सुहृन्मुखाद्रिपुमधिकृत्य भाषितम्।
पितुर्वधव्यसनमिदं हि येन मे
चिरादपि द्विगुणमिवाद्य वर्द्धते ॥ ६ ॥

क्षपणकः—(स्वगतम्) अये श्रुतं मलयकेतुहतकेन !! कृतार्थोऽस्मि ।

(इति निष्क्रान्तः)

निन्दितं कर्म कृतमनुष्ठितं न राक्षसेन। राक्षसकर्तृकः पर्वतेश्वरवधो नेत्यवम् अस्माभिः श्रुतम् आकर्णितम्।

श्रुतमिति । हे सखे सुहृत्। रिपुं पर्वतविनाशेन कृत्रिमशत्रुं राक्षसमित्यर्थः। अधिकृत्योद्दिश्य भाषितं कथितं श्रवणविदारणं श्रोत्रपीडाजनकं वचो वाक्यं सुहृन्मुखात् क्षपणकाननात् श्रुतमाकर्णितम्। येन श्रवणेन मे मम इदं पितुर्वधव्यसनं तातविनाशजन्यदुःखं चिरादपि चिरकालजातमपि अद्य साम्प्रतं द्विगुणमिव अधिकमिव वर्द्धते वृंहते। राक्षसकर्तृकतातविनाशदुःखं चिरकालिकमपि क्षपणकमुखोदितं सद् द्विगुणमिव जातमिति भावः। द्विगुणमिवेत्यत्रोत्प्रेक्षासूचकेवशब्दसद्भावेन मलयकेतोस्तातविनाशजन्यदुःखस्याद्वैगुण्येऽपि द्वैगुण्योत्प्रेक्षणादुत्प्रेक्षालंकारः। प्रसादगुणः। पाञ्चाली रीतिः। रुचिरावृत्तम्। उक्तं तल्लक्षणं छन्दोमञ्जर्यां यथा—जभौ सजौ गिति रुचिरा चतुर्ग्रहैः ॥ ६ ॥

श्रुतमिति। मलयकेतुहतकेन दुष्टेन मलयकेतुना श्रुतं मदुक्तं राक्षसदूषणमाकर्णितम्। हन्त हर्षेऽव्ययम्। 'हन्त हर्षेऽनुकम्पायां दैन्ये' इत्यमरः मदुक्तराक्षसापराधस्य मलयकेतुना श्रुतत्वाद्धर्षो जातः। अतः कृतार्थोऽस्मि (तेनेदानीं महत्प्रयोजनमनुष्ठेयं भविष्यती) ति पूर्वोक्तप्रयोजनानुष्ठानेन कृतकृत्योऽस्मीत्यर्थः (सुहृन्मुखाद्रिपुमधिकृत्येत्युक्त्या स्वस्मिन् सहृदयत्वेन विश्रब्धवचनत्वं राक्षसस्य रिपुत्वञ्च मलयकेतुना चित्ते स्थिरीकृतमिति कृतार्थतेति भावः) इदं बीजानुगुणकार्यप्रख्यापननिर्णयः)।

मलयकेतुः—मित्र ! मैंने राक्षस के मित्र द्वारा कहा गया कर्णकटु वचन सुना। जिससे मेरे पिता का वधजनित पुराना दुःख भी आज मानो दुगुना होकर बढ़ रहा है ६

क्षपणकः—(मनही मन) अये ! क्या दुष्ट मलयकेतुने सुन लिया ? हर्ष की बात है, अब मैं कृतार्थ हूँ।

(यह कहकर चला जाता है)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मलयकेतुः—(प्रत्यक्षवदाकाशे लक्ष्यं बद्ध्वा) राक्षस ! युक्तमिदम् ।

मित्रं ममायमिति निर्वृतचित्तवृत्तिं
विश्रंभतस्त्वयि निवेशितसर्वकार्य्यम् ।
तातं निपात्य, सह बन्धुजनाक्षितोयै-
रन्वर्थतोऽपि ननु राक्षस ! राक्षसोऽसि ॥ ७ ॥

भागुरायणः—(स्वगतम्) रक्षणीया राक्षसस्य प्राणा इत्यार्यादेशः–भवत्वेवं तावत् (प्रकाशम्) कुमार ! अलमावेगेन ? आसनस्थं कुमारं किञ्चिद्विज्ञापयितुमिच्छामि ।

मित्रमिति । अयं राक्षसो मम मित्रं सुहृत् इति हेतोः त्वयि भवति राक्षसे इत्यर्थः, विश्रम्भतो विश्वासात् निवेशितं सर्वं कार्यं येन स निवेशितसर्वकार्यः अर्पितसकलकार्यभारः अत एव निर्वृता चित्तवृत्तिर्यस्य स निर्वृतचित्तवृत्तिः निश्चिन्तमनोव्यापारः आसीदिति शेषः । ननु भो राक्षस ! तं तातं जनकं बन्धुजनाक्षितोयैः आत्मीयजननेत्रजलैः सह सार्द्धं निपात्य पातयित्वा विनाश्येत्यर्थः । अन्वर्थतोऽपि योगार्थादपि राक्षसोऽसि निशाचरो भवसि । न केवलं नाम्ना त्वं राक्षसोऽपि तु क्रूरकर्मकरणाद्यथार्थतो राक्षसोऽसीति भावः मारणात्मकतातनिपातनक्षारणात्मकाक्षितोयनिपातनयोर्भेदेऽप्यभेदाध्यवसायादतिशयोक्तिमूलकः, तातनिपातनबन्धुजनाक्षितोयनिपातनयोः साहित्येनाभिधानात् सहोक्तिरलङ्कारः ।

सहार्थस्य बलादेकं यत्र स्याद्वाचकं द्वयोः ।
सा सहोक्तिर्मूलभूताऽतिशयोक्तिर्यदा भवेत् ॥

इति दर्पणोक्तलक्षणात् । प्रसादगुणः । वैदर्भी रीतिः । वसन्ततिलकं वृत्तम् ॥ ७ ॥

रक्षणीयेति । राक्षसस्य नन्दसचिवस्य प्राणाः जीवनं रक्षणीया पालनीया इत्येष आर्यादेशः चाणक्याज्ञा, येनोपायेन राक्षसप्राणविनाशो न स्यात्तादृश उपायः

मलयकेतुः—(प्रत्यक्षकी तरह आकाशमें लक्ष्य करके) राक्षस ! यह ठीक है ।

राक्षस हमारा मित्र है, इस कारण विश्वस्त होकर तुम्हारे पर सब कार्य भारको देने वाले अतएव शान्तचित्तवृत्ति हमारे पिता को परिवार के आँसुओं के साथ नष्ट करनेवाले ओ राक्षस ! तू सचमुच राक्षस (निशाचर) ही है ॥ ७ ॥

भागुरायणः—(मन ही मन) राक्षस का प्राण बचाना आवश्यक है । ऐसी चाणक्य की आज्ञा है, तब ऐसा उपाय करना चाहिये । (जोरसे) कुमार ! क्रोध करना व्यर्थ है । आप आसन पर बैठ, मैं आपसे कुछ कहना चाहता हूँ ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मलयकेतुः—(उपविश्य) सखे ! किमसि वक्तुकामः ?

भागुरायणः—कुमार ! खल्वर्थशास्त्रव्यवहारिणामर्थवशादरिमित्रोदासीनव्यवस्था न लौकिकानामिव स्वेच्छावशात्। यतस्तस्मिन् सर्वार्थसिद्धिं राजानमिच्छतो राक्षसस्य चन्द्रगुप्तादपि बलीयस्तया सुगृहीतनामादेवः पर्व्वतेश्वर एवार्थपरिपन्थी महानरातिरासीत् ।

करणीयस्त्वयेति चाणक्यनिदेश इति भावः । आवेगेन क्रोधेनालं व्यर्थं क्रोधो न कार्य इत्यर्थः । आसनस्थम् आसने समुपविष्टं किञ्चित्किमपि कार्यं विज्ञापयितुं निवेदयितुम् इच्छामि अभिलषामि ।

खल्विति । (खलुशब्दो वाक्यालङ्कारार्थको निश्चयार्थको वा बोध्यः) अर्थ शास्त्रेण व्यवहर्तुं शीलमेषामित्यर्थशास्त्रव्यवहारिणस्तेषामर्थशास्त्रव्यवहारिणां नीतितन्त्रानुसरणशीलानां जनानामिति शेषः । अर्थवशात् प्रयोजनानुरोधात् अरिश्च मित्रं चोदासीनश्चारिमित्रोदासीनास्तेषु व्यवस्था व्यवस्थितिर्भवतीति शेषः, अयमरिः शत्रुः अयं मित्रं सखा अयमुदासीनो मध्यो न शत्रुर्न मित्रमित्यर्थः । एषु व्यवस्था विचारः प्रयोजनानुरोधेन भवतीत्यर्थः । लौकिकानां लोकानुसरणशीलनामिवस्वेच्छावशात् निजमनोरथानुरोधेन न तेषु व्यवस्थेत्यर्थः । नीतितन्त्रानुसरणशीलाः कार्यानुरोधेन शत्रुमित्रोदासीनान् विचारयन्ति लोकानुसरणशीलास्तु स्वेच्छानुरोधेन तान्विचारयन्ति जानन्तीति तन्त्रानुसरणशीलास्तु स्वेच्छानुरोधेन तान्विचारयन्ति जानन्तीति नीतितन्त्रानुसरणशीलानां लोकानुसरणशीलानाञ्च परस्परं भेदः । यतो यस्मात् तस्मिन्काले सर्वार्थसिद्धिं राक्षसमित्रवेशिचाणक्यप्रणिधिं राजानं नृपतिमिच्छतः कामयमानस्य राक्षसस्य नन्दसचिवस्य चन्द्रगुप्तादपि मौर्यादपि बलीयस्तया बलवत्तया सुगृहीतनामा प्रातःस्मरणीयाभिधेयः देवो नृपः पर्वतेश्वरो मलयकेतुतात एव अर्थपरिपन्थी कार्यप्रतिद्वन्द्वी महान् प्रबलोऽरातिः शत्रुरासीत् । तस्मिंश्च देवे पर्वतेश्वरे राक्षसेन इदमकार्यं विषकन्याप्रयोगरूपमनुष्ठितं कृ-

मलयकेतुः—(बैठकर) मित्र ! क्या कहना चाहते हो ?।

भागुरायणः—कुमार ! प्रयोजन के अनुसार नीतिज्ञपुरुषों की शत्रु, मित्र और उदासीन की व्यवस्था होती है, न कि लोकानुसरण करनेवाले पुरुषों की तरह अपनी इच्छा के अनुसार । क्योंकि उस समय सर्वार्थसिद्धि को राजा बनाना चाहता हुआ राक्षस चन्द्रगुप्त से भी अधिकबलवत्ता के कारण प्रातःस्मरणीयनामवाले राजा पर्वतेश्वर ही कार्य के विरोधी प्रबल शत्रु थे। उस समय राक्षस ने यह अनुचित कार्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तस्मिंश्च काले, राक्षसेनेदमनुष्ठितमिति नातिदोषमत्र पश्यामि । पश्यतु कुमारः—

मित्राणि शत्रुत्वमपानयन्ती, मित्रत्वमर्थस्य वशाच्च शत्रून् ।
नीतिर्नयत्यस्मृतपूर्ववृत्तं, जन्मान्तरं जीवत एव पुंसः ॥ ८ ॥

तदत्र वस्तुनि नोपालभ्यो राक्षसः, आनन्दराज्यलाभादनुग्राह्यश्च परतस्तस्य परिग्रहे परित्यागे वा, कुमारः प्रमाणम् ।

तमित्यतो हेतोः अत्रास्मिन्विषये पर्वतकमारणात्मके इत्यर्थः । नातिदोषमधिकापराधं राक्षसस्येति शेषः । न पश्यामि न प्रेक्षे । तमेव (दोषाभावमेव) दर्शयति—पश्यत्वित्यादिना ।

मित्राणीति । अर्थस्य प्रयोजनस्य वशादनुरोधात्कार्यानुरोधेनेत्यर्थः । मित्राणि सुहृदो वन्धूनिति यावत् । शत्रुत्वं, शत्रून् विपक्षांश्च मित्रत्वं बन्धुत्वमुपानयन्ती प्रापयन्ती नीतिः अर्थशास्त्रनियमः जीवत एव पुंसोऽमृतानेव पुरुषान् पूर्वञ्च तद्वृत्तं पूर्ववृत्तम् अस्मृतं पूर्ववृत्तं यस्मिन्तदस्मृतपूर्ववृत्तम् अचिन्तितपूर्ववृत्तान्तं जन्मान्तरम् अन्यज्जन्म नयति प्रापयति । यथा जन्मान्तरे (अन्यस्मिन् जन्मनि) पूर्वजन्मवृत्तान्तं न स्मर्यते तथा राजनीतिवशाज्जीवत एव पुंसः पूर्वकृतापकारादि न स्मर्यत इति भावः । पूर्वार्द्धे नीत्या मित्रेषु शत्रुत्वस्य शत्रुषु मित्रत्वस्य च प्रापणाद्विरूपयोः (असंभवतोः)उत्तरार्द्धेऽपि तयाऽजीवत एव पुंसो जन्मान्तरप्रापणाच्चविरूपयोश्च संघटनाद्विषमालंकारः । एवं मित्रत्वशत्रुत्वयोरन्योन्यविरोधात् जीवतः पुंसो जन्मान्तरेण (जन्मान्तरप्रापणेन) विरोधाच्च विरोधालंकारश्चेत्युभयालंकारसंभवादनयोर्मध्ये कोऽत्रालंकार इति सन्देहोदयाच्च सन्देहसंकरालङ्कारः । केचित्तु (मित्राणि शत्रुत्वमिवानयन्ती)ति पाठमङ्गीकृत्योत्प्रेक्षाऽतिशयोक्त्योः संसृष्टिमाहुः । इन्द्रवज्रावृत्तम् ॥ ८ ॥

तदत्रेति । तत्तस्मात्कारणात् अत्रास्मिन् वस्तुनि विषये राक्षसोऽमात्यः

किया, इस लिये इस विषयमे विशेष दोष नहीं दीखता ।

देखिये—कार्य के अनुरोध से मित्र के साथ शत्रुता (और) शत्रु के साथ मित्रता को करनेवाली नीति, जीवित पुरुषों को ही अज्ञात पूर्ववृत्तान्तवाले जन्मान्तरको प्राप्त करा देती है ॥ ८ ॥

इसलिये इस विषयमें राक्षस तिरस्कार के योग्य नहीं है, नन्दराजा के राज्यप्राप्ति के समय तक यह माननीय है । उसके बाद उस का तिरस्कार करना अथवा साथ रखना आपके अधीन है ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मलयकेतुः—एवं भवतु । सखे ! सम्यक्-दृष्टवानसि । अमात्यस्य वधे प्रकृतिक्षोभः स्यात् । एवञ्च सन्दिग्धे विजयः स्यात् ।

पुरुषः—(प्रविश्य) जेदु कुमारो । अअं अज्जस्स गुम्मट्ठाणाधिकिदो दीहचक्खू अज्जं विण्णवेदि, एसो क्खु अह्मेहि कडआदो णिक्कमन्तो अगहीदमुद्दो सलेहो पुलिसो गहीदो, ता पच्चक्खीकरेदु णं अज्जोत्ति [जयति जयति कुमारः। अयमार्य्यस्य गुल्मस्थानाधिकृतो दीर्घचक्षुरार्यं विज्ञापयति, एष खल्वस्माभिः कटकान्निष्क्रामन्नगृहीतमुद्रः सलेखः पुरुषो गृहीतस्तत् प्रत्यक्षीकरोत्वेनमार्य इति]।

भागुरायणः—भद्र ! प्रवेशय ।

पुरुषः—जं अज्जो आणवेदि [यदार्य आज्ञापयति] (इति निष्क्रान्तः)

नोपालम्भनीयो न तिरस्कार्यः । आनन्दराज्यलाभात् नन्दराज्यप्राप्तिं यावत् अनु ग्राह्योऽनुकम्प्यश्च अमात्य इति यावत् राक्षस इति शेषः । परतश्च नन्दराज्यप्राप्त्युत्तरकाले च परिग्रहे ग्रहणे परित्यागेऽग्रहणे वा राक्षसस्येति शेषः, कुमारो भवानेव प्रमाणम् निदर्शनम् नन्दराज्यप्राप्त्युत्तरकाले यथा भवते (रोचेत) तथा करिष्यतीत्यर्थः । (इदं कुपितस्य मलयकेतोः समाधानरूपं पर्युपासनम्) ।

सम्यगिति । सम्यक् साधु दृष्टवान् विचारितवान् असि त्वमिति शेषः । अमात्यवधे मन्त्रिहिंसने प्रकृतीनां क्षोभः प्रकृतिक्षोभः प्रजाविरागः स्यात् , एवं च विजयः सन्दिग्धः सन्देहयुक्तः स्यात (अर्शाद्यजन्तः सन्दिग्धशब्दः) ।

जयत्विति । आर्यस्य भवतः गुल्मस्थानाधिकृतः शिविरप्रधानद्वारपालकः अयमेष दीर्घचक्षुः एतदाख्यः आर्यं भवन्तं विज्ञापयति निवेदयति, कटकात् शिविरात् निष्क्रामन् निस्सरन् अगृहीता मुद्रा येन सोऽगृहीतमुद्रः अप्राप्तप्रवेशनिर्गमा-

---

मलयकेतुः—ऐसे ही सही । मित्र ! तुम अच्छा विचार किए हो । मन्त्री के वध करने से प्रजा विरक्त हो जायगी और विजय में सन्देह हो जायगा ।

पुरुषः—(आकर) कुमारकी जय हो, जय हो आपके सैन्यावास स्थान का दीर्घचक्षु नामक प्रधान द्वारपाल आप से निवेदन करता है कि सैन्यावासस्थान से आते हुए और विना मुद्राचिह्नवाले लेखके साथ यह पुरुष हमलोगों द्वारा पकड़ा गया है इसको आप देखिये ।

भागुरायणः—भद्र ! उसे यहां ले आओ ।

पुरुषः—जो आज्ञा । (बाहर चला गया)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(ततः प्रविशति पुरुषेणाऽनुगम्यमानः संयतः सिद्धार्थकः) ।

सिद्धार्थकः—(स्वगतम्)—

तिप्पन्तीए गुणेसुं दोसेसुं परंमुहं करन्तीए ।
अह्मारिसजणणीए प्पणमामो सामिभत्तीए ॥९॥

[तृप्यन्त्यै गुणेषु, दोषेषु पराङ्मुखं कुर्वन्त्यै ।
अस्मादृशजनन्यै प्रणमामः स्वामिभक्त्यै] ॥९॥

नुमतिपत्रः लेखेन सहितः सलेखः पत्रिकायुक्तः अयमेषः पुरुषो जनोऽस्माभिर्गृहीतः धृतः प्राप्त इति यावत् तत्तस्मात् एवं पुरुषम् आर्यो भवान् प्रत्यक्षीकरोतु स्वयं पश्यतु ।

तत इति । ततस्तदनन्तरं भागुरायणानुमतिमादाय निष्क्रमणोत्तरमित्यर्थः । पुरुषेण मलयकेतुचरेणाऽनुगम्यमानोऽनुस्रियमाणः संयतः पाशादिभिः संबद्धः सिद्धार्थकः एतदाख्यो राक्षसगुप्तप्रणिधिः प्रविशति मलयकेतु-भागुरायणालंकृतरङ्गशालाभ्यन्तरगतो भवतीत्यर्थः । तत्सान्निध्यं प्राप्नोतीति यावत् । (इत उद्‌र्ध्वमङ्कावसानं यावत्प्रथमेऽङ्केकिमत्राभिलिखामीत्यारभ्य कर्णे एवमेवमित्यन्तग्रन्थेनोपक्षिप्तबीजस्यानेकधा प्रकीर्णस्यैकार्थीकरणवीजोपगमनस्यैव सन्धेरङ्गस्य प्रपञ्च इत्यवसेयम्)।

तृप्यन्त्यै इति । (गुणेष्वित्यतः प्रागनुचराणामित्याक्षेपः) अनुचराणां सेवकानां गुणेषु उत्कर्षेषु कार्यसाधनक्षमत्व-चातुर्यादिरूपेषु विषये, वा दृष्टेषु सत्सु तृप्यन्त्यै सन्तुष्टायै (तृपेरन्तर्भावितण्यर्थत्वात्) तृप्तिप्रदायिन्यै वा दोषेषु अपराधेषु सत्सु पराङ्मुखं कुर्व्वन्त्यै विमुखं विदधत्यै अस्मादृशानां जननी अस्मादृशजननी तस्यै अस्मादृशजनन्यै मादृशानां भृत्यानां पालनकर्त्रीत्वेन जननीतुल्यायै इत्यर्थः । स्वामिनो भक्तिः स्वामिभक्तिस्तस्यै स्वामिभक्त्यै प्रभुसेवायै प्रणमामो नमस्कुर्मः। या स्वामिभक्तिः भृत्यगुणदर्शनात्स्वयं तृप्यन्ती भृत्यानां तृप्तिप्रदायिनी वा दोषनिरीक्षणाल्लज्जया तानधोमुखान् विदधती तद्दोषानगणयन्ती वा पालनकर्त्रीत्वेन मातृसदृशी तस्यै स्वामिभक्त्यै नमोऽस्त्वित्यर्थः । प्रभुसेवानुरोधेन तत्कार्यसम्पादना-

---

(पुरुष के साथ बँधे हुए सिद्धार्थकका प्रवेश)

सिद्धार्थकः—(मनही मन) —

सेवकोंके चातुर्यादि गुण देखने पर सन्तुष्ट होनेवाली या तृप्ती देनेवाली उनके दोष देखनेपर विमुख हो जानेवाली और माता के तुल्य हमलोगों की रक्षा करनेवाली स्वामिभक्ति को प्रणाम है ॥ ९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुरुषः—(उपसृत्य) अज्ज ! अअं सो पुलिसो [आर्य ! अयं स पुरुषः]।

भागुरायणः—(नाट्येनावलोक्य) भद्र ! किमागन्तुकः, आहोस्विदिहैव कस्यचित्परिग्रहः ?

सिद्धार्थकः—अज्ज ! अहं क्खु अमच्चरक्खसस्स सेवओ [आर्य ! अहं खल्वमात्यराक्षसस्य सेवकः]

भागुरायणः—भद्र ! तत् किमर्थमगृहीतमुद्रः कटकान्निष्क्रामसि ?

सिद्धार्थकः—अज्ज ! कज्जगोरवेण तुवराविदोह्मि [आर्य ! कार्यगौरवेण त्वरायितोऽस्मि]।

भागुरायणः—कीदृशं तत्कार्यगौरवं, यद्राजशासनमुल्लङ्घयसि ?

यायुक्तमपि क्रियमाणं कार्यं न दोषोद्घोषकरमपि तु गुणावहमेवेति भावः। (स्वामिभक्त्यै इति क्रियया यमभिप्रैति स सम्प्रदानमिति विहितचतुर्थ्यन्तम्)। स्वामिभक्तौ जननीत्वसमारोपणान्निरङ्गरूपकालङ्कारः ॥ ९ ॥

किमर्थमिति। अयं स पुरुषः भवता गृहीत इत्यर्थः। किम् आगन्तुकः अन्यस्थानात्साम्प्रतमत्रागतः आहोस्विदथवा इहात्रैव स्थाने कस्यचिदिहत्यस्यैव परिग्रहः आश्रितोऽनुचर इति यावत्।

भद्रेति। भद्रकल्याणिन् ! तत्तस्मात्कारणात् अगृहीतमुद्रोऽप्राप्तप्रवेशनिर्गमनानुमतिपत्रः सन् कटकात् शिविरात् किमर्थं कस्मै प्रयोजनाय निष्क्रामसि निर्गच्छसि त्वमिति शेषः।

कार्येति। कार्यगौरवेण प्रयोजनप्राचुर्य्येण त्वरायितः शैघ्रयुक्तोऽस्मि।

कीदृशमिति। तत् भवदुक्तं कार्यगौरवं प्रयोजनप्राचुर्यं कीदृशं किम्भूतं येन

पुरुषः—(समीप जाकर) आर्य ! यही वह पुरुष है।

भागुरायणः—(विचित्र ढङ्ग से देखकर)। भद्र ! क्या यह कहीं बाहर से यहां आया है या यहां रहनेवाले किसी पुरुष का नौकर है।

सिद्धार्थकः—आर्य ! मैं मन्त्रि राक्षस का सेवक हूं।

भागुरायणः—भद्र ! तब तुम विना मुद्रा लिये क्यों सैन्यावासस्थान से बाहर जाते हो।

सिद्धार्थकः—आर्य ! मैं कार्याधिक्य के कारण चञ्चल हो रहा हूं।

भागुरायणः—भद्र ! वह कौनसा अधिक कार्य है, जिसके लिये तुम राजाकी आज्ञाका उल्लंघन करते हो ?

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मलयकेतुः—सखे भागुरायण ! लेखमुपानय ।

सिद्धार्थकः—(भागुरायणाय लेखमर्पयति) ।

भागुरायणः—(सिद्धार्थकहस्ताल्लेखं गृहीत्वा मुद्रां दृष्ट्वा) कुमार ! अयं लेखः, राक्षसनामाङ्कितेयं मुद्रा ।

मलयकेतुः—मुद्रां परिपालयन्नुद्घाट्य दर्शय ।

भागुरायणः—(तथा कृत्वा दर्शयति) ।

मलयकेतुः—(गृहीत्वा वाचयति) "स्वस्ति, यथास्थानं कुतोऽपि, कोऽपि, किमपि, पुरुषविशेषमवगमयति । अस्मद्विपक्षं निराकृत्य,

---

कार्यगौरवेणेति शेषः राजशासनं नृपादेशम् उल्लङ्घयसि अतिक्रामसि ।

मुद्रामिति । मुद्रां सिद्धार्थकहस्तस्थिताङ्गुलिमुद्रां परिपालयन् राक्षसनामचिह्नमन्यथा न भवेत्तथा संरक्षन् उद्घाट्य धारणपेटिकामिति शेषः । दर्शय मुद्रामिति शेषः । (राक्षसमुद्रया सह सम्वादार्थं लेखधारणपेटिकयोर्मुद्रापरिपालनमित्यवगन्तव्यम्) ।

स्वस्तीति । मङ्गलार्थकमव्ययमिदम् , पत्रिकादौ स्वस्तिशब्दलेखस्य प्रसिद्धत्वात् । स्थानमनतिक्रम्य यथास्थानं (विद्यमानमित्यवशिष्य कमपीत्यनेनान्वयो बोध्यः) कुतोऽपि कस्मादपि स्थानादिति शेषः । कोऽपि कश्चिदपि जनः कमपि पुरुषविशेषं जनम् अवगमयति विज्ञापयति अस्माकं विपक्षोऽस्मद्विपक्षस्तमस्मद्विपक्षं मम विद्वेषिणम् (कौटिल्यमित्यप्रकाशितोऽभिप्रायः) । निराकृत्य निष्कास्य साचिव्यपदात्पृथक्कृत्येत्यर्थः । कौटिल्यनिराकरणस्य प्रागेव त्वया प्रतिश्रुतत्वादिति भावः । सत्यवादिना तथ्यवचनेन (मौर्येणेति ध्वन्यर्थः) क्वापि लोकोत्तरा सत्यता

मलयकेतुः—मित्र भागुरायण ! वह लेख तो दिखाओ ।

सिद्धार्थकः—(भागुरायण को लेख देता है) ।

भागुरायणः—(सिद्धार्थक के हाथ से लेख को लेकर और मुद्रा को देखकर) कुमार ! यह लेख है और यह राक्षसनामाङ्कित मुद्रा है ।

मलयकेतुः—सिद्धार्थक के हाथ की अङ्गुलिमुद्राकी रक्षा करते हुए पेटी खोल कर मुद्रा को दिखाओ ।

भागुरायणः—(वैसा करके दिखाता है) ।

मलयकेतुः—(पत्र को लेकर बांचता है) । कल्याण हो, किसी स्थान से आया हुआ कोई पुरुष निवेदन करता है कि हमारे शत्रु (चाणक्य) को मन्त्रिपद से हटाकर,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दर्शिता कापि सत्यता सत्यवादिना । साम्प्रतमेषामपि प्रथममुपन्यस्तसन्धीनामस्मत्सुहृदां, पूर्वप्रतिज्ञातसन्धिपरिपणवस्तुप्रतिपादनप्रोत्साहनेन सत्यसन्धः, प्रीतिमुत्पादयितुमर्हति। एते ह्येवमुपगृहीताः सन्तः स्वाश्रयविनाशेनैवोपकारिणमाराधयिष्यन्ति। अविस्मृतमप्येतत्—सत्यवतः स्मारयामः । एतेषां मध्ये केचिदरेः कोषदन्तिभ्यामर्थिनः, केचिद् विषयेणेति । अस्मान् प्रत्यलङ्कारत्रयञ्च. यत् सत्यव-

---

सत्यपालनकर्तृता दर्शिता प्रकटिता । साम्प्रतमिदानीं प्रथमं प्राक् उपन्यस्तः कृतः सन्धिर्भवता सह सम्मेलनं यैस्ते उपन्यस्तसन्धयस्तेषामुपन्यस्तसन्धीनां भवता सह कृतसम्मेलनानाम् एतेषाम् अस्मत्सुहृदामस्मन्मन्त्रिणां पूर्वं प्रतिज्ञातः पूर्वप्रतिज्ञातः स चासौ सन्धिः पूर्वप्रतिज्ञातसन्धिस्तस्य परिपणः प्रतिदानभूतं यद् वस्तु तस्य प्रतिपादनं तेन प्रोत्साहनं तेन पूर्वप्रतिज्ञातसन्धिपरिपणवस्तुप्रतिपादनप्रोत्साहनेन प्राक्प्रतिश्रुतसम्मेलनप्रतिदानभूतवस्तुप्रदानाश्वासनेन सत्या सन्धा यस्य स सत्यसन्धः सत्यप्रतिज्ञः प्रीतिं हर्षमुत्पादयितुं जनयितुम् अर्हति योग्यो भवति एते कौलूतप्रभृतयः एवमुक्तयुक्त्या समाश्वासने सतीत्यर्थः। अनुगृहीता अनुकम्पिताः सन्तः स्वाश्रयविनाशेन निजावलम्बविघातेनैव हेतुना उपकारिणं भवन्तमिति शेषः । आराधयिष्यन्ति आश्रयिष्यन्ति । एतत्पूर्वोक्तमविस्मृतमर्थात्स्मृतमपीत्यर्थः । सत्यवतः सत्यवादिनो भवत इत्यर्थः (इगर्थकस्मरतेः प्रयोगे 'अधीगर्थदयेशामि'ति कर्मणि षष्ठी) स्मारयामः स्मृतिपथं प्रापयामो वयमिति शेषः । एतेषां कौलूतप्रभृतीनां मध्ये केचित् कियन्तो जना इति शेषः । अरेः शत्रोः कोषदन्तिभ्यां (प्रकृत्यादिभ्य इति तृतीया) धनसमूहहस्तिभ्यामर्थिनो धनवन्तः, केचित् कियन्तो जना विषयेण अर्थिनो विषयिणो वेति शेषः । जाता इत्यपि शेषः । अस्मान् प्रति अस्माकं सविधे त्रयोऽवयवा अस्येति त्रयम् अलंकाराणां त्रयमलंकारत्रयं त्रीणि भूषणानीत्यर्थः । यत् सत्यमस्त्यस्येति सत्यवान् तेन सत्यव-

---

सत्यवादी आपने अपनी सत्यता दिखायी । इस समय सत्यप्रतिज्ञ आप पूर्वोक्त सन्धि के प्रतिपादनरूप वस्तु के आश्वासन द्वारा पहले सन्धि करने वाले इन हमारे मित्रों को प्रसन्न करें । ये कौलूत प्रभृति आपके कृपापात्र होते हुए निराधार होने के कारण आपके उपकारों का आभार मानकार आपकी सेवा करेंगे पूर्वोक्त बात याद है तो भी हमलोग आप को याद दिलाते हैं । इन कौलूत आदि में कितने ही शत्रु के धन और हाथियों के पाने से धनवान् हैं और कितने ही जागीर द्वारा सम्मानित

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ताऽनुप्रेषितं, तदुपगतम् । अस्माभिरपि लेखस्याशून्यार्थं किञ्चिदनुप्रेषितं तदुपगमनीयं, वाचिकञ्चाप्ततमात् सिद्धार्थकाच्छ्रोतव्यम् इति ।

मलयकेतुः—भागुरायण ! कीदृशो लेखः ।

भागुरायणः—भद्र सिद्धार्थक ! कस्यायं लेखः ?

सिद्धार्थकः—अज्ज ! ण आणामि [आर्य ! न जानामि] ।

ता सत्यवादिना भवतेति शेषः । अनुप्रेषितं मदन्तिके प्रहितं तत् अलङ्कारत्रयमित्यर्थः । उपगतम्प्राप्तम् मयेति शेषः । लेखस्य पत्रिकाया अशून्यार्थम् अरिक्तार्थं किञ्चित् किमपि वस्तु अस्माभिरपि अनुप्रेषितम् अनुप्रहितम् । 'रिक्तपाणिर्न पश्येत्तु राजानं देवतां गुरुमि' त्याचाराल्लेखस्य साद्गुण्या (प्राशस्त्या) र्थं किमपि वस्तु प्रहितमिति भावः । (इममेव लेखं शकटदासेन चाणक्यो लेखयित्वा तदङ्गुरीयस्थमुद्रयाऽङ्कयित्वा च सिद्धार्थकाय कर्णे एवमेवेत्युपदिश्य प्रागर्पितवानिति स्मरणीयम्) तदुपगमनीयं तत्प्रापणीयम् । वाचिकं मदुक्तसन्देशवचनं च अतिशयेनाप्त आप्ततमस्तस्मादाप्ततमात् अतिविश्वासभाजनात् सिद्धार्थकात् एतदाख्यादस्मच्चरादित्यर्थः । श्रोतव्यमाकर्णितव्यम् ।

कीदृश इति । भागुरायणपठितपत्रस्थलेखशब्दमाकर्ण्य मलयकेतुस्तं प्रति पृच्छति कीदृशो लेख इति । यस्य लेखस्य प्राशस्त्यार्थं किञ्चिद्वस्तु प्रहितं स लेखः कीदृशः किम्विषयक इत्यर्थः इति सिद्धार्थकम्प्रति प्रष्टव्यं त्वयेति तात्पर्यम् ।

भद्रेति । भद्रमस्यास्तीति भद्रः (अर्शाद्यजन्तः) तत्सम्बुद्धौ हे भद्र कल्याणिन् सिद्धार्थक ! कस्यायं लेखः केन कम्प्रति लिखितमिदं पत्रमित्यभिधेहीत्यर्थः ।

आर्येति । आर्य श्रीमन् ! न जानामि कस्यायं लेख इति नावगच्छामीत्यर्थः । लोकैर्ज्ञातविषयोऽभिधीयते नाज्ञातविषय इति कस्य कम्प्रत्ययं लेख इत्येतद्विषयस्य मयाऽज्ञातत्वात्कथमभिधातुं युज्यत इति भावः ।

हैं, आपने हमलोगों के पास जो तीन अलङ्करण भेजे हैं, वे मिले और हमलोगों ने भी पत्रोत्तर के रूप में कुछ वस्तु भेजी है, वह आप ले लीजियेगा और विशेष वार्ता का सन्देश भी अत्यन्त विश्वासपात्र सिद्धार्थक से सुन लीजियेगा ।

मलयकेतुः—भागुरायण ! यह कैसा लेख है ?

भागुरायणः—भद्र सिद्धार्थक ! यह किसका लेख है ?

सिद्धार्थकः—आर्य ! मैं नहीं जानता ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भागुरायणः—हे धूर्त्त ! लेखो नीयते, न च ज्ञायते कस्यायमिति । सर्वं तावत्तिष्ठत्तु, वाचिकं त्वत्तः केन श्रोतव्यम् ?

सिद्धार्थकः—(भयं नाटयन्) तुह्मेहिं । [युष्माभिः]

भागुरायणः—किमस्माभिः ?

सिद्धार्थकः—मिस्सेहिं गहीदो, ण आणामि किं भणामित्ति [मिश्रैर्गृहीतो न जानामि किं भणामीति]।

हेधूर्तेति । हेधूर्त्त शठ! लेखः पत्रं नीयते नीत्वा स्थानान्तरं प्राप्यते तदेत्यध्याहारः। तदा कस्यायम् लेख इतिशेषः केन लिखितं पत्रमिति नावगच्छति । सर्वं तावत् तिष्ठतु तावच्छन्दो वाक्यालंकारे, सर्वमुत्तरप्रत्युत्तरवचनं तिष्ठतु मास्तु वाचिकं सन्देशवचनं त्वत्तो भवतः सकाशात् केन श्रोतव्यम् आकर्णितव्यम् तत्कथयेति शेषः (त्वत्तः केनाकर्णितव्यमिति पृष्टे प्रसङ्गतश्चन्द्रगुप्तनामोच्चारणस्यप्रसक्तत्वेऽपि युष्माकमाकर्णयितुमेवायमखिलो व्यापार इति गूढाभिसन्धिः)।

भयमिति । भयं साध्वसं नाटयन् अभिनयन् कुर्वन्नित्यर्थः। ब्रवीति सिद्धार्थक इति शेषः । युष्माभिर्भवद्भिः, इदमर्द्धोक्त्या समुत्तरं, (तस्य श्रोतव्यमिति वाक्यशेषो गूढः)।

किमस्माभिरिति । वाचिकं त्वत्तः केन श्रोतव्यमिति भागुरायणोक्तेयुष्माभिरिति सिद्धार्थकोत्तराकर्णनात्कुपितो भागुरायणो ब्रवीति किमस्माभिरिति त्वत्तः सकाशात्सन्देशवचनं किमस्माभिः श्रोतव्यम् यतो ब्रवीषि । युष्माभिरितीत्यर्थ ।

मिश्रैरिति । मिश्रशब्दः पूज्यार्थकः मिश्रैः पूज्यैर्भवद्भिरिति शेषः । गृहीतो वशीकृतः संयत इति यावत् अहमिति शेषः किं भणामि किं ब्रवीमीति न जानामि नावगच्छामि । भवद्भिर्गृहीतस्य मे साध्वसबाहुल्याच्चित्तस्यास्थैर्येणावक्तव्यवचनस्यैव मदास्यान्निःसरणाद्युष्माभिरित्यभिधाने न मेऽपराध इति भावः ।

भागुरायणः—ओ धूर्त्त ! तू लेखको लिये जाता है, पर यह नहीं जानता कि यह लेख किसका है ? अच्छा और जाने दो, यह कहो कि विशेष बातों का सन्देश तुमसे कौन सुनेगा ?

सिद्धार्थकः—(डरता हुआ) आप लोगों ने······

भागुरायणः—क्या हम लोगों ने ?

सिद्धार्थकः—आप लोगों ने मुझे पकड़ लिया है । इस लिये मैं क्या बोलता हूं । यह भी नहीं जानता ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भागुरायणः—(सक्रोधम्) एष ज्ञास्यसि । भद्र भासुरक ! वहिर्नीत्वा ताड्यतां तावत् , यावत् सर्वमनेन कथितं भवेत् ।

भासुरकः—जं अज्जो आणवेदि [यदार्य आज्ञापयति] ।

(इति सिद्धार्थकेन सह निष्क्रान्तः) ।

(पुनः प्रविश्य) । अज्ज ! इअं तस्स ताड़ीअमाणस्स कक्खादो मुद्दालंञ्छिदा आहरणपेड़िआ णिवड़िदा [आर्य ! इयं तस्य ताड्यमानस्य कक्षतः नाममुद्रालाञ्छिताऽऽभरणपेटिका निपतिता] ।

भागुरायणः—(विलोक्य) कुमार इयमपि राक्षसमुद्राङ्कितैव ।

सक्रोधमिति । सक्रोधं सकोपं (क्रियाविशेषणम्) तथथा स्यात्तथा ब्रवीतीत्यर्थः । एष त्वं ज्ञास्यसि अवगमिष्यसि । ज्ञानसाधकमाह—भद्रेति । भद्र कल्याणिन् भासुरक ! एष पुरुषाधमः वहिर्नीत्वा गृहाभ्यन्तराद्वाह्यप्रदेशं प्राप्यमाणः तावत् तत्कालपर्यन्तं ताडयतामाहन्यतां त्वयेति शेषः। यावत् यत्कालपर्यन्तम् अनेन पुरुषाधमेन सर्वं निखिलं वृत्तामिति शेषः । कथितं निवेदतं भवेत् स्यात् ।

यदार्य इति । आर्यः-श्रेष्ठो भवानिति शेषः । यत् यत्कार्यम् आज्ञापयति आदिशति तत्करोमीति शेषः।स्वामिनाऽऽदिश्यमानकार्यस्य भृत्यैरवश्यकर्तव्यत्वादार्येण भवताऽऽदिश्यमानैतत्पुरुषाधमताडनात्मककार्यमवश्यमचिरमेव सम्पादयामीति भावः ।

पुनर्भूयः । प्रविश्याऽभ्यन्तरमेत्य विज्ञापयतीति शेषः किं तदाह इयमिति । मुद्रालाञ्छिता राक्षसनामाङ्कितमुद्राचिह्निता इयमेषाऽऽभरणपेटिकाऽलङ्करणमञ्जूषा । ताड्यमानस्याऽऽहन्यमानस्य तस्य सिद्धार्थकस्य कक्षतो भुजमूलात् निपतिता स्खलिता भूमाविति शेषः ।

विलोक्यिति । विलोक्य दृष्ट्वा आभरणपेटिकां कुमारस्त्वा, इदम् पूर्वोक्ताभ-

---

भागुरायणः—(क्रोध के साथ) अच्छा, अब तू जानेगा ! भद्रभासुरक! बाहर ले जाकर इसे तबतक पीटो, जबतक यह सब बातें न कह दे ।

भासुरकः—जो आज्ञा ।

(सिद्धार्थक के साथ बाहर चला जाता है) ।

(फिर प्रवेश कर) आर्य ! मार खाते समय उसकी बगल से यह ।अलङ्करण की पेटी नीचे गिरि है ।

भागुरायणः—(देखकर) कुमार यह भी राक्षस की मुद्रा से चिह्नित की हुई है ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मलयकेतुः—अयं लेखस्याशून्यार्थो भविष्यति। इमान्यपि मुद्रां-परिपालयन्नुद्घाट्य दर्शय।

भागुरायणः—(तथा कृत्वा दर्शयति)।

मलयकेतुः—(विलोक्य) अये! तदिदमाभरणं, यन्मया स्वशरीरादवतार्य राक्षसाय प्रेषितम्। व्यक्तं चन्द्रगुप्तस्यायं लेखः।

भागुरायणः—कुमार! एष निर्णीयते संशयः। भद्र! पुनरपि ताड्यताम्।

रणपेटिकापरामर्शः। इयमपि एषाऽपि आभरणपेटिका राक्षसमुद्राङ्कितैव राक्षसाऽङ्गुलिमुद्राचिह्नितैव अस्तीति क्रियाशेषः।

अयमिति। अयमेषः लेखस्य पत्रिकायाः अशून्यार्थः अरिक्तार्थः। मुद्रां राक्षसाङ्गुलिमुद्रां परिपालयन् यथा व्याघातो न स्यात्तथा संरक्षन्नित्यर्थः। उद्घाट्योन्मुच्य इमान्येतान्यलङ्करणानि दर्शय अवलोकय मामिति शेषः।

विलोक्येति। विलोक्य निरीक्ष्य भागुरायणमिति शेषः। अये (कोमलालापे सम्बोधनमिदम्) मयाऽऽत्मना स्वशरीरान्निजवर्ष्मणः सकाशात् यत् आभरणमिति शेषः। अवतार्य पृथक्कृत्य राक्षसस्य राक्षसमुद्दिश्य प्रेषितं प्रहितम् उपायनत्वेन प्रदत्तमित्यर्थः। तदिदमाभरणं तदेवैतदलङ्करणम् चन्द्रगुप्तस्य मौर्यस्याऽयमेषलेखः पत्रिकेति व्यक्तं नृपयोग्यालङ्करणस्य मया राक्षसं प्रति प्रेषणात्तेन मौर्याय प्रहितमित्येतद्वृत्तं स्फुटं सम्यगवगतमित्यर्थः।

कुमारेति। कुमार शिशो मलयकेतो। एषोऽसौ संशयः (संशय्यतेऽसाविति विग्रहे संपूर्वकशीङः 'एरजि' ति कर्मण्यचा निष्पन्नः संशयशब्दः) संशयविषयः मौर्यस्यायं लेखोऽन्यस्य वेतीत्येवंरूपसन्देहविषय इत्यर्थः। निर्णीयते मयेति शेषः। येनोपायेनोक्तविधसन्देहनिर्णयं स्यात् स उपायो मया विधीयत इत्यर्थः।

मलयकेतुः—यही पत्र का उत्तर होगा। मुद्राचिह्न की रक्षा करते हुए पेटी खोल कर इन अलङ्करणों को भी दिखाओ।

भागुरायणः—(वैसा ही करके दिखाता है)।

मलयकेतुः—(देखकर) अये यह तो वही अलङ्करण है, जो मैंने अपने शरीर से उतार कर राक्षस के लिये भेजा था। तब तो चन्द्रगुप्त के लिए यह लेख है, यह स्पष्ट रूप से मालूम हो गया।

भागुरायणः—कुमार! अभी इस सन्देह का भी निर्णय हुआ जाता है। भद्र! उसे और पीटो।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुरुषः—जं अज्जो आणवेदि । (इति निष्क्रम्य पुनः प्रविश्य च) । अज्ज ! एसो क्खु ताड़ीअमाणो विण्णवेदि कुमारस्स स्सअंज्जेव णिवेदेमित्ति [यदार्य आज्ञापयति । आर्य ! एष खलु ताड्यमानो विज्ञापयति कुमारस्य स्वयमेव निवेदयामीति] ।

मलयकेतुः—प्रवेशय ।

पुरुषः—जं कुमालो आणवेदि [यत् कुमार आज्ञापयति] ।

(इति निष्क्रम्य सिद्धार्थकेन सह प्रविशति) ।

सिद्धार्थकः—(पादयोर्निपत्य) अभएण मे कुमालो प्पसादं करेदु [अभयेन मे कुमारः प्रसादं करोतु] ।

तमाह—भद्रेत्यादिना । पुनरपि भूयोऽपि ताड्यतां दण्ड्यताम् । प्रागन्यथा ताडनेन किञ्चित्कार्यं साधितं तथैव साम्प्रतमपि ताडनेन लेखस्य याथार्थ्येनाभिधानात्मकं कार्यं साधितं भविष्यतीति भावः ।

यदार्य इति । आर्यः पूज्यो भवान् यत्कार्यमाज्ञापयति आदिशति तत्करोमीत्यर्थः । एषोऽसौ सिद्धार्थक इत्यर्थः । खलुशब्दो वाक्यालंकारे ताड्यमान आहन्यमानो विज्ञापयति निवेदयति कुमारस्य शिशोर्मलयकेतोरित्यर्थः । स्वयमेव साक्षादेव निवेदयामि (भविष्यत्सामीप्ये लट्) कथयिष्यामीत्यर्थः । ताडनजन्यक्लेशसहनापेक्षया यथार्थकथनमेवोचितमित्यङ्गीकृतमनेन यथार्थकथनमिति भावः ।

प्रवेशयेति । प्रवेशय रङ्गशालाभ्यन्तरमानय मत्सन्निधिं प्रापयेति यावत् । मदन्यस्मै तदुदन्ताभिधानस्य याथातथ्येनाऽनभिप्रेतत्वात्तज्ज्ञानस्यावश्यकत्वादिति मदन्तिकवर्त्तिनं तं विधेहीत्यर्थः ।

यादिति । कुमारो राजपुत्रो भवान् यदाज्ञापयति यदादिशति तत्करोमीति शेषः । कुमारस्य भवतो निदेशस्य शिरोधार्यत्वात्सिद्धार्थकानयनात्मकनिदेशं झटिति सम्पादयामीत्यर्थः ।

पुरुषः—जो आज्ञा । (बाहर जाकर और फिर प्रवेश कर) आर्य ! ज्यादा मार खाने पर वह कहता है कि कुमार के समीप मैं स्वयं सब बातें बता दूँगा ।

मलयकेतुः—ले आओ ।

पुरुषः—कुमार की जो आज्ञा ।

(बाहर जाकर फिर सिद्धार्थक के साथ प्रवेश करता है) ।

सिद्धार्थकः—(पैरों पड़ कर) अभय दान देकर कुमार मुझपर प्रसन्न होव ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मलयकेतुः—भद्र ! भद्र ! अभयमेव परायत्तजनस्य, तन्निवेद्यतां यथाऽवस्थितम् ।

सिद्धार्थकः—णिसामेदु कुमालो, अहं क्खु अमच्चरक्खसेण इमं लेहं देइअ, चन्दउत्तसआसं प्पेसिदोह्मि [निशामयतु कुमारः, अहं खल्वमात्यराक्षसेनेमं लेखं दत्वा, चन्द्रगुप्तसकाशं प्रेषितोऽस्मि] ।

मलयकेतुः—भद्र ! वाचिकमिदानीं श्रोतुमिच्छामि ।

सिद्धार्थकः—कुमाल ! संदिट्ठोह्मि अमच्चरक्खसेण, जहा,—"एदे मम प्पिअवस्सा पञ्च राआणो तुए सह प्पढ़मसमुप्पण्णसन्धाणा । जदा,—कुलूदाहिवो चित्तवम्मा, मलअजणवदाहिवो सिंहणादो, कस्सीरदेसणाहो पुक्खरक्खो, सिन्धुराओ सिन्धुसेणो, पारसीआधि

भद्रेति । भद्र भद्रेति सम्भ्रमे द्विरुक्तिः। परेषामायत्तः परायतः स चासौ जनस्तस्य परायत्तजनस्य अन्याधीनलाकस्य अभयमेव, नास्ति साध्वसं किमपीत्यर्थः । तत्तस्मात्कारणात् यथाऽवस्थितं याथार्थ्येन सर्वं वृत्तमित्यर्थः। निवेद्यतामभिधीयताम् ।

निशामयत्विति । कुमारो भवान् निशामयतु शृणोतु, तदाह अहमिति । खलुशब्दो वाक्यालंकारे अमात्यराक्षसेन इमं लेखं पत्रं दत्वा समर्प्य चन्द्रगुप्तसकाशं मौर्यसन्निधिं प्रेषितः प्रहितोऽस्मि भवामि ।

भद्रेति । भद्रमस्त्यस्येति भद्रः (अर्शाद्यजन्तः) तत्सम्बुद्धौ हे भद्र कल्याणिन् ! इदानीं सम्प्रति वाचिकं वाक्सदेशं श्रोतुमाकर्णितुमिच्छामि अभिलषामि लेखाभरणपेटिकाद्ययादानान्निखिलोदन्ताऽनवगमात्सन्देहस्याऽनपायाद्वाक्सन्देशश्रवणौत्सुक्यमिति मौर्यान्तिकमेत्य कथयिष्यमाणं वाक्यमभिधेहीत्यर्थः ।

सन्दिष्टोऽमीति । अमात्यराक्षसेन राक्षसनाम्ना नन्दसचिवेन सन्दिष्टोऽस्मि

मलयकेतुः—भद्र! भद्र ! पराधीन पुरुष को सदा अभय ही है, इस लिये जो सच्ची बात हो, कह दो ।

सिद्धार्थकः—कुमार ! सुनें, मैं मन्त्रिराक्षस द्वारा इस लेख को लेकर चन्द्रगुप्तके पास भेजा गया हूँ ।

मलयकेतुः—भद्र मैं विशेष बातों का सन्देश सुनना चाहता हूँ ।

सिद्धार्थकः—कुमार ! अमात्य राक्षस ने मुझसे यह सन्देश कहा है कि हमारे प्रियमित्र ये पांच राजे आपके साथ मेल करनेवाले हैं। जैसेकि—कुलूत देश का अधिपति चित्रवर्म्मा, मलयदेशका अधिपति सिंहनाद, कश्मीरदेशका अधिपति पुष्कराक्ष, सिन्धुदेश का राजा सिन्धुसेन और पारसीक देशका राजा मेघाक्ष। इन्हीं पांचो में

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चदी मेहक्खो त्ति । एत्थ ज्जेव पढ़मभणिदा तिणि राआणो मलअ-केदुणो विसअं अहिलसन्ति, इदरे दुवे कोसं हत्थिबलं अ त्ति । ता जहा चाणक्कं णिराकरिअ महाराएण, मम प्पीदी उप्पादिआ, तहा एदाणं वाआसन्देसो त्ति [कुमार ! संदिष्टोऽस्म्यमात्यराक्षसेन, यथा,— "एते मम प्रियवयस्याः पञ्च राजानस्त्वया सह प्रथमसमुत्पन्नसन्धानाः । यथा,— कुलूताधिपश्चित्रवर्मा, मलयजनपदाधिपः सिंहनादः, कश्मीरदेशाधिपः पुष्कराक्षः, सिन्धुराजः सिन्धुसेनः, पारसीकाधिपतिर्मेघाक्षः इति । अत्रैव प्रथमभणितास्त्रयो राजानः मलयकेतोर्विषयमभिलषन्ति इतरौ द्वौ कोषं हस्तिबलञ्चेति । तद्यथा चाणक्यं निराकृत्य महाराजेन मम प्रीतिरुत्पादिता, तथैतेषामपि प्रथमभणितोऽर्थः संपादयितव्यः" इत्येतावान् वाक्संदेश इति] ।

मलयकेतुः—(स्वगतम्) कथं चित्रवर्म्मादयोऽपि मामभिद्रुह्यन्ति, अत एवैतेषां राक्षसे निरतिशया प्रीतिः । (प्रकाशम्) विजये !

सन्देशवचनमभिहितोऽस्मि, यथा यत् एते इमे त्वया सह भवता सार्द्धं प्रथमसमुत्पन्नसन्धानाः प्राक्सञ्जातसौहार्दाः पञ्च तत्संख्यकाः राजानो नृपतयः मम मित्राणि सन्तीति शेषः । तन्नाम दर्शयति `यथेत्यादिना । अत्रैव एतेषु परिगणितेषु पञ्चसु राजस्वेवेत्यर्थः प्रथमभणिताः प्रागुक्तास्त्रयो राजानो नृपतयः मलयकेतोः पर्वतकसुतस्य विषयं राज्यमभिलषन्ति वाञ्छन्ति इतरौ तदन्यौ द्वौ राजानाविति शेषः । कोषं द्रव्यगृहं हस्तिबलं गजसैन्यञ्च । तत्तस्मात् यथा येन प्रकारेण चाणक्यं कौटिल्यं निराकृत्य निष्कास्य महाराजेन चन्द्रगुप्तेन सहेति शेषः । मम प्रीतिः प्रणयः समुत्पादिता भवेदिति शेषः । तथा तेन प्रकारेण एतेषामपि राज्ञामिति शेषः । प्रथमभणितोऽर्थः प्रागुक्तकार्यं सम्पादयितव्यम् इत्येतावन्मात्रं वाचिकम् ।

स्वगतमिति । स्वस्मिन् गतं स्वगतं तद्यथा स्यात्तथा ब्रवीतीत्यर्थः । (क्रिया विशेषणम्) चित्रवर्म्मप्रभृतयोऽपि कथं कुतो माम् अभिद्रुह्यन्ति जिघांस-

---

पहले कहे गये तीन राजे मलयकेतु का राज्य चाहते हैं और दो राजे कोष (द्रव्य) और हस्तिबल (राजसैन्य) चाहते हैं । इस कारण जैसे कि चाणक्य को मन्त्रिपद से हटा कर महाराज (आप) के साथ हमारी प्रीति हुई, उसी तरह इन सब राजाओं का भी कार्य सम्पन्न होना चाहिये ।

मलयकेतुः—(मनही मन) क्या चित्रवर्मा आदि भी मुझको मारने की इच्छा करते हैं ? इसी लिये राक्षस से इन लोगों की अधिक प्रीति है । (जोर से) । विजये ! मैं

 Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अमात्यराक्षसं द्रष्टुमिच्छामि ।

प्रतीहारी—जं कुमालो आणवेदि । [यत् कुमार अज्ञापयति] ।

(इति निष्क्रान्ता) ।

(ततः प्रविशत्यासनस्थः स्वभवनगतः पुरुषेणानुगम्यमानः सचिन्तो राक्षसः) ।

राक्षसः—(स्वगतम्) सम्पूर्णमस्मद्बलं चन्द्रगुप्तबलैरिति यत् सत्यं न मे मनसः शुद्धिरस्ति । कुतः ?—

साध्ये निश्चितमन्वयेन घटितं बिभ्रत् सपक्षे स्थितिं,

न्ति, अत एव चित्रवर्म्मादीनां मयि जिघांसुत्वादेव एतेषां चित्रवर्मादीनां राक्षसे नन्दसचिवे निर्नास्त्यतिशयो यस्याः सा निरतिशया अधिका प्रीतिः प्रणयोऽस्तीति शेषः ।

तत इति । ततस्तदनन्तरं मलयकेतुनिष्क्रमणानन्तरमित्यर्थः आसनस्थः आसने समुपविष्टः स्वभवनगतः निजगृहवर्त्ती पुरुषेण सिद्धार्थकनाम्नाऽनुगम्यमानोऽनुस्रियमाणः सचिन्तः सखेदः राक्षसो नन्दसचिवः प्रविशति रङ्गशालाभ्यन्तरगतो भवतीत्यर्थः । मलयकेतुना राक्षसदर्शनौत्सुक्यस्य प्रतीहारीम्प्रति प्रकटितत्वाद्राक्षसस्य मलयकेतुसन्निधावागमनस्यावश्यकत्वात्तत्प्रवेश इति भावः ।

स्वगतमिति । स्वस्मिन् गतं स्वगतमात्मगतं (क्रियाविशेषणम्) तद्यथा स्यात्तथा वचनं ब्रवीति अतिसूक्ष्मरूपेणोच्चारयतीत्यर्थः । यत् यस्मात् अस्मद्बलमस्मत्सैन्यं चन्द्रगुप्तबलैर्मौर्यसैन्यैर्भद्रभटादिभिः पूर्णं व्याप्तमाक्रान्तमिति यावत् । इत्यतः सत्यं याथार्थ्येन मे मम मनसो हृदयस्य शुद्धिः असन्दिग्धत्वं नास्ति अस्मत्सैन्यस्य मौर्यसैन्यैराक्रान्तत्वात्सन्दिग्धं मे हृदयमिति भावः ।

साध्य इति । साध्ये शत्रुविनाशनात्मके कार्ये निश्चितं निश्चितशक्तिकम् अन्वयेनाऽनुगमनेन घटितं युक्तं सपक्षे सहाये स्थितिमवस्थानमानुकूल्यं बिभ्रत् धा-

---

मन्त्रि राक्षस को देखने की इच्छा करता हूँ ।

प्रतीहारी—कुमार की जो आज्ञा । (बाहर चला गया) (अपने घरमें आसन पर बैठे हुए पुरुष के साथ चिन्तित राक्षस का प्रवेश) ।

राक्षसः—(मनही मन) हमारा सैन्यवर्ग चन्द्रगुप्त के सैन्यवर्ग से घिरा हुआ है, इसीलिये मेरे मन की शुद्धि नहीं होने पाती ।

क्योंकि—जो साधन (सैन्यादि) शत्रुविनाशनरूप कार्य में निश्चित सामर्थ्यवान्, अनुगमन युक्त तथा सहायता में अनुकूलता धारण करनेवाला हो तो वह साधन (सैन्यादि शत्रुविनाश कार्यका साधक होता है और जो साधन (सैन्यादि) स्वयं,

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व्यावृत्तश्च विपक्षतो भवति यत्, तत् साधनं सिद्धये ।
यत् साध्यं स्वयमेव तुल्यमुभयोः पक्षे विरुद्धश्च यत्
तस्याङ्गीकरणेन वादिन इव स्यात् स्वामिनो निग्रहः ॥१०॥

रयत् विपक्षतः शत्रुवर्गात् व्यावृत्तं निवृत्तश्च भवति तत् साधनं सैन्यादि सिद्धये कार्यसम्पादनाय शत्रुविनाशायेति यावत् । भवतीति शेषः । यत् साधनं सैन्यादि स्वयमेव साध्यं भीत्यादिप्रदर्शनद्वारा आत्मसात्करणीयं उभयोरात्मवर्गपरवर्गयोस्तुल्यं समानम् उभयत्र स्थित्येति शेषः । यच्च साधनं (पक्षे) आत्मवर्गे विरुद्धं प्रतिकूलं तस्य साधनस्य तादृशस्य त्रिविधस्य सैन्यादेरित्यर्थः । अङ्गीकरणेन स्वीकारेण (पक्षान्तरे) यत् साधनं धूमादिरूपं हेतुः साध्ये सिद्धिविषयीभूते वह्न्यादौ निश्चितं निश्चितव्याप्तिकम् असन्दिग्धमिति यावत् । अन्वयेन तत्सत्वनियतसत्ताकस्वरूपाऽन्वयव्याप्त्या घटितं विशिष्टं सपक्षे सन्दिग्धसाध्यके पर्वतादौ स्थितिं सत्वं बिभ्रत् विपक्षतः साध्याभावाधिकरणात् जलह्रदादेः व्यावृत्तं तत्राऽवृत्तीत्यर्थः । तत् साधनं धूमादिरूपं हेतुसिद्धये वह्न्यनुमानाय भवति ।

यत् साधनं हेतुः स्वयमेव साध्यं हेत्वन्तरेणाऽनुमेयम् उभयोः सपक्ष–परपक्षयोः पर्वत—जल—ह्रदाद्योरित्यर्थः । तुल्यं विद्यमानं यत् साधनं (पक्षे) विरुद्धञ्च साध्यासामानाऽधिकरण्यविशिष्टं तस्य तादृशस्य त्रिविधस्य हेत्वाभासस्याऽङ्गीकरणेनाऽभ्युपगमेन वादिनः असदर्थंकरणेन विजयमाकांक्षतो जनस्येव तस्य तथाभूतस्य सैन्यादेरङ्गीकरणेन स्वामिनः प्रभोर्निग्रहः पराजयः स्यात् । मौर्यश्रीस्थैर्यसम्पादनात्मकसाध्ये साधकत्वेनाऽध्यवसितस्य मौर्यस्थिति–नन्दविनाशात्मकाभ्यामन्वय–व्यतिरेकव्याप्तिभ्यां दृष्टसारस्य भद्रभटभागुरायणप्रभृतिरूपयाव-

भय दिखाने के कारण शत्रु के वशीभूत हो जाय, और स्वपक्ष तथा शत्रुपक्ष दोनों ओर रहने वाला हो और अपने पक्ष के विरुद्ध हो, वह साधन (सैन्यादि) वादी की तरह स्वामी के पराजयका साधक होता है ॥

(दूसरा अर्थ यह है)

जो साधन (वन्ह्यादिरूप हेतु) सिद्धिविषय वह्न्यादि में असन्दिग्ध हो और तत्संस्त्व नियतसत्ताकस्वरूप अन्ययव्याप्ति से युक्त हो और सन्दिग्धसाध्यवाले पर्वतादि में रहता हो तथा साध्याऽधिकरण–जल–ह्रदादि में नहीं रहता हो, वह साधन (धूमादिरूप हेतु) वह्निके अनुमान साधक होता है । और जो हेतु स्वयं हेत्वन्तरसे अनुमान के योग्य हो तथा सपक्ष (पर्वत) परपक्ष (जल–ह्रदादि) में रहता हो तथा साध्याऽसामानाधिकरण्य युक्त हो वह हेतु वादी के पराजय का साधक होता है॥१०॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथवा तैस्तैर्विज्ञातापरागहेतुभिः प्राक्परिगृहीतोपजापैरापूर्णमिति न विकल्पयितुमर्हामि । (प्रकाशम्) ।

प्रियंवदक ! उच्यन्तामस्मद्वचनात् कुमारानुयायिनो राजानः, सम्प्रति दिने दिने प्रत्यासीदति कुसुमपुरम् । अतः परिकल्पितविभागैर्भवद्भिः प्रयाणे प्रस्थातव्यम् । कथमिति ?—

रसपक्षे स्थितिं बिभ्रतो मलयकेतुरूपविपक्षाद्व्यावृत्तस्य कौटिल्यनीतिरूपस्य साधनस्य मौर्यश्रीस्थैर्यसम्पादकत्वम्, भद्रभटप्रभृतिभिरायत्तीकृतत्वादुभयत्र समानाभासमानस्य मलयकेतुरुपपक्षे भद्रभटाद्यंशेन विरुद्धस्य मत्कार्यं साधयेन्नवेति सन्दिग्धस्य मलयकेतुसैन्यस्य (तादृशसैन्याभासस्य) अङ्गीकरणेन राक्षस-मलयकेत्वोरीशयोरवश्यं पराजयो भावीति दार्ष्टान्तिकपक्षाभिप्रायः वादिस्वामिनोरुपमानोपमेययोः साधनगतनिश्चितत्वादिरूपसामान्यधर्माणां साऽऽश्यबोधकेवशब्दस्य चाऽभिधानाच्छ्रौतीपूर्णोपमालंकारः श्लिष्टविशेषणत्वाच्छ्लेषानुप्राणितः शार्दूलविक्रीडितं वृत्तम् ॥ १० ॥

इत्थं सन्दिह्य भूयः समाधत्ते—अथवेति । विज्ञाता अस्माभिस्तात्पर्यसूचकेङ्गितादिभिरनुमिता अपरागहेतवश्चन्द्रगुप्तविरागकारणनि येषां ते तथोक्तास्तैर्विज्ञातापरागहेतुभिः अनुमितविरागकारणैः प्राक् अस्मत्पक्षावलम्बनात्पूर्वं परिगृहीतो ज्ञातोऽस्माकमुपजापो यैस्ते तथोक्तास्तैः प्राक्परिगृहीतोजापैः पूर्वज्ञातास्मद्भेदैः तैस्तैर्भद्रभटप्रभृतिभिः प्रधानपुरुषैः आपूर्णं व्याप्तमिति हेतोः विकल्पयितुं नार्हामि न योग्यो भवामि । प्रकाशं सुस्पष्टं ब्रवीतीत्यर्थः । अस्मद्वचनान्मदुक्त्या कुमारानुयायिनः कुमारानुसरणशीला राजानो नृपतयः उच्यन्तामभिधीयन्ताम् । सम्प्रति इदानीं दिने दिने क्षणे क्षणे कुसुमपुरं तन्नामनगरं प्रत्यासीदति निकटवर्त्ति भवतीत्यर्थः, अतोऽस्मात्कारणात् परिकल्पितो विभागो यैस्ते तथोक्तास्तैः परिकल्पितविभागैः कृतसैन्यविभागैर्भवद्भिर्युष्माभिः प्रयाणे रणयात्रायां प्रस्थातव्यं गन्तव्यम् ।

अथ वा—चन्द्रगुप्त के विरागकारण वाले तथा यहां आने से पहले हमारे समस्त भेदों के जाननेवाले उन सब भद्रभटादि प्रधानपुरुषों ने हमारे सैन्यवर्ग को पकड़ लिया है । इस लिये सन्देह करना व्यर्थ है । (जोर से)। प्रियंवदक ! मेरे कथनानुसार कुमार के साथ चलनेवाले राजाओं से कहो कि प्रतिक्षण कुसुमपुर निकट आता जा रहा है, इस लिये सेना को विभाजित कर आप लोग युद्ध के लिये आगे बढ़ें ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

follow me in the van drawn up in array

प्रस्थातव्यं पुरस्तात् खसमगधगणैर्मामनुव्यूह्य सैन्यै-
र्गान्धारैर्मध्ययाने सयवनपतिभिः संविधेयः प्रयत्नः ।
पश्चाद् गच्छन्तु वीराः, शकनरपतयः, संवृताश्चेदिहूणैः,
कौलूताद्यश्च शिष्टः पथि परिवृणुयाद्राजलोकः कुमारम् ॥ ११ ॥

प्रियंवदकः—जं अमच्चो आणवेदि । [यदमात्य आज्ञापयति]

(इति निष्क्रान्तः) ।

प्रस्थातव्यमिति । माम् अनु (अनोः कर्मप्रवचनीयत्वेन तद्योगे द्वितीया) मम पश्चादित्यर्थः खसाश्च मगधाश्च खसमगधास्तेषां गणो येषु तानि खसमगधगणानि तैः खसमगधगणैः (येषु सैन्येषु प्राग्ज्योतिषान्तर्वर्त्तिपार्वत्या मगधदेशवर्त्तिनश्च राजानः सन्ति तादृशैः सैन्यैरित्यर्थः) व्यूह्य विभागं कृत्वा पुरस्तात् संग्रामोद्यतसैन्यसमुदायाग्रे प्रस्थातव्यं गन्तव्यम् , यवनानां पतयो यवनपतयस्तैः सहिताः सयवनपतयस्तैः सयवनपतिभिः यवनपतिसहितैर्गान्धारैर्गान्धारदेशवर्त्तिभिः सैन्यैरिति शेषः । मध्ययाने सैन्यमध्यगमने प्रयत्न उद्योगः संविधेयः कर्तव्यः । पश्चात् तदनु चेदिहूणैश्चेदिदेशीयम्लेच्छविशेषैः संवृताः संमिलिता वीराः पराक्रमशालिनः शकनरभूपतयः शकदेशीयराजनो गच्छन्तु प्रयान्तु, शिष्टोऽवशिष्टः कौलूतः आद्यः प्रथमो यस्य स कौलूताद्यः चित्रवर्मप्रभृतिः राजलोको भूपवर्गः पथि मार्गे कुमारं मलयकेतुं परिवृणुयात् शरीररक्षणार्थं परितो वेष्टयेदित्यर्थः । युद्धार्थमुद्युक्तानां राज्ञां सैन्यविभागपूर्वकसमावेशस्य स्वभावसिद्धत्वादत्र स्वभाववर्णनात्स्वभावोक्तिरलङ्कारः । तदुक्तमलङ्कारसर्वस्वे—

सूक्ष्मवस्तुस्वभावयथावद्वर्णनं स्वभावोक्तिः ।

सूक्ष्मस्य कविमात्रगम्यस्य वस्तुनो यः स्वभावस्तस्य यथावद्वर्णनं स्वभावोक्तिरलङ्कार इत्यर्थः । प्रकृते उक्तविधराजकर्तृकसैन्यविभागपूर्वकयुद्धार्थप्रेषणात्मकसमावेशरूपकविमात्रगम्यवस्तुनो यथावद्वर्णनादुक्तालंकारसङ्घटनमुपपन्नम् । वृत्तमिदं स्रग्धरानाम ॥ ११ ॥

क्योंकि—खस और मगध देशवासी राजाओं के साथ सेनायें आगे चलें, यवनपति के साथ गान्धार देश की सेनायें बीच में चलें, चेदि तथा हूण देश के राजाओं और प्रबलपराक्रमी शक देश के राजे पीछे चलें । कौलूत आदि राजे रास्ते में कुमार (मलयकेतु) के चारों तरफ होकर चलें ॥ ११ ॥

प्रियंवदकः—अमात्य की जो आज्ञा । (चला जाता है) ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रतीहारी—(प्रविश्य) जेदु जेदु अमच्चो। अमच्च! इच्छदि तुमं कुमालो प्पेक्खिदुं [जयति जयत्यमात्यः। अमात्य! इच्छति त्वां कुमारः प्रेक्षितुम्]।

राक्षसः—भद्रे! मुहूर्त्तं तिष्ठ। कः कोऽत्र भोः?

पुरुषः—(प्रविश्य) आणवेदु अमच्चो [आज्ञापयत्वमात्यः]।

राक्षसः—भद्र! उच्यतां शकटदासः, यथा परिधापिता वयमाभरणं कुमारेण, तन्न युक्तमिदानीमस्माभिरनलंकृतैः कुमारदर्शनमनुभवितुम्, अतो यदलङ्करणत्रयं क्रीतं तन्मध्यादेकं दीयतामिति।

पुरुषः—जं अमच्चो आणवेदि। (इति निष्क्रम्य पुनः प्रविश्य च) अमच्च! इदं तं अलङ्करणं [यदमात्य आज्ञापयति। अमात्य! इदं तदलङ्करणम्]।

राक्षसः—(नाट्येनावलोक्यात्मानमलंकृत्योत्थाय च)। भद्रे! राजकुल-

---

उच्यतामिति। शकटदासस्तन्नामा कायस्थजातीयो मन्मित्रमुच्यतामभिधीयताम् मदुक्त्येति शेषः, यथा यत् वयं कुमारेण मलयकेतुना आभरणमलङ्करणं परिधापिता परिधारिताः (ग्राहिताः) प्रागिति शेषः, तत्तस्मात् इदानीं साम्प्रतम् अनलङ्कृतैराभरणशून्यैः अस्माभिः कुमारदर्शनं कुमारावलोकनम् अनुभवितुं कर्त्तुं न युक्तम् असाम्प्रतमित्यर्थः, अतोऽस्माद्धेतोः यत् अलङ्करणत्रयं त्रीण्यलङ्करणानीत्यर्थः। क्रीतं मूल्यदानपूर्वकमात्मसात्कृतं तन्मध्यात् अलङ्करणत्रयमध्यात् एकमलङ्करणं दीयतां समर्प्यताम्।

नाट्येनेति। नाट्येन नटोचितव्यापारेण अवलोक्य दृष्ट्वाऽलङ्करणमिति शेषः।

प्रतीहारी—(प्रवेश कर)। अमात्य की जय हो। अमात्य! कुमार (मलयकेतु) आप से मिलना चाहते हैं।

राक्षसः—भद्रे! कुछ देर ठहरो। यहां पर कौन है?

पुरुषः—(प्रवेश कर) जो आज्ञा।

राक्षसः—भद्र! शकटदास से कहो कि कुमार ने हमको अलङ्करण पहनाये हैं। इसलिये विना अलङ्करण पहने कुमार से मिलना ठीक नहीं है। सो मैंने मूल्य देकर जो तीन अलङ्करण खरीदे हैं, उनमें से एक अलङ्करण दे दो।

पुरुषः—जो आज्ञा। (बाहर जाकर और फिर प्रवेश कर)। अमात्य! यह आप का अलङ्करण है।

राक्षसः—(विचित्र ढङ्गसे अलङ्करण को देख और पहिन तथा उठकर)। भद्रे!

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गामिनं मार्गमादेशय ।

प्रतीहारी—एदु एदु अमच्चो [एतु एत्वमात्यः] ।

राक्षसः—(स्वगतम्) अधिकारपदं नाम निर्दोषस्यापि पुरुषस्य महदाशङ्कास्थानम् । कुतः ?—

> भयं तावत् सेव्यादभिनिविशते सेवकजनं
> ततः प्रत्यासन्नाद् भवति हृदयेष्वेव निहितम् ।
> अतोऽध्यारूढानां पदमसुजनद्वेषजननं
> मतिः सोच्छ्रायाणां पतनमनुकूलं कलयति ॥ १२ ॥

आत्मानं स्वशरीरमलंकृत्य भूषयित्वा उत्थाय गमनोत्सुको भूत्वा ब्रवीतीति शेषः । भद्रे ! (प्रतीहारीसम्बोधनम्) राजकुलगामिनं नृपसमीपप्रापकं मार्गं पन्थानमादेशय दर्शय ।

अधिकारपदमिति । कार्ये नियोजनमधिकारः स पदं स्थानम् अधिकारपदं दासत्वं निर्दोषस्यापि निरागसोऽपि पुरुषस्य महदाशङ्कास्थानम् परमभयकारणम् ।

भयमिति । भयं साध्वसं (कर्तृ) 'भीतिर्भीः साध्वसं भयमि' त्यमरः । सेव्यात् स्वामिनः तावत् प्रथमं सेवकजनम् अनुचरम् अभिनिविशते सर्वतः प्राप्नोति (अभिनिपूर्वकविशतेरात्मनेपदविधायकसूत्रं तु 'नेर्विशः' इति, 'अभिनिविशश्चे'त्यधिकरणस्य कर्मत्वम्) ततस्तदनन्तरं प्रत्यासन्नात् राजनिकटवर्तिनो जनात् अमात्यप्रभृतेरित्यर्थः । हृदयेष्वेव सेवकजनस्य चित्तेष्वेव निहितं स्थिरं भवति भयमिति शेषः । अध्यारूढानामुच्चपदप्राप्तानां भृत्यानामिति शेषः । पदं स्थानं (कर्मवा) असुजनद्वेषजननं दुर्जनक्रोधवर्द्धकं भवतीति क्रियाशेषः । सोच्छ्रायाणामत्युन्नतानां पुरुषाणामिति शेषः । मतिर्बुद्धिः पतनमधोगमनम् अनुकूलमुचितं कलयति अवगच्छति । अनुचराणां प्राक् राज्ञो भयं भवति महामहिमशालिनामनु-

---

राजा के समीप जाने का रास्ता बताओ ।

प्रतिहारी—अमात्य, इधर से आइए, इधर ।

राक्षसः—(मन ही मन) निर्दोष पुरुष का भी विशेष भयके स्थान ही को अधिकार कहते हैं ।

क्योंकि—पहले अनुचर को स्वामी से भय होता है, तदनन्तर स्वामीके समीप में रहनेवाले मन्त्री आदि से अनुचर के हृदय में भय होता है । इसलिये उच्चपद पर आसीन अनुचरों का स्थान दुर्जनों का क्रोधवर्द्धक होता है और उन्नत पुरुषों की बुद्धि अधोगमन को ही उचित जानती है ॥ १२ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रतीहारी—(परिक्रम्य) अमच्च ! अअं कुमालो चिट्ठदि, ता उपसप्पदु णं अमच्चो । [अमात्य ! अयं कुमारस्तिष्ठति, तदुपसर्पत्वेनममात्यः] ।

राक्षसः—(नाट्येनावलोक्य) अये ! अयं कुमारस्तिष्ठति य एषः,—

पादाग्रे दृशमवधाय निश्चलन्तीं
शून्यत्वादपरिगृहीततद्विशेषाम् ।
वक्त्रेन्दुं वहति करेण दुर्वहाणां
कार्य्याणां कृतमिव गौरवेण नम्रम् ॥ १३ ॥

, चराणामुत्तमपदावलोकनात्खलानां क्रोध उत्पद्यते अत उन्नतपदस्थितानां पुरुषाणां बुद्धिः स्वपतनमवश्यम्भावित्वेनोचितमेव विचारयतीति सरलार्थः । अत्युन्नतपदात् भीता बुद्धिमन्तोऽहर्निशमात्मनस्ततः पतनमेव चिन्तयन्तीति भावः । तुरीयपादप्रतिपाद्यात्युन्नतपदावलम्बि मृत्यपतनमवश्यम्भावीत्यर्थे पादत्रयगतावाक्यार्थसमुदायस्य हेतुत्वेनाभिधानाद्वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः । तदुक्तं पण्डितराजजगन्नाथप्रणीते रसगङ्गाधरे—

अनुमितिकरणत्वेन सामान्यविशेष्यभावाभ्याञ्चाऽनालिङ्गितः प्रकृतार्थोपपादकत्वेन विवक्षितोऽर्थः काव्यलिङ्गम् ।

अलङ्कारसर्वस्वोक्तञ्चैतल्लक्षणं यथा—हेतोर्वाक्यपदार्थता काव्यलिङ्गम् ।

उन्नतपदारूढानां बुद्धिरात्मनोऽधोगमनमुचितमेवावगच्छतीति तुरीयपादप्रतिपाद्यसामान्यार्थेन पादत्रयप्रतिपाद्यविशेषार्थस्य समर्थनादर्थान्तरन्यासश्चेत्यनयोः संसृष्टिः । प्रसादो गुणः । वैदर्भी रीतिः । शिखरिणी वृत्तम् ॥ १२ ॥

पादाग्र इति । य एष कुमारः शून्यत्वाच्चित्तव्यापारहीनत्वात् हेतोः न परिगृहीतो ज्ञातस्तद्विशेषः पादाग्ररूपाद्यात्मकविशेषो यया सा तथोक्ता तामपरिगृहीततद्विशेषाम् अज्ञातपादाग्ररूपाद्यात्मकविशेषाम् अत एव निश्चलन्तीं विषयान्तरानासक्तां दृशं दृष्टिमवधाय सम्यग्रूपेण संस्थाप्य दुर्वहाणां महतां कार्याणां गौरवेण गुरुत्वेन नम्रमानतं कृतमिव विहितमिव वक्त्रमिन्दुमिव वक्त्रेन्दुम् (उपमितं व्याघ्रादिभिः सामान्याऽप्रयोगे इति समासः) मुखचन्द्रं करेण हस्तेन वहति धारयति ।

प्रतिहारी—(घूमकर) अमात्य ! यह कुमार हैं । आप उनके समीप जाइए ।

राक्षसः—(विचित्र ढङ्गसे देखकर) । हाँ ! यही तो कुमार हैं, जो कि—

मनोव्यापार की निर्बलता के कारण निश्चलरूप विशेष बात को नहीं जाननेवाली अत एव स्थिर दृष्टि को पैर के अग्रभाग में लगाकर कठिन कार्यों के गौरव से नम्र

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(उपसृत्य) विजयतां विजयतां कुमारः !

मलयकेतुः—आर्य ! अभिवादये । इदमासनमास्यताम् ।

राक्षसः—(उपविशति) ।

मलयकेतुः—अमात्य ! चिरदर्शनेनार्यस्य वयमुद्विग्नाः ।

राक्षसः—कुमार ! प्रयाणे प्रतिविधानमनुतिष्ठता मया कुमाराद्-यमुपालम्भोऽधिगतः ।

मलयकेतुः—अमात्य ! प्रयाणे कथं प्रतिविहितमिति श्रोतुमिच्छामि ।

राक्षसः—कुमार ! एवमादिष्टाः कुमारस्यानुयायिनो राजानः ।

कार्यगौरवेण करे मुखं संस्थाप्य पादाग्रे दृशं निधाय किमपि चिन्तयति कुमार इति भावः वक्त्रेन्दुमित्यत्र वक्त्रमेवेन्दुर्वक्त्रेन्दुः वक्त्रमिन्दुरिव वक्त्रेन्दुरित्युभयविध-समासाभ्यां रूपकोपमयोः सन्देहसङ्करः । कृतमिवेत्यत्रोत्प्रेक्षणार्थकेवशब्दसद्भावाद्वा-च्योत्प्रेक्षया संसृष्टः । प्रहर्षिणी वृत्तम् । त्र्याशाभिर्मनजरगाः प्रहर्षिणीयम् । इति लक्षणात् ॥ १३ ॥

अमात्येति । अमात्य प्रधानसचिव, आर्यस्य पूज्यस्य भवतश्चिरदर्शनेन बहु-कालोत्तरमवलोकनेन वयमुद्विग्ना उत्कण्ठिताः कार्यशैघ्र्याद्व्यग्रा स्म इति क्रिया-शेषः (भवदवलोकनमरुन्तुदं मे साम्प्रतमिति गूढोऽर्थः) ।

कुमारेति । कुमार मलयकेतो ! प्रयाणे युद्धयात्रायां प्रतिविधानं प्रयत्नमनुति-ष्ठता विदधता मया कुमाराद्भवतः सकाशादयमेष उपालम्भोऽनादरोऽधिगतः प्राप्तः ।

कुमारेति । कुमारस्यानुयायिनः भवतोऽनुगमनशीला राजानः एवमित्थं

किये हुए की तरह अपने मुखचन्द्र को हाथ पर रखे हुए हैं ॥ १३ ॥

(समीप जाकर) कुमार की विजय हो, विजय हो ।

मलयकेतुः—आर्य ! मैं प्रणाम करता हूं । यह आसन है, बैठिये ।

राक्षसः—(बैठता है) ।

मलयकेतुः—अमात्य ! बहुत दिनों पर आपका दर्शन होने से हमलोग उदास हैं ।

राक्षसः—कुमार ! युद्धयात्रा के यत्न में लगे रहने के कारण मैंने आप से यह उलाहना पाया ।

मलयकेतुः—अमात्य ! युद्धयात्रा के लिये आपने किस तरह का प्रबन्ध किया है। यह मैं जानना चाहता हूं ।

राक्षसः—कुमार ! आपके अनुयायी राजाओं को मैंने इस तरह आदेश दिया है-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(प्रस्थातव्यमित्यादिश्लोकं पुनः पठति)।

मलयकेतुः—(स्वगतम्) विज्ञायते, कथं य एव मद्विनाशेन चन्द्रगुप्तमाराधयितुमुद्यताः त एव मां परिवृण्वन्ति (प्रकाशम्) आर्य ! अस्ति कश्चिद् यः कुसुमपुरं प्रति गच्छति, तत आगच्छति वा ?

राक्षसः—कुमार ! अवसितमिदानीं गतागतप्रयोजनम् । ननु पञ्चषैरहोभिर्वयमेव तत्र गन्तास्मः ।

मलयकेतुः—(स्वगतम्) विज्ञायते (प्रकाशम्) यद्येवं, तत् किमयमार्येण सलेखः पुरुषः कुसुमपुरं प्रस्थापितः ?

प्रस्थातव्यं पुरस्तादित्याद्युक्तरीत्येत्यर्थः । आदिष्टा आज्ञप्ता मयेति शेषः ।

स्वगतमिति । स्वगतमनतिस्पष्टं यथा तथा ब्रवीतीत्यर्थः । विज्ञायतेऽवगम्यते तवाऽभिप्राय इति शेषः, कथं कुतः य एव मद्विनाशेन मां नियन्तुमित्यर्थः चन्द्रगुप्तं मौर्यमाराधयितुं सेवितुमुद्यतास्तत्पराः त एव ते राजान एव मां परिवृण्वन्ति मच्छरीररक्षणार्थं पथि मां परितो वेष्टय गमिष्यन्ति । प्रकाशं सुस्पष्टं यथा तथा ब्रवीति । आर्य पूज्य ! यः कुसुमपुरं प्रति गच्छति तत आगच्छति वा कुसुमपुरं गत्वा ततोऽत्रागच्छेदित्यर्थः । एतादृश कश्चित्पुरुषोऽस्ति ।

अवसितमिति । इदानीं साम्प्रतं गतागतप्रयोजनम् गमनागमनप्रयोजनम् अवसितं समाप्तम् पञ्च षट् वा परिमाणमेषां ते पञ्चषास्तैः पञ्चषैः (बहुव्रीहौ संख्येये डज् बहुगणादिति डच्) अहोभिर्दिवसैः पञ्चषडदिवसाऽभ्यन्तर एवेत्यर्थः । वयमेवं तत्र कुसुमपुरे गन्तास्मः कुसुमपुरं गमिष्याम इत्यर्थः (भविष्यदनद्यतनेऽर्थे लुट्)।

स्वगतमिति । राक्षसोक्तिमाकर्ण्य मलयकेतुर्मनस्येव ब्रवीति किन्तदाह—विज्ञायत इति मौर्यनिग्रहार्थं वयमेव कुसुमपुरं गमिष्याम इति राक्षसाऽभिप्रायः

प्रस्थातव्यम्-इस श्लोक को फिर पढ़ता है ।

मलयकेतुः—(मनही मन) । में जानता हूं, जो राजे हमारा विनाश कर के चन्द्रगुप्त के आश्रित होने के लिये उद्यत (तैय्यार) हैं, वे ही सब मेरे चारों तरफ होंगे । (जोर से) आर्य ! ऐसा कोई पुरुष है, जो यहाँ से कुसुमपुर जाता है या वहां से यहां आता है ।

राक्षसः—कुमार ! अभी तो जाने-आने का काम बन्द है । किन्तु पांच-छः दिनों के बाद हम लोग स्वयं वहां पहुंच जायँगे ।

मलयकेतुः—(मनही मन) में जानता हूं । (जोरसे) यदि ऐसा है, तब आपने लेखके साथ इस पुरुष को किसलिये कुसुमपुर भेजा था ?

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राक्षसः—(विलोक्य) अये ! सिद्धार्थकः । भद्र ! किमिदम् ?

सिद्धार्थकः—(सवाष्पं लज्जां नाट्यन्) पसीददु पसीददु अमच्चो ! अमच्च ! अतिताड़ीअन्तेण मए ण पारिदं अमच्चस्स रहस्सं धारिदुं ।

[प्रसीदतु प्रसीदत्वमात्यः । अमात्य ! अतिताड्यमानेन मया न पारितम-मात्यस्य रहस्यं धारयितुम्] ।

राक्षसः—भद्र ! कीदृशं तत् रहस्यं न खल्वगच्छामि ।

सिद्धार्थकः—ननु विण्णवेमि, ताड़ीअन्तेण मए······[ननु विज्ञापया-मि, ताड्यमानेन मया··· ···]

(इत्यर्द्धोक्ते सभयमधोमुखस्तिष्ठति) ।

मलयकेतुः—भागुरायण ! स्वामिनः पुरस्ताद् भीतो लज्जितश्च नैष कथयिष्यति । अतः स्वयमेवार्याय कथय ।

मलयकेतुना मौर्यामात्यकार्यकरणाय तव कुसुमपुरे गमनमित्येवं रूपेणावगत इत्य-भिप्रायेणैव विज्ञायत इत्युक्तिः प्रकाशं सर्वैः श्राव्यं यथा तथा ब्रवीति । यद्येवं कुसु-मपुरगमनेऽभिमते सति तत्तस्मात् अयमेषः सलेखः पत्रिकायुक्तः पुरुषोऽनुचरः किं किमर्थमार्येण पूज्येन भवता कुसुमपुरम्प्रति प्रस्थापितः प्रेषितः ।

सवाष्पमिति । वाष्पेण नेत्रजलेन सहितं सवाष्पं सरोदनं यथा तथा लज्जां त्रपां नाटयन्नभिनयन् कथयतीति क्रियाशेषः । प्रसीदतु प्रसन्नो भवतु (त्वरार्थसू-चनाय द्विरुक्तिः) अमात्य मन्त्रिन् ! अतिताड्यमानेन मया अमात्यस्य भवतो रहस्यं गोप्यं धारयितुं गोप्तुं न पारितं न शक्तम् ।

कीदृशमिति । तत् सिद्धार्थकोक्तं रहस्यं गोप्यं कीदृशं किं विषयकमिति न खल्ववगच्छामि नैव जानामि ।

स्वामिन इति । स्वामिनः मम पुरस्तादग्रे भीतस्त्रस्तो लज्जितस्त्रपायुक्तश्च

राक्षसः—(देखकर) अहा ! सिद्धार्थक ! भद्र ! यह क्या ?

सिद्धार्थकः—(आखों में आँसू भर कर लज्जित भावसे) । आर्य ! प्रसन्न हो, प्रसन्न हों । आमात्य ! बहुत मार खाने के कारण मैं आपका रहस्य नहीं छिपा सका ।

राक्षसः—भद्र ! वह रहस्य कौन सा है ? उस को मैं नहीं जानता ।

सिद्धार्थकः—मैं कहता हूं न कि मार।खाकर मैंने······(इस तरह आधी बात कह-कर नीचामुख कर लेता है ।)

मलयकेतुः—भागुरायण ! यह लज्जित पुरुष नहीं कहसकेगा, इसलिये तुम्हीं इन से कहो ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भागुरायणः—यदाज्ञापयति कुमारः अमात्य! एष कथयति, यथा—"अहममात्यराक्षसेन लेखं दत्वा वाचिकञ्च सन्दिश्य, चन्द्रगुप्तसकाशं प्रेषितः" इति।

राक्षसः—भद्र सिद्धार्थक! अपि सत्यम्?

सिद्धार्थकः—(लज्जां नाटयन्)"..............एव्वं अतिताड़ी अन्तेण मए णिवेदिदं। ["..........एवमतिताड्यमानेन मया निवेदितम्]।

राक्षसः—कुमार! अनृतमेतत्। ताड्यमानः किं न ब्रूयात्?

मलयकेतुः—भागुरायण! दर्शय लेखं, वाचिकञ्चायमस्मै स्वभृत्यः कथयिष्यति।

भागुरायणः—(लेखमवलोकयन्) "स्वस्ति यथास्थाने कुतोऽपि पुरुषविशेषमवगमयति" इति वाचयति)।

राक्षसः—कुमार! शत्रोः प्रयोग एषः।

मलयकेतुः—लेखस्याशून्यार्थमार्येणेदमाभरणमनुप्रेषितमिति. तत्

एष सिद्धार्थकः न कथयिष्यति रहस्यं नाऽभिधास्यति, अतोऽस्मात् स्वयमेव साक्षादेव आर्याय राक्षसाय कथय ब्रूहि।

कुमारेति। कुमार मलयकेतो! एतत् सिद्धार्थकोक्तमनृतमसत्यम्। ताड्यमानो दण्ड्यमानः पुरुषः किं न ब्रूयात् अलीकमपि ब्रूयादित्यर्थः।

शत्रोरिति। शत्रोर्भवदरिभूतस्य चन्द्रगुप्तस्यैषोऽयं प्रयोगः पत्रादिषप्रेणमित्यर्थः।

भागुरायणः—जो आज्ञा। अमात्य! यह कहता है कि मैं मन्त्रिराक्षस से लेख और सन्देश को लेकर चन्द्रगुप्त के पास भेजा गया हूँ।

राक्षसः—भद्र सिद्धार्थक! यह ठीक है क्या?

सिद्धार्थकः—(लज्जित होता हुआ) बहुत मारखाने के कारण मैंने ऐसे ही कह दिया था।

राक्षसः—कुमार! यह झूठी बात है। मारखाता हुआ पुरुष क्या नहीं कह सकता?

मलयकेतुः—भागुरायण! लेख दिखाओ और सन्देश इनसे यह स्वयं कहेगा।

भागुरायणः—(लेख देखकर) 'स्वस्ति यथा स्थाने कुतोऽपि पुरुषविशेष मवगमयति' इत्यादि पढता है।

राक्षसः—कुमार! यह शत्रुका किया हुआ कार्य है।

मलयकेतुः—लेखकी पूर्त्ति के लिये जब आपने यह अलङ्करण भेजा है, तब यह

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कथं शत्रोः प्रयोग एष स्यात् ? (इत्याभरणं दर्शयति)।

राक्षसः—(आभरणं निर्वर्ण्य) कुमार ! नैतन्मयाऽनुप्रेषितम् , एतद्धि कुमारेण मह्यं दत्तं, मया च परितोषस्थाने सिद्धार्थकाय दत्तम् ।

भागुरायणः—भो अमात्य ! ईदृशस्याभरणविशेषस्य, विशेषतः कुमारेण स्वगात्रादवतार्य दत्तस्येयं परित्यागभूमिः ।

मलयकेतुः—वाचिकमप्याप्ततमात्सिद्धार्थकाच्छ्रोतव्यमिति लिखितमार्येण ।

लेखस्येति । आर्येण पूज्येन भवता लेखस्य पत्रिकाया अशून्यार्थं पूर्त्यर्थं विश्रम्भार्थमिति यावत् । इदमेतदाभरणमलङ्करणमनुप्रेषितमनुप्रहितम्, तत्तस्मात् शत्रोः रिपोः कथं कुत एष प्रयोगः पत्रादिप्रेषणम् ।

आभरणमिति । आभरणमलङ्करणं निर्वर्ण्य दृष्ट्वा ब्रवीतीति शेषः, मया एतदलङ्करणं नानुप्रेषितं नानुप्रहितम् एतद्धि एतदलङ्करणं हि कुमारेण मलयकेतुना मह्यं दत्तं (मह्यमिति सम्प्रदानचतुर्थ्यन्तम्) मया च मया तु परितोषस्थाने पारितोषिकरूपेण सिद्धार्थकाय दत्तम् ।

ईदृशस्येति । कुमारेण मलयकेतुना स्वगात्रान्निजशरीरादवतार्य पृथक्कृत्य विशेषतो विशेषरूपेण बहुमानपुरस्सरमित्यर्थः । दत्तस्य ईदृशस्य महार्घस्याऽऽभरणस्य इयं दानभूमिः एष दानपात्रम् सिद्धार्थकोद्देश्यकदानमित्यर्थः । वस्तुविशेषस्य पात्रविशेषस्य पात्रविशेषार्पणमेव युक्तमिति भावः ।

वाचिकमिति । अतिशयेनाप्त आप्ततमस्तस्मादाप्ततमात् अतिविश्वासभाजनात् अस्मात् सिद्धार्थकात् सकाशात् श्रोतव्यमाकर्णितव्यम् । इत्येतद्वृत्तमार्येण पूज्येन भवता लिखितम् ।

शत्रुका किया हुआ कार्य कैसे हो सकता है ? (यह कहकर अलङ्करणको दिखाता है)।

राक्षसः—(अलङ्करण देखकर) कुमार ! मैंने इस अलङ्करण को नहीं भेजा है । इसे श्रीमान् ने मुझे दिया था, और मैंने इसे पारितोषिकरूप में सिद्धार्थक को दे दिया था ।

भागुरायणः—अमात्य ! इस बहुमूल्य और शरीर से उतार कर कुमार द्वारा दिए हुए अलङ्कार का यह उपयोग है ।

मलयकेतुः—जबानी सन्देश भी अत्यन्त विश्वासी सिद्धार्थक से सुन लीजियेगा, यह आपने लिखा है ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राक्षसः—कुतो वाचिकम् ? कस्य वा लेखः ? अयमेवास्मदीयो न भवति ।

मलयकेतुः—इयं तर्हि कस्य मुद्रा ?

राक्षसः—कुमार ! कपटमुद्रामप्युत्पादयितुं शक्नुवन्ति धूर्त्ताः ।

भागुरायणः—कुमार ! सम्यगमात्यो विज्ञापयति । सिद्धार्थक ! केनायं लिखितो लेखः ?

सिद्धार्थकः—(राक्षसमुखमवलोक्य तूष्णीमधोमुखस्तिष्ठति) ।

भागुरायणः—अलं पुनरात्मानं ताडयित्वा. कथय ।

कुत इति । वाचिकं वाग्सन्देशः कुतः कस्मात् क वा कस्य वा लेखः पत्रम्, अयमेव लेख एव अस्मदीयो मामकीनो न भवति । यल्लेखदर्शनान्मयि सन्देहसमुदयादभिभवितुं मामुपस्थितः स लेख एव मल्लिखितो नेत्यर्थः ।

इयमिति । तर्हि तदा इयमेषा मुद्राऽङ्कनं कस्य पुरुषस्यास्तीति शेषः । इति पश्येति च क्रियाशेषः । लेखस्यातथ्यत्वेऽपि मुद्राया अतथ्यत्वं न सम्भवतीति मुद्रादर्शनात्त्वयि सन्देह समुचित एवेत्यर्थः ।

कुमारेति । कुमार मलयकेतो ! धूर्त्ता वञ्चकाः परप्रतारणशीला इति यावत् । जना इति शेषः । कपटमुद्रां कृत्रिममुद्रामपि; उत्पादयितुं निर्मातुं शक्नुवन्ति समर्थाः भवन्ति । परप्रतारणशीलानां कल्पितमुद्रानिर्माणेऽपि सौकर्यमेव नान्याधीनत्वापेक्षेति भावः ।

सम्यगिति । अमात्यः सचिवो राक्षसः सम्यक् विज्ञापयति याथातथ्येनाभिदधाति । भद्र कल्याणिन् सिद्धार्थक ! केनायं लिखितो लेखः किन्नामधेयेन पुरुषेण पत्रिकेयं लिखितेत्यर्थः । इहाऽमात्यागमनात् प्राक् त्वदीरितवचने तथ्यत्वाऽतथ्यत्वयोर्द्वयोरपि सम्भवः सन्देहश्च, साम्प्रतं तु राक्षसस्यात्र विद्यमानत्वाद्वचनं तथ्यमेव वा भवितुमर्हति नोभयोः सम्भवः सन्देहश्चेति भावः ।

अलं पुनरिति । राक्षसस्यैव लेख इत्यभिधातुमुद्युक्तं राक्षसमुखावलोकना-

---

राक्षसः—जबानी सन्देश अथवा लेख ही किसका है ? यह लेख ही हमारा नहीं है ।

मलयकेतुः—यह मुद्रा किस की है ?

राक्षसः—कुमार ! धूर्त्तलोग नकली मुद्रा भी बना सकते हैं ।

भागुरायणः—कुमार ! अमात्य ठीक कहते हैं । सिद्धार्थक! किसने यह लेख लिखा था।

सिद्धार्थकः—(राक्षस का मुख देखकर चुप चाप नीचे मुख कर लेता है) ।

भागुरायणः—इस तरह आत्मा को दुःख देना व्यर्थ है, कहो ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सिद्धार्थकः—अज्ज. सअटदासेण [आर्य ! शकटदासेन]।

राक्षसः—कुमार ! यदि शकटदासेन लिखितस्तर्हि मयैवलिखितः।

मलयकेतुः—विजये ! शकटदासं द्रष्टुमिच्छामि।

प्रतीहारी—जं कुमालो आणवेदि [यत् कुमार आज्ञापयति]।

भागुरायणः—(स्वगतम्) न खल्वनिश्चितार्थमार्यचाणक्यप्रणिध-

त्लज्जमानं च सिद्धार्थकम्प्रति भागुरायणोक्तिः पुनरात्मानं प्राणं ताडयित्वा क्लेश-यित्वाऽलं व्यर्थम् कथय ब्रूहि राक्षससाक्षात्कारे राक्षसस्यैव लेख इत्यभिधातुमात्मनः क्लेशोऽभिमन्ते स च कथनादेव निवृत्तः स्यान्नान्यथेति ब्रूहि यथार्थरूपेण केन लिखितोऽयं लेख इति भावः। यथार्थरूपेणानुक्तौ भूयस्ते ताडनं भविष्यतीति च गूढोऽभिप्रायः।

आर्येति। आर्य पूज्य ! शकटदासेन तन्नाम्ना कायस्थजातीयेन लिखितोऽयं लेख इति शेषः। नन्दप्रधानसचिवस्य राक्षसस्याग्रे साक्षात्तन्नामाभिधाने त्रपासाध्वसयोराधिक्यात्तद्व्याजेन शकटदासनामोक्तिरिति तात्पर्यम्।

यदीति। शकटदासेन मन्मित्रेण लिखितश्चेत्तर्हि तदा मयैव लिखित इत्यवगन्तव्यम्। शकटदासे लेखकत्वेन निश्चिते सत्यहमेव लेखको वृत्त इत्यर्थः। अतिस्नेहभाजनेशकटदासे राक्षसेन सर्वथा लेखनाऽभावस्य निश्चितत्वादित्थमुक्तिरित्यवधेयम्।

विजये इति। लेखकनिर्णयक्षणे सिद्धार्थकेन शकटदासनाम्नोऽभिधानात्तन्निर्णयस्याऽऽवश्यकत्वात्तस्य च शकटदाससाक्षात्कारमन्तराऽसम्भवादिति स्वप्रतीहारीं विजयाम्प्रति मलयकेतोरुक्तिः विजये ! शकटदासं राक्षससहृदयं कायस्थजातीयमुक्तनामानं पुरुषं द्रष्टुमवलोकितुमिच्छामि कामये यथा शकटदासो मे दृष्टिगोचरो भवेत्तथा विधीयतां त्वयेति भावः।

यत्कुमार इति। कुमारो भवान् यत् कार्यं कर्तुमिति शेषः। आज्ञापयति आदिशति तत्कार्यं करोमीत्यर्थः। शकटदाससाक्षात्कारात्मककार्यसम्पादनार्थमाज्ञप्तं तदचिरमेव सम्पादयामीति भावः।

स्वगतमिति। अनतिस्पष्टं यथा तथा ब्रवीति भागुरायणः। आर्यश्चासौ

सिद्धार्थकः—आर्य ! शकटदास ने।

राक्षसः—कुमार ! यदि शकटदास ने लिखा है तो मानों मैंने ही लिखा है

मलयकेतुः—विजये। मैं शकटदास को देखना चाहता हू।

प्रतिहारी—जो आज्ञा।

भागुरायणः—(मन ही मन) आर्य चाणक्य के दूत अनिश्चित अर्थ को

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

योऽभिधास्यन्ति आगत्य सकटदासो वा, "सोयं लेखः" इति प्रत्यभिज्ञाय पूर्ववृत्तं प्रकाशयेत्। एवं सति सन्दिहानो मलयकेतुरस्मिन् प्रयोगे श्लथादरो भवेत्। (प्रकाशम्) कुमार! न कदाचिदपि शकटदासोऽमात्यराक्षस्याग्रतो "मया लिखितः" इति प्रतिपत्स्यते, अतोऽन्यलिखितमस्यानीयतां, यतो वर्णसंवाद एवैतत् सर्वं विभावयिष्यति।

चाणक्य आर्यचाणक्यस्तस्य प्रणिधयः आर्यचाणक्यप्रणिधयः कौटिल्यदूताः खलु निश्चये अनिश्चितार्थमनिर्णीतवस्तुनाऽभिधास्यन्ति न कथयिष्यन्ति, वाऽथवा शकटदासः राक्षससहृदयः, सोऽयं लेखः, प्राक् चाणक्येन मया लेखितोऽसौ लेख इति प्रत्यभिज्ञाय इति सम्यगवबुद्ध्य पूर्ववृत्तं (सिद्धार्थकप्रेरणया मया शकटदासहस्तेन लेखितमिदं पत्रमिति प्रथमाङ्कोक्तवृत्तान्तमित्यर्थः) प्रकाशयेत् ख्यापयेत्। एवं सति पूर्ववृत्ते प्रकाशिते सतीत्यर्थः। सन्दिहानः सन्दिग्धचित्तो मलयकेतुः कुमारः अस्मिन् प्रयोगे राक्षसप्रभृतिविषयकवैमनस्यात्मके कार्ये श्लथादरोऽनुत्साहितचित्तो भवेत् स्यात्। प्रकाशं सुस्पष्टं ब्रवीतीत्यर्थः। कुमार! शकटदासः अमात्यराक्षसस्याग्रतः प्रधानसचिवस्य राक्षसस्याग्रे इत्यर्थः। मया लिखितः अयं लेख इति शेषः। कदाचिदपि जात्वपि न प्रतिपत्स्यते न स्वीकरिष्यति, अतोऽस्माद्धेतोः। अस्य शकटदासस्य अन्यलिखितम् अपरलेख आनीयताम् आनीय स्थाप्यताम् यतो यस्मादन्यलिखितानयनात् वर्णसंवादे एवाऽक्षरसादृश्यसम्मेलने सत्येवेत्यर्थः। एतत्सर्वं कस्यायं लेख इत्याद्यलखितवृत्तान्तं विभावयिष्यति निर्णयिष्यति। (आर्यकौटिल्येन कुतश्चिद्व्याजात्सिद्धार्थकप्रेरणया वञ्चितेन शकटदासेन लेखितमिदं पत्रं स्यात् अतः परं कुसुमपुर एवाऽनेन सिद्धार्थकेन मद्द्वारालि(ले)खितमिदं पत्रमितीहानीतस्य शकटदासस्योक्त्या सकलाऽऽर्यकौटिल्यकूटनीतिप्रयोगप्रकाशः स्यादतो विमलमतेर्भागुरायणस्याऽन्यथाकरणं प्रकाशमित्यादिनेति भावः।

कभी नहीं कहेंगे, यदि कहीं शकटदास आकर प्रथम अङ्क में कहा हुआ (चाणक्य प्रेरित शकटदास कर्तृक लेख है) इस समाचार को (कदाचित्) प्रकाशित करदे। ऐसा होने पर सन्देह युक्त मलयकेतु राक्षसादि के वैमनस्यरूप कार्य से अनुत्साहित हो जायगा। (जोर से)। कुमार! मन्त्रि राक्षस के आगे शकटदास कभी नहीं कहेगा, कि मैंने इसे लिखा है। इसलिये शकटदास का दूसरा लेख मँगाया जाय, जिसके द्वारा अक्षर की समानता ही इन सब बातों का निर्णय कर देगी।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मलयकेतुः—विजये एवं क्रियताम् ।

भागुरायणः—कुमार ! मुद्रामपीयम् ।

मलयकेतुः—उभयमप्यानीयताम् ।

प्रतीहारी—जं कुमालो आणवेदि (इति निष्क्रम्य पुनः प्रविश्य) कुमाल ! इदं क्खु तं सअडदासेण स्सहत्थलिहिदं पत्तअं मुद्दा अ ।

[यत् कुमार आज्ञापयति । कुमार ! इदं खलु तत् सकटदासेन स्वहस्तलिखितं पत्रं, मुद्रा च] ।

मलयकेतुः—(उभयमपि नाट्येनावलोक्य) आर्य ! संवदन्त्यक्षराणि ।

राक्षसः—(स्वगतम्) संवदन्त्यक्षराणि, शकटदासस्तु मम मित्रमिति च विसंवदन्त्यक्षराणि, तत् किं शकटदासेन लिखितम् ?—

विजये इति । एवं क्रियताम् । यथा भागुरायणो ब्रवीति तथा विधीयतां त्वयेत्यर्थः । शकटदासलिखिताऽपरपत्राऽऽनयनस्य भागुरायणेनाऽभिधानात्तदेव त्वयाऽऽनीयतामिति भावः ।

मुद्रामपीति । इयं प्रतीहारी मुद्राम् अपिशब्दादपरलेखमपि आनयतु । इयं प्रतीहारी न केवलमपरलेखमेवानयतु किन्तु मुद्रामपीत्यर्थे वाऽपेः स्वारस्यसंघटनम् ।

उभयमपीति । नाट्येन नटोचितव्यापारेण भङ्ग्यादिनेत्यर्थः । उभयमपि लेखं मुद्राञ्च अवलोक्य दृष्ट्वा भागुरायणम्प्रति मलयकेतूक्तिः । आर्य पूज्य ! अक्षराणि वर्णाः संवदन्ति सादृश्यं गमयन्ति वर्णानां सम्यगानुरूप्यमस्तीत्यर्थः ।

स्वगतमिति । अनतिस्पष्टं यथा तथा राक्षसो ब्रवीतीत्यर्थः । अक्षराणि वर्णाः संवदन्ति सादृश्यं गमयन्ति शकटदासो मम मित्रमित्यक्षराणि तु विसंवदन्ति विरुद्धत्वमवगमयन्तीत्यर्थः ।

मलयकेतुः—विजये ! ऐसा ही करो ।

भागुरायणः—कुमार ! प्रतीहारी मुद्रा को भी ले आवे ।

मलयकेतुः—दोनों ही ले आओ ।

प्रतीहारीः—कुमार की जो आज्ञा (बाहर जाकर और फिर प्रवेश कर) कुमार ! यह शकटदास का स्वहस्तलिखित लेख है और यह मुद्रा है ।

मलयकेतुः—(दोनों को विचित्र ढङ्ग से देखकर) आर्य ! अक्षर तो मिलते हैं ।

राक्षसः—(मन ही मन) अक्षर तो मिलते हैं। किन्तु शकटदास हमारा मित्र है। यह सङ्गति नहीं मिलती । तब क्या शकटदास ने लिखा है ?—

 Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्मृतं स्यात् पुत्रदाराणां विस्मृताः स्वामिभक्तयः ।
चलेष्वर्थेषु लुब्धेन न यशःस्वनपायिषु ॥ १४ ॥

अथवा, कः सन्देहः ?—

मुद्रा तस्य कराङ्गुलिप्रणयिनी, सिद्धार्थकस्तत्सुहृत्
तस्यैवापरलेख्यसूचितमिदं पत्रं प्रयोगाश्रयम् ।
सुव्यक्तं शकटेन भेदपटुभिः सन्धाय सार्द्धं परैः
भर्त्तृस्नेहपराङ्मुखेन, कृपणं प्राणार्थिना चेष्टितम् ॥ १५ ॥

स्मृतमिति । चलेषु विनाशशालिषु अर्थेषु धनेषु न पुनः अनपायिषु चिरस्थायिषु अविनश्वरेष्विति यावत् । यशःसु कीर्त्तिषु लुब्धेन इच्छुकेन शकटदासेनेति शेषः । स्वामिनि भक्तयः स्वामिभक्तयः प्रभुविषयकाऽनुरागाः विस्मृताः मनसा परिहृताः स्युः पुत्रदाराणां स्मृतं स्यात् पुत्राणां स्त्रियश्च स्मरणं कृतं स्यात् । मदनुमत्या पत्रलिखनेनैव तव पुत्रदाराणां मोक्ष इति कौटिल्यवचः श्रुत्वा पुत्रादिमात्सर्येण स्वामिविषयकानुरागं विस्मर्य लिखितवानित्यर्थः । (पुत्रदाराणामित्यत्राधीगर्थदयेशां कर्मणि इत्यनेन कर्मणि षष्ठी) यदि कौटिल्यानुमत्या शकटदासेन पत्रं लिखितं तदा पुत्रदाराणां स्मरणं कृतं स्यान्न तु स्वामिभक्तीनामित्यर्थे परिसंख्याऽलङ्कारः । प्रसादगुणः । वैदर्भी रीतिः । अनुष्टुब्वृतम् ॥ १४ ॥

मुद्रेति । मुद्राऽङ्गुलिमुद्रा तस्य शकटदासस्य कराङ्गुलिप्रणयिनी करशाखावर्त्तिनी सिद्धार्थकः तत्सुहृत् शकटदासमित्रं पत्रं प्रयोगाश्रयं कूटनीत्याधारभूतम् । इत्थमनेकहेतुभिः भेदपटुभिः उपजापनिपुणैः परैः शत्रुभिः सार्द्धं सह सन्धाय मिलित्वा भर्त्तुः स्नेहपराङ्मुखेन स्वाम्यनुरागविमुखेन प्राणार्थिना पुत्रदारादिजीवनाभिलाषिणा शकटेन शकटदासेन सुव्यक्तं निश्चितं कृपणं दीनं यथा स्यात्तथा चेष्टितं व्यवसितम् । अङ्गुरीयकस्य शकटदासकराङ्गुलिवर्त्तित्वात् सिद्धार्थकस्य शकटदास-

---

अवश्य विनाशशील तथा धन के लोभी शकटदास ने स्त्री-पुत्रों को याद किया और चिरस्थायिनी कीर्त्तिको छोड़कर स्वामिभक्तिको भूलगया ॥ १४ ॥

अथवा—सन्देह की क्या बात है—

मुद्रा (अङ्गुलिमुद्रा) शकटदास के हाथ में रहती है, सिद्धार्थक शकटदास का मित्र है, उस (शकटदास) का दूसरे लेख से मिलाया गया कूटनीतिका आधार यह पत्र है । इस तरह अनेक हेतुओं से भेद करने में चतुर शत्रुओं के साथ मिलकर स्वामी के स्नेह से विमुख तथा पुत्र-स्त्री आदि के जीने की इच्छा करनेवाले शकटदास ने दीन होकर ठीक ही किया है ॥ १५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मलयकेतुः—आर्य ! 'अलङ्कारत्रयं श्रीमता यदनुप्रेषितं, तदुपगतम्' इत्यार्येण परिलिखितं, तन्मध्यादेकं किमिदम् ? (निर्वर्ण्यात्मगतम्) कथं तातेन धृतपूर्वमिदमाभरणम् ? (प्रकाशम्) आर्य ! कुतोऽयमलङ्कारः ?

राक्षसः—वणिग्भ्यः क्रयादधिगतः ।

मित्रत्वात् कूटनीतिरचितैतत्पत्रस्य शकटदासलिखितापरलेखसंवादितत्वादवगम्यते यत् भेदकुशलैः शत्रुभिः सह मिलित्वा परिहृतस्वाम्यनुरागेण पुत्रादिजिवाकाङ्क्षिणा सकटदासेन निश्चितं दीनं यथा तथा व्यसितमित्यर्थः । शकटदासस्य दीनव्यसितत्वे हेतुभूतानां पूर्वार्द्धोपात्तशब्दानां पदार्थत्वेनाऽभिधानात्पदार्थहेतुकं काव्यलिङ्गमलङ्कारः तदुक्तं दर्पणे—

हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम् ।

इति । शकटदासकर्तृकदीनचेष्टितात्मककार्यस्य मुद्रा तस्य कराङ्गुलिप्रणयिनीत्याद्यनेकसाधकसत्त्वात्समुच्चयालङ्कारश्च ।

समुच्चयोऽयमेकस्मिन् सति कार्यस्य साधके ।
खले कपोतिकान्यायात् तत्करः स्यात्परोऽपि चेत् ॥

इत्यादिदर्पणोक्तेः । प्रसादगुणः । पाञ्चाली रीतिः । शार्दूलविक्रीडितं वृत्तम् १५॥

आर्येति । आर्य पूज्य ! श्रीमता लक्ष्मीयुक्तेन कल्याणभाजनेन च यत् अलङ्काराणां त्रयं त्रीण्यलङ्करणानीत्यर्थः अनुप्रेषितम् अनुप्रहितं तत् अलङ्कारत्रयम् उपगतं प्राप्तम् इत्यार्येण पूज्येन भवता यल्लिखितं तन्मध्यात् इदमेकं किम् अस्तीति शेषः । निर्वर्ण्य दृष्ट्वा आत्मगतं मनस्येव विचारयतीत्यर्थः । तातेन पित्रा धृतपूर्वं पूर्वं धृतम् इदमेतत् आभरणम् अलङ्करणं कथं प्राप्तमनेनेति शेषः । प्रकाशं सर्वैः श्राव्यं यथा तथा ब्रवीतीत्यर्थः । आर्य पूज्य ! अयमलङ्कारः इदमाभरणं कुतः कस्मादधिगत इति शेषः ।

मलयकेतुः—आर्य ! आपने जो तीन अलङ्करण भेजे हैं, वे सबके सब मिले । यह आपने लिखा है, क्या उन्हींमें से यह एक है ? (देखकर मनही मन) एँ ! यह तो पिताजी का धारण किया हुआ अलङ्कार है ? (जोर से) आर्य ! यह अलङ्कार आपको कहाँ से मिला ?

राक्षसः—एक व्यापारी से खरीदने पर ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मलयकेतुः—विजये ! अपि प्रत्यभिजानाति भवती भूषणमिदम् ?

प्रतीहारी—(निर्वर्ण्य सबाष्पम्) कुमाल ! कहं ण पच्चभिआणिस्सं इमं क्खु सुगिहीदणामधेएण देएण पव्वदीसरेण धारिदपुव्वं [कुमार ! कथं न प्रत्यभिज्ञास्यामि ? इदं खलु सुगृहीतनामधेयेन देवेन पर्व्वतेश्वरेण धारितपूर्व्वम्]

मलयकेतुः—(सबाष्पम्) हा तात !—

एतानि तानि तव भूषणवल्लभस्य
गात्रोचितानि कुलभूषण ! भूषणानि ।
यैः शोभितोऽसि, मुखचन्द्रकृतावभासो
नक्षत्रवानिव शरत्समयप्रदोषः ॥ १६ ॥

अपीति । इदमेतत् भूषणमलङ्करणम् अपि प्रत्यभिजानासि परिचिनोषि किम्

कुमारेति । कुमार कथं न प्रत्यभिज्ञास्यामि कुतो नाऽवगमिष्यामि आभरणमिति शेषः । इद खलु एतदलंकरणन्तु सुगृहीतनामधेयेन प्रातःस्मरणीयनाम्ना देवेन राज्ञा पर्वतेश्वरेण भवतस्तातेन धारितपूर्वं पूर्वं धारितमित्यर्थः ।

एतानीति । हे कुलभूषण वंशालंकरण ! वल्लभानि भूषणानि यस्य स भूषणवल्लभस्तस्य भूषणवल्लभस्य प्रियालंकरणस्य (अत्र वल्लभशब्दस्य परप्रयोगः कविकृतो बोध्यः । तस्य च निरङ्कुशत्वात् वल्लभभूषणस्येति पाठेऽपि क्षत्यभावाच्च) तव एतानि तानि चिरकालिकानि गात्रोचितानि त्वदीयशरीरयोग्यानि भूषणानि अलंकरणानि सन्तीति शेषः । यैर्भूषणैः मुखं चन्द्रमिव मुखचन्द्रस्तेन कृतो विहितोऽवभासो दीप्तिर्येन स मुखचन्द्रकृतावभासः आस्येन्दुविहितदीप्तिः त्वमिति शेषः । (पक्षान्तरे) मुखे आरम्भे चन्द्रेण कृतोऽवभासः प्रकाशो यस्य स मुखचन्द्रकृतावभासः नक्षत्रवान् सतारकः शरत्समयप्रदोषः शरत्कालीनसन्ध्यासमय इव शोभि-

---

मलयकेतुः—विजये ! तुम इस अलङ्करण को पहचानती हो ?

प्रतीहारी—(देखकर आंखों में आंसू भर कर) कुमार ! क्यों नहीं पहचानूंगी, प्रातःस्मरणीय नामवाले राजा पर्वतेश्वर इस अलङ्करण को धारण किया करते थे ।

मलयकेतुः—(आंखों में आंसू भरकर) हा तात !

हे कुलभूषण और अलङ्करणप्रिय ! आपके शरीरयोग्य ये अलङ्करण हैं, जिन अलङ्करणों से आप चन्द्रमा के सदृश मुख से प्रकाशित और तारागणों से युक्त शरत्कालीन प्रदोष (सन्ध्यासमय) की तरह भूषित होते थे ॥ १६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राक्षसः—(स्वगतम्) कथं पर्वतेश्वरधृतपूर्वाणीत्याह ? (प्रकाशम्) व्यक्तमेतान्यपि तेन चाणक्यप्रयुक्तेन वणिग्जनेनास्मासु विक्रीतानि ।

मलयकेतुः—आर्य ! तातेन धृतपूर्वाणामाभरणविशेषाणां विशेषतश्चन्द्रगुप्तहस्तगतानां वणिग्भ्यः क्रयादधिगम इति, न युज्यते, अथवा युज्यत एवैतत्—

चन्द्रगुप्तस्य विक्रेतुरधिकं लाभमिच्छतः ।

तोऽसि भूषितोऽसि । ईदृशाऽमूल्याऽलंकारणानामियं परित्यागभूमिः शोचनीयेति भावः । पूर्वार्द्धे कुलभूषणभूषणानीत्यत्र लाटाऽनुप्रासाऽलंकारः ।

शब्दार्थयोः पौनरुक्त्यं भेदे तात्पर्यमात्रतः ।

लाटाऽनुप्रास इति दर्पणोक्तलक्षणात् । मुखचन्द्रेत्यत्र रूपकोपमयोः सन्देहसङ्करः । नक्षत्रालंकरणयोः प्रतीयमानोपमा । शरत्समयप्रदोष इवेत्यत्र पूर्णोपमा । प्रसादगुणः । वैदर्भी रीतिः । वसन्ततिलका वृत्तम् ॥ १६ ॥

स्वगतमिति । (क्रियाविशेषणम्) सर्वैरश्राव्यं यथा तथा ब्रवीतीत्यर्थः । पूर्वं धृतानि धृतपूर्वाणि पर्वतेश्वरेण धृतपूर्वाणि मलयकेतुतातेन पूर्वं स्वदेहे परिहितानीत्यर्थः । इत्येतद्वचः कथं कुत आह ब्रवीति प्रतीहारीति शेषः । प्रकाशं सुस्पष्टं यथा तथा ब्रवीति । चाणक्यप्रयुक्तेन कौटिल्यप्रेरितेन तेन वणिग्जनेन एतान्यपि अलंकरणानीति शेषः । अस्मासु विक्रीतानि मूल्यमादाय समर्पितानीत्येवं वृत्तं व्यक्तं सर्वैर्ज्ञातमेवास्तीत्यर्थः ।

तातेनेति । तातेन पित्रा धृतपूर्वाणां पूर्वं स्वदेहे धृतानां विशेषता विशेषरूपेण चन्द्रगुप्तहस्तगतानां मौर्यकरप्राप्तानाम् आभरणविशेषाणां बहुमूल्यकालंकाराणां वणिग्भ्यो व्यापारिभ्यः क्रयात् मूल्यदानात् अधिगमः प्राप्तिः इति न युज्यते इत्यसम्भवः ।

चन्द्रगुप्तस्येति । क्रूरेण कठिनहृदयेन कृतघ्नेनेति यावत् । भवता त्वया

राक्षसः—(मन ही मन) ये पर्वतेश्वर द्वारा पहले धारण किये हुये गये थे यह कैसे कहती है ? (जोर से) मुझे मालूम है कि चाणक्य के भेजे उस बनिये ने इन अलङ्करणों को हम लोगों के हाथ बेचा था ।

मलयकेतुः—आर्य ! पिताजी द्वारा पूर्वकाल में धारण किये (विशेषतः) चन्द्रगुप्तके हस्तगत अलङ्करणों का बनियों से खरीदकर प्राप्त होना, यह बात असंगत मालूम होती है, अथवा यह युक्त ही है—

आप जैसे कृतघ्न द्वारा विशेष लाभ को चाहने और बेचनेवाले चन्द्रगुप्त के इन

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कल्पिता मूल्यमेतेषां क्रूरेण भवता वयम् ॥ १७ ॥

राक्षसः—(आत्मगतम्) अहो ! सुश्लिष्टोऽयमभूच्छत्रुप्रयोगः। कुतः?-

लेखोऽयं न ममेति, नोत्तरमिदं, मुद्रा मदीया यतः
सौहार्दं शकटेन खण्डितमिति श्रद्धेयमेतत्कथम् ?
मौर्ये भूषणविक्रयं नरपतौ को नाम सम्भावयेत् ?
तस्मात् सम्प्रतिपत्तिरेव हि वरं न ग्राम्यमत्रोत्तरम् ॥१८॥

अधिकं विशेषं लाभं प्राप्तिम् इच्छतोऽभिलष्यतो विक्रेतुर्विनिमयं कर्तुः चन्द्रगुप्तस्य मौर्यस्य एतेषां दृश्यमानानामलंकाराणामिति शेषः। मूल्यमर्घः वयमेव अहमेवेत्यर्थः। (अस्मदो द्वयोश्चेत्यनुशासनाद्बहुत्वम्) कल्पिता निर्णीता इत्यर्थः। मूल्यत्वेन कल्पितानस्मान् दत्वा चन्द्रगुप्तसकाशादिमान्याभरणानि क्रीतानीत्यर्थः।

परिवृत्तिर्विनियमः समन्यूनाधिकैर्भवेत्।

इति दर्पणोक्तलक्षणादत्र परिवृत्तिरलंकारः। प्रसादगुणः। वैदर्भी रीतिः अनुष्टुप् वृत्तम् ॥ १७ ॥

आत्मगतमिति। अव्यक्तं यथा स्यात्तथा ब्रवीतीत्यर्थः। शत्रोः प्रयोगः शत्रुप्रयोगः चाणक्यकूटनीतिविधिः सुश्लिष्टोऽतिदृढोऽभूत् जातः।

लेखोऽयमिति। अयमेषः कूटप्रयोगाश्रय इत्यर्थः। लेखः पत्रं न मम नैतत्पत्रं मया लिखितम् इतीत्थमिदमुत्तरं न युक्तमिति शेषः। यतो यस्मात् मदीया मामकीना मुद्रा एवेति शेषः (नामैकदेशग्रहणेन नामग्रहणमिति न्यायात्) शकटेन शकटदासेन सौहार्दं मित्रत्वं खण्डितं भग्नम् इत्येतद्वचः कथं केन प्रकारेण श्रद्धेयं विश्वासयोग्यं लोकैरिति शेषः। नाम सम्भावनायां को जनो मौर्ये चन्द्रगुप्ते नरपतौ राज्ञि भूषणविक्रयम् अलङ्करणमूल्यग्रहणं सम्भावयेत् विश्वसेत् न कोऽपीत्यर्थः, तस्मात्कारणात् सम्प्रतिपत्तिः अङ्गीकरणमेव वरं श्रेष्ठम्। अत्राऽस्मिन्विषये ग्राम्यमयुक्त-

---

अलङ्करणों का मूल्य मैं हीं बनाया गया ॥ १७ ॥

राक्षसः—(मनही मन) ओ ! यह शत्रु का प्रयोग (चाणक्य का कूटनीतिक विधान) अत्यन्त दृढ़ हो गया।

क्योंकि—'यह लेख हमारा नहीं है' यह उत्तर ठीक नहीं। क्योंकि यह मुद्रा हमारी ही है। शकटदास से मित्रता छूट गई' यह बात किस तरह विश्वास योग्य हो सकती है ? राजा चन्द्रगुप्त के अलङ्करण बेचने की इस बात पर कान विश्वास कर सकता है। इस लिये दोष का स्वीकार कर लेना ही श्रेष्ठ है। इस विषय में अयुक्त उत्तर देना उचित नहीं है ॥ १८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मलयकेतुः—एतदार्यं पृच्छामि ।

राक्षसः—(सवाष्पम्) कुमार! य आर्यस्तं पृच्छ, वयमिदानीमनार्याः संवृत्ताः ।

मुत्तरमालापो न वरं न श्रेष्ठम् । लेखस्य मन्नामाङ्कितमुद्रया मुद्रितत्वात्तदनभ्युपगमो न युक्तः, शकटदासकर्तृकमित्रत्वभङ्गे न केषामपि विश्वासः, चन्द्रगुप्तकर्तृकमलंकरणविक्रयणे च न केषामपि विश्वासः, अतो लेखस्य स्वीकरणमेव युक्तं प्रतिभातीति सरलार्थः । नायं मे लेख इत्युत्तरस्याऽसम्भवत्वे शकटदासकर्तृकमित्रत्वापरित्यागे चन्द्रगुप्तकर्तृकालंकरणविक्रयणे च मुद्राविश्रम्भनरपतित्वानां हेतुभूतानां पदार्थत्वेनोक्त्या पदार्थहेतुकं काव्यलिङ्गमलङ्कारः । चतुर्थपादेऽप्रश्नपूर्वकसम्प्रतिपत्तिरूपकथितवस्तुनः ग्राम्योत्तरस्य न ग्राम्यमत्रोत्तरमिति शब्देनैव व्यवच्छेदात्परिसंख्यालंकारश्चेत्यनयोः संसृष्टिः ।

हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम् ।
प्रश्नादप्रश्नतो वापि कथिताद्वस्तुनो भवेत् ।
तादृगन्यव्यपोहश्चेच्छाब्द आर्थोऽथवा पुनः ।
परिसंख्या ॥

प्रसादो गुणः वैदर्भी रीतिः । शार्दूलविक्रीडितं वृत्तम् ॥ १८ ॥

सवाष्पमिति । वाष्पेन नेत्राश्रुणा सह वर्तमानं सवाष्पं तद्यथा स्यात्तथा ब्रवीति, अश्रूणि विमुच्य ब्रवीतीत्यर्थः । कुमार मलयकेतो ! यः पुरुषः आर्यः आर्यशब्दवाच्यो वक्ष्यमाणलक्षणलक्षितः तं पृच्छ जिज्ञासस्व, वयम् इदानीं साम्प्रतम् अनार्याः आर्यत्वरहिताः संवृत्ता जाताः उक्तञ्चार्यलक्षणं यथा—

कर्त्तव्यमाचरन् कार्यमकर्त्तव्यमनाचरन् ।
तिष्ठति प्रकृताचारे स वा आर्य इति स्मृतः ॥ इति ।

यः कर्त्तव्यं कार्यं करोति अकर्तव्यं शास्त्रलोकविरुद्धं कार्यं न करोति प्रकृताचारे सदाचारे तिष्ठति सदाचारवानित्यर्थः । स पुरुषः आर्यः आर्यशब्दवाच्य इत्यर्थः। तथा च कर्तव्यकार्यस्य भवदुपकारात्मकस्याकरणादकर्तव्यकार्यस्य भवदपकारपूर्वकमौर्योपकारात्मकस्य च करणात्सम्प्रति वयमार्यत्वहीना इत्यर्थः ।

मलयकेतुः—आर्य ! मैं आप से यह पूछता हूँ ।

राक्षसः—(आंखों में आंसू भर कर) कुमार ! जो आर्य हो, उससे पूछिये, मैं तो अब अनार्य हो गया हूँ ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मलयकेतुः—

मौर्योऽसौ स्वामिपुत्रः, परिचरणपरो मित्रपुत्रस्तवाहं
दाता सोऽर्थस्य तुभ्यं, स्वमतमनुगतस्त्वन्तु मह्यं ददासि ।
दास्यं सत्कारपूर्वं ननु सचिवपदं तत्र ते स्वाम्यमत्र,
स्वार्थे कस्मिन् समीहा पुनरधिकतरे त्वामनार्यं करोति ॥१६॥

राक्षसः—कुमार ! एवमयुक्तव्याहारिणा भवतैव मे निर्णयो दत्तः।

मौर्य इति । असौ एष मौर्यश्चन्द्रगुप्तः तव भवतः स्वामिनः पुत्रः स्वामिपुत्रः प्रभुतनयः (नन्दस्याऽसवर्णायां मुरानामस्त्रियां जातत्वादसवर्णस्तनय इत्यर्थः) अहं तव परिचरणपरः सेवासक्तः मित्रपुत्रः सुहृत्तनयः (मित्रस्य पर्वतेश्वरस्य पुत्र आत्मज इत्यर्थः) स मौर्यः तुभ्यं भवतेऽर्थस्य धनस्य दाता धनं दास्यतीत्यर्थः । त्वं तु त्वं पुनः स्वमतं स्वाभिप्रायानुरूपमर्थमिति शेषः । अनुगतोऽनुसृतः सन् मह्यं ददासि वितरसि अर्थमिति शेषः । ननु भोः तत्र मौर्ये ते तव सचिवपदं मन्त्रिपदं सत्कारपूर्वं सम्मानपुरस्सरं दास्यं भृत्यत्वम् अत्र मयि विषये ते तव स्वाम्यं प्रभुत्वं न तु भृत्यत्वम्, तदा पुनर्भूयः अधिकतरे इतोऽपि विशेषे कस्मिन् स्वार्थे स्वाभिलषिते समीहा वाञ्छा त्वां भवन्तम् अनार्यम् असदाचारं करोति विदधाति । विशेषप्राप्तिवाञ्छैव नराणामकार्यप्रवृत्तिसाधिकेति मौर्याऽस्मत्पक्षयोरस्मत्पक्षावलम्बनादेव विशेषप्राप्तिसम्भवात्तत्परित्यागपूर्वकमौर्यपक्षावलम्बनमनुचितमिति भावः । अत्र यथासंख्यमलङ्कारः ।

यथासंख्यमनूद्देश उद्दिष्टानां क्रमेण यत् ।

इति दर्पणोक्तलक्षणात् । प्राक्प्रतिपादितानामर्थानां पश्चात्प्रतिपादितैरर्थैः क्रमेण सम्बन्धो यथासंख्यमिति कारिकार्थः । माधुर्यंगुणः । वैदर्भी रीतिः । स्रग्धरा वृत्तम् ॥ १९ ॥

एवमिति । एवमित्थम् अयुक्तं व्याहरति तच्छीलोऽयुक्तव्याहारी तेन अयुक्तव्याहारिणा अनुचितवादिना भवता त्वयैव मे मम निर्णयो निर्णायकमुत्तरं दत्तो दातुमुप-

मलयकेतुः—चन्द्रगुप्त राजानन्दका पुत्र है, मैं आपकी सेवा में तत्पर आप के मित्र पर्वतेश्वरका पुत्र हूँ । चन्द्रगुप्त आपको धन देगा, किन्तु आप इच्छानुसार धन पाकर मुझको देते हैं । चन्द्रगुप्त के आप मन्त्री (सत्कारयुक्त भृत्य) हैं, किन्तु मेरे आप स्वामी हैं तो अब किस स्वार्थ का साधन करने वाली इच्छा आपकी अनार्य बना रही है ॥ १९ ॥

राक्षसः—कुमार ! ऐसा अनुचित व्यवहार करनेवाले आप ही ने हमारा निर्णय

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कुतः ?—("मौर्योऽसौ स्वामिपुत्रः" इति युष्मदस्मदोर्व्यत्ययेन पठति)

मलयकेतुः—(लेखमलंकरणस्थगिकाञ्च विनिर्दिश्य) इदमिदानीं किम् ?

राक्षसः—(सवाष्पम्) विधेर्विलसितमिदं, कुतः ?—

भृत्यत्वे परिभावधामनि सति स्नेहात् प्रभूणां सतां,

पुत्रेभ्यः कृतवेदिनां कृतधियां येषामभिन्ना वयम् ।

दिष्टः। युष्मत्पदस्थानेऽस्मत्पदस्याऽस्मत्पदस्थाने युष्मत्पदस्य च परिवर्तनं(व्यत्यासं) कृत्वा पूर्वोक्तपद्यमेवोपालम्भपूर्वकमभियोगशुद्धये निर्णायकमुत्तरमाह-कुत इत्यादिना।

मौर्योऽसौ स्वामिपुत्रः परिचरणपरो मित्रपुत्रो मम त्वं

दाता सोऽर्थस्य मह्यं स्वमतमनुगतोऽहं तु तुभ्यं ददामि ।

दास्यं सत्कारपूर्वं ननु सचिवपदं तत्र मे स्वाम्यमत्र

स्वार्थे कस्मिन् समीहा पुनरधिकतरे मामनार्यं करोति । इति ।

लेखमिति । लेखं पत्रम् अलङ्करणस्थगिकामाभरणपेटिकाञ्च विनिर्दिश्य दर्शयित्वा उद्दिश्य वा ब्रवीतीत्यर्थः । किन्तदाह—इदमिदानीं किमिति। इदानीं साम्प्रतम् इदं पत्रालंकरणस्थगिकाद्वयं किं किमर्थं त्वया प्रेषितं कुत आगतं वा तद्ब्रूहीति शेषः (कस्यायमपराध इत्युपालम्भः) ।

सवाष्पमिति । अश्रूणि विमुच्य ब्रवीतीत्यर्थः । विधेर्विलसितं विधिविलसितं दैवकृतमेतत् जानीहीति शेषः तदेव दर्शयति कुत इत्यादिना ।

भृत्यत्व इति । परिभावस्य धाम परिभावधाम तस्मिन् परिभावधामनि तिरस्काराऽऽस्पदे । "अनादरः परिभवः परीभावस्तिरस्क्रिया" इत्यमरकोशोक्त्या परीभावशब्दस्यैव तिरस्कारार्थत्वं न परिभावशब्दस्येति नाशङ्क्यम् । (उपसर्गस्य घञि वैकल्पिकदीर्घविधानात्) भृत्यत्वे दास्यत्वे सति अस्माकमिति शेषः । कृतं विदन्ति तच्छीलाः कृतवेदिनस्तेषां कृतवेदिनामुपकारज्ञानां कृता परिनिष्ठिता धीर्येषां ते कृतधियस्तेषां कृतधियां परिनिष्ठितबुद्धीनां सतां

कर दिया । क्योंकि—'मौर्योऽसौ स्वामिपुत्रः' (इस श्लोक को युष्मद् अस्मद्शब्द का परिवर्तन करके पढ़ता है) ।

मलयकेतुः—(लेख और अलङ्करणकी पेटी को दिखाकर) तो यह क्या है ?

राक्षसः—(आखों में आंसू भर कर) इसको आप हमारा अभाग्य समझिये ।

क्योंकिः—अनादर के हेतु दास्यकर्म रहने पर भी कृतज्ञ, बुद्धिमान् तथा साधुशील जिन स्वामियों (नवनन्दों) के लिये हमलोग, स्नेह के कारण पुत्र तुल्य थे । लोगों

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ते लोकस्य परीक्षकाः, क्षितिभृतः पापेन येन क्षताः
तस्येदं विपुलं विधेर्बिलसितं, पुंसां प्रयत्नच्छिदः ॥ २० ॥

मलयकेतुः—(सक्रोधम्) कथमद्यापि निह्नूयते विधेर्विलसितमिदं न ममेति ? अनार्य !—

कन्यां तीव्रविषप्रयोगविषमां कृत्वा, कृतघ्न ! त्वया
विस्रम्भप्रवणः पुरा मम पिता नीतः कथाशेषताम् ।

साधुशीलानां येषां प्रभूणां स्वामिनां नन्दानामित्यर्थः । स्नेहात्प्रेम्णः पुत्रेभ्यः सुतेभ्यः वयं न भिन्ना नान्याः स्मः । लोकस्य परीक्षकाः लोकचरित्रवेदिनस्ते क्षितिभृतो राजानः पापेन पापविशिष्टेन (अर्शाद्यजन्तोऽत्र पापशब्दः) येन विधिना क्षता विनाशिताः, पुंसां पुरुषाणां प्रयत्नच्छिदः उद्योगनाशिनस्तस्य विधेर्दैवस्य विपुलं महत् इदं दृश्यमानं विलसितं व्यापारः । अभाग्यदोषेण हृता नन्दा इवाहमन्यभाग्यदोषेण मृषा दोषी जातोऽस्मीति भावः । वस्तुतो वयंपदवाच्यानां पुत्रभिन्नत्वेऽपि तदभिन्नत्वेनाऽध्यवशायात्पूर्वार्द्धेऽतिशयोक्तिः । विधेर्विलसितमिदमित्यतो न तु चाणक्यस्य न वा ममेत्यन्यस्याऽऽर्थव्यपोहादुत्तरार्द्धे परिसंख्यालङ्कारश्चेत्यनयोः संसृष्टिः । माधुर्यंगुणः । पाञ्चाली रीतिः । शार्दूलविक्रीडितं वृत्तम् ॥ २० ॥

सक्रोधमिति । क्रोधेन सह वर्तमानं सकोपं यथा स्यात्तथा ब्रवीतीत्यर्थः । कथं कुतोऽद्यापि सम्प्रत्यपि निह्नूयते गोप्यते, इदं दृश्यमानं विधेर्दैवस्य विलसितं कृत्यं न ममेति । एष दुर्व्यापारो दैवस्य न ममेत्युक्त्या प्रकटितस्य स्वकृतदुर्व्यापारस्य गोपनमतीवाऽनुचितमिति भावः राक्षसकृत्यमेव तदित्यभिदर्शयत्यनार्येत्यादिना ।

कन्यामिति । कृतं हन्तीति कृतघ्नस्तत्सम्बुद्धौ हे कृतघ्न अविश्वासिन् ! त्वया भवता विषस्य प्रयोगो विषप्रयोगः तीव्रो विषप्रयोगो यस्यां सा तीव्रविषप्रयोगा सा चासौ विषमा तां तीव्रविषप्रयोगविषमां तीक्ष्णहलाहलप्रयोगघोरां सम्भो-

---

के चरित्र को जानने वाले वे राजा जिस पापी भाग्य के द्वारा मारे गये, इससे ज्ञात होता है कि पुरुषों के उद्योग को निष्फल करने वाले उसी भाग्यका किया हुआ यह कार्य है ॥ २० ॥

मलयकेतुः—(क्रोध के साथ) क्या अभी भी छिपाते हो कि यह कार्य भाग्यका किया है, हमारा किया नहीं है ? अनार्य !

ओ कृतघ्न ! तूने तीव्र विष के प्रयोग से प्राण हरने वाली कन्या बनाकर अत्यन्तविश्वासी हमारे पिता को पहले मारा, अबचन्द्रगुप्त के मन्त्रिपद को

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सम्प्रत्याहितगौरवेण भवता मन्त्राधिकारे रिपोः
प्रारब्धाः प्रणयाय मांसवदहो ! विक्रेतुमेते वयम् ॥ २१ ॥

राक्षसः—(स्वगतम्) अयमपरो गण्डस्योपरि विस्फोटः (प्रकाशं कर्णौ पिधाय) शान्तं पापं, शान्तं पापम् । नाहं विषकन्यामारोपितवानपापोऽहं पर्वतेश्वरे ।

मलयकेतुः—केन तर्हि व्यापादितस्तातः ?

गमात्रेण प्राणविनाशिनीमिति यावत् । कन्यां तनयां कृत्वा निर्माय विस्रम्भप्रवणोऽतिविश्वस्तो मम पिता तातः पर्वतेश्वरः पुरा प्राक् कथाशेषतां नीतः क्षयं गमितः सम्प्रति अधुना रिपोः शत्रोश्चन्द्रगुप्तस्येत्यर्थः । मन्त्राधिकारे सचिवपदे आहितं प्राप्तं गौरवं येन स तथोक्तस्तेनाऽऽहितगौरवेण प्राप्तमहत्त्वेन भवता त्वया प्रणयाय तत्प्रीत्यर्थं ('क्रियार्थोपपदस्य च कर्मणि स्थानिनः' इति चतुर्थी) एते वयं मांसवत् क्रव्यमिव विक्रेतुं प्रारब्धाः प्रक्रान्ताः स्थिरीकृता इति यावत् । अहो आश्चर्यम् । पुरा विषकन्यया परमविश्वासपात्रं तातं विनाश्य साम्प्रतं वयमपि विनाशितुमूरीकृता इत्यर्थः । मांसवदित्यत्र सादृश्यार्थकवच्छब्दसत्त्वाच्छ्रौतीपूर्णोपमाऽलङ्कारः । ओजोगुणः । पाञ्चालीरीतिः शार्दूलविक्रीडितं वृत्तम् ॥ २१ ॥

अयमिति । गण्डस्य व्रणविशेषस्योपरि अयमेषोऽपरोऽन्यो विस्फोटो व्रणो जात इति शेषः । मर्मस्थानीयव्रणोपरि व्रणान्तरं जातमित्यर्थः । प्रकाशं सुस्पष्टं ब्रवीतीति शेषः । कर्णौ पिधाय श्रोत्रे आच्छाद्य शान्तं पापमिति वीप्सायां द्विरुक्तिः ।

शान्तं पापमनिर्वाच्ये इत्यमरः ।

मम तातविनाशकोऽयमिति न वाच्यमिति अहं विषकन्यां विषरक्षिततनयां नारोपितवान् न प्रयुक्तवान् पर्वतेश्वर इति शेषः, अपापोऽहं पर्वतेश्वरे नाहं/पर्वतेश्वरे विषकन्याप्रयोगविधानात्मकपापकर्माचरणशीलोऽस्मीति शेषः ।

केन तर्हीति । तर्हि तदा केन क्रूरकर्मकारिणा पुरुषेणेत्यर्थः । तातः पिता

प्राप्त करने की आज्ञा से तुझ से गौरवशाली द्वारा चन्द्रगुप्त की प्रीति के लिये हम सब मांस की तरह बेचनेके लिये निश्चित किये गये हैं । ओह ! यह आश्चर्य है ? ॥२१॥

राक्षसः—(मनही मन) विस्फोट के ऊपर यह दूसरा विस्फोट हो गया (कानों को बन्द कर के—जोर से) ऐसा मत कहिये । मैंने पर्वतेश्वर पर विषकन्याका प्रयोग नहीं किया, मैं पर्वतेश्वर की ओर से निरपराध हूं ।

मलयकेतुः—तब किसने हमारे पिता को मारा ?

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राक्षसः—दैवमत्र प्रष्टव्यम् ।

मलयकेतुः (सक्रोधम्) देवमत्र प्रष्टव्यं, न क्षपणको जीवसिद्धिः !

राक्षसः—(स्वगतम्) कथं जीवसिद्धिरपि चाणक्यप्रणिधिः ! हन्त ! हृदयमपि मे रिपुभिः स्वीकृतम् ।

मलयकेतुः—(सक्रोधम्) भासुरक ! आज्ञाप्यतां शिखरसेनः सेना-

व्यापादितो विनाशितः तद्ब्रूहीति शेषः । यदि नास्मत्पितृविनाशकस्त्वं तदा कस्तद्विनाशक इत्यभिधेहीत्यर्थः ।

दैवमत्रेति । अत्राऽस्मिन् तातविनाशविषये दैवं भाग्यं प्रष्टव्यं जिज्ञास्यम् । दैवाधीनं जगत्सर्वमिति शास्त्रोक्त्या दैवस्यैव सर्वेषां शुभाऽशुभफलसम्पादकत्वात्तस्यैव तातविनाशकत्वं जानीहीत्यर्थः । (कौटिल्याऽभिधानमगृहीत्वाऽदृष्टमिति वदता राक्षसेन परदोषाऽनाविष्करणरूपं मनस्वित्वं सूचितम् ।

सक्रोधमिति । सक्रोधं सरोषं यथा तथा ब्रवीति । अत्रास्मिन् तातविनाशविषये दैवं भाग्यं प्रष्टव्यं जिज्ञास्यं क्षपणको बौद्धसंन्यासिवेषो जीवसिद्धिः तदाख्यः कश्चित्पुरुषो न प्रष्टव्योऽपि तु जीवसिद्धिरेव प्रष्टव्यः इत्यर्थः । यथा येन च विनाशितस्तात इत्याद्यखिलोदन्तं जीवसिद्धिर्विजानातीति भावः ।

तातो विनाशितो येन यथा मे निखिलं महत् ।
वृत्तान्तं च विजानाति जीवसिद्धिर्महामतिः ॥

स्वगतमिति । सर्वैरश्राव्यं यथा तथा ब्रवीति । कथं किं जीवसिद्धिरपि मम सुहृदपि चाणक्यप्रणिधिः कौटिल्यगूढचरः । हन्त खेदे, रिपुभिः शत्रुभिर्मे मम हृदयमपि चित्तमपि स्वीकृतं गृहीतम् । क्षपणकवेशी कौटिल्यप्रणिधिर्जीवसिद्धिः सुहृद्भूत्वा निखिलं मामकीनं क्रियमाणं करिष्यमाणं च कृत्यमवगतवानिति महान् खेदस्य विषय इत्यर्थः ।

आज्ञाप्यतामिति । शिखरसेन एतदाख्यः सेनापतिः सैन्याध्यक्ष आज्ञा-

---

राक्षसः—यह अपने भाग्य से पूछिये ।

मलयकेतुः—(क्रोध के साथ) यह भाग्य को पूछा जाय, जीव सिद्धि नाम के क्षपणक से नहीं ?

राक्षसः—(मनही मन) क्या जीवसिद्धि भी चाणक्य का गुप्तचर है ? खेदकी बात है कि शत्रुओंने हमारे हृदय को भी पकड़ लिया ।

मलयकेतुः—(क्रोधके साथ) सेनापति शिखरसेन से कहो कि राक्षस के साथ

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पतिः, ये एतेन राक्षसेन सह सौहार्दमुत्पाद्यास्मच्छरीरद्रोहेण चन्द्रगुप्तमाराधयितुकामाः पञ्च राजानः, तद्यथा, कौलूतः, चित्रवर्मा, मलयनरपतिः, सिंहनादः, काश्मीरः, पुष्कराक्षः, सिन्धुराजः, सुषेणः, पारसीकाधिराजो मेघाक्ष इति। तेषु त्रयः प्रथमा मदीयां भूमिं कामयन्ते, ते गभीरश्वभ्रमुपनीय पांशुभिः पूर्यन्ताम्, इतरौ तु द्वौ हस्तिबलकामौ हस्तिनैव घात्येतामिति।

पुरुषः—जं कुमारो आणवेदि [यत् कुमार आज्ञापयति] (इति निष्क्रान्तः)

मलयकेतुः—(सक्रोधम्) राक्षस! राक्षस!! नाहं विस्रम्भघाती राक्षसो, मलयकेतुः खल्वहं, तद् गच्छ, समाश्रीयतां सर्वात्मना

प्यतामादिश्यताम् ये चित्रवर्मप्रभृतयः पञ्च राजानो नृपतयः एतेनाऽनेन राक्षसेन सह तदाख्येन मन्त्रिणा सार्द्धं सौहार्दं मित्रत्वमुत्पाद्य सम्पाद्य अस्माकं शरीरमस्मच्छरीरं तस्य द्रोहस्तेन अस्मच्छरीरद्रोहेण मत्कायविनाशेन चन्द्रगुप्तं मौर्यम् आराधयितुं कामो येषां ते आराधयितुकामाः सेवितुमनसः। "लुम्पेदवश्यमः कृत्ये तुं-काम-मनसोरपि" इति तुमुनो मकारलोपः। तेषु पञ्चसु राजसु त्रयः प्रथमाः चित्रवर्म-सिंहनाद-पुष्कराक्षाः मदीयां भूमिं राज्यं कामयन्ते वाञ्छन्ति, ते त्रयः, गभीरश्वभ्रं गभीरगर्तम्। 'रन्ध्रं श्वभ्रं वपा सुषिः' इत्यमरः। उपनीय प्राप्य पांशुभिः रजोभिः पूर्यन्तामाच्छाद्यन्ताम्, इतरावन्यौ द्वौ सुषेण मेघाक्षौ हस्तिबलकामौ गजसैन्याभिलाषुकौ हस्तिनैव गजेनैव घात्येताम् विनाश्येताम् इत्येतद्वृत्तमादिश्यतामित्यनेनान्वयः।

सक्रोधमिति। सक्रोधं क्रोधेन रोषेण सह वर्तमानं यथा तथा ब्रवीति। राक्षसेति द्विरुक्तिरतिशयक्रोधावेशात्। अहं विश्रम्भघाती विश्वासघातको राक्षसो

मैत्री करके मुझको मारने के लिये चन्द्रगुप्त की सेवा को चाहनेवाले जो पांच राजे हैं जिन के नाम ये हैं—कुलूत देशका राजा चित्रवर्मा, मलयदेश का राजा सिंहनाद, कश्मीर देश का राजा पुष्कराक्ष, सिन्धु देश का राजा सुषेण, पारसीक देश का राजा मेघाक्ष, इन पाँचो में से पहले के तीन हमारे राज्य को चाहने वाले हैं, वे सब गहरे गड्ढे में गाड़ दिये जायँ और मेरे गज-सैन्य को चाहने वाले दो राजे हाथी के द्वारा मरवा डाले जांय।

पुरुषः—कुमार की जो आज्ञा (चलागया)

मलयकेतुः—(क्रोध के साथ) राक्षस! राक्षस!! मैं विश्वासघाती राक्षस नहीं, किन्तु मैं मलयकेतु हूं। इसलिये तुम खुशी से जाओ और अच्छी तरह चन्द्र गुप्त की

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चन्द्रगुप्त इति—

विष्णुगुप्तश्च मौर्यश्च सममप्यागतौ त्वया ।
उन्मूलयितुमीशोऽहं त्रिवर्गमिव दुर्नयः ॥ २२ ॥

भागुरायणः—कुमार ! कृतं कालहरणेन, शीघ्रमेव कुसुमपुरोपरोधाय प्रतिष्ठाप्यन्तामस्मद्बलानि,—

गौडीनां लोध्रधूलीपरिमलबहलान् धूम्रयन्तः कपोलान्

न मलयकेतुः खल्वहम् अहं मलयकेतुर्नाम तत्तस्मात् गच्छ स्थानान्तरं याहि सर्वात्मना सर्वप्रकारेण चन्द्रगुप्तो मौर्यः समाश्रीयतां संसेव्यताम् ।

विष्णुगुप्तश्चेति । दुर्नयो दुष्टनीतिः असदाचरणमिति यावत् । त्रयाणां वर्गस्त्रिवर्गस्तं त्रिवर्गं धर्मार्थकामसमूहं, वा क्षयस्थानवृद्धिसमुदायमिव ।

'त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः समोक्षकैः' इत्यमरः । 'क्षयः स्थानं च वृद्धिश्च त्रिवर्गो नीतिवेदिनाम्' इत्यप्यमरः । त्वया समं भवता सार्द्धमागतौ विष्णुगुप्तं कौटिल्यं मौर्यं चन्द्रगुप्तञ्चापि अहमेकाकी उन्मूलयितुं विनाशयितुम् ईशः समर्थः अस्मीति क्रियाशेषः । यथैको दुर्नयस्त्रिवर्गमुन्मूलयितुमीशस्तथैकोऽहं कौटिल्यमौर्यराक्षसत्रयमुन्मूलयितुमीशोऽस्मीत्यर्थः । त्रिवर्गस्य कौटिल्यादित्रयेण दुर्नयस्य मलयकेतुना चोपमानोपमेयभावात्साद्दश्यार्थकेवशब्दस्योन्मूल्योन्मूलकत्वरूपसाधारणधर्मस्य चाभिधानाच्छ्रौतीपूर्णोपमालङ्कारः । (दुर्नयदृष्टान्तेन स्वस्मिन् मलयकेतुना दौरात्म्यं सूचितम् । अनुष्टुप् वृत्तम् ॥ २२ ॥

कृतमिति । कालहरणेन समययापनेन कृतमलम् समययापनं व्यर्थमित्यर्थः । कुसुमपुरोपरोधाय कुसुमपुरं रोद्धुमित्यर्थः । अस्मद्बलानि भद्रभटप्रभृतीन्यस्मत्सैन्यानि शीघ्रमेव द्रुतमेव प्रतिष्ठाप्यन्तां प्रेष्यन्ताम् । (मलयकेतुनिग्रहार्थमेष भागुरायणप्रयत्न इत्यवधेयम्) ।

गौडीनामिति । बलानामस्मत्सैन्यानां तुरगाणां खुरपुटास्तुरगखुरपुटाः तुरगखुरपुटैः क्षोदस्तुरगखुरपुटक्षोदस्तेन लब्ध आत्मलाभो यैस्ते तुरगखुरपुटक्षोदल-

---

सेवा करो ।

जैसे दुष्ट नीति धर्म-अर्थ-काम इनको नाश करने में समर्थ होती है, उसी तरह अकेला मैं तुम्हारे साथ आये हुए चाणक्य और चन्द्रगुप्त का नाश करने में समर्थ हूँ २२

भागुरायण:—कुमार ! ज्यादा समय व्यतीत करना व्यर्थ है । शीघ्र ही कुसुमपुर को घेरने के लिये भद्रभट आदि के साथ हमारी सेनायें भेजी जायँ ।

लोध्र पुष्पके सौरभ से सुगन्धित गौडदेशवासिनी स्त्रियों के कपोलों को मलिन

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्लिश्नन्तः कृष्णिमानं भ्रमरकुलरुचः कुञ्चितस्यालकस्य ।
पांशुव्यूहा बलानां तुरगखुरपुटक्षोदलब्धात्मलाभाः
शत्रूणामुत्तमाङ्गे गजमदसलिलच्छिन्नमूलाः पतन्तु ॥२३॥

(इति सपरिजनो निर्गतो मलयकेतुः) ।

राक्षसः—(सावेगम्) हा धिक् कष्टम् ! ! तेऽपि हतास्तपस्विनश्चित्रवर्मादयः !! तत् कथं सुहृन्नाशाय राक्षसश्चेष्टते, न रिपुविनाशाय ? तत् किमिदानीं करवाणि मन्दभाग्यः !—

लब्धात्मलाभाः अश्वशफाग्रचूर्णनप्राप्तजन्मानः (उत्पत्तयः) 'शफं क्लीबे खुरःपुमान्' इत्यमरः। पांशुव्यूहाः रजोराशयः गौडीनां गौडदेशवासिस्त्रीणां लोध्रधूलीपरिमलबहलान् लोध्रपुष्पविशेषपरागामोदव्याप्तान् कपोलान् गण्डप्रदेशान् धूम्रयन्तो मलिनयन्तः भ्रमरकुलरुगिव रुक् यस्य स तथोक्तस्तस्य भ्रमरकुलरुचः मधुपवृन्दकान्तेः कुञ्चितस्य कुटिलस्यालकस्य चूर्णकुन्तलस्य कृष्णिमानं कार्ष्ण्यं क्लिश्नन्तोऽपनयन्तः गजानां मदा गजमदास्त एव सलिलानि तैश्छिन्नं मूलं येषां ते गजमदसलिलच्छिन्नमूलाः करिमदवारिविनाशितब्रध्नाः । मूले ब्रध्नोऽङ्घ्रिनामक इत्यमरः । सन्तः शत्रूणां रिपूणामुत्तमाङ्गे शिरसि पतन्तु तिष्ठन्तु । उत्तमाङ्गं शिरः शीर्षं मूर्द्धा ना मस्तकोऽस्त्रियाम् । इत्यमरः । कपोलाऽलकयोर्निजगुणत्यागपूर्वकपांशुगुणग्रहणात्तद्गुणालङ्कारः । भ्रमरकुलरुच इत्यत्रेवशब्दाऽभावाल्लुप्तोपमा । गजमदसलिलेत्यत्र रूपकम् । पांशुव्यूहानां कपोलालकरिपूत्तमाङ्गेषु सम्बन्धात्पर्यायालंकारः रिपुजयाय सैन्यसमारोहवर्णनस्य स्वभावसिद्धत्वात्स्वभावोक्तिश्चेत्येषां साङ्कर्यम् । गौडी रीतिः । ओजोगुणः । स्रग्धरावृत्तम् ॥ २३ ॥

सावेगमिति । आवेगेन सह वर्तमानं सावेगम् सचिन्तं यथा तथा ब्रवीति । हा खेदे कष्टं दुःखं धिक् निन्दनीयमित्यर्थः । तेऽपि तपस्विनस्तपश्चरणशालाः चित्रवर्मादयश्चित्रवर्मप्रभृतयः हता विनाशिताः । तत्तस्मात् राक्षसः सुहृन्नाशाय

करती हुई, और भौंरों के समान कृष्णवर्ण तथा कुटिल चूर्ण कुन्तल के कालेपन को हटाती हुई हमारे सैन्य के घोड़ों के खुराग्रभाग से पृथ्वी के चूर्ण होने के कारण उत्पन्न धूलि हाथी के मद-जल के द्वारा पङ्कित होकर हमारे शत्रुओं के सिरपर बैठे २३

(अनुचरों के साथ मलयकेतु चला जाता है) ।

राक्षसः—(वेग के साथ) हा कष्ट ! वे सब बेचारे चित्रवर्मा आदि भी मारे गये। तब मानो राक्षस मित्रघात करने के लिये तैयार है, न कि शत्रुघात के लिये । मैं अभागा अब क्या करूं ?—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

किं गच्छामि तपोवनम् ? न तपसा शाम्येत् सवैरं मनः
किं भर्तृननुयामि जीवति रिपौ स्त्रीणामियं योग्यता ।
किंवा खड्गसखः पतास्यरिबले ? नेदं न युक्तं भवेत् ?
चेतश्चन्दनदासमोक्षरभसं रुन्ध्यात् कृतघ्नं न चेत् ॥ २४ ॥

(इति निष्क्रान्ताः सर्वे) ।

इति मुद्राराक्षसे पञ्चमोऽङ्कः ॥ ५ ॥

मित्रविघाताय कथं कुतश्चेष्टते उद्युंक्ते न रिपुविनाशाय शत्रूच्छेदाय चेष्टत इति क्रिया-शेषः। तत्तस्मात् इदानीं साम्प्रतं मन्दभाग्यो भाग्यहीनः किं करवाणि किं विदधानि ।

किं गच्छामीति । किं तपोवनं गच्छामि तपश्चरणार्थमरण्यं यामि न, तपोवनगमनं न युक्तं यतस्तपसा तपश्चरणेन सवैरं सामर्षं मनश्चित्तं न शाम्येत रिपौ शत्रौ मौर्ये जीवति विद्यमाने सति किं भर्तॄन् स्वामिनो नन्दान् अनुयामि अनुगच्छामि, इदमप्ययुक्तम् यतः शत्रौ विद्यमाने मरणमियं स्त्रीणां नारीणां योग्यता कर्म । वाऽथवा खड्गसखः असिधारी सन् अरिबले शत्रुसैन्ये किं पतामि, इदं शत्रुसैन्ये पतनं युक्तं समुचितं न भवेत् यतः चन्दनदासमोक्षरभसः चन्दनदासपरित्राण-व्यग्रं चेतो मनः रुन्ध्यात् मामिति शेषः। रिपुबलपतनान्मां रोद्धुं प्रवर्तेत इत्यर्थः, न चेत् यदि न रुन्ध्यात् तदा कृतघ्नमकृतज्ञं भवेत् चेत् इति शेषः । तपोवनगमनादिकार्यं परित्यज्य चन्दनदासपरित्राण एव यत्नो विधेयोऽन्यथा मयि कृतघ्नता दोषः स्यादिति भावः । एकस्यैवाऽहमिति कर्तृपदस्य गमनमरणप्रयाणक्रियासु सम्बन्धाद्दीपकालंकारः । तपोवनगमननिषेधे सामर्षमनश्शान्त्यभावस्य भर्त्तुरनुगमननिषेधे स्त्रीयोग्यतायाः शत्रुसैन्यापतने चेतसश्चन्दनदासमोक्षरभसत्वस्य च हेतूनां वाक्यार्थतयाऽभिधानाद्वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारश्चेत्यनयोः साङ्कर्यम् । वैदर्भी रीतिः । प्रसादगुणः शार्दूलविक्रीडितं वृत्तम् ॥ २४ ॥

इति मुद्राराक्षसभावबोधिनीव्याख्यायां पञ्चमोऽङ्कः ।

मेरे क्रोधित मनको तपस्या के द्वारा शान्तिलाभ नहीं होगा । इस कारण तपोवन जाना व्यर्थ है, शत्रु के जीवित रहते प्राण त्याग करना स्त्री का धर्म है । इस लिये वह भी उचित नहीं । तो क्या शस्त्र लेकर शत्रु दलमें कूदना उचित होगा ? पर चन्दनदास के त्राणमें व्यग्र मेरा कृतघ्न चित्त यदि मुझे न रोके तब न ? ॥ २४ ॥

(सब चलेगये)

इति आशुबोधिनीव्याख्यायां पञ्चमोऽङ्कः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

षष्ठोऽङ्कः ।

(ततः प्रविशत्यलंकृतः सहर्षः सिद्धार्थकः)

सिद्धार्थकः—जअदि जलद्णीलो केसवो केसिघादी
जअदि अ जणदिट्ठीचन्दमा चन्दउत्तो ।
जणदि जअणसज्जं जा अकाऊण सेण्णं,
पड़िहदपड़िपक्खा अज्जचाणक्कणीदी ॥ १ ॥

[जयति जलदनीलः केशवः केशिघाती, जयति सुजनदृष्टिश्चन्द्रमाश्चन्द्रगुप्तः ।
जयति जयनसज्जं या अकृत्वा च सैन्यम् , प्रतिहतप्रतिपक्षा आर्यचाणक्यनीतिः] ॥ १ ॥

तत इति । ततस्तदनन्तरं मलयकेतुप्रभृतिनिष्क्रमणोत्तरमित्यर्थः । अलंकृतो भूषितः सहर्षः सानन्दः सिद्धार्थकः एतदाख्यः पुरुषः प्रविशति रङ्गशालान्तर्गतो भवति ।

इत्थं मलयकेतुनिग्रहात्मकाऽवान्तरकार्यसम्पादनोत्तरं राक्षससंग्रहणात्मककार्य-सम्पादनाय मौर्यश्रीस्थैर्यात्मकमहाफलनिष्पादनाय च षष्ठसप्तमांकयोः प्रक्रमः ।

कृतकार्यो मौर्यः परिहितालंकरणसिद्धार्थकाऽनुचरद्वारेष्टदेवराजचाणक्यनीतीनां जयमुद्घोषयति–जयतीति । जलं ददातीति जलदो मेघस्तद्वन्नीलः श्यामः जलद नीलः मेघश्यामः केशिनं हन्तुं शीलोऽस्येति केशिघाती केशिनामदैत्यविनाशकः केशवो विष्णुः जयति सर्वोत्कर्षेण वर्तताम् , जनानां दृष्टिः तस्याश्चन्द्रमाः सकल-पुरुषनेत्राऽऽह्लादजनकचन्द्रः चन्द्रगुप्तो मौर्यश्च जयति सर्वोत्कर्षेण वर्तताम् , या, जयत्यस्मिन्निति जयनं युद्धादि (अधिकरणे ल्युट्) तदर्थं सज्जा वेशो यस्य तत् जयसज्जं सैन्यमकृत्वा सैन्यं विनैवेत्यर्थः । प्रतिहतः परपक्षो यया सा प्रतिहतपर-पक्षा सा आर्यं चाणक्यनीतिः कौटिल्यनयो जयति सर्वोत्कर्षेण वर्तताम् । पद्याद्यच-रणेन भगवदिष्टजयोद्घोषः, द्वितीयेन मौर्यजयोद्घोषः । तृतीयचतुर्थाभ्यां चाणक्यनी-तिजयोद्घोषः । आद्यचरणे जलदंनील इत्यत्र लुप्तोपमा । द्वितीय चरणेचन्द्रगुप्त-सुजनदृष्ट्याह्लादजनकत्वसाधर्म्येण चन्द्रमस्त्वारोपाद्रूपकम् । उत्तरार्द्धे प्रतिपक्षप्रति-

---

(अलङ्करण पहिनकर सिद्धार्थक प्रवेश करता है)

सिद्धार्थकः—सजल मेघ के समान श्यामवर्ण और केशी दैत्य को मारने वाले श्री कृष्णचन्द्र की जय हो और लोगों के नेत्रों को सुख देनेवाले चन्द्रमा के तुल्य चन्द्रगुप्त की जय हो तथा सैन्यों को तय्यार किये विना ही शत्रुओं का नाश करने वाली आर्य चाणक्य की नीति की भी जय हो ॥ १ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ता जाव चिरस्स कालस्स प्पिअवअस्सं सुसिद्धत्थअं पेक्खामि । (परिक्रम्यावलोक्य च) अअं उण प्पिअवअस्सओ सुसिद्धत्थओ इदो ज्जेव आअच्छदी ता जाव उवसप्पामि [तद्यावच्चिरस्य कालस्य प्रियवयस्यं सुसिद्धार्थकं पश्यामि । अयं पुनः प्रियवयस्यः सुसिद्धार्थक इत एवागच्छति, तद्यावदुपसर्पामि]

(ततः प्रविशति सुसिद्धार्थकः) ।

सुसिद्धार्थकः—

सन्तावेन्ता आवाणेसु महूसवेसु रुआवेन्ता ।
हिअअच्छिआ अवि विहवा, विरहे मित्ताणं दुम्मणाअन्ते ॥२॥

[सन्तापयन्तः आपानेषु महोत्सवेषु रुजायन्तः ।

हननात्मककार्यसाधनीभूतसैन्यमंतरैवार्यचाणक्यनीतेरुक्तकार्यसाधनाद्विभावनाऽलङ्कारः। एषामन्योन्यनैरपेक्ष्येण स्थित्या संसृष्टिरलंकारः। लक्षणान्येतेषां दर्पणोक्तानि यथा—लुप्ता सामान्यधर्मादेरेकस्य यदि वा द्वयोः । त्रयाणां वानुपादाने श्रौत्यार्थी सापि पूर्ववत्॥ रूपकं रूपितारोपाद्विषये निरपह्नवे । विभावना बिना हेतुं कार्योत्पत्तिर्यदुच्यते ।

मिथोऽनपेक्षयैतेषां स्थितिः संसृष्टिरुच्यते ॥

(नीतेर्हेतुमन्तरैव कार्यसाधकत्वात्प्राशस्त्यरूपवस्तु व्यज्यते विभावनाऽलंकारेणेत्यवधेयम्) पादत्रये जयतिशब्दप्रयोगादनवीकृतत्वं दोषः । मालिनी वृत्तम्॥१॥

तद्यावदिति । तत्तस्मात् यावद्यत्कालपर्यन्तं चिरस्य कालस्य बहोः कालात्परमित्यर्थः । प्रियश्चासौ वयस्यः प्रियवयस्यस्तं प्रियवयस्यम् अतिसुखप्रदसुहृदं सुसिद्धार्थकमेतदाख्यं पश्यामि प्रेक्षे । परिक्रम्य कियन्ति पदानि संचर्य अवलोक्य संप्रेक्ष्य च पुनर्ब्रवीतीति शेषः । अयं पुनः प्रियवयस्यः प्रियसुहृत् सुसिद्धार्थकः एतदाख्यः इत एवागच्छति इहैवायाति, तत्तस्मात् उपसर्पामि समीपं गच्छामि अहमिति शेषः ।

सन्तापयन्त इति । मित्राणां सुहृदां विरहे वियोगेऽदर्शन इति यावत् । सति विभवा ऐश्वर्याणि हृदयस्थिता अपि अतिसुखप्रदत्वादन्तःकरणवर्त्तिनोऽपि

इसलिये चलो बहुत दिन के प्रियमित्र सुसिद्धार्थक से मिलें । अहा! मेरा प्रियमित्र सुसिद्धार्थक तो इसी तरफ आरहा है । इसलिये उसीके समीप जाऊँ ।

(सुसिद्धार्थक प्रवेश करता है)

सुसिद्धार्थकः—मित्रों का वियोग रहनेपर अत्यन्त दुख देते हैं और अन्तःकरण में

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

हृदयस्थिता अपि विभवा विरहे मित्राणां दुर्मनायन्ते]॥ २ ॥

सुदञ्च मए जधा मलअकेदुकडआदो प्पिअवअस्सओ सिद्धत्थओ आअदोत्ति । ता जाव णं अण्णेसामि (परिक्रम्योपसृत्य च) एसो सिद्धत्थओ ।

[श्रुतञ्च मया यथा मलयकेतुकटकात् प्रियवयस्यः सिद्धार्थक आगत इति । तद्यावदेनमन्विष्यामि । एष सिद्धार्थकः]

आपानेषु पानगोष्ठीषु सन्तापयन्तः तत्र मित्रविरहात्तृप्त्यभावेन क्लेशमुत्पादयन्तः महोत्सवेषु उत्कृष्टमहेषु । 'उद्धर्षो मह उद्धव उत्सव' इत्यमरः । (अदन्तो महशब्दः) रुजायन्तः पीडयन्तः सन्तो दुर्मनायन्ते विमनसो विदधति मित्रसद्भावे एव सुखजनका विभवा नान्यथेति भावः । एकस्यैव विभवरूपकर्तृकारकस्यसन्तापन–रूजाकरण–दुर्मनःकरणरूपास्वनेकक्रियासु सम्बन्धाद्दीपकालंकारः । सन्तापनत्व–रुजाकरणत्व–दुर्मनःकरणत्वेषु हेतुभूतमित्रविरहस्य पदार्थत्वेनोक्त्या पदार्थहेतुककाव्यलिङ्गाऽलंकारश्चेत्यनयोरङ्गाऽङ्गिभावेन सांकर्यम् । अर्या छन्दः ।

संदावे तारेसाणं गेहूसवे सुहाअत्ताणं,
हिअअट्ठिदाणं बिहवा बिरहे मित्ताणं दूणन्दि ।
सन्तापे तारेशानां गेहोत्सवे सुखायमानानाम् ।
हृदयस्थितानां विभवा विरहे मित्राणां दुन्वन्ति ।

इति क्वचित्पाठः । सन्तापे दुःखक्षणे तारेशानां चन्द्रवत् सन्तापहारिणाम्, गेहोत्सवे गृहोत्सवक्षणे सुखायमानानां सुखमनुभवतां हृदयस्थितानां चिन्त्यमानानां मित्राणां सुहृदां विरहे वियोगे विभवा ऐश्वर्याणि दुन्वन्ति क्लेशयन्ति इति तदर्थः । विभवकर्तृकदुःखदाने मित्रविरहस्य हेतुत्वात्पदार्थहेतुकं काव्यलिङ्गमलं कारः ॥२॥

मया श्रुतमाकर्णितञ्च यथा मलयकेतुकटकात् मलयकेतुशिविरात् प्रियवयस्यः प्रियसुहृत् सिद्धार्थक एतदाख्य आगत इह प्राप्त इति श्रुतमित्यन्वयः । तत्तस्मात् यत्कालपर्यन्तमेनं सिद्धार्थकमन्विष्यामि मृगयिष्यामि । परिक्रम्य कियन्ति पदानि गत्वा उपसृत्य समीपमेत्य ब्रवीतीति शेषः । किन्तदाह–एष इति । एषोऽसौ सिद्धा-

---

रहने वाले भी ऐश्वर्य्य पानगोष्ठी में मित्र के विरह से तृप्त न होकर सन्ताप और विशेष उत्सवों में भी पीड़ा देते हुए विमनस्क होते हैं ॥ २ ॥

मैंने सुना है कि मलयकेतु के सैन्यावास से प्रिय मित्र सिद्धार्थक आये हैं । इस लिये चलो, उनको खोजूं ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सिद्धार्थकः—(विलोक्य) कधं इदो ज्जेव प्पिअवअस्सओ सुसिद्धत्थओ ! (उपगम्य) अवि सुहं प्पिअवअस्सस्स ? [कथमित एव प्रियवयस्यः सुसिद्धार्थकः ! अपि सुखं प्रियवयस्यस्य ?]

(उभावन्योन्यमालिङ्गतः)

सुसिद्धार्थकः—अह वअस्स ! कुदो मे सुहं !! जस्स तुमं चिरआलप्पवासपच्चागदोवि, अआणिअ वुत्तन्तं, अण्णदो गदोसि ? त्ति [अहो वयस्य ! कुतो मे सुखम् !! यस्य त्वं चिरकालप्रवासप्रत्यागतोऽप्यज्ञापयित्वा वृत्तान्तमन्यतो गतोऽसीति]

सिद्धार्थकः—प्पसीददु प्पिअवअस्सो । अहं क्खु दिट्ठमेत्तो ज्जेव्व अज्जचाणक्केण आणत्तो, जधा,—"सिद्धत्थअ, गच्छ. एदं प्पिअं वुत्तन्तं प्पिअदंसणस्स देअस्स चन्दसिरिणो णिवेदेहि" त्ति । तदा तस्स तं णिवेदिअ, एव्वं अणुभूदपात्थिवप्पसादो, अहं प्पिअवअस्सं पेक्खिदुं तुह गेहं चलिदोह्मि [प्रसीदतु प्रियवयस्यः । अहं खलु दृष्टमात्र एवा-

---

र्थकः एतदाख्यो मम सुहृत् अस्तीति शेषः ।

विलोक्येति । विलोक्य समीक्ष्य सुसिद्धार्थकमिति शेषः । कथं किम् इत एव इहैव प्रियवयस्यः प्रियसुहृत् आगच्छतीति शेषः । उपगम्य समीपमेत्य ब्रवीतीति क्रियाशेषः । प्रियवयस्यस्य स्निग्धमित्रस्य अपि सुखं सुखमस्तीत्यर्थः ।

अह इति । अह इत्यव्ययं खेदार्थकम् , वयस्य सुहृत् मे मम कुतः कस्मात् सुखमानन्दः न मे आनन्दोऽस्तीत्यर्थः । चिरं प्रवासश्चिरप्रवासस्तस्मात्प्रत्यागतश्चिरप्रवासप्रत्यागतः बहुकालं यापयित्वा विदेशात्प्रतिनिवृत्तोऽपि त्वं यस्य मम वृत्तान्तं तत्रत्योदन्तमज्ञापयित्वा अनुक्त्वा अन्यतोऽन्यत्र गतः प्रस्थितोऽसि । मलयकेतुकटके स्वकृतकार्यमनिवेद्यैवान्यत्र गते त्वयि तद्विशयकभावनया कुतो मे सुखप्राप्तिरित्यर्थः ।

प्रसीदत्विति । प्रियवयस्यः स्निग्धमित्रं भवानिति शेषः । प्रसीदतु प्रसन्नो

सिद्धार्थकः—(देखकर) क्या मेरे प्रियमित्र सुसिद्धार्थक इसी तरफ तो आ रहे हैं (समीप में जाकर) प्रियमित्र ! आप सुखी हैं ।

(दोनों परस्पर आलिङ्गन करते है)

सुसिद्धार्थकः—मित्र ! मुझ से न मिलकर दूसरी जगह चले गये ।

सिद्धार्थकः—प्रियमित्र आप प्रसन्न हों । आर्य चाणक्य ने सब समाचार सुनकर

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

र्यचाणक्येनाज्ञप्तो, यथा—सिद्धार्थक ! गच्छ, इमं प्रियं वृत्तान्तं प्रियदर्शनस्य देवस्य चन्द्रश्रियो निवेदयेति । ततस्तस्य तन्निवेद्य, एवमनुभूतपार्थिवप्रसादोऽहं प्रियवयस्यं प्रेक्षितुं तव गेहं चलितोऽस्मि]

सुसिद्धार्थकः—वअस्स ! जदि मए एदं सुणिदव्वं भोदि, ता मंपि सुणावेहि, किं ते प्पिअं प्पिअदंसणस्स चन्दसिरिणो णिवेदिदं त्ति । [वयस्य ! यदि मयेदं श्रोतव्यं भवति, तन्मामपि श्रावय, किं तत् प्रियं प्रियदर्शनस्य चन्द्रश्रियो निवेदितमिति]

सिद्धार्थकः—प्पिअवअस्स ! तुह वि किं असुणिदव्वं अत्थि ? ता णिसामेहि । अत्थि दाव, अज्जचाणक्कणीदिमोहिदमदिणा मलअकेदु-हदएण णिराकरिअ रक्खसं हदा चित्तवम्मप्पमुहा प्पहाणा पञ्च

भवतु ममोपरीति शेषः । (खलुशब्दो निश्चयार्थकः) आर्यचाणक्येन पूज्यविष्णुगुप्तेन अहं दृष्ट मात्र एव आज्ञप्त आज्ञाम्प्राप्तः । आसमिति शेषः यथा यत् सिद्धार्थक ! गच्छ इतो याहि इमम् प्रियमानन्दप्रदं वृत्तान्तमुदन्तं प्रियदर्शनं सुखावलोकनं यस्य स तथोक्तस्तस्य प्रियदर्शनस्य सुखावलोकनस्य देवस्य राज्ञः चन्द्र इव श्रीर्यस्य स तथोक्तस्य चन्द्रश्रियः चन्द्रगुप्तस्येत्यर्थः । निवेदय कथय चन्द्रगुप्ताय-कथयेत्यर्थः, (अत्र शेषत्वविवक्षया षष्ठी) इत्याज्ञप्त इत्यन्वयः । ततस्तदुत्तरं तस्य चन्द्रगुप्तस्य तत् प्रियमुदन्तं निवेद्य तस्मै प्रियवृत्तान्तं विज्ञाप्य, एवमित्थम् अनुभूय पार्थिवप्रसादः प्राप्तनृपानुग्रहो दत्तालंकरणाऽलंकृत इत्यर्थः । अहं प्रियवयस्यं परममित्रं त्वामिति शेषः । प्रेक्षितुमवलोकितुं तव भवतो गेहं गृहं चलितोऽस्मि प्रस्थितो भवामि ।

वयस्येति । वयसा तुल्यो वयस्यः (वयश्शब्दात्तुल्यार्थे यत् ।) तत्सम्बुद्धौ हे वयस्य मित्र ! यदि चेत् मयाऽऽत्मना इदमेतन्निवेदितं श्रोतव्यमाकर्णितव्यं भवति तत्तदा मामपि श्रावय तद्वृत्तमिति शेषः प्रियदर्शनस्य स्निग्धनिरीक्षणस्य चन्द्रश्रियश्चन्द्रगुप्तस्य किं तत् प्रियं निवेदितं । कीदृशमानन्दप्रदं वचनमिति शेषः । निवेदितं कथितमिति (अत्रापि सम्प्रदानस्य शेषत्वविवक्षणात्षष्ठी) ।

कहा कि सिद्धार्थक ! जाओ, प्रियदर्शन राजा चन्द्रगुप्त को यह प्रिय समाचार सुना-दो । उन को प्रिय समाचार सुनाकर और इस प्रकार राजा से दिये अलङ्करणों से भूषित होकर प्रियमित्र ! तुमको देखने के लिये तुम्हारे पास आया हूं ।

सुसिद्धार्थकः—यदि प्रिय समाचार मेरे सुनने योग्य हो तो मुझे भी सुनाओ । कौनसा वह प्रिय समाचार तुमने प्रियदर्शन चन्द्रगुप्त को सुनाया ?

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पात्थिश्रा, तदो असमिक्खकारी एसो दुराआरोत्ति कदुअ, उज्झिअ मलअकेदुकड़अभूमिं, णिअभूमिकुसलदाए भआवलोलसेण्णतणूकिदसेसपरिवारेसुं सकं सकं विसअं अभिप्पत्थिदेसु, पात्थिवेसु भद्दभटपुरुदत्तहिङ्गुरात वलउत्त राअसेण भागुराअण रोहिदक्ख विजअवम्मप्पमुहेहिं संजमिदो मलअकेदू [प्रियवयस्य ! तवापि किमश्रोतव्यमस्ति ? तन्निशामय,—अस्ति तावदार्यचाणक्यनीतिमोहितमतिना मलयकेतुहतकेन निराकृत्य राक्षसं, हताश्चित्रवर्मप्रमुखाः प्रधानाः पञ्च पार्थिवाः । ततोऽसमीक्ष्यकारी एष दुराचार इत्युज्झित्वा मलयकेतुकटकभूमिं, निजभूमिकुशलतया भयविलोलसैन्यतनूकृतशेषपरिवारेषु स्वकं स्वकं विषयमभिप्रस्थितेषु पार्थिवेषु, भद्रभटपुरुषदत्त-हिङ्गुरात-बलगुप्त-राजसेन-भागुरायण-रोहिताक्षविजयवर्मप्रमुखैः संयमितो मलयकेतुः]

प्रियवयस्येति । प्रियसुहृत् ! तवाऽपि भवतोऽपि किं किमपि अश्रोतव्यमनाकर्णितव्यमस्ति वर्तते । न किमपि सहृदयस्य भवतश्श्रवणाऽनर्हमस्तीत्यर्थः; तत्तस्मात् निशामय शृणु आर्यश्चासौ चाणक्य आर्यचाणक्यस्तस्य नीतिर्नयस्तया मोहिता मतिर्यस्य स आर्यचाणक्यनीतिमोहितमतिस्तेन आर्यचाणक्यनीतिमोहितमतिना पूज्यकौटिल्यनयवशीकृतबुद्धिना मलयकेतुश्चासौ हतको मलयकेतुहतकः ('कुत्सितानि कुत्सितैरि'ति समासः) तेन मलयकेतुहतकेन निन्दितेन मलयकेतुना राक्षसं नन्दसचिवं निराकृष्य निष्कास्य (दूरीकृत्य) प्रधानाः श्रेष्ठाः चित्रवर्मप्रमुखाः चित्रवर्मप्रभृतयः पञ्च राजानो नृपतयो हता विनाशिताः । ततस्तदनन्तरं राक्षसनिष्कासनपूर्वकचित्रवर्मप्रभृतिविनाशोत्तरमित्यर्थः । एषोऽसौ मलयकेतुः न सम्यक् विचार्य कर्तुं शीलमस्येत्यसमीक्ष्यकारी अविचारशीलः दुर्दुष्ट आचारो यस्य स दुराचारो दुष्टव्यवहार इति अस्मात्कारणात् निजभूमिकुशलतया स्वाधि-

---

सिद्धार्थकः—प्रियमित्र ! कोई वाक्य तुम्हें भी नहीं सुनने योग्य हो सकती है ? अच्छा सुनो । आर्य चाणक्य की नीति द्वारा मोहित बुद्धिवाले दुष्ट मलयकेतुने राक्षस को मन्त्रिपद से हटाकर चित्रवर्मा प्रभृति पांच प्रधान राजाओं को मरवा डाला। वह दुरात्मा मलयकेतु और भी अविचारित कार्य करनेवाला है । ऐसा जानकर अपने स्थान की रक्षा में निपुणता के कारण मलयकेतु के सैन्यावास को छोड़कर भयसे भागे हुए सैन्यवाले राजाओं अपने अपने देश चले जानेपर भद्रभट-हिङ्गुरात-बलगुप्त-राजसेन-भागुरायण-रोहिताक्ष-विजयवर्मा आदि दूतोंने मलयकेतु कोपकड़ लिया ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सुसिद्धार्थकः—वअस्स ! भद्दभटप्पमुहा किल देअस्स चन्दसिरिणो अवरत्ता मलयकेदुं समास्सिदा त्ति लोए मन्तीअदि । ता किं णिमित्तं एदं कुकविणाडअस्स बिअ अणं मुहे अणं णिव्वहणेर्त्ति ? [वयस्य ! भद्रभटप्रमुखाः किल देवस्य चन्द्रश्रियोऽपरक्ता मलयकेतुं समाश्रिता इति लोके मन्त्र्यते । तत् किं निमित्तमेतत्, कुकविनाटकस्येवाऽन्यन्निर्वहण इति ?]

सिद्धार्थकः—वअस्स ! सुणु दाव, दैवगदीए बिअ असुणिदगदीए णमो अज्जचाणक्कणीदीए [वयस्य ! शृणु तावत्, देवगत्यै इवाश्रुतगत्यै नम आर्यचाणक्यनीत्यै]

कारस्थानरक्षणनिपुणतया मलयकेतुकटकभूमिं मलयकेतुशिविरस्थानं उज्झित्वा परित्यज्य भयविलोलैः सैन्यैः तनूकृताः शेषाः परिवारा येषां ते तथोक्तास्तेषु भयविलोलसैन्यतनूकृतपरिवारेषु साध्वसचपलसेनासमुदायाल्पीकृतावशिष्टानुयायिवर्गेषु राजसु स्वकं स्वकं विषयम् आत्मीयमात्मीयं जनपदं प्रस्थितेषु गतेषु सत्सु, भद्रभटादिविजयवर्मान्तप्रभृतिभिः सैन्यैः कर्तृभिः, मलयकेतुः पर्वतकपुत्रः संयमितो धृतः (गृहीतः) ।

भद्रभटप्रमुखा इति । भद्रभटप्रभृतयो देवस्य राज्ञश्चन्द्रश्रियश्चन्द्रगुप्तस्य (शेषे षष्ठी) चन्द्रगुप्ते इत्यर्थः । अपरक्ता विरक्ताः सन्तो मलयकेतुपर्वतकपुत्रं समाश्रिताः संसेविता इति लोके मन्त्र्यते कथ्यते । तत् किं निमित्तमेतत् कुतः कारणादिदं कथ्यत इत्यर्थः कुकविनाटकस्य कुत्सितकविप्रणीतनाटकस्येव मुखे मुखसन्धौ प्रारम्भे अन्यत् निर्वहणे उपसंहारे अन्यत् नाटके आरम्भोपसंहारयोरैक्यस्यैव प्रसिद्धत्वादिह तद्विरुद्धं कुतः ये भद्रभटप्रभृतयश्चन्द्रगुप्तेनाऽननुरक्ताः सन्तो मलयकेतुमाश्रितास्तैरेव कथं मलयकेतुः संयमित इति प्रश्नाऽभिप्रायः ।

वयस्येति । वयस्य, मित्र ! शृणु तावत् सावधानः समाकर्णय, देवानां गतिर्देवगतिस्तस्यै देवगत्यै इव अमरकृत्यै इव अश्रुता गतिर्यस्याः साऽश्रुतगतिस्तस्यै अश्रुतगत्यै अनाकर्णितकृत्यै आर्यचाणक्यनीत्यै पूज्यकौटिल्यनीत्यै (कृत्यै) नमोऽ-

---

सुसिद्धार्थकः—मित्र ! भद्रभट आदि राजा चन्द्रगुप्त को छोड़कर मलयकेतु के आश्रित होकर रहते हैं, ऐसा हम लोगोंको मालूम हुआ था । तब किस लिये यह कुकविकृत नाटक की तरह प्रारम्भ में दूसरी बात और उपसंहार में दूसरी बात हुई ?

सिद्धार्थकः—सुनो, देवकृति की तरह अश्रुत कृतिमयी आर्य चाणक्य नीति को नमस्कार है ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सुसिद्धार्थकः—वअस्स ! तदो तदो ? [वयस्य ! ततस्ततः] ?

सिद्धार्थकः—वअस्स ! तदो प्पहुदि, सारसाहणसमुदएण इदो णिक्कमिअ, अज्जचाणक्केण पड़िवएणं अराअलोअं असेसराअवलं [वयस्य ! ततः प्रभृति, सारसाधनसमुदयेनेतो निष्क्रम्य, आर्यचाणक्येन प्रतिपन्नमराजलोकमशेषराजवलम् ।

सुसिद्धार्थकः—वअस्स ! कहिं ? [वयस्य ! कुत्र ?]

सिद्धार्थकः—वअस्स ! जहिं एदे,—[वयस्य ! यत्रैते,]—

अदिसअगुरुएणं दाणदप्पेण दन्ती,
सजलजलदलीलां उव्वहन्तो णदन्ति ।
कसपहरभएणं जादकम्पा तुरन्ता
गहिदजअणसज्जा संपदन्ते तुलंगा ॥ ३ ॥

[अतिशयगुरुकेण दानदर्पेण दन्तिनः, सजलजलदलीलामुद्वहन्तो नदन्ति ।

स्त्विति शेषः । ('नमः स्वस्ति स्वाहे'ति चतुर्थी) यथाऽश्रुगतिदेवगतिर्दुरवबोधा तथा चाणक्यनीतिरपि दुरवबोधेत्यर्थः । अश्रुतगत्यै विशेषणमिदमुभयोर्देवगतिचाणक्यनीत्योरिति वोध्यम् । तेनोभयोः साम्यप्रतीतिः ।

ततः प्रभृतीति । ततः प्रभृति तत्पश्चादित्यर्थः (मलयकेतुनिग्रहोत्तरंवाऽर्थः) आर्यचाणक्येन इतोऽस्मान्नगरान्निष्क्रम्य निर्गत्य सारसाधनसमुदयेन अत्युत्कृष्टरणोपकरणसमूहेन सह अराजलोकं नृपजनरहितम् अशेषराजवलं समस्तनृपसैन्यम् प्रतिपन्नमधिकृतम् ।

कुत्रेति । वयस्य मित्र ! भवता यदुक्तमार्यचाणक्येन समस्तराजसैन्यमधिकृतं स चाधिकारः कुत्र कस्मिन् स्थाने सम्पन्नः इति प्रश्नाशयः ।

अथोत्तरमाह—अतिशयगुरुकेणेति । गुरुरेव गुरुकोऽतिशयश्चासौ गुरुकोऽतिशयगुरुकस्तेनातिशयगुरुकेण अतिप्रवृद्धेन दानं दर्प इव दानदर्पस्तेन दानदर्पेण

सुसिद्धार्थकः—मित्र ! तब क्या हुआ ?

सिद्धार्थकः—मित्र ! उसके बाद आर्यचाणक्य ने इस नगर से बाहर जाकर अतिप्रबल रणसामग्री के साथ राजाओं से रहित समस्त राजसेना को अपने वश में कर लिया ।

सुसिद्धार्थकः—मित्र ! कहां पर ?,

सिद्धार्थकः—मित्र जहां पर—

हाथी अत्यन्त बढ़े हुए मदजल के अभिमान से सजल मेघ की लीला को धारण

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कशाप्रहारभयेन जातकम्पास्त्वरयन्तः, गृहीतजयनसज्जाः सम्पद्यन्ते तुरङ्गाः]

सुसिद्धार्थकः—वअस्स ! एदं सव्वं दावं चिट्ठदु, तहा सव्वलोअप्पच्चक्खं उज्झिआहिआरो भविअ, कहं अज्जचाणक्को पुणो वि तं ज्जेव मन्तिपदं आरूढो ? [वयस्य ! एतत् सर्वं तावत् तिष्ठतु । तथा सर्वलोकप्रत्यक्षमुज्झिताधिकारो भूत्वा कथमार्यचाणक्यः पुनरपि तदेव मन्त्रिपदमारूढः ?]

सिद्धार्थकः—वअस्स ! अदिमुद्धो दाणीं सि तुमं, जो अमच्चरक्खसेण अणवगाहिदपुव्वं अज्जचाणक्कबुद्धिं अवगाहिदुं इच्छसि ?

मदसलिलाऽभिमानेन सजलश्चासौ जलदः सजलजलदस्तस्य लीला सजलजलदलीला तां सजलजलदलीलां सलिलघनविलासमुद्वहन्तो धारयन्तो दन्तिनो हस्तिनो नदन्ति गर्जन्ति । कशायाः प्रहारः कशाप्रहारस्तस्माद्भयं कशाप्रहारभयं तेन कशाप्रहारभयेन ताडनीप्रहारजन्यसाध्वसेन जातकम्पाः अत एव स्वारोहिणस्त्वरावतो विदधतः तुरङ्गा अश्वाः गृहीतो जयनसज्जो युद्धार्थवेशो येषां ते गृहीतजयनसज्जाः युद्धार्थं सज्जिता इत्यर्थः । सन्तः सम्पद्यन्ते सन्नद्धा भवन्ति । वर्षिष्यमाणा मेघा इव हस्तिनो मदजलं वर्षन्ति गर्जन्ति च, ताडन्याघातजन्यसाध्वसेन कम्पमानाः युद्धार्थं सज्जिता अश्वाश्च सन्नद्धा भवन्तीत्यर्थः । यत्र हस्तिनां मदजलवर्षणं गर्जनञ्च, अश्वानाञ्च युद्धार्थतत्परता तत्रार्यचाणक्यस्याधिकारः सम्पन्न इत्युत्तराशयः । पूर्वार्द्धे दानदर्पेणेत्यत्र समासभेदादुपमारूपकयोः सन्देहसंकरः । वस्तुतो दन्तिनां सजलजलदलीलाधारणासम्भवेन तत्सदृशलीलाधारणप्रतीत्या सजलजलदलीलामिव लीलामुद्वहन्त इत्येतद्रूपबिम्बभावबोधनान्निदर्शनालंकारश्चेत्यनयोरङ्गाऽङ्गिभावेन साङ्कर्यम्, उत्तरार्द्धे प्रस्तुततुरङ्गेष्वप्रस्तुततादृशभृत्योद्योगख्यापनव्यवहृत्यारोपणात्समासोक्तिः, त्वरावत्त्वनिधाने कशाप्रहारेत्यादेर्हेतोः पदार्थत्वेनोक्त्या पदार्थहेतुककाव्यलिङ्गोज्जीवितेत्यलंकारचतुष्टयसन्निवेशः । मालिनीवृत्तम् ॥ ३ ॥

वयस्येति । वयस्य प्रियवन्धो (तावच्छब्दो वाक्याऽलंकारे) एतत्सर्वं नीतिनैपुण्यसमस्तनृपसैन्याक्रमणख्यापनं तिष्ठतु तथैवास्ताम् अन्यस्यापि प्रष्टव्य-

---

करते हुए गर्जते हैं और कशा (कोड़ा) मारने के भय से कांपते तथा घुड़सवारों को चञ्चल करते हुए युद्धके लिये सजाये गये घोड़े तैयार हैं ॥ ३ ॥

सुसिद्धार्थकः—मित्र ! अब यह समाचार (चाणक्य का नीतिनैपुण्य तथा समस्त नृपसैन्याक्रमणकथन) जाने दो । यह कहो कि सब लोगों के सामने मन्त्रिपद को त्याग कर आर्य चाणक्यने फिर मन्त्रिपद को क्यों स्वीकार कर लिया ?

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[वयस्य ! अतिमुग्ध इदानीमसि त्वं, योऽमात्यराक्षसेनानवगृहीतपूर्वामार्यचाणक्य बुद्धिमवगाहितुमिच्छसि]

सुसिद्धार्थकः—वअस्स ! अध अमच्चरक्खसो दाणीं कहिं [वयस्य ! अथाऽमात्यराक्षस इदानीं कुत्र ?]

सिद्धार्थकः—वअस्स! सो क्खु तस्सिं प्पलअकोलाहले बड्ढमाणे, मलअकेदुकडआदो णिक्कमिअ, उन्दुरणामहेएण चरेण अणुसरन्तो इमं ज्जेव कुसुमउरं आगदोत्ति अज्जचाणक्कस्स णिवेदिदं [वयस्य ! स खलु तस्मिन् प्रलयकोलाहले वर्द्धमाने, मलयकेतुकटकात् निष्क्रम्योन्दुरनाम-

---

विषयस्य सत्त्वादत्रैव वाक्यविरामो विरच्यतामित्यर्थः। तथा तादृशरूपेण सर्वलोकप्रत्यक्षं सर्वजनसमक्षम् उज्झितः परित्यक्तोऽधिकारो मन्त्रिपदं येन स उज्झिताधिकारः परित्यक्तसचिवपदो भूत्वा सन् आर्यचाणक्यः पूज्यविष्णुगुप्तः पुनरपि भूयोऽपि तदेव मन्त्रिपदं तदेवाऽमात्यस्थानं कथं किमारूढः प्राप्तः पुरा त्यक्तस्य मन्त्रिपदस्य पुनरङ्गीकारे को हेतुरिति तात्पर्यम्।

अतिमुग्ध इति। त्वम् इदानीं साम्प्रतम् अतिमुग्धोऽसि अतिशयदुर्बोधोऽसि, यस्त्वमिति शेषः। अमात्यराक्षसेन राक्षसनाम्ना नन्दसचिवेन राजनीतिकुशलेनेत्यर्थः। अनवगाहितपूर्वां पूर्वमज्ञाताम् आर्यचाणक्यबुद्धिं कौटिल्यमतिमवगाहितुं बोद्धुमिच्छसि वाञ्छसि। यत्कौटिल्यचरितमतिबुद्धिमता राक्षसेन नावगतं तद्विज्ञातुमुद्युक्तस्याऽल्पधियो भवतो मूढत्वमेवाऽवगतं भवतीत्यर्थः।

प्रश्नान्तरमुद्घाटयति—अथेति। अथानन्तरं मलयकेतुना निष्कासनोत्तरमित्यर्थः, अमात्यराक्षसः नन्दसचिवः इदानीं सम्प्रति कुत्र कस्मिन् स्थाने गत इत्यर्थः।

स खल्विति। खलुशब्दो वाक्यालंकारे निश्चये वा, स राक्षसः तस्मिन् मलयकेतुशिविरे प्रलयशब्दस्य प्रलयकालिककोलाहलसदृश इत्यर्थः। तथा च प्रलये प्रलयकालिककोलाहलसदृशे कोलाहले सैन्यकृते इति शेषः। वर्द्धमाने उपचीयमाने सतीत्यर्थः। (अथवा प्रलयकोलाहल इव कोलाहलो यस्य स तथोक्तस्तस्मिमिन्, प्रलयकोलाहले प्रलयकालिककोलाहलसदृशकोलाहलविधानशीले जनसमुदाये वर्द्ध

सिद्धार्थकः—मित्र ! तुम अभी बहुत अज्ञानी हो। क्योंकि अमात्यराक्षस से भी अज्ञेय आर्य चाणक्य की बुद्धि को तुम जानना चाहते हो।

सुसिद्धार्थकः—मित्र ! अब अमात्य राक्षस कहां हैं ?

सिद्धार्थकः—मित्र ! अमात्यराक्षस प्रलयकाल की तरह उस कोलाहल के बढ़ने

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धेयेन चरेणानुस्रियमाण इदमेव कुसुमपुरमागत इत्यार्यचाणक्यस्य निवेदितम्]

सुसिद्धार्थकः—वअस्स ! तहा णाम अमच्चरक्खसो णन्दरज्जप्पच्चाणअणे किद्व्ववसाओ णिक्कमिअ, सम्पदं अकिदत्थो पुणो वि कहं इमं ज्जेव कुसुमउरं आअदो ? [वयस्य ! तथा नाम अमात्यराक्षसो नन्दराज्यप्रत्यानयने कृत व्यवसायो निष्क्रम्य, साम्प्रतमकृतार्थः पुनरपि कथमिदमेव कुसुमपुरमागतः ?]

सिद्धार्थकः—वअस्स ! तक्केमि, चन्दणदासस्स सिणेहेण त्ति । [वयस्य ! तर्कयामि, चन्दनदासस्य स्नेहेनेति]

माने उपचीयमाने सतीत्यर्थः) (प्रथमार्थे कोलाहले ·प्रलयविशेषणतया प्रलयकोलाहलस्य सर्वविनाशसूचकत्वमिवैतत्सैन्यसमुदायकृतकोलाहलस्य मलयकेतुविनाशसूचकत्वमिति सूचितम्) मलयकेतुकटकात् मलयकेतुशिविरात् निष्क्रम्य निर्गत्य उन्दुरनामधेयेन उन्दुराख्येन चरेण दूतेन अनुस्रियमाणोऽनुगम्यमानः इदमेव कुसुमपुरमागतः प्राप्तः, इत्येतद्वृत्तम् आर्यचाणक्यस्य निवेदितम् आर्यचाणक्येन कथितम् (कर्तरि षष्ठी) ।

तथेति । अमात्यराक्षसः नन्दसचिवः तथा नाम सर्वजनप्रत्यक्षमित्यर्थः । नन्दराज्यप्रत्यानयने नन्दराष्ट्रपुनर्ग्रहणे कृतव्यवसायो विहितोद्योगः निष्क्रम्य निर्गत्य मलयकेतुशिविरादिति शेषः । साम्प्रतमिदानीम् अकृतार्थो विफलप्रयासः पुनर्भूयोऽपि कथं किम् इदमेव कुसुमपुरमेतदाख्यनगरमागतः प्राप्तः । नन्दराष्ट्रपुनरुद्धरणाय कृतोद्योगस्याऽमात्यराक्षसस्य मलयकेतुशिविरान्निष्क्रमणेऽपि प्रतिश्रुतेरसिद्धत्वाच्च साम्प्रतं कुसुमपुरागमनं साम्प्रतमिति भावः ।

तर्कयामीति । चन्दनदासस्य महोपकारिणो निजसहृदयस्य स्नेहेन परमाऽनुरागेण कुसुमपुरं पुनरागत इति शेषः । इति तर्कयामि सम्भावयामि अवगच्छामीत्यर्थः । मलयकेतुना विरुद्धस्य राक्षसस्य साम्प्रतमन्यत्र

पर मलयकेतु के कटक से निकल कर उन्दुर नामक दूत के साथ इसी कुसुमपुर में आये हैं । ऐसा आर्य चाणक्यने कहा है ।

सुसिद्धार्थकः—मित्र ! नन्द का राज्य लौटाने में अतिशय उद्योगी अमात्य राक्षस कुसुमपुर को त्यागकर और निष्फलप्रयत्न होकर फिर किस कारण इस कुसुमपुर में आये हैं ?

सिद्धार्थकः—मित्र ! मैं समझता हूं कि चन्दनदास के ही स्नेहसे ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सुसिद्धार्थकः—वअस्स ! सच्चं चन्दणदासस्स सिणेहेण त्ति? अध चन्दणदासस्स मोक्खं पेक्खसि ? [वयस्य ! सत्यं चन्दनदासस्य स्नेहेनेति ? अथ चन्दनदासस्य मोक्षं प्रेक्षसे ?]

सिद्धार्थकः—वअस्स ! कुदो से अधण्णस्स मोक्खो ? सो क्खु सम्पदं अज्जचाणक्कस्स आणत्तीए दुवेहिं पि अह्मेहिं वज्झट्ठाणं पवेसिअ वावादइदव्वो। [वयस्य ? कुतोऽस्याधन्यस्य मोक्षः ? स खलु साम्प्रतमार्यचाणक्यस्याऽऽज्ञप्त्या द्वाभ्यामप्यावाभ्यां वध्यस्थानं प्रवेश्य व्यापादयितव्यः]

सुसिद्धार्थकः—(सक्रोधम्) वअस्स ! किं अज्ज चाणक्कस्स घादअजणो अण्णो णत्थि, जेण अह्मे ईदिसे णिसंसे कम्मे णिउज्जीअदि? [वयस्य ! किमार्यं चाणक्यस्य घातकजनोऽन्यो नास्ति, येनावामीदृशे नृशंसे कर्मणि नियुज्यावहे ?]

गमने चन्दनदासाऽमुक्तौ कृतघ्नतादोषस्यक्तलोकपरिभवस्य विस्मृतात्मप्रतिष्ठस्याकृतकार्यस्यापि तस्य कुसुमपुरे पुनरागमनमिति भावः ।

सत्यमिति । चन्दनदासस्य निजसहृदयस्य स्नेहेनाऽनुरागेण राक्षसः कुसुमपुरमागत इति सत्यं यथार्थमेव । अथशब्दोऽत्र प्रश्नार्थकः, चन्दनदासस्य राक्षससुहृदो मोक्षं चाणक्यहस्तान्मुक्तिं प्रेक्षसे सम्भावयसि किम् ?

कुत इति । धनं लभते धन्यः (धनशब्दाल्लाभार्थे यत्) न धन्योऽधन्यस्तस्याऽधन्यस्य हतभाग्यस्याऽस्य चन्दनदासस्य मोक्षः चाणक्यहस्तान्मुक्तिः कुतः कदापि न सम्भाव्यत इत्यर्थः (खलुशब्दो वाक्यालङ्कारे) स चन्दनदासः आर्यचाणक्यस्य पूज्यविष्णुगुप्तस्याज्ञया निदेशेन द्वाभ्यामुभाभ्यामप्यावाभ्यां त्वया मया चेत्यर्थः । वध्यस्थानं हिंसाभूमिं प्रवेश्य समानीय व्यापादयितव्यो हन्तव्यः ।

सक्रोधमिति । सरोषं यथा तथा ब्रवीति । वयस्य प्रियसुहृद् । आर्यचाणक्यस्य पूज्यकौटिल्यस्य किमन्योऽपरः आवाभ्यामतिरिक्तः घातकजनो हिंसको

सुसिद्धार्थकः—मित्र ! ठीक कहते हो कि चन्दनदास के स्नेह से । अब तुम चाणक्य के हाथ से चन्दनदास का मोक्ष समझते हो क्या ?

सिद्धार्थकः—मित्र ! इस अभागे का मोक्ष कहां से होगा ? चन्दनदास अभी आर्य चाणक्य को आज्ञा से हम दोनों द्वारा वध्यस्थान में लाकर मारा जायगा ।

सुसिद्धार्थकः—(क्रोध के साथ)मित्र! आर्य चाणक्य के पास और कोई दूसरा आदमी मारनेवाला नहीं है क्या? जिस से ऐसे कठिन कार्य में हम दोनों लगाये गये हैं ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सिद्धार्थकः—वअस्स ! को जीवलोए जीविदुकामो अज्जचाणक्कस्स आणत्तिं पड़िऊलेदि; ता एहि, चण्डालवेसधारिणा भविअ, चन्दणदासं वज्झट्ठाणं णेह्म [वयस्य ! को जीवलोके जीवितुकामः आर्यचाणक्यस्याज्ञप्तिं प्रतिकूलयति ? तदेहि, चाण्डालवेशधारिणौ भूत्वा, चन्दनदासं वध्यस्थानं नयावः]

(इत्युभौ निष्क्रान्तौ)

प्रवेशकः ।

(ततः प्रविशति रज्जुहस्तः पुरुषः)

पुरुषः–छग्गुणसंजोअदिढ़ा उवाअपरिवाडिदपासमुही ।
चाणक्कणीदिरज्जू रिउसंजमणउज्जुआ जअदि ॥ ४ ॥

नास्ति न वर्तते येन कारणेन ईदृशे जीवहिंसनात्मके नृशंसे क्रूरे कर्मणि कार्ये आवां नियुज्यावहे नियुक्तौ भवावः । अन्यहिंसकजनाशङ्कावे सत्येवावयोरीदृशकार्ये नियोजनमुचितं नान्यथेति भावः ।

वयस्येति । वयस्य मित्र ! जीवलोके संसारे जीवितुकामः जीवनाभिलाषीकः कीदृशो जनः चाणक्यकौटिल्यस्य आज्ञप्तिमाज्ञां प्रतिकूलयति अस्वीकरोति, नैतादृशः कोऽपि पुरुषो यः कौटिल्यनिदेशं न पालयतीत्यर्थः । तत्तस्मादेहि आगच्छ चण्डालवेशधारिणौ भूत्वा चन्दनदासं राक्षसमित्रं वध्यस्थानं प्राणदण्डभूमिं नयावः प्रापयावः । इतीत्थमुक्त्वा निष्क्रान्तौ रङ्गशालातो निर्गतावित्यर्थः ।

तत इति । ततस्तदनन्तरं रङ्गस्थानादुभयोर्निष्क्रमणोत्तरमित्यर्थः । रज्जुर्हस्ते यस्य स रज्जुहस्तः (व्यधिकरणपदो बहुव्रीहिः) बन्धनदामकरः पुरुषश्चरः प्रविशति रङ्गस्थानान्तर्गतो भवति ।

सुहृद्रक्षणकामनया कुसुमपुराक्रमिणं राक्षसं वशीकर्तुं कौटिल्यः पुनरुपायान्तर-

---

सिद्धार्थकः—इस संसार में जीने की कामनावाला कौन सा पुरुष आर्य चाणक्य का आज्ञा के विरुद्ध कर सकता है ? इस लिये आओ हम दोनों चाण्डाल का वेश बनाकर चन्दनदास को वध्यस्थान ले चलें ।

(दोनों चले जाते हैं)

प्रवेशक ।

(हाथ में डोरी लिये हुए एक पुरुष प्रवेश करता है)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[षड्गुणसंयोगदृढा उपायपरिपाटीघटितपाशमुखी ।
चाणक्यनीतिरज्जूरिपसंयमनऋजुका जयति] ॥ ४ ॥

(परिक्रम्यावलोक्य च) एसो सो अज्जचाणक्कस्स उन्दुरएण चरेण कधिदो प्पदेसो, जहिंमए अज्जचाणक्ककाणत्तीए अमच्चरक्खसो प्पेक्खिदव्वो । (विलोक्य) कहं एसो क्खु अमच्चरक्खसो किदसीसावगुण्ठणो इदो ज्जेव आअच्छदि । ता जाव इमेहिं जिण्णुज्जाणपादवेहिं अववारिदसरीरो प्पेक्खामि, कहिं आसण-

---

मारचयति-षड्गुणेति । षट् च ते गुणाः षड्गुणाः षड्गुणैः षड्गुणानां वा संयोगो यस्याः सा षडगुणसंयोगा अत एव दृढाः (सा चासौ दृढेति विग्रहो बोध्यः) षड्गुणसंयोगदृढा, षड्गुणसंयोगेन दृढेति वा सन्ध्यादिषड्गुणसम्बन्धाऽव्यभिचारिणी । 'सन्धिर्नो विग्रहो यानमासनं द्वैधमाश्रयः' इत्यमरः । उपायानां परिपाटयुपायपरिपाटी तया घटितं पाशमेव मुखं यस्याः सा उपायपरिपाटीघटितपाशमुखी सामाद्युपायसमुदायोचितपाशरूपानना । 'सामदामदण्डभेदमित्युपायचतुष्टयमि'त्यरः । अत एव रिपुसंयमनोद्यता शत्रुबन्धनोद्यमवती चाणक्यनीतिरेव रज्जुः चाणक्यनीतिरज्जुः जयति सर्वोत्कर्षेण वर्तते (रज्जुपक्षे) षड्गुणसंयोगदृढा षड्गुणितगुण (रज्जु)संग्रथनदुश्छेद्या उपायपरिपाटीघटितपाशमुखी बहुविधनैपुण्यरचितपाशाग्रभागा रिपुसंयमनोद्यता शत्रुबन्धनानुकूला चाणक्यनीतिरिव रज्जुश्चाणक्यनीतिरज्जुः कौटिल्यनयसदृशबन्धनदाम जयति सर्वोत्कर्षेण वर्तते ।

चाणक्यनीतिरेव रज्जुः चाणक्यनीतिरिव रज्जुरित्युभयविधसमासाद्रूपकोपमयोः सङ्करः स च विशेषणद्वयस्य श्लिष्टार्थतया श्लेषाऽनुप्राणितः चाणक्यनीतेः रज्जोश्च

पुरुषः—सन्धि-विग्रह-यान-आसन-द्वैध-आश्रय रूप छः गुणों के संयोग से अत्यन्त दृढ़ तथा साम-दाम-दण्ड-भेद रूप उपायों से बने हुए पाश (बन्धन) रूप मुख वाली और शत्रु के बन्धन में उद्योगवती रज्जु (डोरी) के सदृश आर्य चाणक्य की नीति की जय हो ॥ ४ ॥

(दूसरा अर्थ यह भी है)—

छः गुणित रज्जु के संग्रथन से अत्यन्त मजबूत तथा अधिक चातुर्यसे रचित पास (बन्धन) के अग्रभागवाली, और शत्रु के बन्धन योग्य चाणक्य की नीति के सदृश बन्धनरज्जु की जय हो ॥ ४ ॥

(घूमकर और देखकर) उन्दुर नामक आर्यचाणक्य के दूत का बताया हुआ

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परिग्गहं करेदि [एष स आर्यचाणक्यस्योन्दुरकेण चरेण कथितः प्रदेशः, यत्र मयाऽऽर्यचाणक्याज्ञप्त्याऽमात्यराक्षसः प्रेक्षितव्यः । कथमेष खल्वमात्यराक्षसः कृतशीर्षावगुण्ठन इत एवागच्छति ! तद्यावदेभिर्जीर्णोद्यानपादपैरवारितशरीरः प्रेक्षे, कुत्रासनपरिग्रहं करोतीति] (इति परिक्रम्य तथा स्थितः)

(ततः प्रविशति यथानिर्दिष्टः सशस्त्रो राक्षसः)

राक्षसः—(सवाष्पम्)कष्टं भो कष्टम् !—

उत्सन्नाश्रयकातरेव कुलटा गोत्रान्तरं श्रीर्गता,

रिपु 'यमनोद्यमवत्त्वे षड्गुणसंयोगदृढत्वस्योपायपरिपाटीघटितपाशमुखत्वस्य च पदार्थस्य हेतुत्वेन पदार्थहेतुककाव्यलिङ्गसङ्कीर्णश्च । आर्याछन्दः ॥ ४ ॥

एष इति । आर्यचाणक्यस्य पूज्यकौटिल्यस्य उन्दुरकेण तन्नाम्ना चरेण दूतेन कथितोऽभिहितः एष स प्रदेशः उपवनभूमिः, यत्र प्रदेशे मयाऽऽत्मना आर्यचाणक्याज्ञया कौटिल्यादेशेन अमात्यराक्षसः प्रेक्षितव्योऽवलोकितव्यो भविष्यतीति शेषः । विलोक्य समीक्ष्य कृतं शीर्षस्यावगुण्ठनं येन स कृतशीर्षावगुण्ठनः कृतमस्तकावरणः वस्त्रावृतशिरा इत्यर्थः । कथं किम् इत एवागच्छति इहैवायाति, तत्तस्मात् यावत् यत्कालपर्यन्तम् एभिः जीर्णाश्चोद्यानपादपा जीर्णोद्यानपादपास्तैर्जीर्णोद्यानपादपैः पुरातनोपवनवृक्षैः अपवारितं शरीरं यस्य सोऽपवारितशरीरः तिरोहितकायः सन् अहमिति शेषः । प्रेक्षे पश्यामि कुत्र कस्मिन् स्थाने आसनपरिग्रहं करोति उपविशतीत्यर्थः ।

तत इति । ततः पुरुषेण राक्षसप्रवेशज्ञापनोत्तरम् निर्दिष्टमनतिक्रम्य यथानिर्दिष्टं तदस्यास्तीति यथानिर्दिष्टः (अर्शाद्यजन्तः) वस्त्रेणावृतशिरा इत्यर्थः । शस्त्रेणाऽऽयुधेन सह वर्तमानः सशस्त्रः सायुधो राक्षसो नन्दसचिवः प्रविशति रङ्गशालान्तरागच्छति ।

उत्सन्नाश्रयेति । उत्सन्नो विनष्ट आश्रयोऽवलम्बनं यस्याः सोत्सन्नाश्रया

यह वही प्रदेश है । जिस प्रदेश में आर्यचाणक्य की आज्ञा से मैं अमात्यराक्षस को देखूंगा । क्या शिर को ढक कर अमात्यराक्षस इसी तरफ आते हैं ? इस लिये तब-तक प्राचीन बगीचों के वृक्षों की झुरमुट में छिप कर देखता हूं कि ये कहां बैठते हैं । (छिप कर खड़ा हो जाता है)

(पूर्वोक्त शस्त्र के साथ राक्षस प्रवेश करता है)

राक्षसः—(आंखों में आंसू भरकर) कष्ट है ! महाकष्ट है !!—

आश्रय का विनाश होने से अत्यन्त व्याकुल राजलक्ष्मी पुंश्चली स्त्री की तरह

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तामेवानुगता गतानुगतिकास्त्यक्तानुरागाः प्रजाः ।
आप्तैरप्यनवाप्तपौरुषफलैः कार्यस्य धूरुज्झिता,
किं कुर्वन्त्वथवोत्तमाङ्गरहितैर्नागैरिव स्थीयते(१) ॥ ५ ॥

सा चासौ कातरा उत्सन्नाश्रयकातरा विनष्टावलम्बनव्याकुला श्रीः राजलक्ष्मीः कुलटा पुंश्चलीव । 'पुंश्चली धर्षिणी बन्धक्यसती कुलटेत्वरी' इत्यमरः । अन्यत् गोत्रं गोत्रान्तरम् अन्यत्कुलं गता समाश्रिता (चन्द्रगुप्तस्याऽसवर्णोत्पन्नत्वेन नन्दात्मजत्वेऽपि गोत्रान्तरत्वमवधेयम्) । 'सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः' इति स्मृत्या (असवर्णोत्पन्नस्यात्मजाऽप्रतिनिधित्वप्रतिपादनात्) त्यक्तोऽनुरागो याभिस्तास्त्यक्ताऽनुरागाः परिहृतस्वामिस्नेहाः गतानामनुगतिर्यासां ता गतानुगतिकाः पूर्वप्रस्थितानुसरणशीलाः प्रजाः प्रकृतयः तामेव गोत्रान्तराश्रितां श्रियमेवाऽनुगता अनुसृता । अनवाप्तं पौरुषफलं यैस्ते तथोक्तास्तैरनवाप्तपौरुषफलैः अप्राप्तपुरुषफलैः आप्तैः विश्वस्तैरपि जनैरिति शेषः । कार्यस्याऽभीप्सितकृत्यस्य धूर्भारः । 'धूः स्त्री स्यात् भारचिन्तयोः' इत्यमरः । उज्झिता त्यक्ता अथवा ते आप्ता किं कुर्वन्तु यतः उत्तमाङ्गरहितै शीर्षविरहितैः नागैः हस्तिभिर्वाऽहिभिरिव स्थीयते वर्त्यते तत्तुल्यशक्तिशालिभिराप्तैरिति शेषः आश्रयैकपुरुषविनाशोत्तरमन्यपुरुषमाश्रयन्ती पुंश्चलीव राजलक्ष्मीर्नन्दविनाशोत्तरमन्यमौर्यपुरुषमाश्रितवती, पूर्वप्रस्थितानुसरणशीलाः प्रजाश्चनन्दानुरागं परिहृत्य मौर्यानुरागं विदधुः आप्ताश्चास्मादृशाः प्रयत्नफलमनवाप्य कार्यसाधकसहायमुत्साहं परिजहुः, अथवा न किमपि कर्तुं शक्नुवन्तीत्यर्थः ।

यथोत्कृष्टशक्तिमन्तोऽपि हस्तिनोऽहिनो वा शक्त्याश्रयोत्तमाङ्गवैकल्यादुपेक्ष्यते तथोत्कृष्टशक्तिमन्तोऽप्याप्ता नायकवैकल्यादुपेक्षिता न किमपि कार्यं साधयितुं शक्नुवन्तीति भावः । प्रथमपादे कुलटेवेत्यत्र पूर्णोपमालङ्कारः । द्वितीयतृतीयपादस्थयोस्त्यागक्रिययोर्गतानुगतिकत्वानवाप्तपौरुषफलत्वयोर्हेतुत्वात्काव्यलिङ्गम् । चतुर्थे

अन्यगोत्र वाले पुरुष के पास चली गई, स्नेह का त्याग करने तथा पूर्वजों का अनुसरण करनेवाली प्रजा गोत्रान्तर में गई हुई राजलक्ष्मी का ही अनुगमन करती है। पुरुषार्थ का फल नहीं पाए हुए विश्वस्त पुरुषों ने कार्य का भार छोड़ दिया अथवा वे आप्त पुरुष क्या करें ? वे तो मस्तकविहीन हाथी की तरह यथावत् स्थित हैं ॥५॥

(१) स्वाम्याश्रयाभावात्स्त्रियः पुंश्चलीत्वप्राप्तिरिव श्रियोऽपि रक्षकनृपाश्रयाभावान्नृपान्तराश्रयप्राप्त्या प्रजानां प्रबलं विद्यमाननृपानुरागितया स्वस्य च नृपावलम्बासत्त्वादुत्तमाङ्गहीननागसादृश्यादाक्षसस्यानुशोचनं युक्तमेवेति भावः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अपि च—पतिं त्यक्त्वा देवं भुवनपतिमुच्चैरभिजनं
गता छिद्रेण श्रीर्वृषलमविनीतेव वृषली ।
स्थिरीभूता चास्मिन् किमिह करवाम स्थिरमपि,
प्रयत्नं नो येषां विफलयति दैवं द्विषदिव ॥ ६ ॥

उत्तमाङ्गनागपदयोः श्लिष्टत्वेन श्लेषानुप्राणिता नागैरिवेत्यत्रोपमा, एषामेकत्र सत्त्वात्संसृष्टिः । गौडी रीतिः । प्रसादो गुणः । शार्दूलविक्रीडितं वृत्तम् ॥५॥

पतिमिति । श्रीः राजलक्ष्मीः अविनीता दुश्चरिता वृषली शूद्रीव उच्चैरुन्नतोऽभिजनो वंशो यस्य स उच्चैरभिजनस्तमुच्चैरजिनम् उन्नतवंशं (अभिज्ञायतेऽस्मिन्निति विग्रहे घञर्थे कः) 'अन्ववायोऽन्वयो वंशः गोत्रश्चाभिजनः कुलम्' इत्यमरः । भुवनस्य पतिर्भुवनपतिस्तं भुवनपतिं क्षितीशं देवं नन्दं पतिं स्वामिनं त्यक्त्वा परित्यज्य छिद्रेण छलेन वृषलं चन्द्रगुप्तं गता समाश्रिता । न केवलं तमाश्रितापि तु चपला सती अस्मिन् मौर्ये स्थिरीभूता इहास्मिन् विषये किं करवाम विदधाम वयमिति शेषः, येषां नोऽस्माकं स्थिरमपि दृढमपि प्रयत्नमुद्योगं दैवं भाग्यं द्विषदिव द्वेषं कुर्वदिव विफलयति विनाशयति । यथाऽविनीता वृषली पूर्वपतिमुन्नतवंशोद्भूतं परित्यज्य व्याजेन पुरुषान्तरमकुलीनमङ्गीकरोति तथा श्रीर्नन्दनृपतिमुच्चकुलोद्भूतं पूर्वपतिमपहाय पुरुषान्तरमकुलीनं मौर्यपतिमाश्रितवती तत्र स्थैर्यञ्चाङ्गीकृतवती नात्रविषये किमपि कर्तुं शक्यतेऽस्माभिः, यतो भाग्यं शत्रुवदस्माकमुद्योगं व्यर्थयतीत्यर्थः । श्रियो नन्दपरित्यागे मौर्याश्रयणे तत्र स्थैर्ये चाऽस्मत्प्रयासवैफल्ये च भाग्यमेव हेतुर्न चाणक्य इति भावः । एकस्या एव श्रियः कर्त्र्यास्त्यागाश्रयणस्थिरीभवनरूपास्वनेकक्रियासु सम्बन्धाद्दीपकम् , अविनीतेवेत्यत्रेवशब्दसत्त्वादुपमा, श्रियश्चाचल्यात्स्थैर्यासम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः, श्रियः पूर्वपतित्यागादिष्वविनीतत्वस्य हेतुत्वात्काव्यलिङ्गञ्चेत्यलङ्कारचतुष्टयस्यैकाश्रयानुप्रवेशसङ्करः । द्विषदिवेत्यत्र चोपमा । वैदर्भीरीतिः । प्रसादो गुणः । शिखरिणी वृत्तम् ॥ ६ ॥

और भीः—हे राजलक्ष्मि ! तू दुश्चरित्र शूद्री की तरह उच्च कुल में उत्पन्न राजा नन्दरूप पति को छोड़कर छल से चन्द्रगुप्त के पास चली गई । और चन्द्रगुप्त के पास केवल चली ही नहीं गई, बल्कि हे चपले ! तू उसके पास जाकर स्थिर भी हो गई । इस विषय में हमलोग क्या करें ! क्यों कि हमलोगों के उद्योग को भाग्य शत्रु की तरह विफल करता रहता है ॥ ६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मया हि,-देवे गते दिवमतद्विधमृत्युयोग्ये,
शैलेश्वरं तमधिकृत्य कृतः प्रयत्नः ।
तस्मिन् हते तनयमस्य, तथाप्यसिद्धि-
र्दैवं हि नन्दकुलशत्रुरसौ न विप्रः ॥ ७ ॥

अहो ! विवेकशून्यता म्लेच्छस्य मलयकेतोः कुतः ?—

देवे गत इति । न तद्विधमृत्युयोग्योऽतद्विधमृत्युयोग्यस्तस्मिन्नतद्विधमृत्युयोग्ये अनार्यकौटिल्यकृतप्राणहरणानर्हे देवे राज्ञि नन्दे दिवं स्वर्गं गते प्राप्ते सति मया तं प्रसिद्धं शैलेश्वरं पर्वतेश्वरं नृपम् अधिकृत्य आश्रित्य प्रयत्नः शत्रुपराभवोद्योगः कृतो विहितः । तस्मिन् शैलेश्वरे हते विषकन्याद्वारा कौटिल्येन घातिते सति अस्य शैलेश्वरस्य तनयं पुत्रं मलयकेतुमाश्रित्य प्रयत्नः कृत इति शेषः । तथापि बहुधा प्रयासे कृतेऽपीत्यर्थः । असिद्धिः शत्रुपराभवात्मककार्यनिष्पत्तिः जातेति शेषः, अतोऽस्मात् दैवं हि भाग्यमेव नन्दकुशलत्रुः नन्दवंशविद्वेषो असावेष विप्रो ब्राह्मणः कौटिल्यो न, नन्दकुलविद्वेषीति शेषः । नन्दकुलविनाशे भाग्यस्यैव प्रावल्यं न कौटिल्यस्येत्यर्थः । (राक्षसकर्तृकविप्रोक्तिरनादरसूचिका) अत्र पद्ये वक्ष्यमाणालङ्कारत्रयसंसृष्टिः, तथा हि तुर्यपादस्य पादत्रये हेतुत्वात्काव्यलिङ्गम् । दैवमेव नन्दकुलशत्रुरित्यप्रश्नपूर्वककथितवस्तुनोऽन्यस्य कौटिल्यस्य व्यवच्छेदात्परिसंख्या । कौटिल्यस्य नन्दकुलशत्रुत्वयोगेऽप्ययोगोक्त्यातिशयोक्तिः । वैदर्भी रीतिः । प्रसादगुणः वसन्ततिलकं वृत्तम् ॥ ७ ॥

विवेकशून्यतेति । म्लेच्छस्य म्लेच्छजातीयस्य म्लेच्छकर्मणो वा मलयकेतोरित्यर्थः । विवेकेन शून्यो विवेकशून्यस्तस्य भावो विवेकशून्यता सदसद्विचारहीनता, अहो आश्चर्यम् । किं सत् किमसदित्युचितविचारो मलयकेतोर्नास्तीत्यर्थः । तदेव दर्शयति—कुत इति ।

मैंने तो—दुष्ट चाणक्य के द्वारा नहीं वध करने योग्य राजा नन्द के स्वर्ग चले जाने पर उस पर्वतेश्वर का अवलम्बन किया । चाणक्य से विषकन्या द्वारा उस के मारे जाने पर उसके पुत्र मलयकेतु का अवलम्बन करके उद्योग किया, पर तो भी कार्य सिद्ध न हुआ । इससे मैं जानता हूं कि भाग्य ही नन्दकुल का शत्रु है । वह चाणक्य ब्राह्मण नहीं ॥ ७ ॥

आश्चर्य है ! म्लेच्छजातीय मलयकेतु का भी विचार दूषित है, क्यों कि:—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यो नष्टानपि जीवनाशमधुना शुश्रूषते स्वामिन-
स्तेषां वैरिभिरक्षतः कथमसौ सन्धास्यते राक्षसः ?
इत्थं वस्तुविवेकमूढमतिना म्लेच्छेन नालोचितं,
दैवेनोपहतस्य बुद्धिरथवा पूर्वं विपर्यस्यति ॥ ८ ॥

तदिदानीमपि तावदरातिहस्तगतो विनश्येद्राक्षसो न तु चन्द्रगुप्तेन सह सन्धिं कुर्यादिति; अथवा मम काममसत्यसन्ध इति,

---

यो नष्टानिति । यो राक्षसः जीवनाशं समूलं नष्टान् नृपानपि स्वामिनो नन्दान् न शुश्रूषते सेवते, अथवा यो राक्षसो नष्टान् मृतानपि स्वामिनो नन्दान् जीवनाशं प्राणपर्यन्तं न शुश्रूषते, असावेष राक्षसो नन्दसचिवः तेषां स्वामिनां नन्दानां वैरिभिः शत्रुभिर्मौर्यादिभिः सह कथं सन्धास्यते सन्धिं करिष्यति न कथमपीत्यर्थः । इत्थमेतत् वस्तुनो यथार्थविषयस्य विवेके विचारे मूढाऽल्पा (असमीचीना) मतिर्यस्य स तथोक्तस्तेन वस्तुविवेकमूढमतिना सदसद्विचारशून्यबुद्धिना म्लेच्छेन म्लेच्छजातीयेन मलयकेतुना नालोचितं न विचारितम् , अथवा दैवेन भाग्येनोपहतस्य पराभूतस्य अदृष्टहीनस्येत्यर्थः । जनस्येति शेषः । बुद्धिर्मतिः विपर्यस्यति विपरीता भवति । विपत्प्राप्तौ सर्वेषामविवेकशालिनी बुद्धिर्भवतीति भावः । अत्र तुरीयपादप्रतिपाद्यसामान्यार्थेन नेत्थमालोचितं म्लेच्छेनेति विशेषार्थस्य समर्थनादर्थान्तरन्यासोऽलङ्कारः । प्रसादो गुणः । वैदर्भी रीतिः । शार्दू०वृत्तम् ॥८॥

तदिदानीमिति । तत्तस्मात् इदानीं साम्प्रतं (तावच्छब्दो वाक्यालङ्कारे) अरातीनां हस्तोऽरातिहस्तस्तमरातिहस्तं गतोऽरातिहस्तगतः शत्रुकरप्राप्तो राक्षसः विनश्येत् म्रियेत तु किन्तु चन्द्रगुप्तेन सह मौर्येण सार्द्धं सन्धिं स्नेहं (सम्मेलनं) न कुर्यात् न विदध्यात् , अथवा किंवा असत्या सन्धा यस्य सोऽसत्यसन्धः अतथ्यप्रतिज्ञः अपूर्णप्रतिश्रुतिरिति यावत् । अयमिति शेषः । इतीत्येवंरूपमयशोऽकीर्त्तिः

जो राक्षस परिवार के साथ मरे हुए स्वामी की अब तक सेवा कर रहा है, वह राक्षस स्वयं जीवित रह कर उनके शत्रुओं के साथ किस प्रकार मेल करेगा। विचारशून्य बुद्धिवाले म्लेच्छ जातीय (मलयकेतु) ने ऐसा नहीं सोचा (अथवा) इस में सोचना ही क्या है ? क्यों कि भाग्यहीन पुरुषों की बुद्धि पहले ही विपरीत हो जाती है ॥८॥

इस लिये अभी भी राक्षस शत्रु के वश होकर प्राणका त्याग कर देगा, पर चन्द्रगुप्त के साथ मेल न करेगा (अथवा) हमारी प्रतिज्ञा के मिथ्या होने की अपेक्षा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

-वरमयशः । न पुनः शत्रुवञ्चनपरिभूतिः (समन्तादवलोक्य सास्रम्) एतास्ता देवस्य पादक्रमणपरिचयपवित्रीकृतरथ्याः कुसुमपुरोपकण्ठभूमयः । इह हि,—

शार्ङ्गज्याकृष्टिमुक्तप्रशिथिलकविकाप्रग्रहेणात्र देशे,
देवेनाकारि चित्रं प्रजवितुरगं बाणमोक्षश्चलेषु ।
अस्यामुद्यानराजौ स्थितमिह कथितं राजभिस्तैर्विनेत्थं,
सम्प्रत्यालोक्यमानाः कुसुमपुरभुवो भूयसा दुःखयन्ति ॥९॥

मम कामं यथेच्छं वरं प्रियम् पुनर्भूयः शत्रुवञ्चनपराभूतिः रिपुप्रतारणतिरस्कारो न वरमिति शेषः । समन्तात्सर्वतोऽवलोक्य सास्रम् नेत्रजलसहितं यथा तथा ब्रवीति एतास्ताः पूर्वकालावलोकिताः देवस्य स्वामिनो नन्दस्येत्यर्थः । पादक्रमणपरिचयपवित्रीकृतरथ्याः चरणसञ्चाराभ्यासपूतप्रतोल्यः, (तलाः) कुसुमपुरोपकण्ठभूमयः कुसुमपुरसमीपप्रदेशाः दृश्यन्ते मयेति शेषः ।

शार्ङ्गज्येति । अत्र देशेऽस्मिन्भूभागे शार्ङ्गस्य ज्या शार्ङ्गज्या तस्या आकृष्टिः तया मुक्तोऽत एव प्रशिथिलः कविकाप्रग्रहो येन स तथोक्तस्तेन शार्ङ्गज्याकृष्टिमुक्तप्रशिथिलकविकाप्रहणधनुर्मौर्व्याकर्षणत्यक्तादृढवल्गाग्रहणेन देवेन नन्देन चलेषु अस्थिरेषु लक्ष्येषु शरव्येषु प्रजवितस्तुरगो यत्र तत्प्रजवितुरगं वेगवदश्वम् अत एव चित्रं यथा तथा बाणमोक्षः शरत्यागोऽकारि कृतः । अस्याममुष्यामुद्यानराजौ उपवनपंक्तौ तैः राजभिर्नृपैः सह नन्देन स्थितम् इह तैः राजभिः कथितमालपितम् सम्प्रति इदानीं तैः राजभिर्विना इत्थमेवमवलोक्यमानाः संदृश्यमानाः कुसुमपुरभुवः कुसुमपुरभूमयः भूयसा आधिक्येन दुःखयन्ति क्लेशयन्ति । यत्र प्रदेशे मृगयाञ्चिकीर्षुर्नन्दो लक्ष्येषु शरान्विचिक्षेप । यत्र च प्रदेशे भागधेयं प्रदातुमागतैर्नृपैः सहोपविष्टवान् आलपितवांश्च तस्य प्रदेशस्य सम्प्रत्येकाकिनाऽवलोकनात्क्लेशा-

---

अपयश होना अच्छा है, पर शत्रु द्वारा वञ्चनारूप तिरस्कार होना अच्छा नहीं है । (चारों तरफ देख और आंखों में आंसू भरकर) राजानन्द के चलने से पवित्र मार्ग वाली कुसुमपुर के समीप की यह वही भूमि है !

इस प्रदेश में धनुषकी डोरी को खींचने के कारण छूटे अत एव शिथिल बागडोर पकड़े हुए नन्द राजाने घोड़े को तेज कर चलायमान मृगादिरूप लक्ष्यों में विचित्ररूप से बाण को फेंकाथा और इस उद्यान की पंक्ति में उन राजाओं के साथ बैठकर वार्तालाप कियाथा । इस समय कुसुमपुर के वही प्रदेश मुझे विशेष दुःख देरहें हैं ॥९॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत् क्व खलु गच्छामि मन्दभाग्यः ?. (विलोक्य) भवतु दृष्टमेतज्जीर्णोद्यानम् , अत्र प्रविश्य कुतश्चिच्चन्दनदासस्य वृत्तान्तमुपलप्स्ये (परिक्रम्य स्वगतम्) अहो !! अलक्षितोपनिपाताः पुरुषाणां समविषमदशाविभागपरिणतयो भवन्ति । कुतः ?—

पौरैरङ्गुलिभिर्नवेन्दुवदहं निर्दिश्यमानः, शनैः,

धिक्यमुपजायत इत्यर्थः । अत्र सूक्ष्मवस्तुस्वभावस्य यथावद्वर्णनात् स्वभावोक्तिरलङ्कारः । एकस्यैव नन्दरूपकर्तृकारकस्य करणोपवेशनकथनक्रियासु सम्बन्धाद्दीपकालङ्कारः । नन्दं विना कुसुमपुरभूप्रदेशानामशोभनत्वाद्विनोक्तिरलङ्कारश्चेत्येषां संसृष्टिः।

तेषां लक्षणान्यलङ्कारसर्वस्वोक्तानि यथा—(सूक्ष्मवस्तुस्वभावयथावद्वर्णनं स्वभावोक्तिः । प्रस्तुताप्रस्तुतानां तु दीपकम्) अलङ्कारसर्वस्वनाम्नि ग्रन्थे दीपकालङ्कारलक्षणमिदमेवास्ति तस्याऽत्रासंघटनं नाशङ्कनीयं तत्रैव तद्भेदस्याप्युक्तत्वात् । (विना कश्चिदन्यस्य सदसत्त्वाभावो विनोक्तिः) सदसत्त्वाभाव इत्यस्य शोभनत्वाऽभावोऽशोभनत्वाऽभावश्चेत्यर्थः । गौडी रीतिः । ओजो गुणः । वृत्तञ्चात्र स्रग्धरा नाम ॥ ९ ॥

तदिति । तत्तस्मात् मन्दभाग्योऽदृष्टहीनः अहमिति शेषः । क्व खलु गच्छामि कुत्र स्थाने यामि, विलोक्य निरीक्ष्य भवतु अस्तु एतत् इदं जीर्णोद्यानं दृष्टमवलोकितम् अत्रास्मिन् जीर्णोद्याने प्रविश्यान्तरेत्य कुतश्चित् कस्मादपि स्थानात् जनाद्वा चन्दनदासस्य प्रियसुहृदो वृत्तान्तमुदन्तमुपलप्स्ये ज्ञास्यामि परिक्रम्य सञ्चर्य स्वगतं सर्वैरश्राव्यं यथा तथा ब्रवीतीत्यर्थः । किन्तदाह—अलक्षितेति । पुरुषाणां लोकानां समाश्च विषमाश्चेति इतरेतरद्वन्द्वः । समविषमास्ताश्च ता दशाः समविषमदशास्तासां विभागाः समविषमदशाविभागास्तेषां परिणतयः समविषमदशाविभागपरिणतयः तुल्यातुल्यावस्थापार्थक्यपरिणामाः अलक्षित उपनिपातो यासां ता अलक्षितोपनिपाताः अतर्किततागमाः भवन्ति जायन्ते । कदा कीदृश्यो भवन्ति पुरुषाऽवस्था इति न केऽपि जानन्तीत्यर्थः । तदेव दर्शयति—कुत इति ।

पौरैरिति । योऽहं पौरैः पुरवासिभिः अङ्गुलिभिः करशाखासंकेतेनेत्यर्थः ।

मैं अभागा कहाँ जाऊँ ? (देखकर) अओ इस प्राचीन पुष्पवाटिका में प्रवेश कर किसीतरह चन्दनदासका समाचार जानू । (घूम कर मन ही मन) आश्चर्य !! लोगों की सम-विषम अवस्था के विभागका परिमाण भी अविचारणीय होता है ।

क्योंकिः—एकदिन मैं पुरवासियों से अङ्गुलिसंकेत द्वारा नवीन चन्द्रमा की तरह

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यो राजेव पुरा पुरान्निरगमं राज्ञां सहस्रैर्वृतः ।
भूयः सम्प्रति सोऽहमेव नगरे तत्रैव वन्ध्यश्रमो,
जीर्णोद्यानकमेष तस्कर इव त्रासाद् विशामि द्रुतम् ॥ १० ॥

अथवा, येषां प्रसादादिदमासीत् ते एव न सन्ति (नाट्येन प्रविश्य विलोक्य च) अहो ! जीर्णोद्यानस्य नाभिरमणीयता । अत्र हि,—

शनैर्मन्दं यथा तथा नवेन्दुना तुल्यं नवेन्दुवत् नवोदितचन्द्र इव निर्दिश्यमानः प्रदर्श्यमानः राजा इव नृपतिरिव राज्ञां सहस्रैर्नृपसमूहैर्वृतः परिवेष्टितः सन् पुरा पूर्वं नन्दजीवनकाले इत्यर्थः । पुरात् कुसुमपुरनगरात् निरगमम् निर्गतवान् । स एषोऽहं सम्प्रति इदानीं वन्ध्यो विफलः श्रमः प्रयासो यस्य स वन्ध्यश्रमो विफलनन्दोद्धरणप्रयासः सन् भूयः पुनः तत्रैव नगरे कुसुमपुरे तस्कर इव दस्युरिव । "चौरैकागारिकस्तेन दस्युतस्करमोषकाः" इत्यमरः । ('तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्चे'ति निपातनात् तस्करपदसिद्धिः) त्रासाद्भयात् जीर्णोद्यानकं पुरातनाल्पोपवनं द्रुतं शीघ्रं विशामि प्रविशामि तदन्तर्गतो भवामीत्यर्थः यस्य मे पुरा नृपस्येव सत्कारस्तस्य मे साम्प्रतं दस्योरिवोपवनप्रवेश इत्यहो मेऽदृष्टपरिवृत्तिरिति भावः । नवेन्दुवदित्यत्र सादृश्यार्थकवच्छब्दस्य राजेवेत्यत्र सादृश्यार्थकेवशब्दस्य तस्कर इवेत्यत्र च सादृश्यार्थकेवशब्दस्य सत्त्वादुपमात्रयम् । एकस्मिन्नाधारे राक्षसात्मके क्रमेण समविषमदशात्मकाधेयद्वयवर्तनाद्द्वितीयः पर्यायालङ्कारभेदः । तदुक्तमलङ्कारसर्वस्वे—

एकस्मिन्नाधारेऽनेकमाधेयं यत्स द्वितीयः पर्याय इति । शार्दूल० वृत्तम् ॥ १० ॥

अथवेति । अथवा किंवा येषां नन्दानां प्रसादादनुग्रहात् इदमनुभूयमानं सुखमित्यर्थः । आसीत् अभूत् ते एव नन्दा इत्यर्थः । न सन्ति न विद्यन्ते । नाट्येन नटव्यापारेण प्रविश्यान्तरेत्य विलोक्य निरीक्ष्य च, प्रतीतीति क्रियाशेषः । अहो आश्चर्यम् जीर्णोद्यानस्य पुरातनोपवनस्य नाऽभिरमणीयता अचारुत्वम् ।

दिखाया जाता था और अनेक राजाओं के साथ राजा की तरह पहले कुसुमपुर से गया था । वही मैं इस समय निष्फल उद्योग होकर फिर उसी नगर में चोर की तरह भय से प्राचीन वाटिका में शीघ्र प्रवेश करता हूँ ॥ १० ॥

अथवा जिनकी कृपा से यह सब होता था, वे ही नहीं है (विचित्र ढङ्गसे प्रवेश कर और देखकर) अहो ! अब इस प्रचीन वाटिका की वह सुन्दरता भी नहीं है । यहाँ पर:—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विपर्यस्तं सौधं कुलमिव महारम्भ रचनं,
सरः शुष्कं साधोर्हृदयमिव नाशेन सुहृदः ।
फलैर्हीना वृक्षा विगुणविधियोगादिव नयाः,
तृणैश्छन्ना भूमिर्मतिरिव कुनीत्या ह्यविदुषः ॥ ११ ॥

अपि च अत्र,—

क्षताङ्गानां तीक्ष्णैः परशुभिरुदग्रैः क्षितिरुहां,

विपर्यस्तमिति । महांश्चासावारम्भो महारम्भस्तेन रचना यस्य तन्महारम्भरचनं, यद्वा महानारम्भो यस्याः सा महारम्भा महारम्भा रचना यस्य तन्महारम्भरचनं प्रचुरोद्योगरचितं सौधं हर्म्यं कुलमिव वंश इव विपर्यस्तं नष्टं, सरो जलाशयः, सुहृदो मित्रस्य विनाशेन वियोगेन साधोर्महात्मनो हृदयं चित्तमिव शुष्कं नीरसं जातम् ('शुषः कः' इति निष्ठातस्य के रूपम्) । वृक्षास्तरवः विगुणश्चासौ विधिर्विगुणविधिस्तस्य योगस्तस्मात् विगुणविधियोगात् प्रतिकूलदैववशात् नया नीतय इव फलैः शस्यैर्लाभैश्च हीना असम्बद्धाः भूमिः कुसुमपुरभूप्रदेशः अविदुषोऽज्ञस्य मतिर्बुद्धिः कुनीत्या दुर्नयेनेव तृणैः शष्पैः छन्ना आवृता दृश्यते इति शेषः। भागुरायणप्रभृत्यसदुपदेशद्वाराऽनोतिविन्मलयकेतुबुद्धेरविवेकितालाभ इति भावः । पुरातनोपवनप्रशंसाद्वारा सौधकुलादीनामुपमया नन्दवंशक्षयः, तेन निजचित्तदैन्यं मलयकेतुसम्पर्कादात्मनीत्यसाफल्यम्, भागुरायणासन्नीतेर्मलयकेतुमतिमोहकतेति च ध्वनिः। अत्र श्रौतीपूर्णोपमाचतुष्टयम् । मालोपमा वा । वैदर्भी रीतिः । प्रसादगुणः । शिखरिणी वृत्तम् ॥ ११ ॥

क्षताङ्गानामिति । तीक्ष्णैर्निशितैः उदग्रैरुन्नताग्रभागैः परानन्यान् शृणन्ति हिंसन्तीति परशवस्तैः परशुभिः परश्वधैः 'शृगातेर्डुः' इति डुप्रत्यये परशुशब्दसिद्धिः 'द्वयोः कुठारः स्वधितिः परशुश्च परश्वधः' इति चामरः । क्षतान्यङ्गानि येषां ते तथोक्तास्तेषां क्षताङ्गानां छिन्नावयवानाम् रुजा पीडया अविरतान्यविच्छिन्नानि कपोतानामुपरुदितानि तैरविरतकपोतोपरुदितैः अविच्छिन्नपारावत-

---

अधिक परिश्रमसे बनाया गया राजभवन, वंश की तरह नष्ट हो गया, सरोवर मित्रके वियोग से महात्मा के हृदय की तरह सूख गया, वृक्ष प्रतिकूल भाग्य के कारण नीति की तरह फलों से हीन हो गये और कुसुमपुरकी भूमि नीति के द्वारा मूर्ख लोगों की बुद्धि की तरह तृणों से आच्छादित हो गई ॥ ११ ॥ और यहां—

तीखे धारवाले कुठारों से काटे गये, अत एव पीडित कपालों के शब्दों द्वारा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रुजा कूजन्तीनामविरतकपोतोपरुदितैः ।
स्वनिर्मोकच्छेदैः परिचितपरिक्लेशकृपया,
श्वसन्तः शाखानां व्रणमिव निबध्नन्ति फणिनः ॥ १२ ॥

एते च तपस्विनः,—

अन्तःशरीरपरिशोषमुपाश्रयन्तः,
कीटक्षतिस्रुतिभिरस्रमिवोद्वमन्तः ।

कूजितैः कपोतकूजितव्याजेनेत्यर्थः । 'पारावतः कलरवः कपोतः' इत्यमरः । कूजन्तीनां शब्दं कुर्वन्तीनामिवेति गम्योत्प्रेक्षणम् । क्षितिरुहां तरूणां शाखानां विटपानां व्रणं क्षतं फणिनः सर्पाः परिचितानां सहवासिनां परिक्लेशः परिचितपरिक्लेशस्तेन तद्दर्शनेनेत्यर्थः । या कृपा तया परिचितक्लेशकृपया सहवासिदुःखदर्शनजन्याऽनुकम्पया श्वसन्तो दीर्घनिःश्वासं त्यजन्तः सन्तः स्वेषां निर्मोकाः स्वनिर्मोकास्तेषां छेदानि तैः स्वनिर्मोकच्छेदैः निजकञ्चुकात्मवस्त्रखण्डैः निबध्नन्तीव दृश्यन्ते वर्त्तन्ते इवेत्यन्तरक्रियाशेषो बोध्यः । यथा दयावन्तः सहवासिक्षतदुःखदर्शनाद्वस्त्रेणाच्छादयन्ति फणिनोऽपि शाखानां छेदनजन्यक्लेशावलोकनात्तद्व्रणमात्मकञ्चुकरूपवस्त्रेणाच्छादयन्तीवेत्यर्थः । रुजा कूजन्तीनामित्यत्र कूजन्तीनामिवेत्यर्थाद्गम्योत्प्रेक्षा, अविरतकपोतोपरुदितैरित्यत्र निरतकपोतरुदितव्याजेनेत्यर्थादपह्नुतिः, परिचितपरिक्लेशकृपयेत्यत्र परिचितपरिक्लेशकृपयेवेति हेतुत्वेनोत्प्रेक्षणाद्धेतूत्प्रेक्षा व्रणमिवेत्यत्रोत्प्रेक्षेत्येषां संसृष्टिः । चिन्ताव्यग्रमानसो राक्षसः कस्यचिदतिस्निग्धसुहृदः समवेदनमर्थयते इति वस्तु व्यज्यते ।

प्रसादाख्यगुणेनाऽपि गौडीरीत्या समन्वितम् ।
शिखरिणीनामवृत्तेन पद्यमेतद्विनिर्मितम् ॥ १२ ॥

अन्तःशरीरेति । अन्तःशरीरस्य परिशोषोऽन्तःशरीरपरिशोषस्तमन्तःशरीरपरिशोषं शरीराऽभ्यन्तरशोषणमुपाश्रयन्तः प्राप्नुवन्तः कीटानां क्षतयः कीटक्षतयस्ताभ्यः स्रुतयः कीटक्षतिस्रुतयस्ताभिः कीटक्षतिस्रुतिभिः कीटत्वक्छिद्ररसरक्षणैः अस्रं नेत्रजलम् उद्वमन्त इव मुञ्चन्त इव ।

रोती हुई की तरह वृक्षों की शाखाओं के व्रण को सहवासी के दुःख देखने से कृपालु और दीर्घ निःश्वास लेते हुये सर्प अपने २ कञ्चुकरूपी वस्त्रों के टुकड़ों से ढँकते हुये की तरह दीख पड़ते हैं ॥ १२ ॥

ये वृक्ष अन्दर से सूखे तथा कीड़ों के काटने से निकले रसों की द्वारा रोते हुये

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

छायावियोगमलिना व्यसने निमग्ना,
वृक्षाः श्मशानमुपगन्तुमिव प्रवृत्ताः ॥ १३ ॥

यावदस्मिन् विषमदशापरिणामसुलभे भग्नाग्रशिलातले मुहूर्त्तमुपविशामि (उपविश्याकर्ण्य च) अये! किमयमाकस्मिकः शङ्खपटहविमिश्रो नान्दीनादः श्रूयते? य एषः,—

निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयम्। अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते॥

इति दण्ड्युक्त्या प्रकृते उद्वमतेर्गौणार्थत्वान्न ग्राम्यत्वदोषः। छायया अनातपस्य वियोगोऽभावस्तेन मलिना विहतकान्तयः पत्राभावाच्छायाविरहेणाशोभमाना इत्यर्थः। व्यसने दुःखे निमग्नाः पतिताः एते पुरोविद्यमाना इत्यर्थः। तपस्विनस्तपश्चरणशीलाः दीना इति यावत् (एते तपस्विन इति गद्यस्थस्य सम्बन्धः) वृक्षास्तरवः श्मशानं पितृवनमुपगन्तुमाश्रयितुं प्रवृत्ता उद्युक्ता इव दृश्यन्ते इति शेषः। परलोकवर्तिनन्दप्रभुविरहासहनशीलास्तरवस्तमनुगन्तुं कृतप्रयासा इव बुध्यन्ते इति भावः। द्वितीयचतुर्थपादयोरुत्प्रेक्षणार्थकेवशब्दसत्त्वादुत्प्रेक्षाद्वयम्। एतेनोत्प्रेक्षालङ्कारेण मित्रवियोगजदुःखभाजिनां लोकानां मरणव्यवसायाचरणात्मकव्यवहारोत्थापनात्समासोक्त्यलङ्कारोऽभिव्यज्यते। पाञ्चाली रीतिः, प्रसादो गुणः। वसन्ततिलकं वृत्तम् ॥ १३ ॥

यावदिति। यावत् यत्कालपर्यन्तम् अस्मिन् पुरो दृश्यमाने विषमा चासौ दशा विषमदशा तस्याः परिणामः स इव सुलभः तस्मिन् विषमदशापरिणामसुलभे कठिनदुरवस्थावशिष्टभागसुकरे (साम्प्रतं यथा कठिनदुरवस्था मयाऽधिगता तथेदं शिलातलमपीति भावः)।

भग्नमग्रं यस्य तद्भग्नाग्रं तच्च तच्छिलातलं तस्मिन् भग्नाग्रशिलातले नष्टाग्रभागप्रस्तरखण्डे मुहूर्त्तमल्पक्षणम् उपविशामि आसनपरिग्रहणं करोमि। उपविश्य आसनपरिग्रहणं विधाय आकर्ण्य श्रुत्वा च। अये कोमलालापेऽव्ययम्, किं किमर्थं कुतो वा अयमेषः आकस्मिकोऽकस्मादुत्पन्नः शङ्खपटहविमिश्रः कम्बुग्रीवपटहवा-

---

की तरह देखे जाते हैं। छाया के वियोग से कान्तिहीन (तथा) दुःख में डूबे हुये ये तपस्वी वृक्ष श्मशानभूमिको जाने के लिये उद्यत की तरह दीख पड़ते हैं ॥ १३ ॥

मैं तबतक कठिन दुरवस्थापन्न इस टूटे शिलाखण्डपर क्षणमात्र बैठता हूँ। (बैठकर और सुन कर)। ऐं क्या यह शङ्ख और नगाड़े के शब्दों से मिला नान्दी का शब्द सुनाई देता है। यह—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रकुर्वन् श्रोतॄणां श्रुतिपथमसारं गुरुतया,
बहुत्वात् प्रासादः सपदि परिपीतोज्झित इव ।
असौ नान्दीनादः पटुपटहशङ्खध्वनिमहान्,
दिशां दैर्घ्यं द्रष्टुं प्रसरति सकौतूहल इव ॥ १४ ॥

(विचिन्त्य) आं, ज्ञातम्, एष हि मलयकेतुसंयमनसञ्जातो राजकुलस्य (इत्यर्द्धोक्ते सासूयम्) मौर्यकुलस्याऽधिकपरितोषं पिशुनयति (सवाष्पम्) कष्टं भोः कष्टम् !!—

ध्वशब्दमिलितः (संसृष्टः) नान्दीनादः स्तुतिपाठध्वनिः श्रूयते आकर्ण्यते ।

प्रकुर्व्वन्निति । गुरोर्भावो गुरुता तया गुरुतया महत्तया श्रोतॄणां आकर्णयितॄणां श्रुतिपथं श्रोत्रम् नास्ति सारो यस्य तदसारं प्रभूतशब्दग्रहणशक्तिहीनम् यद्वा असारमप्रसारं शङ्कुचितमित्यर्थः । कुर्वन् विदधत्, बहुत्वाद्बाहुल्याद्धेतोःप्रासादैर्हर्म्यैः सपदि शीघ्रं परिपीतोज्झित इव पूर्वं परिपीतः पश्चादुज्झित इव उद्वान्त इव पटहशङ्खध्वनयस्तैर्महान् पटुपटहशङ्खध्वनिमहान् बृहद्ढक्काशङ्खनादप्रवृद्धः असावेष नान्दीनादो मङ्गलतूर्यध्वनिः सकौतूहलः कौतुकवानिव दिशामाशानां दैर्घ्यं विस्तृतिं द्रष्टुमवलोकितुं प्रसरति सर्वतो गच्छति । यथा कौतुकवान् पुरुषः स्वेष्टकार्यसम्पादनाय सर्वतो गच्छति तथा नान्दीनादोऽपीति भावः । अत्रोत्प्रेक्षालङ्कारः । परिपीतोज्झित इव सकौतूहल इवेति चोत्प्रेक्षाद्वयम् वैदर्भी रीतिः । प्रसादो गुणः शिखरिणीवृत्तम् ॥ १४ ॥

विचिन्त्येति । विचिन्त्य विचार्य केन कस्मात् क कुतोऽयं नान्दीनादः इति सम्यगालोच्येत्यर्थः । आमिति स्मरणार्थकमव्ययत्वम्, ज्ञातम् अवगतम् । मलयकेतोः संयमनं मलयकेतुसंयमनं तस्मात्सञ्जातो मलयकेतुसंयमनसञ्जातः पर्वतकपुत्रबन्धनोत्पन्न एषोऽसौनान्दीनोदः राजकुलस्य नृपवंशस्य, इत्यर्द्धोक्ते इति

गुरुता के कारण सुननेवालों के कानों को संकुचित करती तथा विशेषता के कारण राजभवनों द्वारा पी जाकर बाहर निकाली हुई की तरह स्थित तथा बड़े नगाड़ों और शङ्खों के शब्दों से मिली हुई नान्दीपाठकी ध्वनि उत्कण्ठित पुरुष की तरह दिशाओं की विस्तृतिको देखने के लिये आगे बढ़रही है ॥ १४ ॥

(विचार कर) हाँ जाना, यह मलयकेतु के पकड़ेजाने से राजाओं का कोलाहल शब्द है ! (आधा वाक्य कहकर द्वेष से) यह तो चन्द्रगुप्त के विशेष आनन्द को सूचित करता है। (आंखों में आंसु भर कर) कष्ट है ! महाकष्ट है !!

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रावितोऽस्मि श्रियं शत्रोरभिनीय स दर्शितः।
अनुभावयितुं मन्ये, यत्नः सम्प्रति मां विधेः॥ १५॥

पुरुषः—आसीणो अअं। ता जाव अज्जचाणक्कस्स आणत्तिं संपादेमि [आसीनोऽयम्। तद्यावदार्यचाणक्यस्याज्ञप्तिं सम्पादयामि] (राक्षसमपश्यन्निव तस्याग्रतो रज्जुपाशेन कण्ठमुद्बध्नाति)

राक्षसः—(विलोक्य स्वगतम्) अये कथमयमात्मानमुद्बध्नाति !!!

वाक्यार्द्धमभिधाय सासूयम् मुरापुत्रे चन्द्रगुप्ते राजशब्दप्रयोगमभिधानमसूया द्वेषस्तेन सहितं यथा तथा ब्रवीतीत्यर्थः। मौर्यकुलस्य चन्द्रगुप्तवंशस्य अधिकपरितोषं प्रभूतानन्दं पिशुनयति सूचयति।

श्रावित इति। शत्रोः रिपोर्मौर्यस्य श्रियं सम्पत्तिं श्रावितः आकर्णितोऽस्मि अभिनीय समीपमानीय दर्शितः साक्षात्कारितश्चास्मि विधिनेति शेषः। सम्प्रति अधुना माम् अनुभावयितुं प्रापयितुं शत्रुसम्पत्तिमिति शेषः। विधेर्दैवस्य यत्नः प्रयासः इति मन्ये उत्प्रेक्षे सम्भावयामीति यावत्। अहमिति कर्तृपदशेषः। अत्र मन्येशब्दप्रयोगनिबन्धनोत्प्रेक्षाऽलंकारः। तदुक्तं दर्पणे—

मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादयः। उत्प्रेक्षासूचकाः शब्दा इत्यादि॥
निबद्धमेतत्पद्यमनुष्टुप्छन्दसा॥ १५॥

आसीन इति। अयमेष राक्षस इत्यर्थः आसीन उपविष्टः तत्तस्मात् यावत् यत्कालपर्यन्तम् आर्यश्चासौ चाणक्य आर्यचाणक्यस्तस्यादेशस्तमार्यचाणक्यादेशं पूज्यकौटिल्याज्ञप्तिं सम्पादयामि करोमि। **राक्षसमिति।** राक्षसं नन्दसचिवमपश्यन्ननवलोकयन्निव तस्य राक्षसस्याग्रतः पुरतो रज्जुपाशेन बन्धनदाम्ना कण्ठं गलमुद्बध्नाति संयच्छति।

विलोक्येति। विलोक्य निरीक्ष्य पुरुषमिति शेषः। स्वगतम् अन्यैरश्राव्यं यथा तथा ब्रवीति। अये कारुण्याऽऽविष्कारे सम्बोधनम्, अयमेष पुरुषः कथं

भाग्य ने शत्रु (चन्द्रगुप्त) की सम्पत्ति का उत्कर्ष सुनाया और समीप लाकर दिखाया। अब अनुभवकराने के लिये भाग्य का उद्योग है, ऐसा मैं जानता हूँ १५

पुरुषः—यह बैठे हैं, इसलिये जबतक आर्यचाणक्य की आज्ञा का सम्पादन करता हूं। (राक्षस को नहीं देखते हुए की तरह उपवन के आगे रज्जुपाश से कण्ठ को बांधता है)।

राक्षसः—(देखकर मनही मन) ऐं! यह पुरुष किस कारण अपने आप को बांध

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नन्वयमहमिव दुःखितस्तपस्वी । भवतु, पृच्छाम्येनम् (उपसृत्य प्राकाशम्) भद्र भद्र !! किमिदमनुष्ठीयेते ?

पुरुषः—(सवाष्पम्) अज्ज ! जं प्पिअवअस्सविनासदुःखिदो अह्मादिसो मन्दभाओ जणो अणुचिट्ठदि [आर्य ! यत् प्रियवयस्यविनाशदुःखितोऽस्मादृशो मन्दभाग्योजनोऽनुतिष्ठति]

राक्षसः—(स्वगतम्) प्रथममेव मया ज्ञातं, नूनमहमिवाऽयमार्त्तस्तपस्वीति । भवतु, पृच्छाम्येनम् (प्रकाशम्) भद्र ! व्यसनसब्रह्मचा-

---

कस्मात्कारणात् आत्मानं स्वमुद्बध्नाति संयच्छति नूनं निश्चितम् अयमेषः अहमिव दुःखितः आर्त्तः । भवतु, एनं पुरुषं पृच्छामि, उपसृत्य समीपमेत्य प्रकाशं सुस्पष्टं ब्रवीतीति शेषः । भद्र भद्रेति वीप्सायां शैघ्र्ये वा द्विरुक्तिः, साधो ! किं प्रश्नार्थकोऽत्र किंशब्दः इदं किम् कार्यमिति शेषः। अनुष्ठीयते विधीयते त्वयेति शेषः ।

आर्येति । आर्य पूज्य । प्रियवयस्यविनाशदुःखितः अतिस्निग्धमित्रविरहार्त्तोऽस्मादृशो मत्सदृशो मन्दभाग्यो भाग्यहीनो जनो लोको यत् यत्कार्यमनुतिष्ठति करोति तदेव कार्यं मयाऽनुष्ठीयते इत्युत्तराभिप्रायः ।

प्रथममेवेति । प्रथमं पूर्वमेव मया ज्ञातमवगतम् अयमेष तपस्वी दीनो नूनं निश्चितम् अहमिव मादृश इवाऽऽर्त्तः शोकव्याकुलमानस इति प्रथममेव ज्ञातमित्यन्वयः, भवतु एनं पृच्छामि, प्रकाशं सर्वश्राव्यं वचो ब्रवीतीत्यर्थः। भद्र साधो! ब्रह्म वेदस्तदध्ययनार्थं व्रतमपि ब्रह्म तच्चरतीति ब्रह्मचारी समानो ब्रह्मचारी सब्रह्मचारी सहाध्यायी व्यसनेन सब्रह्मचारी व्यसनसब्रह्मचारी तत्सम्बुद्धौ हेव्यसनसब्रह्मचारिन् समानव्यसन ! यदि चेत् न गुह्यं न रहस्यम् अतिभारोऽस्यास्तीति विग्रहे 'अत इनि ठनावि' ति सूत्रेण ठनि तस्येकि आतिभारिकम् अथवा अतिभाराय

रहा है । यह तपस्वी अवश्य हमारे ही जैसा दुःखित है । तबतक इससे पूछता हूं । (समीप जाकर जोर से) भद्र ! आप यह क्या करते हैं ?

पुरुषः—(आंखों में आंसू भरकर) आर्य ! प्रियमित्र के विनाश से दुःखित हमारे जैसा भाग्यहीन पुरुष जो करता है ।

राक्षसः—(मनही मन) मैंने पहले ही समझ लिया था कि यह तपस्वी हमारे ही जैसा दुःखित है । तबतक इसे पूछता हूं । (जोर से) भद्र ! मेरे दुःखके साथी ! यदि यह समचार गोपनीय न हो अथवा कोई बड़ी बात न हो तो मैं सुनना चाहता हूं । आखिर आपके प्राणत्याग का कारण क्या है ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रिन् ! यदि न गुह्यं, नातिभारिकं वा ततः श्रोतुमिच्छामि किं ते प्राणपरित्यागकारणम् ।

पुरुषः—(निरूप्य) अज्ज ! ण रहस्सं, ण वा अतिगुरुअं, किन्तु ण सक्कणोमि पिअवअस्सविणासदुक्खिदहिअओ एत्ति अमत्तम्पि मरणस्स कालहरणं कादुं । [आर्य ! न रहस्यं, न वाऽतिगुरुकं, किन्तु न शक्नोमि प्रियवयस्यविनाशदुःखितहृदय एतावन्मात्रमपि मरणस्य कालहरणं कर्त्तुम्]

राक्षसः—(निःश्वस्याऽऽत्मगतम्) कष्टमेतेषु सुहृद्व्यसनेषु परवदुदासीनाः प्रत्यादिश्यामहे वयमनेन (प्रकाशम्) भद्र ! यदि न रहस्यं, नाऽतिगुरुकं वा, तत् पुनः श्रोतुमिच्छामि, कथ्यतां का गतिः दुःखस्येति ?

ह्तिम् आतिभारिकम् नातिभारिकम् अगुरुकंवेत्यर्थः, ततस्तदा श्रोतुमाकर्णितुमिच्छामि अभिलषामि, ते तव प्राणपरित्यागकारणम् आत्मविनाशहेतुः किम् अस्तीति शेषः ।

निरूप्येति । निरूप्य सम्यगालोच्य, आर्य पूज्य ! न रहस्यं न गोप्यं नवाऽतिगुरुकम् नातिभारिकम् किन्तु तथापीत्यर्थः, प्रियश्चासौ वयस्यस्तस्य विनाशस्तेन दुःखितं हृदयं यस्य स प्रियवयस्यविनाशदुःखितहृदयः स्निग्धमित्रवियोगार्त्तमानसः अहमिति शेषः । एतावन्मात्रमपि अल्पक्षणमपि मरणस्य प्राणत्यागस्य कालहरणं समययापनं कर्त्तुं विधातुं न शक्नोमि न समर्थः ।

कष्टमिति । एतेषु सुहृद्व्यसनेषु चन्दनदासविपत्सु परेण तुल्यं परवत् अन्यवत् उदासीनाः अकृतोद्योगा वयम् अनेन अमुना करधृतपाशेन पुरुषेण प्रत्यादिश्यामहे तिरस्क्रियामहे, अनेनैव पथा त्वयापि गन्तव्यमित्युपदिश्यामहे वा । यदि न रहस्यं न चेद्गोप्यं नातिगुरुकं नातिविस्तृतं तत् तदा पुनर्भूयः श्रोतुमिच्छामि आकर्णितुम-

---

पुरुषः—(देखकर) आर्य ! यह समाचार न तो अप्रकाश्य है और न अतिविस्तृत है, तो भी प्रियमित्र के विनाश से दुःखित हृदयवाला मैं इतनी देरतक भी मरण के समय को निष्फल नहीं जाने दे सकता ।

राक्षसः—(निःश्वास लेकर मन ही मन) कष्ट है ! यह मित्रविपत्ति से दुःखी अन्य पुरुष हम उद्योग हीन लोगों का तिरस्कार करता है । (जोर से) भद्र ! यदि यह समाचार गोप्य न हो अथवा अतिविस्तृत न हो तो हमसे कहो यह बताओ कि उस दुःख से छूटने का क्या उपाय है ?

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुरुषः—अहो !! णिवन्धो अज्जस्स, का गदी एसो णिवेदेमि, अत्थि एत्थ णअरे मणिआरसेट्ठी जिण्णुदासो णाम [अहो !! निर्वन्ध आर्यस्य, का गतिरेष निवेदयामि, अस्त्यत्र नगरे मणिकारश्रेष्ठी जिष्णुदासो नाम]

राक्षसः—(स्वगतम्) अस्ति जिष्णुदासश्चन्दनदासस्य परं मित्रम्। (प्रकाशम्) किं तस्य ?

पुरुषः—सो मम पिअवअस्सो [स मम प्रियवयस्यः]

राक्षसः—(सहर्षमात्मगतम्) अये ! प्रियवयस्य इत्याह । अत्यन्त सन्निकृष्टः सम्बन्धः । हन्त !!! ज्ञास्यति चन्दनदासस्य वृत्तान्तम् । (प्रकाशम्) भद्र ! किं तस्य ?

पुरुषः—(सबाष्पम्) संपदं सो दीणअणदिण्णविहवो ज्वलणं एपविसिदुकामो णअरादो णिक्कन्तो । ता अहं पि जाव तस्स पिप

भिलषामि दुःखस्य व्यसनस्य का गतिः किं कारणम् इति कथ्यतामभिधीयताम् ।

निर्वन्ध इति । अहो आश्चर्यम् आर्यस्य पूज्यस्य भवतः निर्वन्ध आग्रहातिशयः, का गतिः क उपायः एषोऽहं निवेदयामि कथयामि, अत्र नगरे अस्मिन् कुसुमपुरे मणिकारश्रेष्ठी वैश्यजातीयो जिष्णुदासो नाम अस्ति ।

सहर्षमिति । सहर्षं सानन्दं यथा तथा आत्मगतमनतिस्पष्टं ब्रवीति । प्रियवयस्य स्निग्धमित्रमित्याह ब्रवीति । अत्यन्तसन्निकृष्टः सम्बन्धः एतयोरनतिदूरवर्तिन्यपेक्षा । हन्त हर्षे चन्दनदासस्य वृत्तान्तं प्रियमित्रोदन्तं ज्ञास्यति अवगमिष्यति एव राक्षस इति शेषः ।

सबाष्पमिति । सबाष्पं साश्रुनेत्रं यथा तथा ब्रवीति । साम्प्रतमिदानीं

पुरुषः—आश्चर्य है !! आपका विशेष आग्रह है, तब उपाय ही क्या हो सकता है ! अच्छा मैं कहता हूं, सुनिये-इस कुसुमपुर नगर में जिष्णुदास नामका एक वैश्य है ।

राक्षसः—(मन ही मन) जिष्णुदास चन्दनदासका प्रियमित्र है । (जोरसे) उसका क्या हुआ ?

पुरुषः—वह हमारा भी प्रियमित्र है ।

राक्षसः—(खुशी से मन ही मन) अये ! प्रियमित्र कहता है, तब तो अत्यन्त समीप का सम्बन्ध है । हर्षकी बात है !! अब मैं इसके द्वारा चन्दनदास का समाचार जानूंगा । (जोरसे) तो उसका क्या हुआ ?

पुरुषः—(आंखों में आंसू भर कर) दीन पुरुषों को धन देनेवाला वह जिष्णुदास

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वअस्सस्स असुणिदव्वं ण सुणेमि, ताव अत्ताणं उब्बन्धिअ वावादेमि त्ति इमं जिण्णुज्जाणं आअदो [साम्प्रतं स दीनजनदत्तविभवो ज्वलनं प्रवेष्टुकामो नगरान्निष्क्रान्तः । तदहमपि यावत्तस्य प्रियवयस्यस्याश्रोतव्यं न शृणोमि तावदात्मानमुद्‌बध्य व्यापादयामीतीमं जीर्णोद्यानमागतः]

राक्षसः—भद्र ! अथाऽग्निप्रवेशे तव सुहृदः को हेतुः ?—

किमौषधपथातिगरुपहतो महाव्याधिभिः ?

दीनजनाय दत्तो विभवो येन स दीनजनदत्तविभवः अकिञ्चनजनार्पितैश्वर्यः स चन्दनदासः ज्वलनमग्निं प्रवेष्टुं कामो यस्य स प्रवेष्टुकामः (अत्र तुमुनो मकारलोपः) प्रवेशाभिलाषी नगरात् कुसुमपुरात् निष्क्रान्तो निर्गतः । अश्रोतव्यं मृत्युं न शृणोमि श्रवणसात्करोमि तावत् तत्क्षणपर्यन्तमेव तत्क्षणात्प्रागेवेत्यर्थः । आत्मानं स्वशरीरमुद्‌बध्य बद्ध्वा व्यापादयितुं विनाशयितुम् इमममुम् जीर्णोद्यानम् पुरातनमुपवनम् आगतः प्राप्तः ।

किमौषधेति । औषधस्य पन्था औषधपथः (ऋक्पूरब्धूः पथामित्यप्) तमतिगच्छन्तीति औषधपथातिगास्तैः औषधपथातिगैः अतिक्रान्तप्रतीकार्यतारूपभेषजगुणैः अचिकित्स्यैरिति यावत् । महान्तश्च ते व्याधयो महाव्याधयस्तैर्महाव्याधिभिः प्रवृद्धरोगैः उपहतः पीडितः किम् तव प्रियवयस्य इति शेषः । अप्रतीकार्यरोगार्त्तस्य मरणे प्रवृत्तेः । अथवा अग्निश्च विषञ्चाग्निविषे ताभ्यामीषदूनाऽग्निविषकल्पा तयाऽग्निविषकल्पया वह्निविषतुल्यया नरपतेर्नृपस्य क्रुधा कोपेन निरस्तस्तिरस्कृतः ताडित इति यावत् किम् । नृपसाध्वसेनापि मरणोद्योगप्रवृत्तिदर्शनात् । अथवा अयमेष तव प्रियवयस्यः अलभ्यं सर्वैर्दुष्प्राप्यम् अन्यनारीजनम् अन्यस्त्रियमनुरक्तवान् आसक्तवान् किम् , आसक्तहृदयस्य वस्तुनोऽलाभे कामसन्तापस्यासह्यत्वान्मरणे प्रवृत्तेः । यथा भवतस्तव सुहृदो मित्रस्य नाशो मरणमेव

अग्नि में प्रवेश करने की कामना करके कुसुमपुर से बाहर चलागया । इसलिये मैंने जब प्रियमित्र के मरणका समाचार सुना, उसी समय निश्चय किया कि मैं अपने शरीर को बांधकर अपने प्राणका त्याग कर दूँगा, इसीलिये मैं इस प्राचीन वाटिका में आया हूँ ।

राक्षसः—भद्र ! तुम्हारे मित्रने अग्निप्रवेश क्यों किया ?

अप्रतीकारके योग्य कीसी वडे हुए रोग से पीड़ित हैं क्या ?

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुरुषः—अज्ज ! णहि णहि [आर्य ! नहि नहि]

राक्षसः—किमग्निविषकल्पया नरपतेर्निरस्तः क्रुधा ? ।

पुरुषः—अज्ज ! सन्तं पावं, सन्तं पावं । चन्दउत्तस्स जणवदेसु अणिसंसा पडिवत्ती [आर्य ! शान्तं पापं, शान्तं पापम् । चन्द्रगुप्तस्य जनपदेष्वनृशंसा प्रतिपत्तिः]

राक्षसः—अलभ्यमनुरक्तवान् किमयमन्यनारीजनम् ?

पुरुषः—(कर्णौ पिधाय) अज्ज ! सन्तं पावं, सन्तं पावं अभूमी क्खु एसो विणअणिधाणस्स, विसेसदो जिण्णुदासस्स । [आर्य ! शान्तं पापं, शान्तं पापम् । अभूमिः खल्वेष विनयनिधानस्य वणिग्जनस्य, विशेषतो जिष्णुदासस्य]

राक्षसः—किमस्य भवतो यथा सुहृद एव नाशो विषम् ! ॥ १६ ॥

विषं विनाशकारणं तथाऽस्य भवन्मित्रस्य मित्रान्तरविनाश एव विषं विनाशकारणं किमित्यर्थः भवतः सुहृद्विनाश इवाऽस्यापि सुहृदन्तरविनाश एव विषमित्युपमानोपमेयभावप्रतीत्या सुहृद्विनाशे विषत्वारोपाच्चोपमोत्थापितरूपकालङ्कारः । पृथ्वीनाम वृत्तम् । इति ॥ १६ ॥

नहि नहीति । त्वरायां द्विरुक्तिः, उत्कृष्टरोगो न सुहृद्विनाशहेतुरित्यर्थः ।

आर्येति । आर्य पूज्य ! शान्तं पापं नैवं वाच्यम् । (शान्तं पापमनिर्वाच्ये) चन्द्रगुप्तस्य मौर्यस्य जनपदेषु राष्ट्रेषु अनृशंसा अघातुका प्रतिपत्तिः प्रवृत्तिरित्यर्थः ।

कर्णाविति । कर्णौ पिधाय श्रोत्रे आच्छाद्य आर्य पूज्य शान्तं पापम् अल-

---

पुरुषः—आर्य ! नहीं नहीं ।

राक्षसः—(अथवा) अग्नि, विष तथा उससे किञ्चित् न्यून राजा के क्रोध से मारे गये हैं क्या ?

पुरुषः—आर्य ! ऐसा मत कहिये । चन्द्रगुप्तके राज्य में लोगों की हिंसा में प्रवृत्ति नहीं है ।

राक्षसः—(अथवा) नहीं प्राप्त होने योग्य किसी स्त्री में आसक्त थे क्या ?

पुरुषः—(कानों को ढाँक कर) आर्य ! ऐसा मत कहिये, ऐसा मत कहिये अत्यन्त नम्र वैश्यजाति का अन्य स्त्री में अनुराग नहीं होता, उसमें भी विशेषरूप से हमारे मित्र जिष्णुदास का ? ।

राक्षसः—(अथवा) जैसे मित्र का विनाश आपके विनाश का हेतु होरहा है । उसीतरह मित्रान्तर का विनाश ही आपके मित्रके विनाश का कारण है क्या? ॥१६॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुरुषः—अज्ज ! अध इं ? [आर्य ! अथ किम् ?]

राक्षसः—(सावेगमात्मगतम्) चन्दनदासोऽस्य सुहृदः प्रियसुहृत् तस्य प्रियसुहृद्विनाश एवाऽग्निप्रवेशहेतुरिति यत् सत्यं समाकुलित एवाऽस्मि सुहृत्स्नेहपक्षपातिना हृदयेन (प्रकाशम्) भद्र ! तस्यापि तव सुहृदः सुचरितं विस्तरेण श्रोतुमिच्छामि ।

पुरुषः—अज्ज ! अदो अवरं ण सक्कुणोमि मन्दभाओ मरणस्स विग्घमुप्पादेदुं [आर्य ! अतोऽपरं न शक्नोमि मन्दभाग्यो मरणस्य विघ्नमुत्पादयितुम्]

न्यमित्यादि न वक्तव्यम् । एष परनारीजनानुरागरूपो दोषो विनयनिधानस्याऽतिविनीतस्य वणिग्जनस्य वैश्यजातीयस्य अभूमिः अविषयः, विशेषतो विशेषरूपेण जिष्णुदासस्य मन्मित्रस्य ।

अथेति । अथ किम्, मम प्रियसुहृदो जिष्णुदासस्य सुहृदन्तरविनाश एव विनाशहेतुरित्यर्थः ।

सावेगमिति । आवेगेन सह वर्तमानं सावेगं सरभसं सचिन्तं वा यथा तथा आत्मगतमनतिस्पष्टं वचो ब्रवीतीति शेषः । अस्य मम पुरोवर्त्तिनः पुरुषस्य, सुहृदो मित्रस्य जिष्णुदासस्येत्यर्थः । चन्दनदासः प्रियसुहृत् प्रियमित्रम् । तस्य जिष्णुदासस्य प्रियसुहृद्विनाश एव चन्दनदासमरणमेव अग्निप्रवेशहेतुः वह्निपतनकारणम् इतीत्येतद्वृत्तं यत् यस्मात्सत्यं तथ्यम्, अत इत्यध्याहर्तव्यम्, अतोऽस्मात्कारणात् सुहृत्स्नेहपक्षपातिना मित्रानुरागासक्तेन हृदयेन चित्तेन समाकुलितः पीडित एवाऽस्मि । प्रकाशम् उच्चैर्ब्रवीति, भद्र साधुशील ! तस्यापि जिष्णुदासस्यापि तव सुहृदः भवतो मित्रस्य सुचरितं साधुकृत्यं विस्तरेण श्रोतुमाकर्णितुमिच्छामि ।

पुरुषः—आर्य ! और क्या ?

राक्षसः—(वेग से मन ही मन) चन्दनदास इस मित्रका प्रियमित्र है, प्रियमित्र का विनाश ही उसके अग्नि प्रवेश का हेतु है । इसलिये मैं मित्र के स्नेही हृदय से सचमुच व्याकुल हूं (जोर से) भद्र ! मैं उस तुम्हारे मित्र का सुन्दर चरित्र विशेषरूप से सुनना चाहता हूं ।

पुरुषः—आर्य ! इसके लिये मैं अभागा अपने मरणका दूसरा विघ्न उत्पन्न करने को समर्थ नहीं हूं ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राक्षसः—श्रवणीयां कथां कथयतु भद्रमुखः ।

पुरुषः—का गदी ? एसो क्खु णिवेदेमि, णिसामेदु अज्जो [का गतिः ? एष खलु निवेदयामि, निशामयत्वार्यः]

राक्षसः—भद्र ! दत्तावधानोऽस्मि ।

पुरुषः—अत्थि, जाणादि अज्जो, एत्थ णअरे मणिआरसेट्ठी चन्दणदासो णाम ? [अस्ति, जानात्यार्यः इह नगरे मणिकारश्रेष्ठी चन्दनदासो नाम ?]

राक्षसः—(सविषादमात्मगतम्) एतत्तदपावृतमस्मद्विनाशदीक्षाप्रकाशद्वारं दैवेन । हृदय ! स्थिरमिव किमपि ते कष्टतरमाकर्णनीयम् । (प्रकाशम्) भद्र ! श्रूयते मित्रवत्सलः स साधुः । किं तस्य ?

पुरुषः—सो एदस्स जिण्णुदासस्स प्पिअवअस्सो होदि । [स एतस्य जिष्णुदासस्य प्रियवयस्यो भवति]

राक्षसः—(स्वगतम्) अयमभ्यर्णः शोकवज्रपातो हृदयस्य (प्रकाशम्) ततस्ततः ?

सविषादमिति । सविषादं सचिन्तम् आत्मगतमनतिस्पष्टं च यथा तथा ब्रवीति । अस्मद्विनाशदीक्षाप्रकाशद्वारम् अस्मद्विनाशोपदेशागमनमार्गो दैवेन भाग्येनाऽपावृतम् । हृदय चित्त ! स्थिरीभव स्थैर्यमवलम्बस्व ते तव किमपि वृत्तमिति शेषः । कष्टतरं दुःखजनकम् आकर्णनीयम् , श्रूयते आकर्ण्यते स चन्दनदासो मित्रवत्सलः सुहृदनुरागी साधुः सच्चरित्रः ।

स्वगतमिति । अश्राव्यं यथा तथा ब्रवीति राक्षसः, सोऽयं स एष हृदयस्य

राक्षसः—भद्रमुख ! आप उस सुनने योग्य कथाको अवश्य कहें ।

पुरुषः—अच्छा, जब आपका ऐसा आग्रह है तब कहता हूं, सुनिये ।

राक्षसः—भद्र ! मैं सुनने को तैयार हूं ।

पुरुषः—आप जानते हैं कि इस नगर में चन्दनदास नाम का एक वैश्य है ।

राक्षसः—(विषादके साथ मनही मन) हमारे विनाश के मार्ग को भाग्य रोक दिया है । हृदय ! तू धैर्यका अवलम्बन कर । तुझे कोई कष्टप्रद समाचार सुनना होगा (जोर से) भद्र ! वह मित्रस्नेही बड़ा सच्चरित्र सुना जाता है । हां तो उसका क्या हुआ ?

पुरुषः—वह इस जिष्णुदास का प्रियमित्र है ।

राक्षसः—(मन ही मन) यह समीपवर्ती हृदयका शोकरूपी वज्रपात है (जोर से) तब तब ?

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पुरुषः—तदो जिण्णुदासेण पिअवअस्सस्स सिणेहसरिसं अज्ज विण्णत्तो चन्दउत्तो ! [ततो जिष्णुदासेन प्रियवयस्यस्य स्नेहसदृशमद्य विज्ञप्तश्चन्द्रगुप्तः]

राक्षसः—कथम् किमिति ?

पुरुषः—देव ! अत्थि मे गेहे कुटुम्बभरणपज्जत्तो अत्थो । तस्स विणिमएण मुञ्चिज्जदु मे पिअवअस्सो चन्दणदासो त्ति [देव ! अस्ति मे गेहे कुटुम्बभरणपर्याप्तोऽर्थः । तस्य विनिमयेन मुच्यतां मे प्रियवयस्यश्चन्दनदास इति]

राक्षसः—(स्वगतम्) साधु जिष्णुदास साधु ! अहो ! दर्शितो मित्रस्नेहः । कुतः ?—

पितॄन् पुत्राः पुत्रान् परवदभिहिंसन्ति पितरो,
यदर्थं सौहार्दं सुहृदि च विमुञ्चन्ति सुहृदः ।

चित्तस्य शोकवज्रपातः चिन्ताकुलिशागमोऽभ्यर्णोऽदूरवर्ती अचिरम्भावीति यावत्।

तत इति । ततस्तदनन्तरं चन्दनदासस्य राजदण्डश्रवणोत्तरमित्यर्थः, जिष्णुदासेन तन्नाम्ना तत्सुहृदा प्रियवयस्यस्य प्रियबन्धोः स्नेहसदृशं प्रीतितुल्यं यथा तथा अद्य चन्द्रगुप्तो मौर्यो विज्ञप्तः प्रार्थितः ।

देवेति । देव राजन् ! मे मम गेहे भवने कुटुम्बभरणपर्याप्तो बन्धुपोषणपूरणोऽर्थो विभवोऽस्ति, तस्यार्थस्य विनिमयेन परिवर्तनेन मे मम प्रियवयस्यः प्रियसुहृत् चन्दनदासः मुच्यतां त्यज्यताम् इति विज्ञप्त इत्यन्वयः । (एतेनास्य सुहृद्विपत्त्राणप्रावीण्यं सूचितम्) ।

पितॄनिति । यदर्थं यस्मै अर्थाय निमित्तं पुत्राः सुताः पितॄन् जनकान् पितरो जनकाः पुत्रान् सुतान् परेण तुल्यं परवत् अन्यतुल्यम् अभिहिंसन्ति घ्नन्ति, सुहृदो

पुरुषः—तब जिष्णुदासने प्रियमित्र के स्नेह को सोचकर आज चन्द्रगुप्त से कहा ।

राक्षसः—किसतरह क्या कहा ?

पुरुषः—देव ! हमारे घर में कुटुम्ब के पालन करने योग्य बहुत सा धन है । उसको लेकर हमारे प्रियमित्र चन्दनदास को छोड़ दीजिये ।

राक्षसः—(मनही मन) साधु जिष्णुदास साधु ! ओह ! इसने अपने मित्र पर असाधारण स्नेह दिखाया ।

कैसे कि—जिस धन के लोभवश पुत्र पिताको गैर जानकर मारते हैं और पिता

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रियं मोक्तुं तद्यो व्यसनमिव सद्यो व्यवसितः,
कृतार्थोऽयं सोऽर्थस्तव सति वणिक्त्वेऽपि वणिजः ॥१७॥

(प्रकाशम्) भद्र ! ततस्तथाऽभिहितेन सता किं प्रतिपन्नं मौर्येण ?

पुरुषः—अज्ज ! तदो एवं भणिदेण चन्दउत्तेण प्पडिभणिदो सेट्ठी जिण्णुदासो,—"जिण्णुदास ! ण मए अत्थस्स कालणेण सेट्ठी चन्दणदासो संजमिदो, किंदु प्पच्छादिदो अणेण अमच्चरक्खसस्स घरअणो, वहुसो जाचिदेणावि ण समप्पिदोत्ति ता जइ अमच्चरक्खसस्स घरअणं समप्पेदि, तदो अत्थि से मोक्खो, अण्णधा, प्पाणहरो से दण्डो" त्ति भणिअ, वज्झट्ठाणं आणीदो चन्दणदासो। तदो 'जाव प्पिअवअस्सस्स चन्दणदासस्स असुणिदव्वं ण सुणेमि, तावज्जेव अत्ताणअं वावादेमि त्ति, ज्जलणे प्पविसिदुकामो सेट्ठी जिण्णुदासो

वयस्याश्च सुहृदि मित्रे सौहार्दमनुरागं मुञ्चन्ति त्यजन्ति। प्रियं प्राणादपीष्टं तत् धनं यो जिष्णुदासः व्यसनमिव दुःखमिव मोक्तुं त्यक्तुं सद्यस्तत्क्षणं व्यवसितः समुद्युक्तः सोऽयमर्थः तदेतद्धनं वणिजो वणिग्जातीयस्य तव भवतो वणिक्त्वे वणिग्जातीयनैसर्गिककार्पण्यराहित्येऽपि सति कृतार्थः सफलो जात इति शेषः। यस्यार्थस्य लोभात्पितृपुत्रयोरन्योन्यं विरोधो जायते यस्य च लोभात् मित्रे च विरोधः सञ्जायते तस्यार्थस्य सुहृद्विपदुद्धरणाय व्ययीकरणात्साफल्यं प्रापितं त्वयेत्यर्थः। आद्यतृतीयपादयोर्वदिवशब्दयोरुपमानवाचकयोः सत्त्वादुपमाद्वयम्। चतुर्थपादप्रतिपाद्येऽर्थस्य कार्तार्थ्यरूपेऽर्थे तृतीयपादप्रतिपाद्यस्य व्यसनवद्धनत्यागोद्यतत्वहेतुत्वाद्वाक्यार्थहेतुककाव्यलिङ्गम्। अर्थव्ययविरोधिवणिक्त्वप्रदर्शनेऽप्यर्थव्ययोक्त्या विरोधस्य जातत्वाद्विरोधालंकारश्चेत्येषां नैरपेक्ष्येणैकत्राऽवस्थानात्संसृष्टिः। शिखरिणीवृत्तम् ॥ १७ ॥

भद्रेति। भद्र साधुशील ! ततस्तदनन्तरं जिष्णुदासेन मौर्यम्प्रति विज्ञाप-

---

भी पुत्रों को गैर समझकर प्राणतक लेते हैं, मित्र भी मैत्रीको छोड़ देते हैं, प्राणसे भी श्रेष्ठ उस धनको जिष्णुदास दुःख की तरह त्यागने के लिये तैयार है। वैश्य जातीय आप का वह धन वणिक्जाति के स्वाभाविक कार्पण्य दोष के रहने पर भी सफल हुआ।१७

(जोर से) भद्र ! तब उसतरह कहने पर उस चन्द्रगुप्तने क्या कहा ?

पुरुषः—आर्य इसतरह कहने पर चन्द्रगुप्तने वैश्यजातीय जिष्णुदास से कहा कि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

णअरादो णिग्गदो । अहं वि जाव प्पिअवअस्सस्स जिण्णुदासस्स असुणिदव्वं ण सुणेमि, ताव उव्वन्धिअ अत्ताणं वावादेमित्ति, इमं जिण्णुज्जाणं आगदो ह्मि ? [आर्य ! तत एवं भणितेन चन्द्रगुप्तेन प्रतिभणितः श्रेष्ठी जिष्णुदासः,—'जिष्णुदास ! न मयाऽर्थस्य कारणेन श्रेष्ठी चन्दनदासः संयमितः, किन्तु प्रच्छादितोऽनेनामात्यराक्षसस्य गृहजनः, बहुशो याचितेनाऽपि न समर्पित इति । तद्यद्यमात्यराक्षसस्य गृहजनं समर्पयति, ततोऽस्त्यस्य मोक्षः, अन्यथा, प्राणहरोऽस्य दण्ड' इति भणित्वा वध्यस्थानमानीतश्चन्दनदासः । ततो "यावत् प्रियवयस्यस्य चन्दनदासस्याश्रोतव्यं न शृणोमि, तावदेवात्मानं व्यापाद-

---

नोत्तरमित्यर्थः, तथा तादृग् अभिहितेन कथितेन मौर्येण चन्द्रगुप्तेन किं प्रतिपन्नं किं प्रत्युक्तम् ।

तत इति । ततस्तदुत्तरमेवं भणितेन ईदृगभिहितेन चन्द्रगुप्तेन मौर्येण, भणितः प्रत्युक्तः, मयाऽर्थस्य कारणेन धनस्य हेतुना श्रेष्ठी चन्दनदासो न संयमितः न बद्धः न कारागृहे निक्षिप्त इति यावत् । किन्त्वनेन चन्दनदासेनाऽमात्यराक्षसस्य गृहजनः कलत्रादि प्रच्छादितः संगोपितः क्वाप्यनिर्दिष्टस्थाने स्थापित इत्यर्थः, बहुशो याचितेनापि असकृदर्थितोऽपि गृहजन इति शेषः । न समर्पितो न दत्तः तत्तस्मात् यदि चेत् अमात्यराक्षसस्य नन्दसचिवस्य गृहजनं कलत्रादिकं समर्पयति ददाति तदाऽस्य चन्दनदासस्य मोक्षो मुक्तिरस्ति बन्धनादिति शेषः, अन्यथा राक्षसगृहजनाऽसमर्पणे सतीत्यर्थः । अस्य चन्दनदासस्य हरतीति हरः प्राणस्य हरः प्राणहरः जीवनाशः दण्डः क्लेशः । इति भणित्वा एवमभिधाय चन्दनदासः वैश्यजातीयो राक्षसमित्रं वध्यस्थानं मारणभूमिमानीतः । ततस्तदु रं यावत् यत्कालपर्यन्तं प्रियवयस्यस्य प्रियसुहृदः चन्दनदासस्य, अश्रोतव्यं मरणं न शृणोमि आकर्णयामि

हे जिष्णुदास ! मैंने धन के लोभ से श्रेष्ठी चन्दनदासको नहीं पकड़ा है, किन्तु इसने मन्त्रिराक्षस के कुटुम्बवर्ग को छिपा रक्खा है, मैंने बहुतवार इस से याचना की, पर इसने नहीं दिया । अब भी यदि मन्त्रिराक्षसका कुटुम्ब देवे तो इसकी जान बच सकती है नहीं तो इसको प्राणान्तिक दण्ड होगा । जिष्णुदास से वह ऐसा कह कर चन्दनदास वध्यस्थानमें लाया गया है । इस लिये उसका संकल्प है कि प्रियमित्र चन्दनदासका अश्रोतव्य समाचार सुनने के पहले ही मर जाऊँगा । जब अग्नि में प्रवेश करने की कामना से श्रेष्ठी जिष्णुदास नगर से बाहर चला गया है, तो मैं भी जबतक प्रियमित्र जिष्णुदासका अश्रोतव्य समाचार नहीं सुनता उसके पहले ही बांध कर आत्मघात कर लेता हूं । इसी लिये इस प्राचीनवाटिकामें आया हूँ ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यामि इति ज्वलने प्रवेष्टुकामः श्रेष्ठी जिष्णुदासो नगरान्निर्गतः। अहमपि यावत् प्रियवयस्यस्य जिष्णुदासस्याश्रोतव्यं न शृणोमि, तावदुद्वध्यात्मानं व्यापादयामि, इतीदं जीर्णोद्यानमागतोऽस्मि]

राक्षसः—न खलु व्यापादितश्चन्दनदासः ?

पुरुषः—अज्ज! ण दाव बाबादीअदि। सो क्खु संप्पदं पुणो पुणो अमच्चरक्खसस्स घरजणं जाचीअदि। ण सो मित्तवच्छलदाए जाचीअन्तो बि तं समप्पेदि। ता एदिणा कालणेण होदि से मरणस्स कालहलणं [आर्य ! न तावत् व्यापाद्यते। स खलु साम्प्रतं पुनः पुनरमात्यराक्षसस्य गृहजनं याच्यते। न स मित्रवत्सलतया याच्यमानोऽपि तं समर्पयति तदेतेन कारणेन भवत्यस्य मरणस्य कालहरणम्]

राक्षसः—(सहर्षमात्मगतम्) साधु वयस्य ! चन्दनदास ! साधु, साधु—

तावदेव तत्कालपर्यन्तमेव आत्मानं प्राणं व्यापादयामि विनाशयामि इत्यतो हेतोः ज्वलने वह्नौ प्रवेष्टुकामः प्रवेशाभिलाषी श्रेष्ठी वैश्यजातीयो जिष्णुदासो नगरात्पुरान्निर्गतो निस्सृतः। अहमपि यावत् प्रियवयस्यस्य प्रियसुहृदो जिष्णुदासस्याश्रोतव्यं मरणं न शृणोमि नाकर्णयामि तावत् तत्कालपर्यन्तम् उद्बध्योर्ध्वबन्धनं कृत्वा आत्मानं प्राणं व्यापादयामि विनाशयामि, इत्यतो हेतोः इदमेतत् जीर्णोद्यानं पुरातनोपवनमागतः प्राप्तोऽस्मि भवामि।

आर्येति। आर्य पूज्य! न तावत् व्यापाद्यते न तत्कालपर्यन्तं हन्यते स खलु (खलुशब्दो वाक्यालंकारे) असौ चन्दनदासः साम्प्रतमधुना पुनः पुनः भूयो भूयः अमात्यराक्षसगृहजनं राक्षसकलत्रं याच्यते प्रार्थ्यते मौर्येणेति शेषः। चन्दनदासो याच्यमानोऽपि प्रार्थ्यमानोऽपि मित्रवत्सलतया सुहृत्स्नेहेन न तं राक्षसगृहजनं समर्पयति ददाति। तत्तस्मात् एतेन कारणेन अनेन हेतुनाऽस्य चन्दनदासस्य मरणस्य विनाशस्य कालहरणं समययापनं भवति जायते।

राक्षसः—चन्दनदास मारडाला तो नहीं गया ?

पुरुषः—आर्य ! मारा नहीं गया। वह इस समय बारम्बार मन्त्रिराक्षस के गृहजनको समर्पण करने के लिये बाध्य किया जारहा है। किन्तु वह मित्रवात्सल्यके कारण उसको नहीं देता, इसी कारण इसके मरने में विलम्ब हो रहा है।

राक्षसः—(खुशी से मन ही मन) साधु मित्र ! चन्दनदास साधु !—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शिवेरिव समुद्भूतं शरणागतरक्षया ।
विचीयते त्वया साधो ! यशोऽपि सुहृदा विना ॥१८॥

(प्रकाशम्) भद्र ! भद्र ! गच्छ शीघ्रमिदानीं जिष्णुदासं ज्वलनप्रवेशान्निवारय ? अहमपि चन्दनदासं मरणान्मोचयामि ।

पुरुषः—अध, केण उण उवाएण अज्जो चन्दनदासं मरणादो मोचेदि ? [अथ केन पुनरुपायेनार्यश्चन्दनदासं मरणान्मोचयति]

राक्षसः—(खड्गमाकृष्य) नन्वनेन व्यवसायमहासुहृदा निस्त्रिंशेन । ननु पश्य—

शिवेरिवेति । अत्रत्येवशब्दस्य भिन्नक्रमत्वेन यशसा सम्बन्धो बोध्यः । हे साधो परोपकारिन् ! शरणमागतः शरणागतः शरणागतस्य रक्षा शरणागतरक्षा तया शरणागतरक्षया शरणप्राप्तकपोतरूपिवह्नेः श्येनरूपेन्द्रात्त्राणेनेत्यर्थः । समुद्भूतं समुत्पन्नं शिवेः उशीनरदेशाधिपस्य नृपतेः यश इव कीर्तिरिव यश इति शेषः । त्वया भवता सुहृदा शरणागतेन मित्रेण विनाऽपि विचीयते सम्पाद्यते । शिविः शरणागतस्य समक्ष एवात्मविनाशमुपगतः त्वया तु शरणागतस्य ममाऽसमक्षे विनाशमुपगमिष्यतीत्याश्चर्यमित्यर्थः शिवेर्यश इव यश इत्यर्थे उपमा । उपमानशिवेरपक्षयोपमेयस्य त्वया पदवाच्यस्याधिक्यवर्णनाद्व्यतिरेकालङ्कारश्चेति द्वयोः संसृष्टिः । अनुष्टुप् वृत्तम् ॥ १८ ॥

भद्रेति । त्वरायां द्विरुक्तिः, गच्छ प्रयाहि शीघ्रं द्रुतमिदानीं साम्प्रतं जिष्णुदासं तदाख्यं सुहृदं ज्वलनप्रवेशात् वह्निपतनात् निवारय निषेधय (अत्र 'वारणार्थानामीप्सितः' इत्यपादानत्वात्पञ्चमी) अहमपि चन्दनदासमेतदाख्यं सुहृदं मरणात् विनाशात् मोचयामि पृथक्करोमि (अत्र 'भीत्रार्थानां भयहेतुः' इत्यपादानत्वात्पञ्चमी) ।

नन्विति । ननु वितर्के अनेन एतेन व्यवसायः पौरुषं महासुहृत् यस्य स व्यवसायमहासुहृत् तेन व्यवसायमहासुहृदा पौरुषप्रियमित्रेण निस्त्रिंशेन खड्गेन

शरणागतकी रक्षा करने से राजा शिवि के यशकी तरह उज्ज्वल यशको तुमने विना मित्रकी सहायता के ही प्राप्त कर लिआ ॥ १८ ॥

(जोर से) भद्र ! भद्र ! शीघ्र जाओ अभी जिष्णुदास को अग्निप्रवेशसे रोको । मैं भी चन्दनदास को मरण से छुड़ाता हूं ।

पुरुषः—अब किस उपाय से आप चन्दनदास को मरण से छुड़ा सकते हैं ?

राक्षसः—(तलवार को बाहर कर) पुरुषार्थका परममित्र इस तलवार से ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निस्त्रिंशोऽयं विगतजलदव्योमसङ्काशमूर्त्ति-
युद्धश्रद्धापुलकित इव प्राप्तसख्यः करेण ।
सत्त्वोत्कर्षात् समरनिकषे दृष्टसारः परैर्मे
मित्रस्नेहाद्विवशमधुना साहसे मां नियुङ्क्ते ॥ १९ ॥

पुरुषः—अज्ज ! एवं सेट्ठिचन्दणदासजीविदं होदि त्ति सुणिदं, बिसमदसाविभाअपरिणामपड़िदो सक्कणोमि णिच्चिदपदं पडिवत्तुं । (विलोक्य पादयोर्निपत्य) अध, सुगिहीदणामधेआ अमच्चरक्खसपादा तुह्मे त्ति, ता करेहि मे पसादं संदेहणिणएण [आर्य ! एवं श्रेष्ठिचन्दनदासजीवितं भवतीति श्रुतं, विषमदशाविभागपरिणामपतितो न शक्नोमि निश्चित-

---

अथवा व्यवसाये पौरुषे महासुहृत् तेन व्यवसायमहासुहृदा पौरुषैकसहायेन निस्त्रिंशेन खड्गेन चन्दनदासं मरणान्मोचयामीति शेषः ।

निस्त्रिंशोऽयमिति। विगतो जलदो यस्मात्तत् विगतजलदं तच्च तद्व्योम विगतजलदव्योम तेन सङ्काशा मूर्त्तिर्यस्य स विगतजलदव्योमसङ्काशमूर्त्तिः शरत्कालिकाकाशसदृशकृष्णवर्णः, युद्धे श्रद्धा युद्धश्रद्धा तया पुलकितः युद्धश्रद्धापुलकितः रणविषयकादरसञ्जातरोमाञ्च इव करेण हस्तेन प्राप्तं सख्यं येन स प्राप्तसख्यः सञ्जातानुरागः करधृत इत्यर्थः । सत्त्वस्योत्कर्षः सत्त्वोत्कर्षस्तस्मात्सत्त्वोत्कर्षात् बलाधिक्यात् परैः शत्रुभिः समर एव निकषः समरनिकषस्तस्मिन् समरनिकषे संग्रामपरीक्षणोपले दृष्टः सारो यस्य स दृष्टसारः दृष्टशक्तिः अयमेष मे मम निस्त्रिंशः अधुना सम्प्रति मित्रस्नेहात् सुहृदनुरागात् विवशं व्यग्रं मां साहसे पौरुषे युद्धव्यापारे इत्यर्थः । नियुङ्क्ते प्रेरयति । प्रथमपादे सादृश्यार्थकसङ्काशशब्दसत्त्वादुपमा । द्वितीयपादे उत्प्रेक्षा । तृतीयपादे समरे परीक्षात्वसाधर्म्येण निकषत्वारोपाद्रूपकम् इत्येषां संसृष्टिः । मन्दाक्रान्ता वृत्तम् ॥ १९ ॥

एवमिति । एवं त्वयि युद्धे प्रवृत्ते सतीत्यर्थः । श्रेष्ठिचन्दनदासजीवितं वणिक्चन्दनदासजीवनं भवति (भविष्यत्सामीप्ये लट्) भविष्यतीत्यर्थः, इति श्रुतं त्वत्त

देखो !—स्वच्छ मेघवाले आकाश के सदृश मूर्त्तिधारी, युद्ध की अभिलाषा से रोमाञ्चित की तरह स्थित, हाथ के साथ मित्रता करने वाला, मेरे पराक्रम के आधिक्य से संग्राम रूपी परीक्षणोपल में शत्रुओं से देखा गया पुरुषार्थ वाला यह खड्ग मित्रस्नेह के कारण पराधीन मुझको इस समय युद्ध के लिये प्रेरित करता है ॥ १९ ॥

पुरुषः—आर्य ! ऐसा करने पर चन्दनदास जीवित रह सकता है विषम दशा-विशेष के परिणामको प्राप्त मैं आपके निर्णीत निश्चय को नहीं जान सकता (देखकर

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पदं प्रतिपत्तुम् । अथ सुगृहीतनामधेया अमात्यराक्षसपादा यूयमिति, तत् कुरु मे प्रसादं सन्देहनिर्णयेन]

राक्षसः—भद्र ! सोऽहमनुभूतभर्तृवंशविनाशः सुहृद्विनाशहेतुरनार्यो दुर्गृहीतनामा यथार्थो राक्षसः ।

पुरुषः—(सहर्षं पुनः पादयोर्निपत्य) प्पसीदध, प्पसीदध । हीमाणहे ! दिट्ठिआ कदत्थोह्मि [प्रसीदथ प्रसीदथ । आश्चर्यम् ! दिष्ट्या कृतार्थोऽस्मि]

राक्षसः—भद्र ! उत्तिष्ठोत्तिष्ठ, कृतमिदानीं कालहरणेन, निवेद्यतां जिष्णुदासाय, यथैष राक्षसः चन्दनदासं मरणान्मोचयति । (इति "निस्त्रिंशोऽयम्" इत्यादि पठन् आकृष्टखड्गः परिक्रामति) ।

पुरुषः—(पादयोर्निपत्य) प्पसीदन्तु प्पसीदन्तु अमच्चरक्खसपादाः । अत्थि दाव एत्थ णअरे प्पढमं चन्दउत्तहदएण अज्जसअडदासस्स वधो आणत्तो । सो अ केणावि वज्झट्ठाणादो अवहरिअ, देसान्तरं अवबाहिदो । तदो चन्दउत्तहदएण कीस प्पमादो किदो,त्ति अज्जसअडदासवधवखणाए समुज्जलिदो रोसग्गो घादअजणवधजलेण

इति शेषः, विषमदशाविभागपरिणामपतितः अभद्रावस्थाविशेषपरिपाकप्राप्तः अहमिति शेषः । निश्चितपदं निर्णीतस्थानं त्वामिति शेषः । प्रतिपत्तुं ज्ञातुं न शक्नोमि न समर्थः ।

सोऽहमिति । सोऽहम् अनुभूतो भर्तुर्नन्दस्य वंशविनाशः कुलक्षयो येन सोऽनुभूतभर्तृवंशविनाशः प्राप्त(दृष्ट)नन्दकुलक्षयः सुहृद्विनाशहेतुः मित्रमरणकारणम् अनार्यः कुत्सितः दुर्गृहीतनामा अपुण्यनामधेया यथार्थोऽन्वर्थः राक्षसः अस्मीति शेषः।

पैरों पर गिर कर) आप ही सुगृहीत नामवाले मन्त्रि राक्षस हैं क्या ? यदि हों तो प्रसन्न होकर मेरे सन्देह को दूर कीजिये ।

राक्षसः—भद्र ! स्वामी के वंशका विनाश देखनेवाला और मित्रविनाशका हेतु, अनार्य तथा अपुण्यनामवाला मैं यथार्थ ही राक्षस हूँ ।

पुरुषः— (हर्ष के साथ फिर पैरों पर गिर कर) । प्रसन्न होइये , प्रसन्न होइये । आश्चर्य है । हर्ष की बात है । मैं कृतार्थ हूँ ।

राक्षसः—उठो उठो, अब समय बिताना व्यर्थ है । जिष्णुदास से कहो कि राक्षस चन्दनदास को मरण से छुड़ाता है ।

पुरुषः—(पैरों पर गिर कर) मन्त्रिराक्षस ! आप प्रसन्न हों । इस नगर में पहले

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

णिव्वाविदो। तदो पहुदि घादआ जं कंपि गहीदसत्थं अपुव्वं पुरुसं अग्गदो वा पेक्खन्ति, तदो अद्धवधे ज्जेव अत्तणो जीविदं परिरक्खन्तो अप्पमत्ता एदे अवात्तवज्झठ्ठाणं वज्झं वावादेन्ति। ता एव्वं गहीदसत्थेहिं अमच्चपादेहिं तहिं गच्छन्तेहि सेट्ठिचन्दणदासस्स वहो तुवराइदो होदि [प्रसीदन्तु प्रसीदन्त्वमात्यराक्षसपादाः। अस्ति तावदत्र नगरे प्रथमं चन्द्रगुप्तहतकेनाऽऽर्यशकटदासस्य वध आज्ञप्तः। स च केनापि वध्यस्थानादपहृत्य देशान्तरमपवाहितः। अतश्चन्द्रगुप्तहतकेन कस्मात् प्रमादः कृत इति आर्यशकटदासवधवञ्चनया समुज्वलितो रोषाग्निर्घातकजनवधजलेन निर्वापितः। ततः प्रभृति घातका यं कमपि गृहीतशस्त्रं अपूर्वं पुरुषमग्रतः पश्चाद्वा प्रेक्षन्ते, तदाऽर्द्धपथे एवात्मनो जीवितं परिरक्षन्तोऽप्रमत्ता एतेऽवाप्तवध्यस्थानं बध्यं व्यापादयन्ति। तस्मादेवं गृहीतशस्त्रैरमात्यपादैस्तत्र गच्छद्भिः श्रेष्ठिचन्द-

---

पादयोर्निपत्येति। पादयोश्चरणयोर्निपत्य पतित्वा चरणौ प्रणम्येत्यर्थः। प्रथमं प्राक् चन्द्रगुप्तहतकेन निन्दितेन मौर्येण आर्यशकटदासस्य वधो हिंसा आज्ञप्त आदिष्टः (आत्मनो नन्दकुलानुरागित्वसूचनार्थं पदद्वयोपादानमिति बोध्यम्) स च आर्यशकटदासः केनापि वीरपुरुषेण वध्यस्थानान्मारणप्रदेशात् अपहृत्य आदाय देशान्तरं दूरदेशमपवाहितः प्रापितः। ततस्तदुत्तरं चन्द्रगुप्तहतकेन अनार्येण कस्मात् कुतः कारणात् प्रमादोऽनवधानता कृतः इतीत्येतदभिधाय आर्यशकटदासवधवञ्चनया पूज्यशकटदासहिंसनप्रतारणया समुज्ज्वलितः प्रदीप्तो रोषाग्निः क्रोधवह्निः घातकजनवधजलेन रक्षकजनमारणेनेत्यर्थः। निर्वापितः शमितः। ततः प्रभृति तदारभ्य घातकाः हिंसकाः यं कमपि गृहीतशस्त्रमायुधविशिष्टम् अपूर्वम् अदृष्टपूर्वं पुरुषं कोकं प्रेक्षन्ते पश्यन्ति तदाऽर्द्धपथे एवार्द्धमार्गे एव आत्मनो जीवितं स्वप्राणं परिरक्षन्तः परित्रायमाणाः अप्रमत्ताः सावधानाः सन्तः अवाप्तवध्यस्थानं प्राप्तमारणप्र-

---

दुष्ट चन्द्रगुप्तने आर्यशकटदास के वध की आज्ञा दी थी। सो शकटदास किसी पुरुष द्वारा वध्यस्थान से भगाकर दूसरे स्थान में पुहुँचादिया गया। तब दुष्टचन्द्रगुप्त ने जल्लादों से पूछा कि किस करण ऐसी भूल की गयी' ऐसा कह कर उसने आर्य शकटदास के भागने से बढ़ी हुई क्रोधाग्नि को घातक जनके वधरूपीजल से शान्त किया। उसी दिन से घातक लोग जिस किसी शस्त्रधारी नये पुरुष को आगे वा पीछे देखते हैं तब आधे रास्ते ही में अपने प्राणोंकी रक्षा करते हुए सावधान होकर वध्यस्थान में न लाये हुए वध्यपुरुष को भी मारते हैं। इस लिये शस्त्रको छिपा कर आप वध्यस्थान

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नदासस्य वधस्त्वरायितो भवति]

(इति निष्क्रान्तः)

राक्षसः—(स्वगतम्) अहो ! दुर्बोधश्चाणक्यवटोर्नीतिमार्गः। कुतः?-

यदि स शकटो नीतः शत्रोर्मतेन ममान्तिकं,
किमिति निहतस्तेन क्रोधाद् वधाधिकृतो जनः ?।
अथ न कृतकं तादृक्कष्टं कथं नु विभावये-
दिति मम मतिस्तर्कारूढा न पश्यति निश्चयम् ॥ २० ॥

देशं वध्यं मारणार्हं पुरुषमिति शेषः व्यापादयन्ति मारयन्ति ।

स्वगतमिति । अनतिस्पष्टं यथा तथा ब्रवीतीत्यर्थः, अहो आश्चर्यम् चाणक्यवटोः अल्पधियो विष्णुगुप्तस्य नीतिमार्गो नयपद्धतिर्दुर्बोधो ज्ञातुमशक्यः ।

यदीति । यदि शत्रोश्चाणक्यस्य मौर्यस्य वा मतेन आज्ञया कपटेनेत्यर्थः । गूढचरेण सिद्धार्थकेनेति शेषः । शकटः शकटदासो ममान्तिकं मम समीपं नीतः प्रापितः तर्हि तेन चाणक्येन मौर्येण वा क्रोधात् शकटदासापसारणविषयच्युतिजन्यघातकजनविषयकोपादित्यर्थः । वधाधिकृतो हिंसननियुक्तो जनो लोकः किमिति कुतो निहतो व्यापादितः स्यादिति शेषः । अथ पक्षान्तरे घातकजनवधाऽन्यथाऽनुपपत्त्येत्यर्थः । कृतकं न, शकटदासस्य पलाय्य गमनं कपटरूपं न भवति, यथार्थमेव सिद्धार्थकस्य तात्त्विकसाहसोपकारेण शकटदासस्य गमनं भवतीत्यर्थः । तदा तादृक् कष्टं कुत्सितं स्वहस्तलेखमुद्राङ्कनादिरूपं स्वामिद्रोहं शकटदासः कथं नु भावयेत् नु वितर्के कर्त्तव्यत्वेन कथं चिन्तयेदित्यर्थः, तस्य चिन्तनमप्ययुक्तं किमुताचरणमिति तात्पर्यम् । इतीत्थं मम मतिर्बुद्धिः तर्कारूढा सन्देहपरिहारार्थं विचारमनुसरन्ती सतीत्यर्थः अथवा इतीत्थं तर्कारूढा सन्देहास्पदीभूता मम मतिर्बुद्धिः

में जायँ । क्योंकि चन्दनदास का वध शीघ्र ही होने वाला है ।

(इतना कह कर चला जाता है)

राक्षसः—(मन ही मन) आश्चर्य है ! उस ब्राह्मण चाणक्य का नीतिमार्ग अत्यन्त कठिन है । कैसे कि—

यदि शत्रु (चाणक्य वा चन्द्रगुप्त) की आज्ञा से वह शकटदास हमारे समीप पहुंचाया गया तब उसने क्रोधसे वधिक जनको क्यों मारा । अथवा शकटदास को भगाकर लेजाना यदि कपटरूप न हो, किन्तु यथार्थ ही हो तब शकटदासने स्वहस्तलेख मुद्राङ्कनादिरूप निन्दित-स्वामिद्रोह कर्म क्यों सोचा ? इस प्रकार। विचार करती हुई हमारी बुद्धि किसी निश्चय पर नहीं पहुँचती ॥ २० ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(विचिन्त्य) तस्मात्,—

नायं निस्त्रिंशकालः, प्रथममिह कृते घातकानां विघाते,
नीतिः कालान्तरेण प्रकटयति फलं किं तया कार्यमत्र ।
औदासीन्यं न युक्तं, प्रियसुहृदि गते मत्कृते चातिघोरां
व्यापत्तिं ज्ञातमस्य स्वतनुमहमिमां निष्क्रयं कल्पयामि ॥

(इति निष्क्रान्ताः सर्वे)

इति मुद्राराक्षसे षष्ठोऽङ्कः ॥ ६ ॥

निश्चयं सिद्धान्तं न पश्यति नाधिगच्छति सम्प्रत्यपि सन्देहाकुलेव मम धीरित्यर्थः ।
अतश्चाणक्यनीतिमार्गो दुर्बोध इत्याशयः । निश्चयप्राप्त्यभावे हेतुभूतस्य तर्कारूढ-
मतित्वस्य वाक्यार्थत्वेनाभिहितत्वाद्वाक्यार्थहेतुककाव्यलिङ्गालङ्करणालंकृतं पद्यमि-
दमित्यवधेयम् । शिखरिणी वृत्तम् ॥ २० ॥

नायमिति । इहास्मिन् चन्दनदासमोचनविषये अयमेषः निस्त्रिंशकालः खड्ग-
धारणसमयो न, यतः प्रथमं प्राक् घातकानां घातकैरित्यर्थः (कृद्योगे कर्तरि षष्ठी)
चन्दनदासस्येत्यध्याहार्यम् विघाते विनाशे कृते सति तस्य वैफल्यादिति शेषः ।
नीत्यवलम्बनमप्ययुक्तमित्याह—नीतिरिति । नीतिर्नयः खड्गधारणविषयेत्यर्थः ।
कालान्तरेण समयान्तरेण फलं प्रकटयति सिद्धिं जनयति अतस्तया नीत्याऽत्रास्मिन्
चन्दनदासमोचने किं कार्यं न किमपीत्यर्थः । औदासीन्यावलम्बनमप्ययुक्तमित्याह-
औदासीन्यमिति । प्रियसुहृदि प्रियमित्रचन्दनदासे मत्कृतां घोरां कठिनां व्या-
पत्तिं विपदं गते प्राप्ते सति औदासीन्यं निरपेक्षतयाऽवस्थानं न युक्तं न समु-
चितम् । इत्थं सन्दिह्य कर्त्तव्यमवधारयति—ज्ञातमिति । इमां स्वतनुं निजश-

---

(विचार करे) इस कारण—

पहिले तो घातक जनों द्वारा चन्दनदास का विघात होने पर शस्त्र धारण करना ही व्यर्थ है, नीति समय बीतने पर फलको दिखाती है । इसलिये इस विषय में उस नीति से क्या प्रयोजन ? मेरे लिए प्रियमित्र चन्दनदास के कठिन विपत्ति प्राप्त करने पर उदासीन होकर रहना भी ठीक नहीं है, इसलिये इस शरीर को चन्दनदास के छुड़ाने का मूल्य बनाना ही उचित है ॥ २१ ॥

(सब चले जाते हैं)

इति आशुबोधिनीव्याख्यायां षष्ठोऽङ्कः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सप्तमोऽङ्कः ।

(ततः प्रविशति चण्डालः)

चण्डालः—ओसलध अज्जा ! ओसलध, अवेध माणहे ! अवेध,—
जइ लक्खिदु मणहं पाणे, विहवे, कुले, कलत्ते अ ।
पलिहलध ता विसं विअ लाआपत्थं पअत्तेण ॥ १ ॥

रीरम् अस्य चन्दनदासस्य निष्क्रियतेऽऽनेनेति निष्क्रयस्तं निष्क्रयं मोचनमूल्यं कल्पयामि करिष्यामीत्यर्थः (भविष्यत्सामीप्ये लट्) प्राक् कापव्येनाऽकापव्येन वा घातकैश्चन्दनदासे निहते भीत्या खड्गधारणमयुक्तम् तत्क्षणं फलाजननाच्चीत्यवलम्बनं न युक्तम् सुहृदुपेक्षणं कृतघ्नतादोषोत्पादकमतो निजशरीरमेव तन्मोचनमूल्यमुचितमिति ज्ञातमिति भावः । स्वशरीरदानेन सुहृन्मोचनादत्र परिवृत्तिनामाऽलङ्कारः । तदुक्तं दर्पणे—

परिवृत्तिर्विनिमयः समन्यूनाधिकैर्भवेत् । इति ।

स च निस्त्रिंशाऽधारणम्प्रति घातककर्तृकचन्दनदासविघातस्य नीत्यनाश्रयणे चिरकालफलोत्पत्तेः औदासीन्यानाश्रयणे सुहृद्विपदश्च हेतुत्वेनोपन्यासात्काव्यलिङ्गत्रयेणोज्जीवितः । स्रग्धरा वृत्तम् ॥ २१ ॥

इति मुद्राराक्षसभावबोधिनीव्याख्यायां षष्ठोऽङ्कः ।

एवं षष्ठेनाऽङ्केन मुख्यकार्यममात्यराक्षसाऽऽयत्तीकरणात्मकं बीजवद्भिर्यथायथं विप्रकीर्णैरत्रैकार्थीभावम्प्राप्तैर्मुखसन्ध्याद्यर्थैः सम्पन्नम् अथामात्यराक्षसेन मौर्याऽमात्यपदोपादानद्वारा तच्छ्रीस्थैर्यसम्पादनात्मकनाटकस्योत्कृष्टफलं प्रापयितुं सप्तमाङ्कप्रक्रमः । करधृतबन्धनदाम्ना पुरुषेण सूचितं चन्दनदासश्मशानभूम्यागमनमाकर्ण्य ससत्वरमुत्सृज्य शस्त्रं श्मशानभूमिं गत इत्युक्तम् साम्प्रतमुक्त एव चन्दनदासवृत्तान्तोऽभिधीयते प्रपञ्च्यते ।

यत्र स्यादुत्तराऽङ्कार्थः पूर्वाङ्कार्थोऽनुसंगतः ।

इत्युक्तलक्षणादङ्कावक्षरणमिदम् ।

(चाण्डालवेषधारी पुरुष का प्रवेश)

चाण्डालः—आर्य ! आप लोग चले जायं २, मान्य ! आप लोग भाग जायँ २ ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[अपसरत आर्या अपसरत, अपेत मान्याः अपेत,—
यदि रक्षितुं मन्यध्वं प्राणं विभवं, कुलं, कलत्रं च ।
परिहरत तस्मात् विषमिव राजापथ्यं प्रयत्नेन ॥ १ ॥]

अविअ—होदि पुलिसस्स व्वाही मलणं वा, सेविदे अपत्थेवि ।
लाआपत्थे उण सेविदे सअलं वि कुलं मलदि ॥ २ ॥

अपि च—[भवति पुरुषस्य व्याधिर्मरणं वा सेविते अपथ्येऽपि ।
राजापथ्ये पुनः सेविते हि सकलमपि कुलं म्रियते ॥ २ ॥]

यदीति । यदि प्राणमात्मानं विभवमैश्वर्यं कुलं वंशं कलत्रं दारांश्च रक्षितुं त्रातुं यथावत् स्थापयितुं मन्यध्वम् इच्छत यूयमिति शेषः । तस्मात् तदा प्रयत्नेन प्रयासेन सर्वथेत्यर्थः । विषमिव हलाहलमिव पथोऽनपेतं पथ्यं न पथ्यमपथ्यं राज्ञोऽपथ्यं राजापथ्यं नृपाहितं परिहरत परित्यजत । (रक्षितुमित्यत्रेच्छार्थैककर्तृकधातूपपदाद्भाव एव तुमुनो विधानात्तस्यात्रासत्त्वात्स न स्यादिति नाशंक्यम् । तादृशस्य मनधातोरेव सत्त्वेन तदुपपत्तेः) प्राणादिविनाशकं नृपाहितं सर्वथा परित्याज्यमित्यर्थः । विषसेवनादेकस्यैव विनाशः सोऽपि कादाचित्को राजापथ्यकरणात्सपुत्रकलत्रादेरात्मनो विनाश इत्यर्थस्य फलितत्वाद्विदरूपोपमानादुपमेयस्य राजापथ्यस्याऽऽधिक्यप्रतीत्या व्यतिरेकालंकारः ।स च हेतोरनुक्तेस्तृतीयः। तदुक्तम्—

आधिक्यमुपमेयस्योपमानान्न्यूनताऽथवा ।
व्यतिरेक एक उक्ते हेतौ नोक्ते स च त्रिधा ॥ इति । आर्यावृत्तम् ॥१॥

भवतीति । अपथ्येऽहितकरे वस्तुनि विषादौ सेविते भुंक्ते सति पुरुषस्य जनस्य व्याधिः दैहिकी व्यथा मरणंवा प्राणवियोगो वा भवति जायते । पुनर्वाक्यालंकारे हिशब्दो निश्चयार्थकः राजापथ्ये नृपाहितकरे कार्ये इत्यर्थः । सेविते कृते सति सकलमपि सर्वमपि कुलं वंशो म्रियते विनश्यति । सामान्यापथ्यसेवनादेकस्यैव विनाशो राजापथ्यसेवनात्सर्वनाश इत्यर्थः । अत्रापि सामान्यापथ्याद्राजापथ्यस्याधिक्योक्त्या व्यतिरेकालंकारः । पूर्वार्द्धेऽपथ्योत्कर्षमभिधायोत्तरार्द्धे तदुपमानत्वप्रक-

---

यदि आप अपने प्राण, धन, कुल और कलत्रकी रक्षा करना चाहें तो यत्न करके अमङ्गलदायक राजद्रोह को छोड़ दीजिये ॥ १ ॥

और भी—अहितकर वस्तु का सेवन करने से तो पुरुषों को ।केवल व्याधि (रोग) वा मरण होता है, किन्तु राजविरोधरूप अपथ्य का सेवन करने से सम्पूर्ण कुल का विनाश हो जाता है ॥ २ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ता जइ ण प्पत्तिआअध, तदा पेक्खध एणं लाआपत्थकालिणं सेट्ठिचन्दणदासं वज्झट्ठाणं आणीअमाणं सपुत्त कलकत्तं (आकाशे) अज्जा ! किं भणाध ? अत्थि किं चन्दनदासस्स मोक्खोवाओ त्ति ? कुदो से अधणस्स मोक्खोबाओ ? एद उण अत्थि,-सो जइ अमच्चरक्खसस्स घरअणं समप्पेदि (पुनराकाशे) किं भणाध ? एसे सलणागदवच्छले अत्तणो जीविदस्स कालणेण ईरिसं,अकज्जं ण कलिस्स दित्ति ? अज्जा ! जइ एव्वं त्तेण हि अवधाणेध से सुभगदिं । किं दाणीं तुह्माणे प्पडीआलचिआरेण ? [तद्यदि न प्रत्ययध्वं, तदा प्रेक्षध्वमेनं राजापथ्यकारिणं श्रेष्ठिचन्दनदासं वध्यस्थानमानीयमानं सपुत्रकलत्रम् । आर्याः ! किं भणथ ? अस्ति किं चन्दनदासस्य मोक्षोपाय इति ? कुतोऽस्याधन्यस्य मोक्षोपायः ? एतत् पुनरस्ति—स यद्यमात्यराक्षसस्य गृहजनं समर्पयति । किं भणथ ?

ल्पनाद्द्वितीयप्रतीपालंकारो ध्वन्यते तेनेत्यलङ्कारध्वनिः ।

उक्त्वा चात्यन्तमुत्कर्षमत्युत्कृष्टस्य वस्तुनः ।
कल्पितेऽप्युपमानत्वे प्रतीपं केचिदूचिरे ॥

इति प्रतीपालंकारलक्षणम् । आर्या वृत्तम् ॥ २ ॥

तद्यदीति । यदि चेत् न प्रत्ययध्वं मदुक्तवचनं तथ्यत्वेन न गृह्णीत तदा तर्हि एनममुम् राजापथ्यकारिणं नृपाऽहितविधायिनं वध्यस्थानमानीयमानं श्मशानभूमिं प्राप्यमाणं सपुत्रकलत्रं तनयस्त्रीसहितं श्रेष्ठिचन्दनदासं चन्दनदासनामानं वैश्यजातीयं पुरुषं प्रेक्षध्वमवलोकध्वम् । आकाशेऽन्तरिक्षे सन्निधापितचक्षुः सन् ब्रवीतिति शेषः । आर्याः पूज्याः ! कि भणथ किं वचनं ब्रूथ चन्दनदासस्य मोक्षोपायो मुक्तिप्रकारः किमस्ति विद्यते (प्रश्नार्थकोऽत्र किंशब्दः) अस्यतस्याऽधन्यस्य हतभाग्यस्याऽपुण्यवत इति यावत् । कुतो मोक्षोपायः कस्मान्मुक्तिप्रकारः नास्तीत्यर्थः । चन्दनदासो यदि चेत् अमात्यराक्षसगृहजनं मन्त्रिणो राक्षसस्य कल-

इसलिये आप यदि न विश्वास करें तो राज विरोधी और वध्यस्थान में लाये गये स्त्री-पुत्रों सहित इस चन्दनदास वैश्य को देखिये । (आकाश में स्थित पुरुष को देख कर) आर्य ! आप क्या पूछते हैं कि चन्दनदास के छूटने का कोई उपाय है ? भाग्यहीन इस चन्दनदास के छूटने का उपाय अब कहां है । हां, फिर भी छूटने का एक उपाय है । वह यह कि चन्दनदास यदि मन्त्रि राक्षस के स्त्रीवर्ग को दे दे । (फिर आकाश में) आप क्या कहते हैं कि शरणागत वत्सल यह चन्दनदास अपने जीवन के लिए

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एष शरणागतवत्सल आत्मनो जीवितस्य कारणेनेदृशमकार्यं न करिष्यतीति ? आर्याः ! यद्येवं, तेन ह्यवधत्तास्य शुभगतिम् । किमिदानीं युष्माकं प्रतीकारविचारेण ?]

(ततः प्रविशति द्वितीयचाण्डालानुगतोवध्यवेषधारी शूलं स्कन्धेनादाय कुटुम्बिन्या पुत्रेण चानुगम्यमानश्चन्दनदासः)

चन्दनदासः—हद्धी !! हद्धी !! अह्मारिसाणं वि कधं णिच्चचारित्तभङ्गभीरुणं चोरिजणोचिदं मलणं पत्तं त्ति । णमो किदन्तस्स । अहवा ण णिसंसाणं उदासीणेसुं इदरेसुं वा विसेसो अत्थि ? तधाहि,—

मोत्तूण आमिसाइं मलणभएण तिणेहिं जीवन्तम् ।
बाहाणं मुद्धहरिणं हन्तुं को णाम णिब्बन्धो ? ॥ ३ ॥

[हा धिक् , हा धिक् ! अस्मादृशानामपि कथं नित्यचारित्रभङ्गभीरुणां चौरज,

---

त्रं समर्पयति ददाति, एतत्पुनरस्ति एष मोक्षोपायो वर्तते । पुनराकाशे, भूयोऽन्तरिक्षे चक्षुः सन्निधाप्य ब्रवीतीत्यर्थः । किं भणथ किं ब्रूथ एषोऽसौ शरणागतवत्सलः शरणापन्नेष्वनुरागवान् आत्मनः स्वस्य जीवितस्य प्राणस्य कारणेन हेतुना ईदृशम् अकार्यं राक्षसकलत्रसमर्पणरूपनिन्दितकर्मेत्यर्थः । न करिष्यति न विधास्यति । आर्याः पूज्याः ! यद्येवं अमात्यराक्षसगृहजनसमर्पणे इत्यर्थः, तेन हि अस्य चन्दनदासस्य शुभगतिं(शरणापन्नरक्षणजन्यसुकृतेन स्वर्लोकप्राप्तिमिति बाह्योऽर्थः)(अमात्यराक्षसद्वारा बन्धनान्मुक्त्या कल्याणप्राप्तिमिति गूढोऽर्थः) अवधत्त जानीत । इदानी साम्प्रतं युष्माकं भवतां प्रतीकारविचारेण मोक्षोपायचिन्तनेन किं न किमपीत्यर्थः ।

तत इति । ततः पुरुषकर्तृकाकाशभाषणोत्तरमित्यर्थः। द्वितीयचाण्डालाऽनुगतोऽपरवधकानुसृतः बध्यवेशधारी रक्तवस्त्रस्रक्चन्दनादिधारणशीलः बध्यभूमिकामादायेत्यर्थः । स्कन्धेन अंशेन शूलं लोहनिर्मिततीक्ष्णसूक्ष्माग्रावयवं शङ्कुमादाय गृहीत्वा कुटुम्बिन्या पत्न्या पुत्रेण तनयेन चाऽनुगम्यमानोऽनुस्रियमाणः चन्दनदासो वैश्यजातीयोऽमात्यराक्षसमित्रं प्रविशति रङ्गशालान्तर्गतो भवति ।

'भार्या जायाथ पुंभूम्नि दाराः स्यात्तु कुटुम्बिनी' इत्यमरः ।

हाधिगिति । वाष्पेण नेत्राश्रुणा सह वर्तमानं सवाष्पं साश्रुपूर्णनेत्रमित्यर्थः ।

ऐसा अनुचित कार्य नहीं करेगा । आर्य ! यदि ऐसा है, तब इस की शुभगति जानिये। अब आपलोगों का उपाय सोचना व्यर्थ है ।

(द्वितीय चाण्डाल के साथ वध्यवेश धारण किये कन्धे से शूल को लिए स्त्री-पुत्रों समेत चन्दनदास का प्रवेश) ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जनानामिव मरणं प्राप्तमिति । नमः कृतान्तस्य । अथवा न नृशंसानामुदासीनेष्वितरेषु वा विशेषोऽस्ति । तथाहि—

मुक्त्वा आमिषाणि मरणभयेन तृणैर्जीवन्तम् ।
व्याधानां मुग्धहरिणं हन्तुं को नाम निर्बन्धः ?] ॥ ३ ॥

(क्रियाविशेषणम्) तद्यथा स्यात्तथा ब्रवीति । हा धिगिति शोकावेगाद्द्विरुक्तिः, हा कष्टे धिक् निन्दा कष्टं निन्दनीयमित्यर्थः । चरित्रमेव चारित्रं तस्य भङ्गश्चारित्रभङ्गस्तस्माच्चारित्रभङ्गात् नित्यं चारित्रभङ्गाद्भीरवो नित्यचारित्रभङ्गभीरवस्तेषां नित्यचारित्रभङ्गभीरूणां प्रतिदिनचरित्रस्खलनभयशालिनाम् अस्मादृशानां मद्विधानामपि जनानामिति शेषः । चौरजनोचितं दस्युजनयोग्यं मरणं मृत्युः प्राप्तमधिगतम् कृतान्तस्य (सम्बन्धविवक्षया षष्ठी) कृतान्ताय यमाय नमोऽस्त्विति शेषः । मादृशानां सच्चरित्रवतामीदृशमरणप्रदो यमो नमस्कार्य इत्यर्थः । अथवा नृशंसानां दुर्जनानां । 'नृशंसो घातुकः क्रूर' इत्यमरः । उदासीनेषु असन्निहितेषु निरपराधेष्विति यावत् वा इतरेषु सन्निहितेषु सापराधेष्वित्यर्थः । न विशेषोऽस्ति न भेदो वर्तते दण्ड्यादण्ड्यविवेको न भवतीत्यर्थः । चाणक्यस्य दण्ड्यादण्ड्यविवेको नास्तीति विशेषे प्रस्तुतेऽभिधातव्ये सामान्येन नृशंसानां नास्ति दण्ड्यादण्ड्यविवेक इत्यप्रस्तुताऽभिधानादत्राप्रस्तुतप्रशंसानामालङ्कारः तदेव दर्शयति तथाहीति ।

मुक्तेति । मरणाद्भयं मरणभयं तेन मरणभयेन मृत्युभीत्या आमिषाणि मत्स्यादीनि मुक्त्वा परित्यज्य तृणैः शष्पैर्जीवन्तं प्राणं धारयन्तं मुग्धहरिणं सरलप्रकृतिं मृगं हन्तुं व्यापादयितुं व्याधानां किरातानां को नाम निर्बन्धः क आग्रहातिशयः । अप्रस्तुतव्याधकर्तृकहरिणव्यापादनोक्त्या प्रस्तुतचाणक्यकर्तृकचन्दनदासव्यापादनावगत्याऽप्रस्तुतप्रशंसालङ्कारः । यथा निर्दोषहरिणव्यापादको व्याधस्तथा निर्दोषपुरुषव्यापादकश्चाणक्योऽपीति बिम्बप्रतिबिम्बभावद्योतनाद्दृष्टान्तालङ्कारः । मृत्युभीत्या हरिणानामामिषत्यागायोगेऽपि तद्योगोक्त्याऽतिशयोक्त्यलङ्कारश्चेत्येषामङ्गाऽङ्गिभावेन साङ्कर्यम् । आर्यावृत्तम् ॥ ३ ॥

चन्दनदासः—हा कष्ट है ! महा कष्ट है !! चरित्र भङ्ग से भयभीत हमारे जैसे पुरुषों को भी चोरों की तरह मरण प्राप्त है । धर्मराज को नमस्कार है । अथवा घातक जनों के लिए दोषी वा निर्दोषी पुरुषों में कोई विशेषता नहीं होती ।

जैसे कि—मरण के भय से मत्स्यादि को छोड़ कर तृण से जीवित रहने वाले सरल हृदय हरिण को मारने के लिये व्याधों का आग्रह क्या नहीं होता ॥ ३ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(समन्तादवलोक्य) भो प्पिअवस्स विण्णुदास ! कधं प्पड़िवअणं वि मे ण प्पड़िवज्जसि त्ति। अधवा, दुल्लहा क्खु पुरिसा, जे इमस्सि काले दिट्ठिवधे वि चिट्ठन्ति। (सबाष्पम्) एदे अह्मप्पिअवअस्सा अस्सु बादमेत्तकेण किद्प्पदीआरा कहं विणिवत्तमाणा परिवड्ढमाणसो· अदीणवद्णा, बाप्फगरुआए दिट्ठीए मं अणुगच्छन्दि [भो प्रियवयस्य विष्णुदास ! कथं प्रतिवचनमपि मे न प्रतिपद्यसे इति । अथवा, दुर्लभाः खल्वेते पुरुषाः येऽस्मिन् काले दृष्टिपथेऽपि तिष्ठन्ति । एतेऽस्मत्प्रियवयस्या अश्रुपातमात्रेण कृतप्रतीकाराः निवर्त्तमानाः परिवर्द्धमानशोकदीनवदनाः वाष्पगुर्व्या दृष्टया माम-नुगच्छन्ति] (इति परिक्रमति)

चाण्डालौ—(परिक्रम्यावलोक्य च) अज्ज चन्दनदास ! आगदोसि वज्झट्ठाणं, ता बिसज्जेहि पणिअणं [आर्य चन्दनदास ! आगतोऽसि वध्य-स्थानं, तत् विसर्ज्जय परिजनम्]

समन्तादिति । समन्तात् सर्वतोऽवलोक्य दृष्ट्वा रङ्गस्थानं सम्यङ्निरीक्ष्ये-त्यर्थः । भो प्रियवयस्य हे प्रियबन्धो ! विष्णुदास ! मे मम प्रतिवचनं प्रत्युत्तरमपि कथं न प्रतिपद्यसे कुतो न ददासि । अथवा ये पुरुषाः अस्मिन् काले दुःखावसरे दृष्टिपथे तिष्ठन्ति चक्षुर्विषयमायान्ति ते पुरुषा दुर्लभाः दुष्प्रापा विरला इति या-वत् । सवाष्पं साश्रुनेत्रं यथा तथा ब्रवीति । एतेऽस्मत्प्रियवयस्याः इमे मम प्रिय-बन्धवः अश्रुपातमात्रेण चक्षुर्जलनिपातेन कृतप्रतीकाराः कृतोपायाः कथमपि निव-र्तमानाः केनापि प्रकारेण गच्छन्तः परिवर्द्धमानशोकदीनवदनाः प्रवृद्धचिन्ताम्ला-नमुखाः वाष्पगुर्व्या दृष्टया अश्रुपूर्णनेत्रेण माम् अनुगच्छन्ति अनुयान्ति मां पश्य-न्तीत्यर्थः ।

परिक्रम्येति । परिक्रम्य सञ्चर्य अवलोक्य समीक्ष्य च आर्यचन्दनदास ! वध्यस्थानं श्मशानम् आगतः प्राप्तोऽसि तत्तस्मात् कारणात् परिजनं परिवारवर्गं

(चारो तरफ देखकर) हा प्रियमित्र विष्णुदास ! क्या मुझको प्रत्युत्तर भी नहीं देते ? अथवा ऐसे समय में जो दृष्टिपथ में रहते हैं, ऐसे पुरुष दुर्लभ ही हैं, केवल रो-ने से प्रतीकार करनेवाले, बढ़े हुए शोक के कारण उदासीन मुखवाले, लौटते हुए ये हमारे मित्र आंसुओं से भरी हुई दृष्टि से मुझको देख रहे हैं । (यह कह कर घूमता है) ।

चाण्डालः—(चारों ओर देख कर) आर्य चन्दनदास ! अब तुम बध्यभूमि में आ गये हो, इस लिये अपने परिजनों को लौटा दो ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चन्दनदासः—अज्जे ! कुडुम्बिणि ! णिवत्तस्स तुमं सपुत्ता । वज्झट्ठाणं क्खु एदं, अदो अवरं अभूमि क्खु अणुगच्छिदुम् [आर्ये ! कुटुम्बिनि ! निवर्त्तस्व त्वं सपुत्रा । वध्यस्थानं खल्वेतत्, अतोऽपरमभूमिः खल्वनुगन्तुम्]

कुटुम्बिनी—(सबाष्पम्) परलोअं पत्थिदो अज्जो, ण उण देसन्तरं. ता अज्जोग्गो दाणीं कुलजनस्स णिवत्तिदुं [परलोकं प्रस्थित आर्यो न पुनर्देशान्तरं, तदयोग्यमिदानीं कुलजनस्य निवर्त्तितुम्]

चन्दनदासः—अज्जे ! सच्चं, मित्तकज्जेण मम विणासो ण पुरिसदोसेण । ता किं हरिसट्ठाणे वि रोइसि त्ति ? [आर्ये ! सत्यं, मित्रकार्येण मम विनाशो, न पुरुषदोषेण तत् किं हर्षस्थानेऽपि रोदिषि इति ?

कुटुम्बिनी—अज्ज जइ एव्वं ता अणुचिदं दाणीं कुलजणेण णिव-

पुत्रकलत्रादिकमित्यर्थः । विसर्जय निवर्त्तय ।

आर्ये इति । आर्ये श्रीमति ! मान्ये इत्यर्थः । त्वं सपुत्रा सतनया निवर्तस्व गच्छ । एतत् वध्यस्थानं खलु श्मशानम् अस्तीति शेषः (खलुशब्दो वाक्यालङ्कारे) अतोऽपरम् एतदग्रे अनुगन्तुम् अनुसर्त्तुं अभूमिः खलु अयुक्तमित्यर्थः ।

सबाष्पमिति । अश्रुपूर्णनेत्रं यथा तथा ब्रवीति । आर्यः पूज्यो भवानिति शेषः । परो लोकः परलोकस्तं परलोकं स्वर्लोकं प्रस्थितो गन्तुमुत्सुकः अस्तीति शेषः । न पुनर्देशान्तरम् अन्यजनपदं प्रस्थित इति शेषः । तत्तस्मात् इदानीं साम्प्रतं कुलजनस्य बन्धुवर्गस्य निवर्त्तितुं त्यक्तुं त्वामिति शेषः । (गन्तुम् अयोग्यम्) अयुक्तम् देशान्तरगन्तुकपत्यनुगमनमयुक्तं स्वर्लोकगन्तुकपत्यनुगमनं तु युक्तमेवेति भावः ।

सत्यमिति । सत्यं यथार्थतो मित्रकार्येण सुहृत्कार्येणेत्यर्थः । मम विनाशो मृत्युः न पुनः पुरुषदोषेण असदाचरणेनेत्यर्थः । तत्तस्मात् हर्षस्थाने आनन्दसमयेऽपि किं किमर्थं रोदिषि आक्रन्दसि ।

चन्दनदासः—आर्ये कुटुम्बिनी ! तू पुत्र के साथ लौट जा यह वध्य भूमि है । इस के आगे जाना अनुचित है ।

कुटुम्बिनी—(आंखों में आंसू डबडबा कर) । आप परलोक को जा रहे हैं न कि देशान्तर को, इस लिये परिजनों का लौटना उचित नहीं है ।

चन्दनदासः—आर्ये ! ठीक है, मित्रकार्य से हमारा विनाश हो रहा है न कि असद्व्यवहार से । इस लिये हर्ष के समय में तुम रोती क्यों हो ?

कुटुम्बिनी—आर्य ! यदि ऐसा है, तो परिजनों का लौटना और भी अनुचित है ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्तिदुं [आर्य ! यद्येवं, तदनुचितमिदानीं कुलजनेन निवर्त्तितुम्]

चन्दनदासः—अध इं ववसिदं अज्जाए? [अथ किं व्यवसितमार्यया]

कुटुम्बिनी—(सवाष्पम्) भत्तुणो चलणमणुगच्छन्तीए अप्पाणुग्गहो होदित्ति । [भर्त्तुश्चरणमनुगच्छन्त्या आत्माऽनुग्रहो भवति]

चन्दनदासः—अज्जे ! दुव्ववसिदं एदं दे, ता दाणीं अज्जाए अअं असुणिदलोअव्ववहारो कुमारो अणुगेह्णिदव्वोत्ति [आर्ये ! दुर्व्यवसितमिदं ते, तदिदानीमार्ययाऽयमश्रुतलोकव्यवहारः कुमारोऽनुग्रहीतव्य इति]

कुटुम्बिनी—अणुगेह्णन्तु णं पसण्णाओ । कुलदेवदाओ । जाद ! पुत्तअ ! पणम अपच्छिमस्स पिदुणो पाएसुं [अनुगृह्णन्त्वेनंप्र सन्नाः

आर्येति । आर्य पूज्य ! यद्येवं सुहृत्कार्यसाधनाय विनाशे सतीत्यर्थः। तत्तदा इदानीं साम्प्रतं कुलजनेन वन्धुवर्गेण निवर्त्तितुम् परित्यक्तुम् अनुचितम् अयुक्तम् विनाशकाले न कुलजनैः परित्यज्य गन्तव्यमित्यर्थः ।

अथेति । अथ मदुक्तश्रवणानन्तरम् आर्यया भवत्या किं व्यवसितं किं निश्चितम् अनुगमननिवर्तनयोर्मध्ये किं स्थिरीकृतमित्यर्थः ।

सवाष्पमिति । वाष्पेण अश्रुणा सहितं सवाष्पम् तद्यथा स्यात्तथा ब्रवीति । भर्त्तुः स्वामिनश्चरणं पादमनुगच्छन्त्या अनुसरन्त्याः (अनुस्मरन्त्याः) स्त्रिया इति शेषः । आत्मनोऽनुग्रहः आत्माऽनुग्रहः भवति जायते । पतिचरणानुगमनशीलाः स्त्रियः स्वर्गलोके महीयन्ते इत्यर्थः ।

दुर्व्यवसितमिति । आर्ये मान्ये ! इदमेतत् ते त्वया (सम्बन्धसामान्ये षष्ठी) दुर्व्यवसितम् अयुक्तम् स्थिरीकृतम् तत्तस्मात् इदानीं साम्प्रतम् आर्यया भवत्या अश्रुतोऽज्ञातो लोकव्यवहार आचारो येन सोऽश्रुतलोकव्यवहारः अज्ञातलोकाचारोऽयमेष कुमारः शिशुः अनुग्रहीतव्यः पालनीयः । शिशुं परित्यज्य मदनुसरणनिश्चयस्तेऽयुक्त एवेति भावः ।

अनुगृह्णन्त्विति । कुलदेवाः कुलदेवताः प्रसन्ना हृष्टाः सन्तः एनं कुमारम्

चन्दनदासः—आखिर तो तुमने क्या निश्चय किया है ?

कुटुम्बिनी—(आंखों में आंसू भर कर) सुनती हूँ कि स्वामी के चरणों का अनुगमन करने से स्त्री को स्वर्गलाभ होता है ।

चन्दनदासः—आर्ये ! तुम्हारा यह विचार ठीक नहीं है । लोकव्यहार को नहीं जाननेवाले इस कुमार का तुम पालन करो ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कुलदेवताः । जात ! पुत्रक ! प्रणम, अपश्चिमस्य पितुः पादयोः]

पुत्रः—(पादयोर्निपत्य) ताद ! मए तादविरहिदेण किं अणुचिट्ठिदव्वं ? [तात ! मया तातविरहितेन किमनुष्ठातव्यम्]

चन्दनदासः—पुत्त ! चाणक्कविरहिदे देसे वसिदव्वं [पुत्र ! चाणक्यविरहिते देशे वस्तव्यम्]

चण्डालौ—अज्ज ! चन्दनदास ! णिखादे शूले, ता दाणीं सज्जो होहि ! [आर्य चन्दनदास ! निखातं शूलं, तदिदानीं सज्जो भव !]

कुटुम्बिनी—अज्जा ! पलित्ताअध पलित्ताअध [आर्याः ! परित्रायध्वं परित्रायध्वम् ।]

अल्पवयस्कं शिशुम् अनुगृह्णन्तु रक्षन्तु । जात पुत्रक ! अपश्चिमस्याऽतः परं द्रष्टुमशक्यस्य पितुस्तातस्य पादयोश्चरणयोः प्रणम पत नमस्कुर्विति यावत् ।

पादयोर्निपत्येति । पादयोश्चरणयोर्निपत्य प्रणम्य, तात पितः ! तातविरहितेन भवद्वियोगिना मया किं कार्यमिति शेषः। अनुष्ठातव्यं विधातव्यम् । भवत्परोक्षे यत्कार्यानुष्ठानेन न कैश्चिदपि वैमनस्यं जायेत सुखञ्च स्यात्तत्सर्वमुपदेश्यमिति भावः ।

पुत्रेति । पुत्र जात ! चाणक्यविरहिते कौटिल्याऽनधिष्ठिते देशे जनपदे वस्तव्यं स्थातव्यम् यस्मिन्देशे कौटिल्यस्य नाधिपत्यं तत्र त्वया स्थातव्यमित्यर्थः । एतेन चाणक्यक्रौर्यमुक्तम् ।

आर्येति । आर्य पूज्य चन्दनदास ! निखातः शूलः भूमौ निक्षिप्तः प्राणहरो लोहशङ्कुः, तत्तस्मात् सज्जो भव आरोढुमुद्यतो भव । प्रणहरणक्षणप्राप्तौ शूले निक्षिप्ते च समययापनं न कार्यमित्यर्थः ।

आर्या इति । आर्याः पूज्याः कुलदेवताः अन्ये दयालवो वा (इति बाह्यता-

---

कुटुम्बिनी—तुम्हारे इस सत्कार्य से प्रसन्न कुलदेवता कुमार की रक्षा करेंगे । पुत्र ! परलोक जाने के लिये तत्पर अपने पिताजी के चरणों को प्रणाम करो ।

पुत्रः—(चरणों पर गिर कर) तात ! आपके न रहनेपर मुझे क्या करना चाहिये ?

चन्दनदासः—पुत्र ! जिस देशका स्वामी चाणक्य न हो, उस देश में जाकर निवास करना ।

चाण्डालः—आर्य ! चन्दनदास पृथ्वी में शूल गाड़ दिया गया । इसलिये अब तैयार हो जाओ ।

कुटुम्बिनी—आर्य ! आप लोग मेरे स्वामी की रक्षा करें, रक्षा करें ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चन्दनदासः—भद्दमुह ! मुहुत्तअं चिट्ठ । अइ जीबिदवच्छले ! किं एत्थ आक्कंदसि ? सग्गं गदा क्खु ते देवा णन्दा, जे दुक्खिदं इत्थीजणं प्पइदिणं अणुकम्पन्ति [भद्रमुख । मुहूर्त्तं तिष्ठ । अयि जीवितवत्सले ! किमत्राक्रन्दसि ? स्वर्गं गताः खलु ते देवाः नन्दाः, ये दुःखितं स्त्रीजनं प्रतिदिनमनुकम्पन्ते]

प्रथमश्चण्डालः—अले वेणुवेत्तका ! गेह्ण इमं चन्दणदासं । घलज्जणो स्सअं ज्जेव गमिस्सदि [अरे वेणुवेत्रक ! गृहाणेमं चन्दनदासम् । गृहजनः स्वयमेव गमिष्यति]

द्वितीयश्चण्डालः—अले वज्जलोमआ ! एसे गेह्णामि [अरे वज्रलोमक ! एष गृह्णामि]

चन्दनदासः—भद्दमुह ! चिट्ठ मुहुत्तअं, जाव पुत्तअं परिस्सआमि (इति पुत्रं परिष्वज्य मूर्ध्नि समाघ्राय) जाद ! पुत्तअ ! अवस्सं भविदव्वे- वि बिणासे मित्तकज्जं समुव्वहमाणो विणासमणुभवागि [भद्रमुख ! तिष्ठ मुहूर्त्तं, यावत् पुत्रकं परिष्वजे । जात ! पुत्रक ! अवश्यम्भवितव्येऽपि विनाशे

त्पर्यम्) अस्मद्रक्षणोद्यता अमात्यराक्षसाः (इति गूढतात्पर्यम्) यूयमिति शेषः। परित्रायध्वं रक्षत मृत्युमुखान्मम पतिमिति शेषः । त्वरावेशाद्‌द्विरुक्तिः ।

भद्रमुखेति । भद्रमुख ! दूतद्वयसम्बोधनम् , मुहूर्त्तं क्षणं तिष्ठ विलम्बस्व, यावदस्मन्मरणकातरामिमामपुष्टहृदयांकुटुम्बिनीं सान्त्वयामीति वाक्यशेषः । अयि जीवितवत्सले मत्प्राणानुरागिणी ! अत्रास्मिन् हर्षस्थाने आक्रन्दसि रोदिषि ? ये नन्दा दुखितं क्लिश्यमानं स्त्रीजनं नारीवर्गं प्रतिदिनं सततम् अनुकम्पन्ते रक्षन्ति रक्षन्तिस्मेत्यर्थः । ते नन्दा नन्दनामानो देवा राजानः स्वर्गंगता सुरगृहातिथयो जाताः नात्र रोदनं विधेयम् देवा एव रक्षिष्यन्तीत्यर्थः ।

यावदिति । यावत् यत्कालपर्यन्तं पुत्रकम् अल्पवयस्कं शिशुं परिष्वजामि

चन्दनदासः—भद्रमुख ! थोड़ी देर और ठहरो । हे प्राणप्रिये ! इस हर्ष के समय रोती क्यों हो ? अब वे राजा नन्द स्वर्ग को चले गये, जो दुःखित स्त्रीजन के ऊपर सदा दया किया करते थे ।

प्रथमचाण्डालः—अरे वेणुवेत्रक ! चन्दनदास को पकड़ तो परिजन लौट जायेंगे ।

द्वितीयचाण्डालः—अरे वज्रलोमक ! ले, यह मैं पकड़ता हूँ ।

चन्दनदासः—भद्रमुख ! थोड़ी देर और ठहरो, मैं पुत्र का आलिङ्गन कर लूँ जात

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मित्रकार्यं समुद्वहमानो विनाशमनुभवामि]

पुत्रः—ताद ! एदं क्खु भणिदव्वं, किं कुलक्कमो क्खु एसो अह्माणं? [तात ! इदं खलु भणितव्यं किं कुलक्रमः खल्वेषाऽस्माकम् ?] (इति पादयोः पतति) ।

चाण्डालः—अले गेह्न वज्जलोमआ ! [अरे गृहाण वज्रलोमक !]

(चाण्डालौ गृहीतश्चन्दनदासमारोपयितुं शूले)

कुटुम्बिनी—(सोरस्ताडम्) अज्जा ! पलित्ताअध पलित्ताअध । [आर्याः ! परित्रायध्वम् परित्रायध्वम्]

(प्रविश्य पटाक्षेपेण राक्षसः) भवति ! न भेतव्यं न भेतव्यं; भो भो शूलायतनाः ! न खलु व्यापादनीयश्चन्दनदासः । कुतः ?—

आलिङ्गामि, इतीत्येतद्वचोऽभिधाय पुत्रं शिशुं परिष्वज्य समालिङ्ग्य मूर्ध्नि शिरसि समाघ्राय घ्रात्वा । जात पुत्रक ! अवश्यंभवितव्येऽपि विनाशे निश्चितेऽपि मरणे मित्रकार्यं सुहृदुपकारं समुद्वहमानः कुर्वन् विनाशं मृत्युम् अनुभवामि प्राप्नोमि । अतस्त्वया शोको न विधेयः । शोकदीनवचनादिविभावैरनुभावैश्च पुष्कलः करुणरसोऽत्र स्थायी)

सोरस्ताडमिति । ताडनं ताडः उरसस्ताड उरस्ताडस्तेन सहितं सोरस्ताडम् तद्यथा स्यात्तथा ब्रवीति (क्रियाविशेषणम्) आर्याः पूज्याः ! परित्रायध्वं रक्षत मृत्युमुखात्पतिमिति शेषः यूयमिति च शेषः ।

प्रविश्य पटाक्षेपेणेति । असूचितपात्रस्य सहसा प्रवेशः पटाक्षेपस्तेन । शूलमायतनं जीवनं येषां ते शूलायतनाः शूलजीविन इत्यर्थः ।

पुत्रक यह अवश्य होने वाला विनाश है तो भी मैं मित्र के कार्य से विनाश को प्राप्त हो रहा हूं ।

पुत्रः—तात ! आप यह बताइये कि मित्रके कार्यवश विनाश को प्राप्त होना क्या यह हमलोगों का कुलागत धर्म है ? यह कह कर पैरों पर गिर पड़ता है ।

चाण्डालः—अरे वज्रलोमक ! पकड़ ।

(दोनों चाण्डाल चन्दनदास को शूल पर चढ़ाने के लिये पकड़ लेते हैं) ।

कुटुम्बिनी—(छाती पीटती हुई) आर्य ! आप लोग मेरे स्वामी की रक्षा करें, । (परदा हटा कर राक्षस का प्रवेश) । आर्य ! मत डरो, मत डरो । अरे शूलाधिकारी पुरुष ! चन्दनदास को मत मार ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

येन स्वामिकुलं रिपोरिव कुलं दृष्टं विनश्यत् पुरा,
मित्राणां व्यसने महोत्सव इव स्वस्थेन येन स्थितम्।
आत्मा यस्य वधाय वः परिभवक्षेत्रीकृतोऽपि प्रियः,
तस्येयं मम मृत्युलोकपदवी वध्यस्रगाबध्यताम् ॥ ४ ॥

चन्दनदासः—(विलोक्य सबाष्पम्) अमच्च ! किं पदं दे ववसिदं ?

येनेति । येन मया राक्षसेन पुरा पूर्वं स्वामिनः कुलं स्वामिकुलं नन्दवंशः रिपोः कुलमिव शत्रोर्वंश इव विनश्यत् क्षयं गच्छत् दृष्टम् अवलोकितम् न तत्र किमपि कृतम् येन मया मित्राणां सुहृदां चन्दनदासप्रभृतीनामित्यर्थः । व्यसने दुःखे महोत्सवे आनन्दकाले इव स्वस्थेन सुस्थिरेण स्थितं न तत्र साहाय्यं कृतम् । यस्य मम आत्मा शरीरम् । 'आत्मा पुंसि स्वभावे च प्रयत्नमनसोरपि । धृतावपि मनीषायां शरीरब्रह्मणोरपीति' मेदिनी । इति प्रामाण्याच्छरीरेप्यात्मशब्दप्रयोगः । वो युष्माकं मौर्याश्रितानामित्यर्थः । परिभवस्य क्षेत्रं परिभवक्षेत्रमपरिभवक्षेत्रं परिभवक्षेत्रं कृतः परिभवक्षेत्रीकृतोऽनादरास्पदीभूतोऽपि वधाय हन्तुमित्यर्थः (तुमर्थाच्च भाववचनादिति चतुर्थी) प्रिय इष्टः, तस्य मम मृत्योर्लोको मृत्युलोकस्तस्य पदवी मृत्युलोकपदवी यमनगरगमनपद्धतिः इयमेषा वध्यस्रग् रक्तपुष्पमाल्यादियुक्तबन्धनदाम आवध्यताम् पिनह्यतां कण्ठे त्वयेति शेषः । चन्दनदासस्थाने मामेव व्यापादयेति भावः । रिपोः कुलमिवेत्यत्र सादृश्यार्थकेवशब्दस्य रिपुकुलस्वामिकुलरूपयोरुपमानोपमेययोर्विनश्यत्तात्मकसाधारणधर्मस्य च सत्त्वाच्छ्रौतीपूर्णोपमालंकारः । एवं महोत्सव इवेत्यत्र तादृशेव शब्दस्य महोत्सवव्यसनयोरुपमानोपमेययोः स्वस्थत्व (अविकृतत्व) रूपसाधारणधर्मस्य चाऽभिधानाच्छ्रौतीपूर्णोपमालंकारः । उपमाद्वयम् । तृतीयपादे परिभवक्षेत्रीकृतोऽपि प्रिय इत्यत्र तिरस्कारपात्रीभूतस्य प्रियत्वाप्रसिद्ध्या विरुद्धवदाभासमानेन विरोधालंकारः । तुरीयपादे वध्यस्रजि मृत्युलोकपदवीत्वसमारोपाद्रूपकालङ्कारश्चेति संसृष्टिः । वैदर्भी रीतिः । प्रसादोगुणः । शार्दूलविक्रीडितं वृत्तम् ॥ ४ ॥

विलोक्यते । सबाष्पमश्रुपूर्णनेत्रं यथा तथा विलोक्य निरीक्ष्य ब्रवीतीति

कैसे कि—जिसने स्वामिकुलको शत्रु के कुल की तरह नाश होता हुआ देखा है, उस समय मैं महान् उत्सव की तरह मित्रों के दुःख में स्थिर रहा । हमारी आत्मा तुम लोगों से दिये हुए पराभव को पाकर भी वध के लिये उद्यत है, तू मुझ निर्दयी के कण्ठमें यमनगर जानेको मार्गरूप यह डोरी डाल ॥ ४ ॥

चन्दनदासः—(देखकर रोता हुआ) अमात्य ! आपने यह क्या किया ?

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

[अमात्य ! किमि ' ते व्यवसितम् ?]

राक्षसः—त्वदीयसुचरितैकदेशस्यानुकरणं किल ।

चन्दनदासः—अमच्च ! सव्वं वि मे णिप्फलं एदं पआसं करन्तेण ण मे पिअं अणुचिट्ठिदं अमच्चेण [अमात्य ! सर्वमपि मे निष्फलमिमं प्रयासं कुर्वता न मे प्रियमनुष्ठितममात्येन]

राक्षसः—सखे चन्दनदास ! कृतमुपालम्भेन, स्वार्थप्रधानो हि जीवलोकः । भद्रमुख! अयमर्थो निवेद्यतां तावद्दुरात्मने चाणक्याय ।

चाण्डालौ—अध कि त्ति ? [अथ किमिति ?]

राक्षसः—दुष्कालेऽपि कलावसज्जनरुचौ प्राणैः परं रक्षता,
नीतं येन यशस्विनातिलघुतामौशीनरीयं यशः ।

शेषः । अमात्य मन्त्रिन् इदमेतत् ते तव त्वयेत्यर्थः । (सम्बन्धसामान्ये षष्ठी) किं व्यवसितम् अनुष्ठितम् शूलमारोपयितुमुद्यतं चण्डालद्वयमवरुध्य मत्प्रतिनिधि-भूतो भवान् किमर्थं वध्यो भवतीत्यर्थः ।

त्वदीयेति । तवेदं त्वदीयं तच्च तत्सुचरितञ्च त्वदीयसुचरितं तस्यैकदेशस्त्व-दीयसुचरितैकदेशस्तस्य त्वदीयसुचरितैकदेशस्य भवत्साधुचरित्रैकभागस्य न तु सम-प्रभागस्येत्यर्थः अनुकरणमनुकल्पोऽस्तीति क्रियाशेषः ।

कृतमुपालम्भेनेति । उपालम्भेन तिरस्कारेण कृतम् अलम् तिरस्कारो न कार्यः यतः स्वस्यार्थः स्वार्थः स प्रधानं मुख्यं यस्मिन् स स्वार्थप्रधानः आत्मप्र-योजनसम्पादनप्रवण इत्यर्थः । जीवलोकः संसारः अस्तीति क्रियाशेषः। प्राणव्यये-नाऽपि सुहृत्त्राणाद्यशःप्राप्तिरूपः स्वार्थो यथा तवाऽभिमतस्तथा ममाऽपि साम्प्रतं प्राणव्ययेन भवतः सुहृत्तमस्य रक्षया यशः प्राप्तिरूपः स्वार्थोऽस्तीति भावः ।

दुष्कालेपीति । असज्जनानां रुचिर्यस्मिन् सोऽसज्जनरुचिस्तस्मिन् असज-

---

राक्षसः—तुम्हारी सच्चरित्रता का यह एक छोटी सी नकल है ।

चन्दनदासः—अमात्य ! हमारे सम्पूर्ण प्रयत्न को निष्फल करते हुए आपने यह भला नहीं किया ।

राक्षसः—मित्र चन्दनदास ! तिरस्कार करना व्यर्थ है, जीवमात्र अपने प्रयोजन के साधन में चतुर है । भद्रमुख ! तुम जाकर उस दुरात्मा चाणक्य से यह कह दो।—

चाण्डालः—वह कौनसी बात है ?

राक्षसः—दुर्जनों की प्रीति उत्पादन करनेवाले पापी कलियुग में भी प्राणों से दूसरे की रक्षा करते हुए यशस्वी चन्दनदास ने शिवि राजाकी कीर्त्तिको भी बहुत लघु बना

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बुद्धानामपि चेष्टितं सुचरितैः क्लिष्टं विशुद्धात्मना,
पूजार्होऽपि स यत्कृते तव गतो वध्यत्वमेषोऽस्मि सः*॥५॥

प्रथमः—अले वेणुवेत्तआ! तुमं दाव सेट्ठिचन्दणदासं गेह्णिअ, इमस्स मसाणपादवस्स छाआए मुहुत्तअं चिट्ठ, जाव अहं अज्ज चाणक्कस णिवेदेमि, जधा गहीदो अमच्चलक्खसो त्ति [अरे वेणुवेत्रक! त्वं तावच्छ्रेष्ठिचन्दनदासं गृहीत्वाऽस्य श्मशानपादपस्य छायायां मुहूर्त्त

नरुचौ दुर्जनाऽनुरागे दुर्जनप्रीत्युत्पादनशील इति यावत्। दुष्काले पापिन्यपि कलौ कलियुगे प्राणैरसुभिः परमन्यं रक्षता पालयता यशस्विना कीर्त्तिशालिना येन चन्दनदासेन उसीनरस्य देशस्यायमधिपतिः औशीनरः तस्येदमौशीनरीयं (गहादिभ्यश्चेति छः प्रत्ययः) शिविनृपतिगतं यशः कीर्त्तिः अतिलघुतामत्यन्तानादरास्पदतां नीतं प्रापितम्। तथा, विशुद्ध आत्मा यस्य स विशुद्धात्मा तेन विशुद्धात्मना पवित्रहृदयेन निर्दुष्टस्वभावेनेति यावत्। येन चन्दनदासेन सुचरितैः साधुचरित्रैः (पुण्यकर्मभिः) (करणतृतीयान्तमिदम्) बुद्धानां प्राणिमात्रेषु दयावतां सुगतानामपि। 'सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः' इत्यमरः। चेष्टितं व्यापारः क्लिष्टं तिरस्कृतम्, (बुद्धानामतिदयाशालित्वं सुप्रसिद्धम्) स चन्दनदासः पूजाऽर्होऽर्च्योऽपि यत्कृते यस्य मम (राक्षसस्य) रक्षणायेत्यर्थः। गृहजनरक्षणद्वारेति शेषः। त्वं शत्रुत्वं गतः प्राप्तः स एष राक्षसः अहमस्मि। लोकानां प्रायशः कलियुगे स्वार्थप्रधानत्वेऽपि शरणागतवात्सल्यात्सत्ययुगे शरणागतवत्सलाच्छिविनृपतेरप्यस्याऽधिकमहत्त्वम् बुद्धादप्यतिशयदयाशालित्वञ्चेति भावः। एकस्यैव यच्छब्दवाच्यस्य चन्दनदासरूपकर्तृकारकस्य नी-क्लिशगम् धातुवाच्यक्रियासु सम्बन्धाद्दीपकालंकारः। शिवि-बुद्धोभयाऽपेक्षयाऽऽधिक्योक्त्या व्यतिरेकालङ्कारः। यः पूजार्होऽपि स तव वध्यं गतः इत्यतः पूजार्हस्य वध्यत्वेन परिवर्तनात् (परिवर्तनप्रतीत्या) परिवृत्यलंकारश्चेत्येषां साङ्कर्यम्। वैदर्भी रीतिः। माधुर्यगुणः। शार्दूलविक्रीडितं वृत्तम्॥ ५॥

दिया है। पवित्र हृदय वाले जिस चन्दनदास ने सुचरित द्वारा बौद्ध संन्यासियों के भी व्यपार को तिरस्कृत कर दिया वह चन्दनदास पूजायोग्य है। जिस के लिये यह तुम्हारा वध्य होने को तैयार है, वही यह राक्षस नाम का मैं हूं॥ ६॥

प्रथमचाण्डालः—अरे वेणुवेत्रक! तब तक तु श्रेष्ठी चन्दनदास को पकड़ कर इस

(*) स्वजीवार्पणद्वाराऽन्यरक्षणकर्तृचन्दनदासे शिविबुद्धिसादृश्यं राक्षसेन सूचितम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तिष्ठ, यावदार्यचाणक्यस्य निवेदयामि, यथा गृहीतोऽमात्यराक्षस इति]

द्वितीयः—अले वज्जलोमआ! एव्वं होदु [अरे वज्रलोमक! एवं भवतु]

(इति सपुत्रदारेण चन्दनदासेन सह निष्क्रान्तः)

प्रथमः—(राक्षसेन सह परिक्रम्य) के के एत्थ दुआलिआणं ? णिवेदेध दाव णन्दकुलसेण्णसञ्चअचुण्णकुलिसस्स मौलिअकुलपदिट्ठाबिदधम्मसञ्चअस्स अज्जचाणक्कस्स [कः कोऽत्र दौवारिकाणाम् ? निवेदयत तावत् , नन्दकुलसैन्यसञ्चयचूर्णनकुलिशस्य मौर्यकुलप्रतिष्ठापितधर्मसञ्चयस्यार्यचाणक्यस्य]

राक्षसः—(स्वगतम्) एतदपि नाम राक्षसेन श्रोतव्यम् !

चण्डालः—एसो क्खु अज्जणीदि संजमिदबुद्धिपलिसले गहीदे अमच्चलक्खसे त्ति [एषखल्वार्यनीतिसयमितबुद्धिपरिसरो गृहीतोऽमात्यराक्षस इति]

कः कोऽत्रेऽस्ति । अत्र द्वारे दौवारिकाणां प्रहरिणां मध्ये कः कोऽस्ति, तावत् प्रथमं निवेदयत विज्ञापयत यूयमिति शेषः, नन्दानां कुलं तस्य सैन्यसञ्चयस्तस्यचूर्णनं तस्य (तस्मै) कुलिशं तस्य नन्दकुलसैन्यसञ्चयचूर्णनकुलिशस्य 'नन्दवंशसैन्यवर्गविध्वंसवज्रस्य, मौर्यस्य कुलं मौर्यकुलं तत्र प्रतिष्ठापितो धर्मसञ्चयो येन स तथोक्तस्तस्य मौर्यकुलप्रतिष्ठापितधर्मसञ्चयस्य चन्द्रगुप्तवंशस्थिरीकृतसुकृतपुञ्जस्य आर्यचाणक्यस्य पूज्यकौटिल्यस्य, (सम्बन्धविवक्षायां षष्ठी) उक्तविशेषणविशिष्टाय चाणक्याय विज्ञापयत यूयमिदं मदुक्तमित्यर्थः ।

एष खल्विति । आर्यस्य नीतिरार्यनीतिस्तया संयमितो बुद्धिपरिसरो यस्य स

श्मशान भूमिके वृक्ष की छाया में कुछ देर ठहर । मैं आर्य चाणक्य को यह खबर देता हूँ कि आमात्य राक्षस पकड़ लिया गया ।

द्वितीय चाण्डालः—अरे वज्रलोमक ! ऐसा ही सही ।

(इतना कहकर स्त्री-पुत्र से युक्त चन्दनदास के साथ चला जाता है)।

प्रथम चाण्डालः— (राक्षस के साथ घूमकर) यहां पर कौनसा द्वारपाल है ? नन्दकुल के सेनासमूह को नाश करने में वज्र के समान और मौर्यकुल में धर्मसमूह को स्थापित करनेवाले आर्य चाणक्य से पहले यह समाचार कहना ।

राक्षसः—(मन ही मन) क्या यह बात भी राक्षस को सुनना चाहिए ।

चाण्डालः—आपकी नीति से स्थगित बुद्धिप्रभाव वाला यह मंत्रि राक्षस पकड़ लिया गया है ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(ततः प्रविशति जवनिकावृतशरीरो मुखमात्रदृश्यः सहर्षश्चाणक्यः)

चाणक्यः—भद्र ! कथय कथय !—

केनोत्तुङ्गशिखाकलापकपिलो बद्धः पटान्ते शिखी ?
पाशैः केन सदागतेरगतिता सद्यः समासादिता ? ।
केनानेकपदानवासितसटः सिंहोऽर्पितः पञ्जरे ?

आर्यनीतिसंयमितबुद्धिपरिसरः चाणक्यनयकुण्ठितमतिवैशद्यः एष अमात्यराक्षसो गृहीतो धृतः ।

तत इति । ततस्तदुत्तरं चाण्डालनिवेदनोत्तरमित्यर्थः। जवनिकयाऽऽवृतं शरीरं यस्य स जवनिकावृतशरीरः तिरस्करिण्याच्छादितकायः मुखमात्रदृश्यः आननमात्राऽनाच्छादितः सहर्षः सानन्दश्चाणक्यो विष्णुगुप्तः प्रविशति रङ्गस्थानवर्त्ती भवतीत्यर्थः ।

केनेति । उत्तुङ्गाश्च ताः शिखा उत्तुङ्गशिखास्तासां कलाप उत्तुङ्गशिखाकलापस्तेन कपिलः उत्तुङ्गशिखाकलापकपिलः ऊर्ध्वोत्थितज्वालासमूहपिङ्गलः सुप्रज्वलित इत्यर्थः । शिखी वह्निः केन जनेन पटान्ते वस्त्रप्रान्ते बद्धः संयमितः धृत इति यावत् । (पटान्त इत्यत्र सप्तम्याधारविवक्षणादिति बोध्यम्) सदेत्यव्ययम् । सदा सततं गतिर्गमनं यस्य स तथोक्तस्तस्य सदागतेः सततगमनशीलस्य वायोरित्यर्थः।

'मातरिश्वा सदागतिरि'त्यमरः अविद्यमाना गतिर्यस्य सोऽगतिः तस्त भावोऽगतिता गतिनिरोध इत्यर्थः। केन महापुरुषेण सद्यः अकाण्डे पाशैः रज्जुभिः समासादिता कृता । अनेकाभ्यां मुखशुण्डाभ्यां पिबन्तीत्यनेकपा हस्तिनस्तेषां द्रानं मदस्तेन वासिता सुरभीकृता सटा यस्य सोऽनेकपदानवासितसटः ।

'दन्ती दन्तावलो हस्ती द्विरदोऽनेकपो द्विपः' इत्यमरः । 'सटाजटा केसरयोरि'तिचामरः ।

द्विरदमदजलसुरभीकृतजटः सिंहो हरिः केन पराक्रमशालिना पुरुषेण पञ्जरे पश्वादिबन्धनागारे अर्पितः स्थापितो बद्ध इति यावत् । चलाश्चञ्चला एके महान्तो

(हर्ष के साथ जवनिका से मुखमात्र बाहर किये हुए चाणक्य का प्रवेश)

चाणक्यः—भद्र ! कहो कहो !—

किसमहापुरुष ने ऊंची शिखासमूह से पिङ्गल वर्ण के अग्नि को वस्त्र में एक तरफ बांधा है ? किस महापुरुष ने हठात् वायु की गति रोका है ? किस महापुरुष ने हाथी के मदजल से सुगन्धित जटावाले सिंह को पिंजरें में पकड़ रक्खा है ? किस महापुरुष

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भीमः केन चलैकनक्रमकरो दोर्भ्यां प्रतीर्णोऽर्णवः(१) ॥ ६ ॥

चाण्डालः—णं णीदिणिउणवुद्धिणा अज्जेण ज्जेव [ननु नीतिनिपुणबुद्धिनार्येणैव]

चाणक्यः—भद्र ! मा मैवम् । नन्दकुलद्वेषिणा दैवेनेति ब्रूहि ।

नक्रा मकराश्च यस्मिन् स चलैकनक्रमकरः बहुलनक्रमकरजलजन्तुः । अत एव भीमो भीषणोऽर्णवः समुद्रः केन पुरुषेण दोर्भ्यां बाहुभ्यां प्रतीर्णः पारं गतः । वस्त्राञ्चलेन वह्निग्रहणमिव दाम्ना वायोर्बन्धनमिव पञ्जरे सिंहस्थापनमिव बाहुभ्यामर्णवतरणमिव दुष्करमपि राक्षससंयमनं मयैव कृतमिति भावः । अप्रस्तुतवह्निग्रहणादिवर्णनात्प्रस्तुतराक्षसग्रहणावगमादप्रस्तुतप्रशंसाऽलंकारः । पटान्तेन वह्नेर्दाम्ना वायोः पञ्जरेण सिंहस्यार्णवेन बाहुतरणस्य चाऽयोगेऽपि तत्तद्योगोक्त्याऽसम्बन्धे सम्बन्धरूपाऽतिशयोक्त्यनुप्राणितः पटान्तेन वह्निग्रहणवत् दाम्ना वायुनिरोधवत् पञ्जरेण सिंहस्थापनवत् बाहुभ्यामर्णवतरणवत् राक्षसग्रहणमसम्भवीति बिम्बप्रतिबिम्बभाव (सादृश्य) प्रतीत्या मालानिदर्शनाऽलंकारश्चेत्येषामङ्गाङ्गिभावेन साङ्कर्यम् । मयैव पटान्ते शिखी बद्धो मयैव वायोर्गतिर्निरुद्धा मयैव पञ्जरे सिंहः स्थापितो मयैव बाहुभ्यामर्णवः प्रतीर्ण इत्यस्य फलितत्वादेकस्यैव मयेति कर्तृकारकस्य बन्धननिरोधनस्थापन-तरणक्रियासु सम्बन्धादार्थिकदीपकालंकारोऽपि । केनेति पदस्य चतुर्षु पादेषु सत्त्वादनवीकृतत्वं दोषः । अवश्यस्य राक्षसस्य वशीकरणादात्मनोऽभिमानः सूचितः (अद्भुतार्थप्राप्तिरूपगूहनं नामाङ्गमिदम्) शार्दूलवृत्तम् ॥ ६ ॥

नन्विति । ननु भोः ! नीतौ राजनीतौ निपुणा कुशला बुद्धिर्मतिर्यस्य स नीतिनिपुणबुद्धिस्तेन नीतिनिपुणबुद्धिना राजनीतिकुशलमतिना आर्येण पूज्येन भवतैव केनोत्तुङ्गशिखेत्याद्युक्तकार्यं कृतमिति शेषः ।

मा मैवमिति । एवं पूर्वोक्तवाक्यं मा नैव वक्तव्यं त्वयेति शेषः । किन्तु नन्दानां कुलं नन्दकुलं तद्विद्वेष्टीति नन्दकुलविद्वेषी तेन नन्दकुलविद्वेषिणा नन्दवंश-

---

ने बड़े बड़े नक्र तथा मकर से भयानक समुद्र को हाथों से तैर कर पार किया है ॥ ६ ॥

चाण्डालः—राजनीति में निपुण बुद्धिवाले आप ही ने ।

चाणक्यः—भद्र ! ऐसा मत कहो । नन्दकुल के विरोधी भाग्य ने ऐसा किया है, सो कहो ।

---

(१) नन्दकुलविनाशपूर्वकमौर्याधिपत्यं स्थिरीकृत्य सर्वथा दुष्करस्यापि राक्षसायत्तीकरणस्य संपादनाच्चाणक्येनात्मश्लाघापराकाष्ठा दर्शिता ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राक्षसः—(विलोक्य स्वगतम्) अये!! अयं स दुरात्मा, अथवा अयं स महात्मा कौटिल्यः । यतः,—

आकरः सर्वशास्त्राणां, रत्नानामिव सागरः ।
गुणैर्न परितुष्यामो , यस्य मत्सरिणो वयम् ॥ ७ ॥

चाणक्यः—(विलोक्य सहर्षम्) अये !! अयममात्यराक्षसः येनमहात्मना—

गुरुभिः कल्पनाक्लेशैर्दीर्घजागरहेतुभिः ।
चिरमायासिता सेना वृषलस्य, मतिश्च मे ॥ ८ ॥

विनाशकेन दैवेन भाग्येन केनोत्तुङ्गशिखेत्याद्युक्तकार्यं कृतमितीत्येव ब्रूहि कथय । दैवेन नन्दवंशे क्षयं नीते निराश्रयत्वादेषोऽयं राक्षसो वश्यतां गत इति भावः ।

आकर इति । अयं चाणक्य इत्याक्षेप्यम् सागरोऽर्णवो रत्नानां पद्मरागादीनां मणीनामिव सर्वशास्त्राणां निखिलशास्त्रज्ञानानामित्यर्थः । आकरः उत्पत्तिस्थानम् अस्तीति शेषः । यस्य चाणक्यस्य गुणैश्चातुर्यादिभिः मत्सरिणोऽन्यशुभद्वेषिणो वयं न परितुष्यामो न प्रीतिमाप्नुमः । मत्सरिणां गुणवत्स्वपि दोषोद्घाटनस्वभावप्रसिद्धिरिति भावः रत्नानामिवेत्यत्र सादृश्यार्थकेवशब्दसत्त्वादुपमा । वस्तुतश्चाणक्ये सर्वशास्त्राकरभिन्नत्वेऽप्यभिन्नत्वारोपाद्रूपकञ्चेत्यलङ्कारद्वयसंसृष्टिः । अनुष्टुप् वृत्तम् ॥ ७ ॥

गुरुभिरिति । (येन महात्मनेति पदद्वयं गद्यस्थमादायाऽन्वयः कार्यः) येन महात्मना महत्त्वशालिना भवतेति शेषः । दीर्घश्चासौ जागरो दीर्घजागरस्तस्य हेतवस्तैर्दीर्घजागरहेतुभिः, यद्वा दीर्घा जागरा हेतवो येषां ते दीर्घजागरहेतवस्तैर्दीर्घजागरहेतुभिः चिरनिद्रोच्छेदकारणैः गुरुभिर्महद्भिः कल्पनाक्लेशैः कर्त्तव्याऽकर्त्तव्योपायरचनोत्पन्नदुःखैः वृषलस्य मौर्यस्य सेना चमूः मे मम मतिर्बुद्धिश्च चिरं चिरकालम-

---

राक्षसः—(देख कर मन ही मन) अये !! यह वही दुष्ट है, अथवा यह वही महात्मा चाणक्य है ?

क्योंकि—जैसे समुद्र रत्नों का उत्पत्ति स्थान है, उसी तरह यह चाणक्य सब शास्त्रों का उत्पत्तिस्थान है, जिस चाणक्य के चातुर्य्यादि गुणों से ईर्ष्या करने वाले हमलोग प्रीति को नहीं प्राप्त करते ॥ ७ ॥

चाणक्यः—(देखकर खुशी से) अये !! यह राक्षस हैं—

जिस महात्मा द्वारा दीर्घ जागरणहेतुक बड़े कल्पनाजनित दुःखों से चन्द्रगुप्त की सेना और हमारी बुद्धि बहुत दिन से दुःखित है ॥ ८ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(जवनिकामपनीयोपसृत्य च) भो भो अमात्यराक्षस ! विष्णुगुप्तोऽभिवादयते ।

राक्षसः—(स्वगतम्) अमात्य इति लज्जाकरमिदानीं विशेषणपदम् (प्रकाशम्) भो भो विष्णुगुप्त ! न मां श्वपाकस्पर्शदूषितं स्प्रष्टुमर्हसि ।

चाणक्यः—अमात्यराक्षस ! नायं श्वपाकः । अयं खलु दृष्टपूर्वः एव भवता सिद्धार्थकनामा राजपुरुषः योऽयमसौ द्वितीयः, सोपि सुसिद्धार्थकनामा राजपुरुष एव । ताभ्यामेव सह सौहार्दमुत्पाद्य, शकटदासोऽपि तपस्वी तं तादृशमजानन्नेव कपटलेखं मयैव लेखितः।

भिव्याप्य आयासिता क्लेशिता अस्तीति शेषः । यद्बुद्धिमहिम्ना मम वृषलाऽनीकस्य च चिरमायासोऽभूदिति भावः । वृषलसेनाऽस्मन्मत्योभयोः प्रस्तुतयोरायासरूपैकक्रियान्वितत्वेन तुल्ययोगिताऽलङ्कारः । तदुक्तं दर्पणे—

पदार्थानां प्रस्तुतानामन्येषां वा यदा भवेत् ।
एकधर्मोऽभिसम्बन्धः स्यात्तदा तुल्ययोगिता ॥ इति ।

प्रस्तुतानां प्रकृतानाम् (प्राकरणिकानाम्) अन्येषामप्रस्तुतानां वा यदा एकधर्मेण गुणक्रियाऽन्यतररूपेणाऽभिसम्बन्धो योगः स्यात्तदा तुल्ययोगिताऽलङ्कारो भवतीति कारिकार्थः । अनुष्टुप् वृत्तम् । (इदं दुःखप्रशमनं समयः) ॥८॥

जवनिकामिति । जवनिकां तिरस्करिणीमपनीयाऽपसार्य उपसृत्य समीपमेत्य च ब्रवीतीति शेषः । विष्णुगुप्तश्चाणक्योऽभिवादयते स्तौति भवन्तमिति शेषः। स्वनामग्रहणपुरस्सरमेवाभिवादनं स्मृत्युक्तमिति विष्णुगुप्तेति स्वनामोक्तिरित्यवसेयम् ।

(परदा हटा कर और समीप जाकर) अमात्य राक्षस ! विष्णुगुप्त आप को प्रणाम करता है ।

राक्षसः—(मन ही मन) अमात्य यह विशेषण मेरे लिए अब लज्जाप्रद सा मालूम होता है (जोर से) भो भो विष्णुगुप्त ! आप चाण्डाल के स्पर्श से दूषित मेरे शरीर का स्पर्श न करें ।

चाणक्यः—अमात्यराक्षस ! यह चाण्डाल नहीं है, किन्तु यह आपका पहिले पहचाना हुआ सिद्धार्थक नामका राजपुरुष है, जो यह दूसरा है वह भी सुसिद्धार्थक नामका राजपुरुष ही है । इन दोनों के साथ मैत्री कर उस गुप्तकपट नहीं जानने वाले तपस्वी शकटदास के द्वारा मैंने ही कपटलेख लिखवाया था ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राक्षसः—(आत्मगतम्) दिष्ट्या, शकटदासं प्रत्यपनीतो विकल्पः।

चाणक्यः—किं बहुना, सङ्क्षेपतः कथयामि ।

भृत्या भद्रभटादयः, स च तथा लेखः, स सिद्धार्थकः,
तच्चालङ्करणत्रयं, स भवतो मित्रं भदन्तः किल ।
जीर्णोद्यानगतः सचार्त्तपुरुषः, क्लेशः स च श्रेष्ठिनः,
सर्वंमे वृषलस्य वीर ! भवता संयोगमिच्छोर्नयः ॥ ९ ॥

आत्मगतमिति । आत्मगतमनतिस्पष्टं यथा तथा ब्रवीतीति शेषः । दिष्ट्या भाग्येनेत्यर्थः (दिष्ट्येति तृतीयान्तप्रतिरूपकमव्ययं हर्षसूचकम्) शकटदासं प्रत्यपनीतो विकल्पः शकटदासलिखितं पत्रं न वेत्येवंरूपः सन्देहोऽपहृत इत्यर्थः, शकटदासोऽपीत्याद्युक्तचाणक्योक्तेरिति शेषः ।

भृत्या इति । भद्रभट आदिर्येषां ते भद्रभटादयः भद्रभटप्रभृतयः भृत्या अनुचरा मदीया इति शेषः । (ये भद्रभटप्रभृतयोऽनुचरास्ते साम्प्रतं मौर्ये विरक्ताः सन्तो मलयकेतुमाश्रित्य गजाश्वाध्यक्षादयः सन्तीत्यर्थः) स च तथालेखः कृत्रिमपत्रम् (कपटेन शकटदासद्वारा मया लेखितः इत्यर्थः स च सिद्धार्थकः (हन्यमानमपवाह्य शकटदासं भवन्तमाश्रित्य इत्यर्थः) तच्चालङ्करणत्रयं (पर्वतेश्वरधृतपूर्वं वणिजो भवता क्रीतमित्यर्थः) य इति प्रागध्याहर्तव्यं यो भवतोऽलीकं मित्रं भदन्तः स च जीवसिद्धिनामधेयो बौद्धसन्न्यासीत्यर्थः) (अलीकाऽर्थेऽत्र किलशब्दः) जीर्णोद्यानगतः पुरातनोपवनप्राप्तः स च आर्त्तपुरुषः (बन्धुविरहमसह्यमवगत्यात्मविनाशोद्यत इत्यर्थः) स च श्रेष्ठिनो वणिजश्चन्दनदासस्य क्लेशो दुःखम् हे वीर ! पराक्रमशालिन् एतत्सर्वं भवता त्वया सह वृषलस्य मौर्यस्य संयोगं सन्धिमिच्छोरभिलाषुकस्य मे मम नयो नीतिरस्तीति शेषः । भवन्तं चन्द्रगुप्तामात्यपदारूढं कर्तुमेवैतत्सर्वं मया कृतमित्यर्थः ।

राक्षसः—(मन ही मन) हर्ष की बात है, शकटदास से लेखका सन्देह दूर हो गया।

चाणक्यः—बहुत कहने से क्या प्रयोजन, संक्षेप में कहता हूं ।

सम्प्रति मलयकेतु के पास रहने वाले भद्रभट आदि हमारे ही अनुचर हैं, वह लेख शकटदास के द्वारा मैंने लिखवाया है, वे तीनों अलङ्करण पर्वतेश्वर वाले ही हैं, वह जीवसिद्धि नामका बौद्ध सन्यासी आपका कपटमित्र है । प्राचीन वाटिका में गया हुआ वह आर्त्तपुरुष मेरा ही चर था और चन्दनदास को दुःख मैंने ही दिया है । हे- वीर ! आपके साथ चन्द्रगुप्त का सम्बन्ध कराने की इच्छा से मैंने ही ये सब नीति करती है ॥ ९ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(इत्यर्द्धोक्ते लज्जां नाटयति)

तदेष वृषलस्त्वां द्रष्टुमागच्छति । पश्यैनम् ।

राक्षसः—(स्वगतम्) का गतिः ? (प्रकाशम्) एष पश्यामि ।

(ततः प्रविशति राजा विभवतश्च परिवारः)

राजा—(स्वगतम्) विनैव युद्धादार्येण पराजितं दुर्जयं रिपुकुलमिति, लज्जित इवास्मि । मम हि—

फलयोगमवाप्य सायकानामनियोगेन विलक्षतां गतानाम् ।

बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथातथम् ।
एकार्थ्यमुपनीयन्ते यत्र निर्वहणं हि तत् ॥

इति दर्पणोक्तलक्षणात् (निर्वहणनामाऽङ्गमिदम्)। तुर्यपादगतवाक्यार्थस्याऽस्मन्नीतेः पादत्रयगतवाक्यार्थेषु हेतुविधयोक्त्या वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः । पादत्रयगतविशेषार्थानां तुर्यपादगतसामान्यार्थेन समर्थनादर्थान्तरन्यासाऽलङ्कारो वा । शार्दूलविक्रीडितं वृत्तम् ॥ ९ ॥

तत इति । ततस्तदुत्तरं विभवेनेति विभवतः (तृतीयान्तात्तसिप्रत्ययः) ऐश्वर्याऽनुसारेणेत्यर्थः परिवारोऽनुचरश्च प्रविशति रङ्गस्थानमिति शेषः ।

स्वगतमिति । अनतिस्पष्टं वचो ब्रवीति मौर्य इत्यर्थः । आर्येण पूज्येन चाणक्येनेति शेषः । युद्धाद्विनैव संग्राममन्तरैव दुर्जयं दुःखेन जेतुं योग्यं रिपुकुलं शत्रुसैन्यं पराजितं पराभूतं वशीकृतमिति यावत् । इत्यतो हेतोःलज्जितस्त्रपायुक्त इवाऽस्मि । लज्जा जाताऽस्येति लज्जितः 'तारकादित्वादितच्, युद्धं विनैव शत्रुजयो लज्जाहेतुः ।

फलयोगमिति । फलयोगं लौहमयाप्रकीलसम्बन्धमवाप्य प्राप्यापि अनियोगेनाऽप्रेरणया विलक्षतामशरव्यतां गतानां प्राप्तानां शुचेव विलक्षताप्राप्तिजन्य-

---

(आधा वाक्य कहकर लज्जित होता है)

इसीलिये वह चन्द्रगुप्त आप को देखने के लिये इधर ही आता है । उसको देखिये ।

राक्षसः—(मनही मन) क्या उपाय है।? (जोरसे) मैं देखरहा हूं ।

(राजा और उस के अनुगामी प्रवेश करते हैं)

राजा—(मन ही मन) युद्ध के विना ही महात्मा चाणक्य ने प्रबल शत्रुकुल को जीत लिया । इस लिये मैं लज्जित की तरह हूं ।

लोहमय कील के सम्बन्ध को पाकर विना प्रेरणाही लक्ष्यको नहीं प्राप्त करनेवाले

 Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

न शुचेव भवत्यधोमुखानां, निजतूणीशयनव्रतं प्रतुष्ट्यै ॥ १० ॥

अथवा—

विगुणीकृतकार्मुकोऽपि जेतुं, भुवि जेतव्यमसौ समर्थ एव ।
स्वपतोऽपि ममेव यस्य तन्त्रे, गुरवो जाग्रति कार्यजागरूकाः॥११॥

दुःखेनेव अधोमुखानामानताग्रभागानां सायकानां मम बाणानां निजतूणीशयनव्रतं स्वेषुधिनिश्चलावस्थितिनियमो प्रतुष्ट्यै मम प्रीत्यै न भवतीति शेषः, (अत्र गद्यस्थममपदसम्बन्धो बोध्यः । तस्याप्युक्तविशेषणविशिष्टत्वमवधेयम् । तत्संघटनप्रकारश्चेत्थम्) फलयोगं कार्यसिद्धिमवाप्य प्राप्यापि अनियोगेन नियोगाऽयोग्यत्वेन विलक्षतां गतानां लज्जावत्तां प्राप्तानां शुचेव अनियोगजनितदुःखेनेव अधोमुखानाम् नतास्यानां मम अस्माकमित्यर्थः । निजतूणीशयनव्रतं स्वगृहे निर्व्यापारतयाऽवस्थानं प्रतुष्ट्यै आत्मनः प्रीत्यै न भवतीति शेषः । शुचेवेत्यत्रोत्प्रेक्षार्थकेवशब्दसत्वात् वाच्योत्प्रेक्षालङ्कारः । विशेषणानां श्लिष्टतया श्लेषानुप्राणितगम्योपमालंकारश्चेत्यनयोरङ्गाङ्गिभावेन साङ्कर्यम् । मालभारिणीवृत्तम् । "विषमे ससजा यदा गुरू चेत् सभरा येन तु मालभारिणीयम्" । इति तल्लक्षणम् ॥ १० ॥

विगुणीकृतेति । स्वपतोऽपि शयानस्याऽपि त्यक्तराज्यकार्यस्याऽपीत्यर्थः । यस्यनृपतेः ममेव तन्त्रे राष्ट्रचिन्तने । "तन्त्रः स्वराष्ट्रचिन्तायामावापः परिचिन्तने" । इति वैज०को० । कार्ये जागरूकाः कार्यजागरूकाः कर्त्तव्यकर्मसावधानाः सन्तो गुरवो मन्त्रिप्रधानाः जाग्रति सततं प्रयत्नं कुर्वन्ति प्रतिविधानोद्यताः सन्तीति यावत् । असावेष नृपतिः विगुणीकृतं कार्मुकं येन यस्य वा स विगुणीकृतकार्मुकः मौर्वीहीनशरासनोऽपि सन् भुवि पृथिव्यां जेतव्यं जेतुं योग्यं शत्रुमित्यर्थः । जेतुं पराभवितुं समर्थ एव शक्त एव अहमिवेति शेषः । सचिवन्यस्तराज्यभारस्त्यक्तधनुष्कोऽहमिवाऽन्योऽपि तादृशो नृपोऽरिं विजेतुं भुवि समर्थ एवेति भावः । उत्तरार्द्धे पूर्वार्द्धे हेतुरिति वाक्यार्थहेतुकं काव्यलिङ्गमलंकारः । ममेवेत्यत्रोपमा । रणव्यापारात्मकजयकारणेऽसत्यपि जयसिद्धेरुक्त्योक्तोभयालङ्कारोत्थापितो विभावनाऽल-

सोच से जैसे नीचे मुखकिये हुए हमारे बाणों का तर्कस में रहना हमारे सन्तोष के लिये नहीं है ॥ १० ॥

अथवा—छोड़े हुये राज्यकार्य वाले हमारे राज्यचिन्तन और कर्त्तव्याकर्तव्यविचारमें चतुर गुरु आर्य चाणक्य सदा उद्यत हैं, तो मैं धनुष को त्याग कर भी पृथ्वी में शत्रुओं को जीतने में समर्थ हूं ॥ ११ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(चाणक्यमुपसृत्य) आर्य ! चन्द्रगुप्तः प्रणमति ।

चाणक्यः—वृषल ! सम्पन्नास्ते सर्वाशिषः । तदभिवादयस्व तत्रभवन्तममात्यराक्षसम् ; पैतृकस्तवायममात्यमुख्यः ।

राक्षसः—(स्वगतम्) योजितोऽनेन सम्बन्धः ।

राजा—(राक्षसमुपसृत्य) आर्य ! चन्द्रगुप्तोऽहमभिवादये ।

राक्षसः—(विलोक्य स्वगतम्) अये ! अयं चन्द्रगुप्तः !! य एषः—

वाल एवहि लोकेन सम्भावितमहोदयः ।
क्रमेणारूढवान् राज्यं, यूथैश्वर्यमिव द्विपः ॥ १२ ॥

(प्रकाशम्) राजन् ! विजयस्व ।

राजा—आर्य!—

ङ्कारश्चेत्येषामङ्गाङ्गिभावेन सङ्करः । वृत्तं पूर्वोक्तमेव । औपच्छन्दसिकमित्यस्य नामान्तरमिति ध्येयम् । (इयं वाञ्छितार्थप्राप्तिरानन्दः) ॥ ११ ॥

वाल एवेति । (य एष इति गद्यस्थपदमन्वयि) य एष चन्द्रगुप्तो वाल एव शिशुरेव लोकेन जनेन सम्भावितमहोदयः अनुमितविशिष्टाभ्युदयः य एष चन्द्रगुप्तः यूथैश्वर्यं यूथाऽऽधिपत्यं द्विपो हस्तीव क्रमेण राज्यमारूढवान् प्राप्तवान् । करिशावको यथा कालक्रमेण यूथपतित्वं प्राप्नोति तथैव चन्द्रगुप्तोऽपि राज्यमाप्तवानित्यर्थः । द्विप-मौर्ययोरुपमानोपमेययोरिवशब्दस्योपमानवाचकस्य सम्भावितमहोदयत्वात्मकसाधर्म्यस्य च सत्त्वाच्छ्रौती र्णोपमालङ्कारः । अनुष्टुप् वृत्तम् ॥ १२ ॥

(चाणक्य के समीप जाकर) आर्य ! चन्द्रगुप्त प्रणाम करता है ।

चाणक्यः—वृषल । तुम्हारे सबप्रकार के आशीर्वाद सफलही हैं । इस लिये पूज्य मन्त्रिराक्षस को प्रणाम करो । क्यों कि ये तुम्हारे पिता के प्रधान मन्त्री है ।

राक्षसः—(मनही मन) इसने अन्त में सम्वन्ध जोड़ ही दिया ।

राजा—(राक्षस के समीप जाकर) आर्य ! मैं चन्द्रगुप्त आप को प्रणाम करता हूं ।

राक्षसः—(देखकर मन ही मन) अये ! यह चन्द्रगुप्त है । जो—

बाल्यावस्था ही में लोगों द्वारा किये गये अभ्युदयकी सम्भावनावाला राजकुमार क्रम से (धीरे-धीरे) हाथी के यूथाधिपतित्व प्राप्त करने की तरह राज्यको प्राप्त कर लिया ॥ १२ ॥

(जोर से) राजन् ! विजयी होओ ।

राजा—आर्य !—

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जगतः किं न विजितं मयेति प्रविचिन्त्यताम् ।
गुरौ षाड्गुण्यचिन्तायामार्ये चार्ये च जाग्रति ॥ १३ ॥

राक्षसः—(स्वगतम्) स्पृशति मां कौटिल्यशिष्यो भृत्यभावेन अथवा विनय एवैषः । चन्द्रगुप्तस्य मत्सरस्तु मे विपरीतं कलयति । सर्वथा स्थाने यशस्वी चाणक्यः । कुतः ?

द्रव्यं जिगीषुमधिगम्य जडात्मनोऽपि,
नेतुर्यशस्विनि पदे नियता प्रतिष्ठा ।

जगत इति । आर्ये पूज्ये गुरौ शिक्षके चाणक्ये आर्ये पूज्ये त्वयि च षड्गुणा एव षाड्गुण्यं (चतुर्वर्णादित्वात्स्वार्थे ष्यञ्) तस्य चिन्ता भावना तस्यां षाड्गुण्यचिन्तायां सन्धिविग्रहादिव्यापारविधानाऽविधानभावनायां जाग्रति उद्यते सति मयाऽऽत्मना चन्द्रगुप्तेनेत्यर्थः । जगतः (शेषे षष्ठी) संसारस्य किं न विजितम् अपितु सर्वमेव विजितमित्यर्थः। इति प्रविचिन्त्यताम् बुध्यताम् । सन्धिविग्रहादिषड्गुणकर्तव्याकर्त्तव्यविचारशीलस्यार्यद्वयस्य सत्त्वे जगदेव मे वशीभूतं जातमित्यवसेयमित्यर्थः । आर्यद्वयस्य सधर्मत्वोक्त्या तुल्ययोगिताऽलङ्कारः । एकस्याऽऽर्यस्य कार्यसाधकत्वे सत्यप्यन्यार्यस्याऽपि तत्करत्वात्समुच्चयालङ्कारः । आर्यद्वयकर्तृकषाड्गुण्यचिन्ताया जगद्विजयहेतुत्वाद्वाक्यार्थहेतुकं काव्यलिङ्गं मया जगतः किं न विजितमर्थात्सर्वमेव विजितमित्यन्यर्थावगत्याऽर्थापत्तिरलङ्कारश्चेत्येषामेकत्र नैरपेक्ष्येण स्थित्या संसृष्टिरलङ्कारः । अनुष्टुप् वृत्तम् ॥ १३ ॥

स्वगतमिति । स्वगतं मनोगतं यथा तथा ब्रवीति । कौटिल्यशिष्यश्चाणक्यशिष्यो मौर्य इत्यर्थः । मां राक्षसं भृत्यभावेन सेवकत्वेन स्पृशति मां भृत्यमवगच्छतीत्यर्थः । अथवा किम्वा चन्द्रगुप्तस्यमौर्यस्य एष विनय एव शिष्टतैव तु किन्तु मत्सरोऽन्यशुभद्वेषो मे मम विपरीतमन्यथा कलयति अवगमयति । चाणक्यः कौटिल्यः सर्वभावेन स्थाने युक्त एव यशस्वी कीर्त्तिमान् ।

द्रव्यमिति । द्रव्यं योग्यं जिगीषुं जयोद्यमवन्तं नृपमिति शेषः। अभिगम्य-

---

गुरु चाणक्य तथा आप के सन्धिविग्रहादि व्यापार में उद्यत रहने पर क्या मैंने संसार को नहीं जीता ? अर्थात् सब कुछ जीत लिया ॥ १३ ॥

राक्षसः—(मन ही मन) चाणक्य का शिष्य चन्द्रगुप्त मुझको सेवक समझता है। अथवा यह विनयमात्र है । चन्द्रगुप्त का मात्सर्य तो मुझे विपरीत ही बोधन कराता है । चाणक्य वास्तव में सबतरह से यशस्वी है । क्यों कि—

योग्य और जयोद्योगी राजा को पाकर मन्द बुद्धिवाला मन्त्री भी यशस्वी

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अद्रव्यमेत्यतु विविक्तनयोऽपि मन्त्री,
शीर्णाशयः पतति कूलजवृक्षवृत्त्या ॥ १४ ॥

चाणक्यः—अमात्यराक्षस ! अपीष्यते चन्दनदासस्य जीवितम् ?

राक्षसः—भो विष्णुगुप्त ! कुतः सन्देहः ?

चाणक्यः—अमात्यराक्षस ! अगृहीतशस्त्रेण भवताऽनुगृह्यते वृषल इत्यतः सन्देहः । तद्यदि सत्यमेव चन्दनदासस्य जीवितमिष्यते, ततो गृह्यतामिदं शस्त्रम् ।

प्राप्य जडो मन्द आत्मा धीर्यस्य स तथोक्तस्तस्य जडात्मनोऽपि मन्दधियोऽपि नेतुर्नायकस्य मन्त्रिणो यशस्विनि कीर्त्तिप्रापके पदे स्थाने प्रतिष्ठा कीर्त्तिप्राप्तिरित्यर्थः । नियतं निश्चितैव भवतीति क्रियाशेषः । तु किन्तु अद्रव्यम् अनुद्योगिनं नृपमिति शेषः । एत्य प्राप्य विविक्तो विशुद्धो नयो नीतिर्यस्य स विविक्तनयी विशुद्धनीतिशाल्यपि मन्त्री सचिवः शीर्णं उच्छिन्न आश्रयोऽवलम्बनं यस्य स शीर्णाश्रय उच्छिन्नावलम्बनः सन् कूलजवृक्षवृत्त्या तटस्थतरुनियमेन तीरजतरुरिव पतति कार्यसम्पादको न भवतीत्यर्थः । उच्छिन्नमूलस्तीरतरुर्यथा पतति स्थित्यात्मकार्यसाधको न भवति तथाऽनुद्योगिनृपाश्रितो नीतिशाली सचिवोऽपि कार्यसाधको नेत्यर्थः । उद्योगशालिनृपाश्रितमन्त्रिणो जयोऽनुद्योगशालिनृपाश्रितराक्षसस्य पराजय इति विशेषार्थप्रतीत्या प्रथमोऽप्रस्तुतप्रशंसाभेदः । एतन्मूलकसामान्यार्थेन कौटिल्यजयात्मकविशेषार्थसमर्थनादप्रस्तुतप्रशंसामूलोऽर्थान्तरन्यासः । जडात्मनोऽपि विविक्तनयोऽपीत्युभयत्र किमु तीक्ष्णबुद्धेः, किमु अविविक्तनय इत्येतद्रूपाऽन्यार्थोऽवगमादर्थापत्तिः । कूलजवृक्षवृत्त्येत्यतः कूलजवृक्ष इवेति बिम्बप्रतिबिम्बभावस्य प्रतीयमानत्वान्निदर्शनाऽलङ्कारश्चेत्येषां साङ्कर्यम् । वसन्ततिलकं वृत्तम् ॥ १४ ॥

अमात्येति । अमात्य राक्षस ! अगृहीतशस्त्रेणाऽनादत्ताऽऽयुधेन भवता

होता है । और अयोग्य तथा अनुद्योगी राजा को पाकर विशेष नीतिज्ञ भी मन्त्री आश्रयहीन होकर तटस्थ वृक्ष की तरह नीचे गिर पड़ता है ॥ १४ ॥

चाणक्यः—अमात्यराक्षस ! आप क्या चन्दनदास की प्राणरक्षा चाहते हैं ?

राक्षसः—विष्णुगुप्त ! इस में भी क्या सन्देह है ?

चाणक्यः—अमात्यराक्षस ! विना शस्त्रधारण किये ही आपने चन्द्रगुप्त के ऊपर दया की इस लिये सन्देह है । तब यदि सचमुच आप चन्दनदास की प्राणरक्षा चाहते हैं तो इस शस्त्र को ग्रहण कीजिये ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

राक्षसः—भो विष्णुगुप्त ! मा मैवम् । अयोग्या वयमेतस्य ग्रहणे, विशेषतस्त्वया गृहीतस्य शस्त्रस्य ।

चाणक्यः—अमात्यराक्षस ! योग्योऽहमयोग्यो भवान् !! इति कथमेतत् ? पश्य,—

अश्वैः सार्द्धमजस्रदत्तकविकाक्षामैरशून्यासनान्,
स्नानाहारविहारपानशयनस्वेच्छासुखैर्वर्जितान् ।
माहात्म्यादतिपौरुषस्य भवतो दृप्तारिदर्पच्छिदः,
पश्यैतान् परिकल्पनाव्यतिकरप्रोच्छूनवंशान् गजान् ॥ १५ ॥

त्वया वृषलो मौर्योऽनुगृह्यतेऽनुकम्प्यते इत्यतोऽस्माद्धेतोः सन्देहोऽनिर्णयः चन्दनदासजीवने इति शेषः । मन्त्रिग्राह्यायुधाऽग्रहणात्सन्देह इत्यर्थः । (एष राक्षसस्य मौर्यमन्त्रित्वसाधको यत्न इत्यवधेयम्) ।

अश्वैरिति । भो अमात्यराक्षस! दृप्ताश्च तेऽरयो दृप्तारयस्तेषां दर्पं छिनत्तीति दृप्तारिदर्पच्छिदस्तस्य दृप्ताऽरिदर्पच्छिदोऽभिमानवद्रिपुगर्वविनाशकस्य अतिपौरुषस्यातिशयपराक्रमशालिनो भवतस्तव माहात्म्यात् प्रभावात् अजस्रं दत्ता कविका येषां ते तथोक्तास्तैः अजस्रदत्तकविकैः अनवरतयोजितवल्गैः अत एव क्षामैः कृशैः अशून्यासनैः अनपनीतपर्याणैः अश्वैर्वाजिभिः, सार्द्धं सह, स्नानं चाहारश्च विहारश्च पानं च शयनं च तानि स्नानाहारविहारपानशयनानि तानि च तानि स्वेच्छासुखानि तैः स्नानाहारविहारपानशयनस्वेच्छासुखैः निमज्जनभोजनभ्रमणतृषावारणविश्रामात्मकयथेच्छाव्यापारैर्वर्जितान् रहितान्, परिकल्पनाया व्यतिकरः परिकल्पनाव्यतिकरस्तेन प्रोच्छूना वंशा येषां ते तथोक्तास्तान् परिकल्पनाव्यतिकरप्रोच्छूनवंशान् युद्ध सज्जविशेषसंयोगस्फीतमहत्पृष्ठास्थिभागान् एतानमून् हस्तिनः

राक्षसः—ऐसा मत कहिये, मत कहिये । मैं इस शस्त्र को धारण करने योग्य नहीं हूँ, उस में भी आप के द्वारा ग्रहण किये गये शस्त्र को !

चाणक्यः—अमात्यराक्षस ! मैं योग्य हूँ और आप अयोग्य हैं, इसको आपने किस तरह जाना । देखो—

अभिमानी शत्रुओं के अभिमान को दूर करनेवाले अत्यन्तपराक्रमी आपके प्रभाव से निरन्तर लगायी गयी तीखी लगाम के कारण बहुत ही दुबले और पर्याण से शोभित पृष्ठवाले घोड़ों के साथ स्नान—भोजन—भ्रमण—पान—शयनरूप इच्छानुकूल सुख से वञ्चित तथा पृष्ठासन के कसे रहने से उन्नत पृष्ठास्थिभागवाले इन हमारे हाथियों को देखिए ॥ १६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथवा किमनेन ? न खलु भवतः शस्त्रग्रहणमन्तरेण चन्दनदासस्य जीवितमस्ति ।

राक्षसः—स्वगतम् ।

नन्दस्नेहकणाः स्पृशन्ति हृदये, भृत्योऽस्मि तद्विद्विषां,
ये सिक्ताः स्वयमेव पाणिपयसा च्छेद्यास्त एव द्रुमाः ? ।
शस्त्रं मित्रशरीररक्षणकृते व्यापारणीयं मया,
कार्याणां गतयो विधेरपि न यान्त्यालोचनागोचरम् ॥ १६ ॥

पश्य निरीक्षस्व । भवत्पौरुषमहिम्नाऽस्मदीया गजाश्वादयो मुहूर्त्तमपि विश्रान्तिं न लभन्ते तस्य भवतो नायुधग्रहणायोग्यत्वमिति भावः (एतेनराक्षसपौरुषातिशयस्याऽभिव्यक्तिः) गजाश्वयोः प्रस्तुतयोरेकक्रियाऽभिसम्बन्धेन तुल्ययोगिताऽलङ्कारः शार्दूलविक्रीडितं वृत्तम् ॥ १५ ॥

साचिव्यमवश्यमङ्गीकार्यं भवतेति पक्षान्तरेणाऽभिदधाति—

अथवेति । किं बहुना क्लेशप्रदाऽधिकभाषणेन न प्रयोजनमित्यर्थः । भवतस्तव शस्त्रग्रहणमन्तरेण आयुधग्रहणम्विना चन्दनदासस्य भवत्सुहृदो जीवितंजीवनं मुक्तिरिति यावत् नास्ति न वर्तते ।

नन्दस्नेहकणा इति । नन्देषु स्नेहो नन्दस्नेहस्तस्य कणा नन्दस्नेहकणाः नन्दानुरागलेशाः हृदये चित्ते ममेति शेषः । स्पृशन्ति सम्बध्नन्ति,अहमिति कर्तृपदमध्याहार्यम् तेषां विद्विषस्तद्विद्विषस्तेषां तद्विद्विषां नन्दशत्रूणां मौर्यप्रभृतीनामित्यर्थः । भृत्योऽस्मि साचिव्यग्रहणोद्युक्त्या सेवकत्वं प्राप्तोऽस्मि ये द्रुमास्तरवो मलयकेतुप्रभृतिरूपा इत्यर्थः । स्वयमेव आत्मनैव मया राक्षसेनेत्यर्थः । पाणिपयसा करात्मकसलिलेन सिक्ताः परिपालिताः परिवर्द्धिता इति यावत् । ते एव द्रुमा मलयकेतुवृक्षाः कथं छेद्या विनाश्याः । मयाऽऽत्मना मित्रशरीररक्षणकृते चन्दनदा-

---

अथवा इससे क्या प्रयोजन, आपके शस्त्र ग्रहण किये विना चन्दनदास की प्राणरक्षा नहीं हो सकती ।

राक्षसः—(मन ही मन) ।

राजा नन्दका प्रेमसम्बन्ध हमारे हृदय में विद्यमान है, मैं उनके शत्रुओं का नौकर हूँ । जिन मलयकेतु आदि वृक्षों को मैंने अपनी ही सेवारूप जल के द्वारा पाला है, वे वृक्ष किसप्रकार नाश किये जायँ । मुझे मित्रकी शरीररक्षा के लिये शस्त्रधारण करना पड़ता है, भाग्य के कार्यों की गति विचार योग्य नहीं होती ॥ १६ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(प्रकाशम्) भो विष्णुगुप्त उपानय खड्गम । नमः सर्वकार्यप्रतिपत्तिहेतवे सुहृत्स्नेहाय । का गतिः ? एष सज्जोऽस्मि ।

चाणक्यः—(सहर्षं शस्त्रमर्पयित्वा) वृषल ! वृषल !! अमात्यराक्षसेनेदानीं गृहीतशस्त्रेणानुगृहीतः, दिष्ट्या वर्द्धते भवान् ।

राजा—आर्यप्रसाद एष चन्द्रगुप्तेनाऽनुभूयते ।

सरक्षणायशस्त्रं कौटिल्यप्रदत्तमायुधं व्यापारणीयं ग्राह्यम् । विधेर्भाग्यस्य कार्याणां कृत्यानां गतयः प्रकारा आलोचनागोचरं विवेकविषयं न यान्ति न गच्छन्ति । नन्दस्नेहस्मरणशीलस्याऽपि मे सुहृत्त्राणार्थं मौर्यसाचिव्यग्रहणात्तद्विद्वेषप्रसक्तौ दैवप्राबल्यस्य हेतुत्वाच्च कोऽपि मे दोष इति भावः । आद्यचरणे नन्दानुरागवति तद्रिपुभृत्यत्वसत्वादेकत्र नन्दानुरागवत्वतद्रिपुभृत्यरूपयोः (विरुद्धयोः) संघटनया विषमालङ्कारः ।

विरूपयोः संघटना या च तद्विषमं मतम् ।

इति दर्पणोक्तेः द्वितीयचरणे मलयकेतुप्रभृतौ द्रुमत्वारोपणस्य पाणौ पयस्त्वारोपणे हेतुत्वात्परम्परितरूपकालङ्कारः । अप्रस्तुतद्रुमच्छेदनोक्त्या प्रस्तुतात्मपक्षविरूपक्रियाप्रतीत्याऽप्रस्तुतप्रशंसाऽलङ्कारश्च । तृतीयचरणे राक्षसकर्तृकशस्त्रग्रहणे मित्रशरीररक्षणस्य निमित्तत्वात्पदार्थहेतुकं काव्यलिङ्गम् । चतुर्थचरणे एतत्प्रतिपाद्यसामान्यार्थेन पादत्रयगतविशेषार्थस्य समर्थनादर्थान्तरन्यासालङ्कारः । तुर्यपादगतालङ्कारेण पूर्वोक्तालङ्काराणां साङ्कर्यम् । शार्दूलविक्रीडितं वृत्तम् ॥ १६ ॥

प्रकाशमिति । सुस्पष्टं यथा तथा ब्रवीति । सर्वाणि च तानि कार्याणि सर्वकार्याणि तेषां प्रतिपत्तिः स्वीकारस्तस्या हेतुः कारणं तस्मै सर्वकार्यप्रतिपत्तिहेतवे सकलकृत्यस्वीकारकारणाय सुहृदां स्नेहः सुहृत्स्नेहस्तस्मै सुहृत्स्नेहाय मित्रानुरागाय नमः मित्रस्नेहवशात्सर्वं भवदुक्तकार्यं कर्त्तुमुद्यतोऽस्मीति भावः एषोऽहं सज्जोऽस्मि शस्त्रमादातुमिति शेषः । (प्राप्तकार्याऽनुमोदनमाभाषणमङ्गमिदम्) ।

(जोर से) विष्णुगुप्त (चाणक्य) ! शस्त्र लाओ । सब कार्यों की सिद्धि के हेतुरूप मित्रस्नेह को नमस्कार है । क्या गति है ! मैं तयार हूं ।

चाणक्यः—(हर्ष से शस्त्र देकर) । वृषल ! वृषल !! अब आप शस्त्रधारी अमात्यराक्षस के दयापात्र बन गये । बड़े हर्ष की बात है, अब आप की सब तरह से वृद्धि ही होगी ।

राजा—मैं चन्द्रगुप्त आपका अनुग्रहीत हूं ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

(प्रविश्य पुरुषः) जेदु जेदु अज्जो । अज्ज ! वेसो क्खु भद्दभट-भाउराअणप्पमुहेहिं संजमिअकलचलणो मलअकेदू प्पड़िहारभूमिए अवत्थापिदो, ता एव्वं सुणिअ एत्थ अज्जो प्पमाणं त्ति । [जयति जयत्यार्यः । आर्य ! एष खलु भद्रभटभागुरायणप्रमुखैः संयमितकरचरणो मलयकेतुः प्रतीहारभूमावुपस्थापितः, तदिदं श्रुत्वाऽत्रार्यः प्रमाणमिति]

चाणक्यः—आं श्रुतम् । भद्र ! निवेद्यतामात्यराक्षसाय, अयमिदानीं राजकार्यं करिष्यति ।

राक्षसः—(स्वगतम्) कथं दासीकृत्येदानीं विज्ञापनाय मां मुखरीकरोति कौटिल्यः ! का गतिः ? (प्रकाशम्) राजन् चन्द्रगुप्त ! विदितमेव यथा वयं मलयकेतौ किञ्चित् कालान्तरमुषिताः, तत् परि

आर्य्यप्रसाद इति । चन्द्रगुप्तेन मया एषोऽयम् आर्यप्रसादःआर्यस्य पूज्यस्य भवतः प्रसादोऽनुग्रहोऽनुभूयते प्राप्यते । भवदनुग्रहणैव लब्धमेतत्सर्वंम्मयेति भावः । (लब्धस्थिरीकरणं कृतिर्नामाऽङ्गमेतत्) ।

जयतीति । आर्यो जयति सर्वोत्कर्षेण वर्तताम् (वीप्सायां द्विरुक्तिः) भद्रभटप्रभृतिप्रधानैः सैन्यैरित्यर्थः । करौ च चरणौ च करचरणं (प्राण्यङ्गत्वादेकवद्भावः) संयमितं करचरणं यस्य स संयमितकरचरणः बद्धहस्तपादो मलयकेतुः पर्वतकपुत्रः प्रतीहारभूमौ द्वारदेशेऽवस्थापितः आनीतः अस्तीति शेषः ।

भद्रेति । भद्र कल्याणिन् ! अमात्यराक्षसाय राक्षसनाम्ने मन्त्रिणे निवेद्यतां विज्ञाप्यताम् अयं राक्षसः इदानीं साम्प्रतं राजकार्यं निरीक्षणाद्यात्मकं करिष्यति । (इष्टकार्यदर्शनं पूर्वभावो नामाङ्गमिदम्) ।

स्वगतमिति । अश्राव्यं यथा तथा ब्रवीति । न दासोऽदासस्तं दासं कृत्वेति दासीकृत्य भृत्यं विधाय । न मुखरोऽमुखरस्तं मुखरं करोतीति मुखरीकरोति वक्तारं करोतीत्यर्थः । यथा भृत्यं राजनिकटे विज्ञप्तुमादिशति तथा चन्द्रगुप्तनिकटे संयमितकरचरणस्य मलयकेतोर्द्वारदेशेऽवस्थापनात्मकं कार्यं निवेदितुं मामप्यादिशती-

---

(पुरुष प्रवेश कर) आर्य की जय हो। आर्य ! भद्रभट-भागुरायण प्रभृति दूतों द्वारा बँधा हुआ हाथ पैरवाला मलयकेतु दरवाजे पर लाया गया है, इसको आप देखें ।

चाणक्यः—हाँ सुना । भद्र ! जो कहना हो अमात्यराक्षस से कहो, अब ये ही राजकार्य करेंगे ।

राक्षसः—(मन ही मन) चाणक्य मुझको नौकर बनाकर क्या कहलाना चाहता है ? उपाय ही क्या है ! (जोरसे) राजन् चन्द्रगुप्त ! आपको यह विदित ही है

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रक्ष्यन्तामस्य प्राणाः ।

राजा—(चाणक्यमुखमवलोकयति)

चाणक्यः—वृषल ! प्रतिमानयितव्योऽयममात्यराक्षसस्य प्रथमः प्रणयः । (पुरुषमवलोक्य) भद्र ! अस्मद्वचनादुच्यन्तां भद्रभटप्रभृतयः, अमात्यराक्षसविज्ञापितो देवश्चन्द्रगुप्तः प्रयच्छति मलयकेतवे पित्र्यमेव विषयम्; अतो गच्छन्तु भवन्तः सहानेन, प्रतिष्ठिते चास्मिन् पुनरागन्तव्यम् ।

पुरुषः—जं अज्जो आणवेदित्ति । [यदार्य आज्ञापयतीति]

चाणक्यः—तिष्ठ तावत्, भद्र ! भद्र ! एवमपरमुच्यतां विजयपा-

त्यर्थः । विदितमेव तु त्वया ज्ञातमेवाऽस्तीत्यर्थः (ते इति क्तस्य च वर्तमाने इत्यनेन कर्तरि षष्ठी) मलयकेतौ पर्वतकपुत्रे किञ्चित्कालं यावत् उषिताः स्थिताः आधारे सप्तमीविधानात्तस्यात्राऽभावान्न सप्तमीति नाऽऽशङ्क्यम्, आश्रयभूतमलयकेतोर्निवासक्रियाऽऽधारत्वेन विवक्षया तदुपपत्तेः ।

प्रतिमानयितव्य इति । अमात्यराक्षसस्य प्रथमः प्रणयः आद्यं विज्ञापनं प्रतिमानयितव्यः स्वीकर्त्तव्यः । शत्रुशेषोपेक्षणस्याऽनर्थहेतुत्वेऽपि मन्त्रित्वग्रहणाद्योऽनुरोधोऽभ्युपेयः भद्र ! अस्मद्वचनान्मदुक्त्या भद्रभटप्रमुखा भद्रभटादयः उच्यन्तामभिधीयन्ताम्, यथा यत् अमात्यराक्षसविज्ञापितो मन्त्रिराक्षसप्रार्थितो देवो राजा चन्द्रगुप्तो मौर्यो मलयकेतवे पर्वतेश्वरपुत्राय पित्र्यमेव विषयम् पितुरागतमेव राज्यं प्रयच्छति ददाति । स्वयम् तथाऽपकुर्वतोऽपि राक्षसस्य स्वस्मिन्नेवमुपकारित्वेन मलयकेतुना तदुपकारशीलत्वज्ञानायाऽमात्यराक्षसविज्ञापित इति विशेषणम् ।

कि हम लोग मलयकेतु के निकट कुछ दिन रहे हैं, इसलिये इसका प्राणरक्षा करो ।

राजा—(चाणक्य के मुखको देखता है) ।

चाणक्यः—वृषल ! अमात्यराक्षसकी यह पहिली प्रार्थना मानने योग्य है । (पुरुष को देखकर) भद्र ! हमारे कहे अनुसार भद्रभट प्रभृति दूतों से कहो कि अमात्यराक्षस की प्रार्थना से राजा चन्द्रगुप्त मलयकेतु को उसके पिता का राज्य देते हैं, इसलिये आप लोग उनके साथ जाइये, उनके राजसिंहासन पर बैठने के बाद फिर आइयेगा ।

पुरुषः—आपकी जो आज्ञा ।

चाणक्यः—भद्र ! भद्र ! ठहरो, इसी प्रकार विजयपाल और दुर्गपाल नाम के

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लो दुर्गपालश्च, अमात्यराक्षसस्य गृहीतशस्त्रस्य प्रीत्या देवश्चन्द्रगुप्तः समाज्ञापयति, एष तावच्छ्रेष्ठी चन्दनदासः पृथिव्यां सर्वेषु नगरेषु श्रेष्ठिपदमारोप्यतामिति ।

पुरुषः—जं अज्जो आणवेदि । [यदार्य आज्ञापयति]

(इति निष्क्रान्तः)

चाणक्यः—भो राजन् चन्द्रगुप्त ! किं ते भूयः प्रियमुपकरोमि ?

राजा—किमतः परं प्रियमस्ति ?—

राक्षसेन समं मैत्री, राज्ये चारोपिता वयम् ।
नन्दाश्चोन्मूलिताः सर्वे, किं कर्त्तव्यमतः परम् ? ॥ १७ ॥

चाणक्यः—विजये ! उच्यतां दुर्गपालो विजयपालश्च, अमात्यराक्षसपरिग्रहेण प्रीतो देवश्चन्द्रगुप्तः समाज्ञापयति, विना हस्त्यश्वं

भोराजन्निति । ते तव भूयः पुनः किं प्रियं करोमि किमिष्टं सम्पादयामि । सकलनन्दवंशीयोन्मूलनान्मौर्यराज्यश्रीस्थैर्यसम्पादनेनाऽयुक्तवृषलपदाभिधानमपहाय राजन्नित्युक्तिः । मलयकेतुराक्षसनिग्रहसंग्रहात्मककार्यादधिकं किमिष्टं कार्यं सम्पादयामीत्यर्थः ।

राक्षसेनेति । राक्षसेन मन्त्रिराक्षसेन सह सार्द्धं मैत्री सुहृत्त्वं जातेति शेषः । वयञ्च राज्ये आधिपत्ये आरोपिताः स्थिरीकृताः । सर्वे नन्दाश्च नन्दसंज्ञका राजानश्च उन्मूलिता उच्छिन्नाः अतः परमेतदुत्तरं किं विधेयम् ।

समं स्यादानुरूप्येण श्लाघा योग्यस्य वस्तुनः ।

इति दर्पणोक्त्याऽत्र समनामाऽलङ्कारः । अनुष्टुप् वृत्तम् ॥ १७ ॥

दूतों से कहो कि शस्त्रधारण करने वाले मन्त्रिराक्षस को प्रसन्न करने के लिए राजा चन्द्रगुप्त आज्ञा देते हैं कि श्रेष्ठी चन्दनदास पृथिवी के सब नगरों में श्रेष्ठ माने जायें।

पुरुषः—आपकी जो आज्ञा ।

(चला जाता है)

चाणक्यः—हे राजन् चन्द्रगुप्त ! अब मैं आपका और कौनसा उपकार करूँ ?

राजा—इससे अधिक प्रिय क्या है ?

अमात्य राक्षस के साथ मैत्री हुई । मैं निश्चतरूपसे राज्य का अधिपति बनादिया गया । नन्द नामके सब राजा मार डाले गये, इससे विशेष अब क्या करना है १७

चाणक्यः—विजये ! विजयपाल और दुर्गपाल से कहो कि मन्त्रिराक्षस के वशीभूत होने से प्रसन्न राजा चन्द्रगुप्त आज्ञा देते हैं कि हाथी-घोड़ो को छोड़ कर सब

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

क्रियतां सर्वबन्धमोक्ष इति अथवा, अमात्यराक्षसे नेतरि किं हस्त्यश्वेन प्रयोजनम् ? तदिदानीम् ,—

सह वाहनहस्तिभ्यां मुच्यतां सर्वबन्धनम् ।
मया पूर्णप्रतिज्ञेन केवलं बध्यते शिखा ॥ १८ ॥

(इति शिखां बध्नाति)

प्रतीहारी—जं अज्जो आणवेदि । [यदार्य आज्ञापयति]

(इति निष्क्रान्तः)

चाणक्यः—अमात्यराक्षस! तदुच्यतां, किं ते भूयः प्रियमुपकरोमि?

राक्षसः-किमतः परमपि प्रियमस्ति? यदि न परितोषस्तदिदमस्तु-भरतवाक्यम् ।

वाराहीमात्मयोनेस्तनुमतनुबलामास्थितस्यानुरूपां,
यस्य प्राग्दन्तकोटिं प्रलयपरिगता शिश्रिये भूतधात्री ।

सहेति । वाहनहस्तिभ्यामश्वहस्तिभ्यां सह सार्द्धं सर्वबन्धनं सर्वेषां संयमनं मुच्यताम् । पूर्णप्रतिज्ञेन सफलप्रतिश्रुतिना मया केवलं शिखा बध्यते । नन्दोन्मूलनं यावत् शिखामोचनस्य प्रतिज्ञातत्वात्साम्प्रतं प्रतिज्ञापूर्त्या तद्बन्धनमुचितमेवेति भावः । एकस्यामेव शिखायां विरूपयोर्बन्धनमोचनयोः संघटनयाऽत्र विषमाऽलंकारः । अनुष्टुप् वृत्तम् ॥ १८ ॥

वाराहीमिति । प्रलयेनोपप्लुता प्रलयोपप्लुता कल्पक्षयपरिगता भूतधात्री पृथ्वी प्राक् कल्पारम्भे अतनुबलां प्रचुरबलवतीम् अनुरूपां योग्यां वाराहीं शौकरीं तनुं शरीरमास्थितस्याऽऽश्रितस्य यस्यात्मयोनेः वराहरूपिणः श्रीविष्णोः दन्तकोटिं दन्ताग्रावयवं शिश्रिये आश्रिता । अधुना सम्प्रति म्लेच्छैर्यवनैरुद्वीज्यमाना सम्पी-

---

बँधेहुए मनुष्यों (कैदियों) को छोड़ दो अथवा मन्त्रिराक्षस के राज्यकार्याधिकारी रहने पर हाथी-घोड़ों से क्या प्रयोजन ! इसलिये अब—

हाथी-घोड़ों के साथ बँधेहुए सब लोगों को छोड़ दो । प्रतिज्ञा पूर्ण होने से मैं केवल अपनी शिखा को बांधता हूं ॥ (यह कहकर शिखाको बांधता है) ।

प्रतीहारी—आर्य की जो आज्ञा । (यह कहकर चला जाता है) ।

चाणक्यः—अमात्यराक्षस! अब आप कहिये कि आपका क्या प्रिय कार्य करूं ।

राक्षसः—इससे बढ़कर दूसरा प्रिय कार्य क्या होसकता है ? यदि इतने से सन्तोष न हो तब यह हो कि—

कल्पान्त में नीचे गिरी हुई तथा कल्पादिकाल में अधिकबलवाली और योग्य वराहशरीरको धारण किये जिन वराहरूपधारी श्रीविष्णुभगवान् के दन्ताग्रभाग का

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

म्लेच्छैरुद्वेज्यमाना भुजयुगमधुना पीवरं राजमूर्त्तेः,
स श्रीमद्बन्धुभृत्यश्चिरमवतु महीं पार्थिवश्चन्द्रगुप्तः ॥ १९ ॥
(इति निष्क्रान्ताः सर्वे)

इति मुद्राराक्षसे सप्तमोऽङ्कः ॥ ७ ॥

ऽद्यमाना सती राजमूर्तेः नृपाकृतेः चन्द्रगुप्तरूपिण इति यावत् । श्रीविष्णोः भुजयुगं बाहुयुगलं संश्रिता समवलम्बिता स श्रीमद्बन्धुभृत्यः लक्ष्मीयुक्तानुचरः चन्द्रगुप्तः पार्थिवो राजा चिरं बहुकालं यावत् महीं पृथ्वीमवतु रक्षतु । चन्द्रगुप्तस्य भगवता श्रीविष्णुना भेदेऽप्यभेदारोपादभेदरूपकमलङ्कारः । अभेदेनाऽध्यवसायादतिशयोक्तिर्वा । ग्रन्थादौ ग्रन्थमध्ये ग्रन्थान्ते च मङ्गलविधानस्य शिष्टाचारात् प्रकृते आदौ धन्या केयमिति, मध्ये आकाशं काशपुष्पमिति, अन्ते वाराहीमिति । मङ्गलत्रयं कविना कृतमित्यवधेयम् । 'नृपदेशादिशान्तिस्तु प्रशस्तिरभिधीयते' इति दर्पणोक्त्या प्रशस्तिर्नाम निर्वहणशेषाऽङ्गं प्रदर्शितम् ॥ १९ ॥

इतीति । इतीत्थं प्रस्तुतविषयं समाप्येत्यर्थः । सर्वे नटा निष्क्रान्ताः रङ्गशालातो बहिर्गता इत्यर्थः ।

इति ठक्कुरोपनामक श्रीकनकलालशर्ममैथिलेन विरचितायां
मुद्राराक्षसभावबोधिनीव्याख्यायां सप्तमोऽङ्कः ।

मुनिमुनिनवचन्द्रैः सम्मिते वैक्रमाब्दे सितविजयदशम्यामाश्विने भार्गवेऽह्नि ।
कृतिरतिविशदा मे बोधिनी भावपूर्वा गिरिपतितनुजेशाऽनुग्रहात्पूर्त्तिमापत् ॥ १ ॥
श्रीमन्महेशजयदेवगुरुद्वयस्य, भक्त्या गुरोश्च मधुसूदनमिश्रनाम्नः ।
श्रीलस्य पादकमलानि निधाय चित्ते श्रीस्वर्ण(कनक)लालविदुषा रचिता समाप्ता ॥२॥

श्रीसान्नपूर्णविश्वनाथार्पणम् ।

अवलम्बन करती हुई पृथिवी ने सम्प्रति यवनों से पाडित होकर जिन राजा चन्द्रगुप्तरूपी श्रीविष्णुभगवान् की दोनों मोटी भुजाओं का अवलम्बन किया है, वह लक्ष्मीयुक्त अनुचरवाला राजा चन्द्रगुप्त चिरकाल पर्यन्त पृथ्वी की रक्षा करें ॥ १९ ॥

(यह कहकर सब चले जाते हैं)।

इति ठक्कुरोपनामक श्रीकनकलालशर्मविरचितायां मुद्राराक्षसनाटकस्याऽऽशुबोधिनीव्याख्यायां सप्तमोऽङ्कः समाप्तः ।

समाप्तश्चायं ग्रन्थः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नूतन पुंसवनी टीका सहित—

कुमारसम्भव महाकाव्य

यह काव्य सर्वत्र परीक्षाओं में निर्द्धारित है, इस काव्य की पुंसवनी टीका के टीकाकार—गवर्नमेंट संस्कृत कालेज बनारस के साहित्यशास्त्राध्यापक पण्डित श्रीगङ्गाधरशास्त्री भारद्वाज जी हैं। आज तक इतनी विस्तृत सरल व्याख्या कहीं न छपी थी। इस टीका में विशेषता यह है कि प्रत्येक श्लोक का १ अवतरण सहित दण्डान्वय प्रदर्शन, २ परीक्षोपयोगिनीव्याख्या, ३ विग्रह, व्याकरण, कोश, अलङ्कार, छन्द, प्रमाणप्रदर्शन, मल्लिनाथादि प्रदर्शित दोषोद्धार व्युत्पत्ति, ४ संस्कृत में भावार्थ ५ भाषा के सङ्क्षिप्त पदों के द्वारा श्लोकाभिप्राय प्रदर्शन ६ हिन्दी में सरल भावार्थ ७ प्रत्येक सर्ग की कथा का संक्षेप में संग्रह ८ विशिष्ट भूमिका इत्यादि लोकोत्तरता देखने ही से ज्ञात हो सकती है। यह पुस्तक प्रत्येक संस्कृत प्रेमियों के लिये तथा पुस्तकालयों में संग्रह करने के योग्य है। मूल्य १॥) मात्र

भट्टिकाव्यम् १—६ सर्गपर्यन्तम्।

चन्द्रकला-विद्योतिना-संस्कृत-हिन्दीटीकाद्वयोपेतम्।

यह निःसङ्कोच कहा जा सकता है कि आज तक कोई भी इस ग्रन्थ की ऐसी सरल टीका नहीं थी जिससे विद्यार्थियों को परीक्षा में विशेष सहायता मिले तथा व्याकरण का भी पूरा ज्ञान हो। इसलिये हमारे योग्य सम्पादक ने विद्यार्थियों की कठिनाई को दूर करने के लिये इस संस्करण में अन्वय, व्याख्या, प्रयोगपरिवर्त्तन, भावार्थ, और व्युत्पत्ति (कोश, अलङ्कार, छन्दोलक्षण) आदि विषयों से पद-पदार्थों को स्पष्ट करते हुये यत्र तत्र जयमङ्गल, मल्लिनाथ, और भरतमल्लिक की टीकाओं की आलोचना के साथ पाठभेद भी सुन्दर रूप से दर्शा दिया है। साथ २ इसकी "विद्योतिनी" भाषाटीका तो अपने नाम के अनुकूल सोने में सुगन्धि पैदा कर दी है। इतना ही नहीं इन विशेषताओं के अतिरिक्त परिशिष्ट में श्लोकानुगत धातु-रूप तथा प्रत्येक सगके संक्षिप्तरूपेण कथासार भी दे दिये गये हैं २)

प्राप्तिस्थानम्—श्रीहरिकृष्णनिबन्धभवनम्, बनारस सिटी।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi